VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN
IN DEUTSCHLAND · SUPPLEMENTBAND 9,2

VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN IN DEUTSCHLAND

IM EINVERNEHMEN MIT DER DEUTSCHEN MORGENLÄNDISCHEN GESELLSCHAFT HERAUSGEGEBEN VON

WOLFGANG VOIGT

SUPPLEMENTBAND 9,2

# KAUṢĪTAKIBRĀHMAṆA

VYĀKHYĀ OF UDAYA

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

FRANZ STEINER VERLAG GMBH · WIESBADEN

1976

# KAUṢĪTAKIBRĀHMAṆA

2

VYĀKHYĀ

OF

UDAYA

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

FRANZ STEINER VERLAG GMBH · WIESBADEN

1976

**CIP-Kurztitelaufnahme der Deutschen Bibliothek**

**Verzeichnis der orientalischen Handschriften in Deutschland**
im Einvernehmen mit d. Dt. Morgenländ. Ges. hrsg. von Wolfgang Voigt. – Wiesbaden: Steiner

NE: Voigt, Wolfgang [Hrsg.]

Suppl.-Bd. 9. → Kauṣītakibrāhmana

*

**[Kauṣītakibrāhmana]**
Kauṣītakibrāhmana / hrsg. von E. R. Sreekrishna Sarma. – Wiesbaden: Steiner.

NE: Sarma, E. R. Sreekrishna [Hrsg.]

2. Vyākhyā of Udaya. – 1. Aufl. – 1976.

(Verzeichnis der orientalischen Handschriften in Deutschland; Suppl.-Bd. 9)
ISBN 3-515-01904-9

All rights reserved

This book is copyright under the Berne Convention. Apart from any fair dealing for the purposes of private study, research, criticism or review, as permitted under the Copyright Act, 1911, no portion may be reproduced by any process without written permission. Enquiry should be made to the Publishers. Printed with the financial aid of the German Research Association (DFG). © 1976 Franz Steiner Verlag GmbH., Wiesbaden

Printed in Germany

TABLE OF CONTENTS

Addendum and Corrigenda to vol. 1 ⟨**KB**⟩ VI

Preface VII

The Kausītakibrāhmaṇavyākhyā of Udaya ⟨**KBV**⟩

KBV, Vol. 9,2 – 1–14 1

KBV, Vol. 9,3 – 15–30 343

Appendices 683

## ADDENDUM AND CORRIGENDA TO VOL. 1 ⟨**KB**⟩

C in the footnotes stands for the Commentary on KB by Udaya.

## CORRIGENDA

| | |
|---|---|
| I, 1, २ | °मूचुः |
| I, 1, footnote 2 | सतनूः |
| I, 5, ६ | मवत्या पूर्वा° |
| VII, 12, २० | मयोभुव |
| VIII, 12, १५ | अनन्तर्हितो |
| XI, 8, २३ | भ्रेषोऽन्वेतोः |
| XI, 9, ११ | योगमा वेद |
| XII, 2, १४ | यदास्वैषी° |
| XIII, 5, ७ | युक्ता |
| XIX, 2, १३ | महाव्रती° |
| XIX, 3, ८ | पुरोळाश° |
| XXVI, 12, footnote 2–2 | ऐतीव (omit वा) |

# PREFACE

In the preface to my edition of the Kauṣītakibrāhmaṇa, Wiesbaden 1968, I had promised to bring out an edition of the learned commentary by Udaya on the Brāhmaṇa text. I am happy that I could fulfil my promise at least now.

This edition of the commentary is based on the 8 manuscripts described below (1–4 as microfilm copies, and 5 as transcript available at the Staatsbibliothek, Berlin):

1. Palm-leaf manuscript belonging to the Adyar Library (designated A) comprising the commentary on chapters I to XXX with some lacunae here and there. The manuscript is not dated but seems to be about 400 years old as suggested by the condition of the leaves and the mode of writing. The other particulars are: size 52.5x6.2 cm; folios 260; lines 12 per page; letters 92 per line; script Malayāḷam.

2. Palm-leaf manuscript belonging to Taikkāṭṭu Mana, Śukapuram, Kerala, in three codices (designated T). This contains the commentary on chapters I to XXX,6. The particulars of the manuscript codex-wise are given below:

Volume I: size 30x5 cm; folios 148; lines 9–10 per page; letters 40 per line; script Malayāḷam; na, nna, nya method of numbering the folios. The volume contains the commentary on chapters I to VII,7, with a few gaps here and there.

Volume II: size 35x5 cm; folios 150; lines 10 per page; letters 48 per line; method of numbering and the script are the same as in volume I. This contains the commentary from VII,11 to the end of chapter XVII.

Volume III: size 32x5 cm; folios 176; lines 10 per page; letters 50 per line; script and the method of numbering are the same as above. This contains the commentary on chapters XVIII,5 to XXX,3. Date of copying is given as Kollam 1044 (the numbers are not very clear) Meṭamāsam 24th, Tuesday, Tṛtīyā, which roughly corresponds to April 1869 A.D. Another fly-leaf gives the information that in (the year) 43 (i.e., 1868 A.D.) the transcript was completed on the 13th of Tulā, and was brought to the Maṭham on the same day and four Rupees were paid.

3. Palm-leaf manuscript belonging to Cerummukku Vaidikan Tiruvegappura, Palghat District, Kerala (designated C), containing the commentary on chapters I to VII,7. The other details are as given below:

Size 25x4.5 cm; folios 149; lines 9 per page; letters 45 per line; script Malayāḷam; folios numbered with Malayāḷam numerals.

4. Palm-leaf manuscript belonging to Varikkāśśeri Mana, Ottappalam, Kerala (designated V), containing the commentary on chapters VII to XXI,4. The other details are: size 32x5 cm; folios 188; lines 9–10 per page; letters 46 per

line; script Malayāḷam; the folios are numbered according to the na, nna, nya method. This manuscript is not dated, but does not seem to be older than one hundred and twenty years.

5. Palm-leaf manuscript belonging to Brahmasvam Maṭham, Trichur, (designated **B**), containing the commentary on chapters XIX,2 to XXVII, 5. Other details are as follows: size 33x5 cm; folios 79; lines 10 per page; letters 58 per line; script Malayāḷam. It is not dated, but seems to be 350 years old.

6. Paper manuscript belonging to the Madras Government Oriental Manuscripts Library (designated **M**), containing the commentary on chapters I to XXX,6. This manuscript is bound in three volumes which are described under numbers R 3650, R 3779 Vol. I, and R 3779 Vol. II, respectively, in the Triennial Catalogue of the Madras Government Oriental Manuscripts Library (Vol. IV, Part 1, Sanskrit (C), pp. 5401 and 5589). According to the information given in the manuscript this is a transcript made from a palm-leaf manuscript belonging to the Varikkāśśeri Mana during the years 1921–22; No. R 3779 Vol. I is a copy of the palm-leaf manuscript designated **V** above. The original palm-leaf of the other two parts were not available for me from Varikkāśśeri Mana as they were lent to the Oriental Manuscripts Library of Baroda according to the owners. It is interesting to note that there is a remark by the original scribe of the palm-leaf manuscript recorded on page 210 of R 3779 Vol. II. This remark in Malayāḷam language is translated below:

"Some portion is not seen here. A gap is seen. The ending of the *Khaṇḍa* is missing. How much more is there cannot be decided. I have not indicated the hiatus. The gap seems to be of 5 to 6 lines missing on the page. Afterwards the number is correct."

7. Paper manuscript belonging to the Madras Government Oriental Manuscripts Library No. R 4316 described in the Triennial Catalogue, Vol. V, Part 1, Sanskrit (B), p. 6348. This is a transcript of the manuscript designated **C** above made during 1923–24. This manuscript is of little value for the edition as I had the original itself with me.

8. Paper manuscript in 4 volumes in Devanāgarī script belonging to the Adyar Library. This is a copy of No. R 3650 and R 3779 volumes I and II of the Madras Government Oriental Manuscripts Library described above and therefore of the original palm-leaf belonging to Varikkāśśeri Mana referred to above. It is described under No. 60 on p. 27 of the Descriptive Catalogue of the Sanskrit Manuscripts in the Adyar Library, Vedic volume. As this Manuscript is of little value because of its being a copy of a copy, it was consulted only when there was any doubt regarding some letters which were not legible in the original palm-leaf or in the Madras Library manuscripts.

Evaluation of the Manuscript Material: From the above description of the manuscripts it can be seen that in fact there are only two manuscripts of value for the purpose of this edition. The Adyar palm-leaf manuscript **A** is the only complete, the oldest and most reliable one. The other manuscript is that

which is designated **T**, which, though not complete and not very old, varies very little in the readings from **A** in the available portion. The manuscripts designated **V** and **M** are virtually copies of **T**; so is the manuscript **C**. The manuscript **B** goes with **A**, though the former contains only nine chapters as shown above. **T** and **V** have many scribal errors, whereas **A** and **B** have less of these. However there are no serious variations in the readings as represented by those manuscripts.

Gaps in the commentary are noticed in all manuscripts in the following cases: (1) In chapter XXVI the commentary for *Khaṇḍa* 2 is not available. (2) In chapter XXVII from the twentieth *vākya* of the second *Khaṇḍa* upto the tenth *vākya* of the third *Khaṇḍa* the commentary is missing. (3) In chapter XXVIII the commentary breaks off on the third *vākya* of seventh *Khaṇḍa*. Therefore there is no commentary available for the rest of the chapter, i.e., fifteen *vākyas* in the seventh *Khaṇḍa* and twenty *vākyas* in the eighth. Only manuscript **A** has the commentary from XXX,6 upto the end. Even **M** breaks off in XXX,6.

Apart from these major gaps, lacunae of some letters are also noticed in some instances. (Vide: pp. 31, 72, 177, 247, 366, 627, 628, 637, 673-681).

Another curious thing is that no commentary is available on the text comprising the first four *Khaṇḍas* of the eighteenth chapter, although all the manuscripts of the KB text and the oral tradition preserved in Kerala have these four *Khaṇḍas*. After giving a metrical account of the Somayāga with its *prakṛtis* and *vikṛtis*, Udaya begins with *Hāriyojana*, with which the fifth *Khaṇḍa* begins. The topics dealt with in these four *Khaṇḍas* are the *Āśvinaśastra* and *Paridhānamīmāṃsā*. We do not know why he did not take notice of these *Khaṇḍas*.

UDAYA'S COMMENTARY: Udaya's commentary generally follows the *Brāhmaṇa* text of the Kerala tradition which was presented in my edition. But he mentions a few alternative readings, some accepted by him and some as followed by others. All these variants are collected and given at the end of this edition as Appendix IV. An important textual variation is the existence of two different readings of the text for the *Khaṇḍas* 4 to 7 in the twentyfifth chapter. Udaya comments separately on both the readings. He also gives the reason for doing so. According to him from time immemorial variant readings of some of the words and sentences in the Vedic texts have been followed by different students and there is no criterion by which to prefer one to the other. In the case of classical works by authors, these variations may be attributed to individual bias or carelessness; but in the case of Vedic texts which are considered to be without an author, this assumption cannot hold good. In several places where he follows readings other than those found in the text of my edition, he mentions the readings followed in the text as variants and states that if we accept the latter the syntax becomes easier. Here we get a suggestion that the readings which have come to us in this tradition and presented in my edition are of a later origin, probably suggested by the Yājñikas, in course of time, to make the text easier.

The commentary of Udaya is elaborate, clear, lucid and comprehensive. He explains the meaning of each word and sentence and clarifies the ideas by profusely quoting from other Vedic texts. But his main objective is to draw a clear picture of the entire intricate procedure of the sacrificial performance. He never fails to elucidate the connection between the earlier and later acts involved in a given context. As Keith (*Rig-Veda Brāhmaṇas*, Introduction, p. 22, Harward, 1920) has already pointed out, in contrast to the Aitareya Brāhmaṇa, the KB is complete, systematic and orderly. This aspect is stressed by Udaya at the outset of his commentary. He says that Aitareya aims at elaborating the *Gavāmayanasattra* and the other sacrifices are referred to therein only to serve this main purpose, whereas this Brāhmaṇa as taught by Kauṣītaki aims at giving the entire picture of the manifold sacrificial procedure with order and clarity. In an *iṣṭi* or *yajña* when any act is mentioned, Udaya immediately clarifies its connection with the other acts and shows the position and order of each of them in the particular sacrifice. Besides, every now and then he reminds the reader of the order of acts in the whole sacrifice and helps him not to lose the thread of the sacrificial procedure. In this aspect, Udaya's commentary stands out with dignity and clarity that are remarkable.

Udaya's style is both dignified and lucid. He writes prose and verse with equal ease. After describing the procedure of a sacrifice, he sums up his discussions more often in simple verses. The entire commentary on chapter X is in the form of verses and they do have the same lucidity as his prose passages have. This is the unique feature of Udaya's commentary in comparison with the commentaries of Sāyaṇa and others, excepting that of Ṣaḍguruśiṣya on Vedic texts.

A few of the available *Brāhmaṇas* do not have commentaries. Sāyaṇa has commented upon *Aitareya* of the Ṛgveda, *Taittirīya* of the Kṛṣṇayajurveda, *Śatapatha* of the Śuklayajurveda and *Pañcaviṃśa* of the Kauthuma-śākhā of the Sāma-Veda. Although there are commentaries on the minor Brāhmaṇa texts of the Sāma-Veda, like *Sāmavidhāna Brāhmaṇa* etc., ascribed to Sāyaṇa, their authorship is dubious. Of the Ṛgveda Brāhmaṇas, Aitareya has at least three commentaries, that of Govindasvāmin, Ṣaḍguruśiṣya and Sāyaṇa. None of these has commented on the Kauṣītaki. We have two commentaries on this text, one by Vināyaka Bhaṭṭa styled as *bhāṣya* and the other by Udaya which is called by the author as *vyākhyāna* or *vivṛti* with all humility. Although I have not carefully studied the commentary of Vināyaka Bhaṭṭa which lies still in the manuscripts deposited in the Bhandarkar Oriental Research Institute, Poona, and in the India Office Library, London, a cursory reading of it suggests that Vināyaka Bhaṭṭa does not compare well with Udaya either in the style of language or in the clarity of expression or in explaining the sacrificial procedure with a sense of order and logic.

In the descriptive catalogues of manuscripts of the Madras Government Oriental Manuscripts Library and Adyar Library, the name of Udaya's commentary is recorded as *Sukhada* or *Sadarthavimarśinī*. But there is no concrete

proof to show that the author has meant such a name for his commentary. In the beginning of the first Adhyāya he simply says: *kurve Kauṣītaki-brāhmaṇa-vivṛtim aham*, without calling the commentary by any name. At the end of the chapters ten, twenty and thirty the expression *Kauṣītakibrāhmaṇavyākhyāne sukhade satām* is found. But this does not mean that the commentary is called *Sukhada*; for in that case the word *satām* would stand without any syntax.

INFORMATION ON UDAYA: Regarding his personal history Udaya gives the following information. He was a son of Nārāyaṇa who performed sacrifices. His mother was Sāvitrī. His ancestors were well-versed in all the fourteen branches of learning. He had two elder brothers Kumāra or Śrīkumāra who was well-versed in Vedānta, and Nārāyaṇa who was a Mīmāṃsaka. He got the name Udaya after the name of a paternal uncle of his father. He was born in a house called Mukundamaṅgala in the village known as Brahmakhala. Brahmakhala is a Sanskritization of Brahmakkaḷam or Brahmakkuḷam as it is now known, situated near the famous temple of Guruvāyūr in Kerala. The house name Mukundamaṅgalam is now pronounced as *Muriyamaṅgalam*. It is a pity that the living members of this family have not even heard of such scholars as Udaya and his brothers whom, if they had, they must be proud of. But the eldest members of the family have heard the story that there was a great Vedāntin as their ancestor who was called Śrīkumāra and who eventually became *a saṃnyāsin* after renouncing the family ties. There is another statement by Udaya that Ṛṣi and Parameśvara who were praised by scholars were his paternal uncles. This statement makes for some difficulty in identifying him and fixing his dates. Ṛṣi and Parameśvara are the celebrated names of the Bhaṭṭas of the Payyūr family which is different from the Muriyamaṅgalam family. We have at least six Ṛṣis and six Parameśvaras belonging to this family from the 14th century onwards. Several accounts have been recorded regarding the Payyūr family by competent scholars. Yet we are not in a position to decide either the exact age of Udaya or his connection with the Payyūr family. This enigma may be partly solved if we accept the traditional story as heard and told by the present members of the Muriyamaṅgalam family that their family once became issueless and there was an adoption from the Payyūr family. On the other hand there is another tradition to the effect that the Payyūr family adopted a male member from the Maṅgalam family, but as he did not get male issues by his wife the Payyūr family became extinct. But it is also possible that there were a Ṛṣi and a Parameśvara in the Muriyamaṅgalam family of whom we are still ignorant.

Udaya does not directly quote Sāyaṇa. But while commenting on the twentieth chapter *Khaṇḍa* 1 sentence 13, he explains the word *nāka as viṣṇor loka* and says that *Bhāṣyakṛts* have explained it so. This explanation is seen accepted by Sāyaṇa as an alternative one while commenting on RV 1.164.50. In the same way commenting on KB XX,1,1, Udaya remarks that the word *ap* is found to express *antarikṣa loka*. Sāyaṇa gives this meaning while commenting

on RV 1.139.11. The interpretation of RV 10.30.12 on page 273, closely follows that of Sāyaṇa. But these instances cannot conclusively prove that Udaya knew Sāyaṇa. Udaya quotes a verse with the preface *tatsvarūpaṃ ca darśitaṃ jyotirvidbhiḥ* on page 280. This verse if found in the *Tantrasaṃgraha* of Gārgya Nīlakaṇṭha, a famous astronomer of Kerala who lived between 1465 and 1545. Therefore, we will not be wide of the mark, if we place Udaya between the 14th and 16th centuries of our era.

Perhaps I may take this opportunity to point out one or two things. A reviewer of my text of the Kauṣītakibrāhmaṇa complains that the splitting up of the *Khaṇḍas* in the text is irrational and funny. I may quote here Udaya who was not unaware of this aspect (beginning of *Khaṇḍa* 2 in XIX, p. 442):

vākyānte prāyaśaḥ kvāpi vākyamadhye ca dṛśyate
khaṇḍavicchittir acchinna sampradāyakramāgatā

Whatever may be the explanation for this irrational and funny way of splitting the *Khaṇḍas*, in the case of the Vedic texts we are unable to alter them according to our understanding based on second hand information as against the tradition which has been there from time immemorial.

Another point is regarding the Appendix I given at the end of the edition of the text. There the beginning sentence of each *Khaṇḍa* is recorded in the order as they occur in the text, but not alphabetically. For it is not imaginable that somebody would look up an initial sentence of a *Khaṇḍa*, in which case alone an alphabetical recording can be useful. On the other hand, Lindner's text varies from that of mine in the initial sentences of the *Khaṇḍas*. Thus it was thought reasonable to record these in their textual order, so that the reader who wants to know the differences of the *Khaṇḍas* in these two recensions may easily fulfil his desire.

For the edition of the text three different numerals were used: Roman for the Chapters, Arabic for the *Khaṇḍas* and Devanāgarī for the *Vākyas*. This edition of Udaya's commentary does not contain the text. But the textual reference is given in the margin against the *pratīkas* using the same method of numbering as adopted for the text. The references to the quotations are recorded as foot-notes then and there. At the end the references are indexed text-wise.

When Prof. Dr. K. L. Janert invited me in 1965/66 as visiting-professor to his "Institut für Indologie der Universität zu Köln", we had proposed to prepare an edition of the Mūla text of the Kauṣītaki-Brāhmaṇa (KB) based on rare and precious materials collected by me in Kerala (viz., copies of palm-leaf manuscripts and tape recordings of the still living oral tradition of the text); it was through Prof. Janert's active help and constant encouragement that, after working in the course of that year on my edition, the Mūla text of the Kauṣītaki-Brāhmaṇa, by the support of the German Research Association (DFG), could be published shortly afterwards, being incorporated into the

famous Series of Dr. Voigt. At that time, Prof. Janert and I had already planned to edit in the near future the KB-Vyākhyā (**KBV**), again on the basis of Kerala palm-leaf manuscripts collected by me. The completion of this work is the result of my labour for many years accomplished in my spare times.

On this occasion, I gratefully acknowledge the help rendered by many friends. It was Prof. Janert again who was behind my work, always supporting and encouraging me; but for his constant help I could not have achieved this result. It was he who for almost two years gave very freely of his own precious time, fixed up the printers and has very generously seen this edition of the KBV through the press. I thank Mrs. E.-M. Winkelmann, who assisted Prof. Janert in the heavy and exacting correspondence on behalf of my edition, between the publisher and printer, between Bonn and Berlin, between Germany and India. My hearty thanks are due also to Mr. N. N. Poti (collaborator with Prof. Janert) for his important graphical corrections in the proofs.

Dr. Voigt, who has been an esteemed friend for more than twenty years, anew has once again shown his interest in my work and supported this edition by including it in his famous Series. Many thanks to him.

The Deutsche Forschungsgemeinschaft (DFG) subsidized my work by granting the printing charges, a fact, which I very gratefully acknowledge.

Thanks to our friend Mr. K. Jost, Franz-Steiner-Verlag, (Wiesbaden), the book appears in a most elegant form.

At home, in preparing this edition, my students and colleagues have helped me; to mention only a few names: Dr. M. Sriman Narayana Murti, Mr. I. Venkateswara Rao, Miss S. R. Matha, Mrs. Vijaya Srī Swamy, Mr. B. C. Hussaini, the late Mr. S. V. Bhaskar. I thank them all.

I hope that this edition will be of real use to all those interested in Vedic studies.

Department for Sanskrit
S. V. University,
Tirupati (Andhra Pradesh)
18.3.1976.

*E. R. Sreekrishna Sarma*

ॐ

# कौषीतकिब्राह्मणव्याख्यानम्

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

प्रत्यक्षादिप्रमाणैरनधिगतमभीष्टानभीष्टार्थलब्धि-
प्रध्वंसोपायमुच्चावचमवगमयन् नाकवत् सर्वपुंसाम् ।
स्वप्रामाण्यैकभूषो रचयितृपुरुषाभावनिर्धूतदोषो
मानानामुत्तमोऽसौ जगति विजयते वैदिकः शब्दराशिः[1] ॥

श्रुतिकमलविलासबालभानुः
श्रितजनकामितदानकामधेनुः ।
मयि निरुपधिभक्तिनम्रमूर्ध्नि
स्फुरतु गुरोः करुणाकटाक्षपातः ॥

समुदितगुणदोषक्षीरपाथोविवेक-
प्रकटितपटिमानः प्राप्तसत्पक्षपाताः ।
द्विजपरिषदि मुख्यश्लाघ्यतां[2] बिभ्रतस्ते
मयि गुरुकरुणार्द्राः सन्तु विद्वन्मरालाः ॥

श्रीमत्कौषीतकिमुनिमहःपूर्वपृथ्वीधराग्रा-
दुद्यन्नुज्जासितसुकृतिहृद्व्योमसान्द्रान्धकारः ।
विद्वत्पद्माकरसुखकरैरुल्लसद्गोसहस्रै-
राम्नायात्मा दिनकृदनिशं प्रीतये कल्पतां नः ॥

1. C. M. शब्दकोशः

2. MSS. मुख्यं श्लाघ्यकान्

अपौरुषेयत्वविभूषणा यं
श्रुत्यङ्गना युक्तिसखीसनाथा ।
स्वयं वृणीते स्म मुनीश्वरं तं
प्रणौमि कौषीतकिनामधेयम् ॥

यद्बद्धसूत्रसंदृब्धा श्रुत्यर्थकुसुमावलिः ।
विश्वमामोदयत्युच्चैस्तं सुयज्ञमुनिं स्तुमः ॥

सरन्तः सन्ति ये सन्तः सरण्या तत्प्रणीतया ।
अहंतारहितः सर्वानहं ताननिशं भजे ॥

सर्वज्ञाचार्यपादाम्बुजसततसमाराधनध्वस्तमोह-
स्थेमा सोमार्धचूडामणिविपुलकृपालब्धचेतोविकासः ।
कुर्वे कौषीतकिब्राह्मणविवृतिमहं केवलं बुद्धिशुद्ध्यै
विद्वांसस्तत्परास्तत् परगुणसुखिनः सन्तु सन्तोषवन्तः ॥

व्याख्यातारो हि पूर्वेऽप्यखिलमकथयन्नेव वेदार्थमुच्चै-
र्दुर्ज्ञानित्वेन किंतु स्वविदितमुपदेशाध्वना वा स्वतो वा ।
सत्येवं नापवाद्योऽप्यहमपि लघुधीः[1] स्वप्रतीतार्थवादी
मत्तोऽप्यज्ञो जनो यो जगति स च भवेदत्र[2] योग्योऽधिकारी ॥

इह तावदग्निहोत्रादीनि सहस्रसंवत्सरसत्रपर्यन्तानि सकलान्यपि वेदविहितानि कर्मजातानि आहवनीयगार्हपत्यान्वाहार्यपचनसंज्ञिताग्नित्रयसाध्यानि समधिगतानि। 'आहवनीये जुहोति',[a] 'गार्हपत्ये हवींषि श्रपयति'[b] इत्यादिशास्त्रात् । 'आहवनीये प्रदानम्'[c] इत्याद्यापस्तम्बसूत्राच्च । 'श्रौतं वैतानिकाग्निषु'[d] इति याज्ञवल्क्यस्मरणाच्च । अग्न्याधेयलक्षणक्रियोत्पन्नत्वनिबन्धना चैषामाहवनी-

a. TS. 6. 3. 2. 1.
b. APŚ. 1. 21. 1.
c. APPS. 1. 29. (30)
d. YS. 1. 97.

1. A. M. अखिलबुधैः for अपि लघुधीः
2. A. M. भवेदेव

यादिसंज्ञा, नार्थान्तरनिबन्धना । अतदुत्पादितेषु साधनान्तरसम्पादितेषु लौकिकेष्वग्निषु आहवनीयशब्दप्रयोगप्रत्ययानुपलम्भनात् । न खलु कश्चिदपि प्रेक्षापूर्वकारी सन् अग्न्यानयनविनियोगे विधित्सिते सति कदाचिद् आहवनीयमाहरेति वा गार्हपत्यमाहरेति वा प्रयुञ्जानो दृश्यते । यदि कश्चिद् वैयात्यात् प्रयुञ्जीत प्रेक्षावद्भिः अनवधेयवचनोऽयमित्युपेक्ष्यपक्षे प्रक्षिप्येत । अत एव प्रसङ्गलक्षणे गार्हपत्याद्यग्नीनां लौकिकवैदिकभेदभिन्नसकलव्यवहारनिर्वर्तनसाधारण्यं पूर्वपक्षीकृत्य 'निर्देशाद् वा वैदिकानां स्याद्'[a] इति लौकिकार्थत्वनिराकरणेन वैदिककर्ममात्रशेषत्वं सिद्धान्तितम् । अतः सर्वैरेव क्रतुभिः स्वापेक्षणीयाहवनीयाद्यग्न्युत्पादकत्वेन अग्न्याधेयकर्मण उपजीव्यत्वात् तदेव तावत् प्रथमं विधातव्यम् । तस्य प्रथममनुष्ठेयपद्धतिनिवेशात् । अनुष्ठानक्रमप्रयुक्तत्वाच्च विधानक्रमस्य । यथा चाग्न्याधेयस्य कथितक्रमेण सकलक्रतूपजीव्यत्वात् प्रथमं विधेयत्वम्, तथैव पवमानादीष्टयोऽपि प्रथमं विधातव्याः । तासामप्यग्न्युत्पत्तिशेषत्वाद् अग्न्याधेयवदखिलक्रतूपजीव्यत्वस्य तुल्यत्वात् । अत एव क्रमलक्षणे 'समुच्चितानामेव आधानेष्टीनामग्न्युत्पादकत्वाद् इष्टयनुष्ठानोत्तरकालमेव अग्निहोत्राद्युत्तरकर्मप्रवृत्तिः, नाग्न्याधेयादनन्तरमेव' इत्युपवर्णितं न्यायविद्भिः[b] । न चाग्न्युत्पादकत्वाविशेषाद् अग्न्याधेयात् पूर्वमेवेष्टीनां प्रवृत्तिः किं न स्यादिति शङ्कनीयम् । तासां दर्शपूर्णमासविकृतित्वेन तद्वदेवाग्नित्रयसाध्यत्वात् । संस्कृतत्वरूपेण च तदुत्पादकत्वात् । अग्न्याधेयस्य च प्राथम्यमाश्वलायनो दर्शयति—'अग्न्याधेयप्रभृतीन्याह वैतानिकानि'[c] इति । अतोऽनुष्ठानक्रमानुरोधेनाग्न्याधानेष्टय एव प्रथमं विधातव्याः । यत्तु अनुष्ठानक्रमसमुल्लङ्घनेन ब्राह्मणान्तरेषु प्रवृत्तिर्दृश्यते, यथैतरेये—तत् खलु ब्राह्मणं गावामयनिकं प्रायणीयातिरात्रमधिकृत्य प्रवृत्तम्, तथा च तन्निबन्धनकृतां वचनम्—'चात्वारिंशं[1] ब्राह्मणं प्रायणीयाद्यह्नां चातुर्विंशतिकेन युक्तम्'[d] इति । 'गवामयनमाश्रित्य प्रवृत्तं ब्राह्मणं त्विदम्'[e] इति च—तत्तु लाघवानुसा-

a. JS. 12. 2. 3.
b. Cf. JS. 5. 3. 21.
c. AŚ. 1. 1. 2.
d. Ṣaḍguruśiṣya on AB introduction
e. ibid.

1 A.चत्वारिंशं

रेणोत्सर्गत इति द्रष्टव्यम्। इदं तु कौषीतकिदृष्टम् 'अस्मिन् वै लोके' इत्यादिकं ब्राह्मणम्[1] उत्सर्गन्यायानुरोधेनानुष्ठानक्रममवलम्ब्य प्रवृत्तम्। तत्र च पूर्णाहुतिपर्यन्तेऽग्न्याधेये कर्मणि होत्रा कर्तव्यस्य कर्मणः कस्यचिद् वक्तव्यस्याभावात् प्रथमं तनूत्रयदेवतेष्टय एवेह विधीयन्ते। तासां दर्शपूर्णमासविकृतित्वेन तत्र[2] होत्रा प्रयोज्यस्य पदार्थस्य संभवात्। दर्शपूर्णमासविकृतित्वं च 'पौर्णमासं प्रथमायै तन्त्रं भवति। आमावास्यं द्वितीयायै'[a] इत्यनन्तरमेव दर्शयिष्यति।

तत्रादौ तावदिष्टीनामुत्पत्तिविधिमुन्नेतुं पवमानादिदेवतास्वरूपप्रतिपा-
1. १ दिकां कांचिदाख्यायिकामुपक्रमते—**अस्मिन्–आसुः**। अस्मिन् लोक इति
पृथिवीलोक इत्यर्थः। कथं लोक**सामान्यवाचिनो**[3] लोकशब्दस्य तद्विशेषभूत-
पृथिवीलोकवाचित्वमवगतमिति चेत्, सन्निहितप्रत्यक्षाभिधायकेदंशब्दसामा-
नाधिकरण्यसामर्थ्यादिति ब्रूमः। किं च इदंशब्दसमानाधिकरणस्य लोकशब्दस्य
पृथिवीवाचित्वम् अदःशब्दसमानाधिकरणस्य च[4] द्युलोकवाचित्वं तत्र तत्र
वेदभागेषु बहुलमुपलभामहे। तथा तैत्तिरीये रात्रिसत्रप्रकरणे श्रूयते—
'आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति। त एतं चतुर्दशरात्रमपश्यन्
तमाहरन् तेनायजन्त। ततो वै त उभयोर्लोकयोराध्नुवन्नस्मिंश्चामुष्मिंश्च'[b]
इति। तथैतरेये—'अमुष्मिन् वा एते लोक आध्नुवन्ति नास्मिन्नित्याहुः'[c]
इति। इहापि 'सर्वायुत्वायास्मिँल्लोके। अमृतत्वायामुष्मिन्'[d] इति। अपि च
'ते देवाः स्वर्गं लोकं यन्तः' इति समनन्तरवाक्ये गन्तव्यत्वेन स्वर्गलोकनिर्देशा-
दिह पूर्ववाक्ये पृथिवीलोकविवक्षा विस्पष्टमवगम्यते[5]। न खलु स्वर्ग एव
वर्तमानानां पुनस्तस्मादेव तद्विषयं गमनमुच्यमानमुन्मत्तेतरो जनः श्रद्दध्यात्।
तथा 'त्वं नोऽस्य लोकस्याध्यक्ष एधि' इत्यादिवाक्यशेषगमनिकापि पृथिवी-
वाचित्व एव आञ्जसी[6]। तस्मात् साधूक्तं पृथिवीवाची लोकशब्द इति।

a. KB. I. 2. १, २.
b. TS. 7. 3. 4. 1.
c. AB. 1. 11. 9.
d. KB. VII. 12. १०, ११; X. 7. २४, २५.

1. A. M. omit
2. T. omits
3. C. T. °वाचि
4. T. omits
5. T. अभिस्पष्ट°
6. A. M. समञ्जसी

वैशब्दः प्रसिद्ध्यर्थः । पूर्वस्मिन् काले देवमनुष्याणां पृथिवीमात्रवर्तित्वं प्रसिद्धमित्यर्थः । ननु विरुद्धमिदमुच्यते । न ह्येषोऽर्थः प्रसिद्धिपद्धतिमध्यास्ते । अतः कथमित्थमभिधीयत इति । उच्यते—सत्यम् । नास्त्येवास्यार्थस्य लोकप्रसिद्धिः । अतीन्द्रियत्वात् । अस्य वेदैकावसेयत्वात् । अस्ति चात्र प्रसिद्ध्यर्थो वैशब्दः । अतो मन्यामहे प्रसिद्धिरपि वैदिक्येवेति । न ह्यस्ति राजाज्ञा काचिन्मनुवचनं वा किंचित् नियमतः लौकिक्यैव प्रसिद्ध्या भवितव्यमिति । अतो यत्र यत्र प्रसिद्ध्यर्था वैशब्दहिशब्दादयः श्रूयन्ते तत्र तत्र[1] सति संभवे लौकिकी प्रसिद्धिरादरणीया; असति त्वर्थवादान्तरप्रसिद्धिरपि स्वीकार्या । अस्ति चात्रार्थवादान्तरप्रसिद्धिः । तथा च तैत्तिरीये श्रूयते—'यथा वै मनुष्या एवं देवा अग्र आसन् । तेऽकामयन्त । अवर्तिं पाप्मानं मृत्युमपहत्य दैवीं संसदं गच्छेमेति । त एतं चतुर्विंशतिरात्रमपश्यन् । तमाहरन् । तेनायजन्त । ततो वै ते अवर्तिं पाप्मानं मृत्युमपहत्य दैवीं संसदमगच्छन्'[a] इति । अस्यायमर्थः—पूर्वस्मिन् काले साधनानुष्ठानावस्थायां मनुष्यवदेव[2] देवा अपि अवर्त्यादिमन्तः पृथिवीलोकवर्तिन एव बभूवुः । ते पुनर्मनुष्यसाधारणमवर्त्यादिमत्त्वं निरस्य देवत्वं प्रेप्सव ईश्वरानुग्रहसाक्षात्कृतेन चतुर्विंशतिरात्रसंज्ञितेन केनचिद् विशिष्टज्ञानसहितेन कर्मणा मनुष्यसाधारण्यमपनीय देवत्वं प्राप्तवन्त इति । तामेतामार्थवादिकीं प्रसिद्धिं वैशब्दोऽवद्योतयति । अथवा यथोक्तस्यार्थवादस्य पुरावृत्तत्वं वैशब्देनाभिधीयते । पूर्वस्मिन् काले देवमनुष्या उभयेऽपि पृथिवीलोकवर्तिनो बभूवुरिति । यथा 'यज्ञो वै देवेभ्य उदक्रामद्'[b] इत्यादौ वैशब्दः पुरावृत्तत्वसूचकः । यद्वा अवधारणार्थोऽयं वैशब्दः । यथा 'आत्मा वा इदमेक एवाग्र आसीद्'[c] इत्यत्र वैशब्दः । वाक्यालङ्कारार्थो वा; निपातानामनेकार्थत्वात् । 'उच्चावचेष्वर्थेषु निपतन्ति'[d] इति भगवता यास्केनाऽनेकार्थाभिधायितया निपातशब्दस्य व्युत्पादितत्वात् । लोक्यते भुज्यते शुभाशुभव्यामिश्ररूपकर्मफलं[3] यस्मिन्निति लोकः स्थानविशेषः । तस्मिन् प्रकारद्वयसहिता देवा मनुष्याश्च

a. TS. 7. 4. 2. 1.
b. AB. 1. 2. 1.
c. AU. 1. 1.
d. N. 1. 4. 2.

1. T. omits
2. T. omits एव
3. T. धर्म for कर्म

देवमनुष्याः । देवा अग्न्यादयः । आसन् बभूवुः । उभयेऽपीत्यपिशब्दोऽध्याहार्यः । यथैतस्मिन् काले देवा[1] अग्न्यादयः स्वसमुपार्जितविशिष्टज्ञानकर्मजन्यफलभोगिनः स्वर्गाख्ये लोकविशेषे वर्तन्ते, मनुष्यास्तु श्रुतिचोदितानि तानि कर्माणि कुर्वाणाः पूर्वकालार्जितपुण्यापुण्यफलं सुखदुःखात्मकमुपभुञ्जानाः पृथिवीलोक एव विपरिवर्तन्ते न तथैते पूर्वस्मिन् काले बभूवुः । किं तु यथा मनुष्याः पृथिवीलोकवर्तिनः तथैव देवा अपि पृथिवीलोकवर्तिन एव बभूवुः । कथं पुनः स्वर्गलोकवर्तिनां देवानां पृथिवीलोकवर्तित्वं[2] प्रतिज्ञायते ? तथात्वे अस्मदादिवदेव देवत्वस्यानुपपत्तिप्रसङ्गात् । उच्यते—नात्र मुख्यार्थो देवशब्दः । किं तु देवत्वसाधनभूतज्ञानकर्मानुष्ठायिष्वेव पुरुषेषु भाविनीं वृत्तिमाश्रित्य देवशब्दप्रयोगः । दृश्यते च भाविवृत्त्याश्रयेण लोके शब्दानां प्रयोगः । यथा 'घटं करोति, ओदनं पचति' इत्यादि । एवमिहाप्यवगन्तव्यम् । केवलकर्मानुष्ठायिनो मनुष्यशब्देन विवक्ष्यन्ते । भावनाबलादिहैव देवभावमभिप्रेत्य वा देवशब्दः । श्रूयते खलु मनुष्यावस्थायामेव देवभावभावनोपचयजनित इह जन्मनि देवभावः—'देवो भूत्वा देवानप्येति'[a] इति । उदाहृतश्चैतद्वाक्योक्तेऽर्थे शाखान्तरीयोऽर्थवादः—'यथा वै मनुष्या एवं देवा अग्र आसन्'[b] इत्यादि ॥

1. २ अथ देवानां प्रवृत्तिमाह—**ते-ऊचुः** । ते देवाः साधनानुष्ठानावस्थाः मनुष्यैः सह पृथिव्यामेव वर्तमानाः देवीभविष्यन्तो भावनाबलादापन्नदेवभावा वा । मनुष्यशरीरारम्भकस्य कर्मणोऽन्ते परित्यक्तपाञ्चभौतिकशरीरा अग्न्यादिस्थानोपभोगयोग्यं विशिष्टज्ञानजनितं[3] द्योतनात्मकं तैजसं शरीरविशेषं बिभ्राणा इन्द्रादिशब्दवाच्याः सन्तः । स्वर्गं लोकं 'यन्न दुःखैरसंभिन्नम्'[c] इत्याद्युक्तलक्षणसुखविशेषोपभोगस्थानम् । यन्तो गच्छन्तः । अग्निं स्वेषामग्रतो
1. ३ गच्छन्तमग्निनामानं देवम् उक्तवन्तः । किमित्यत आह—**त्वं-एधीति** । हे अग्ने त्वं[4] नः अस्माकं सर्वेषां मध्ये अस्य लोकस्य पृथिवीलोकवर्तिनां मनुष्याणां त्वमध्यक्षः स्वामी भव । एधीत्यस्तेर्धातोर्लोटि मध्यमपुरुषैकवचनम् । अयं

a. ŚB. 14. 6. 10. 4. b. TS. 7. 4. 2. 1.

c. Quoted by Vācaspatimiśra in his Commentary on *Sāṃkhya-Kārikā* v. 1.

1. C. T. omit
2. T. भावित्वं for वर्तित्वं
3. T. ज्ञानकर्म for ज्ञान
4. T. omits

तेषामाशयः—यथा लोके राज्ञां पौरजानपदानां जनानां चान्योन्यं स्वस्वामिभावलक्षणः संबन्धः एवमेवास्माकं मनुष्याणां च । वयं देवाः स्वामिनः । अमी मनुष्याः स्वभृताः । तत्र तावन्मनुष्यैः श्रौतस्मार्तकर्माधिकारिभिर्वयं तैस्तैः श्रुतिविहितैः कर्मविशेषैराराधिताः तत्प्रत्तं च[1] तं तं यज्ञभागं भुञ्जाना वर्तिष्यामहे । मनुष्याश्च प्रसन्नैरस्माभिरनुगृहीता ऐहिकमामुष्मिकं च पुरुषार्थं प्रतिलप्स्यन्ते । स चायं स्वस्वामिभावसंबन्धो न विना संनिकर्षं संभवति । द्युलोकवर्तिनां चास्माकं न पृथिवीलोकवर्तिभिर्मनुष्यैराराधयितुं योग्यतास्ति । परस्परवार्तानभिज्ञत्वात् । भवांश्च सर्वदेवात्मकः । अतस्त्वां वयं ब्रूमहे मनुष्याणां प्रत्यक्षः सन् स्वामी भवेति । तथा च यथा पौरा जानपदाश्च जनाः तैस्तैरुपायनविशेषैः स्वामिनं परिचरन्ति । स च तेषामभिलषितमखिलं प्रसन्नमानसः संपादयति । एवं मनुष्याः श्रौतस्मार्तकर्माधिकारिणः तैस्तैर्यागभेदैः पूजयन्तु । भवांश्च प्रसन्नः सर्वेषामैहिकमामुष्मिकं च फलं प्रयच्छतु । त्वामाराधयतां तेषां सर्वेऽपि वयमाराधिता एव । त्वयि च प्रसन्ने सर्वेऽपि वयं प्रसन्ना एव । भवतः सर्वफलदानसामर्थ्यं सर्वदेवतात्मकत्वादुपपद्यत एवेति । अग्नेश्च सर्वदेवतात्मकत्वं श्रुत्यन्तरे समाम्नायते—'देवासुराः संयत्ता आसन् । ते देवा बिभ्यतोऽग्निं प्राविशन् । तस्मादाहुरग्निः सर्वा देवता इति'[a] इति । पौरोडाशिकब्राह्मणे च—'देवा वै हविर्भूत्वाब्रुवन् । कस्मिन्निदं म्रक्ष्यामह इति । सोऽग्निरब्रवीत् । मयि तनूः संनिधध्वम् । अहं वस्तं जनयिष्यामि । यस्मिन् म्रक्ष्यध्व इति । ते देवा अग्नौ तनूः संन्यदधत । तस्मादाहुरग्निः सर्वा देवता इति'[b] इति । तथा च मन्त्रः—'अग्निर्मुखं प्रथमो देवतानाम्'[c] इति । 'त्वत्पितारो अग्ने देवास्त्वामाहुतयस्त्वद्विवाचना'[d] इति च । अग्नेश्च देवानां मध्ये श्रेष्ठत्वमाम्नायते—'अग्निर्वै देवानामभिषिक्तः'[e] इति । एवं देवैरुक्तः सन्नग्निः
किमुक्तवानित्याकाङ्क्षायामाह—**तान्–इति** । तान् देवानग्निरित्थमुक्तवान् । 1. ४-७
कथमित्याह—अथ । प्रकृतादर्थादर्थान्तरेऽथशब्दः । बाढमभ्युपगत एवायं

a. TS. 6. 2. 2. 6.
b. TB. 3. 2. 8. 9–10.
c. KS. 4. 16; AB. 1. 4. 8.
d. TS. 1. 5. 10. 2.
e. TS. 5. 4. 9. 2.

1. C. T. omit

भवद्भिरभिहितोऽर्थः। अस्ति तु तत्र काचिदनुपपत्तिः। यस्माद् वः युष्माकं मध्येऽहं घोरसंस्पर्शतमो भवामि। घोरः क्रूरः सोढुमशक्यः संस्पर्शः सन्निकर्षो यस्यासौ तथोक्तः। अतिशयेन घोरसंस्पर्शो घोरसंस्पर्शतमः। यस्मादहं घोरसंस्पर्शतमः तस्मात् मनुष्याः मानवा अनपचायितार एव। अपचितिः परिचर्या तां न करिष्यन्ति इत्यनपचायितारः। कः खल्वनुन्मत्तः प्रेक्षापूर्वकारी सन् प्रतिकूलमाचरत्यनुकूलमाचरेत्। एवं च सति मनुष्येषु वर्तमानम् 'इतः प्रदानं देवा उपजीवन्ति'[a] इत्यादि श्रुतिसिद्धं[1] देवार्थमुपकल्पितं चरुपुरोडाशादिकं यदन्नं तत् कथं वो युष्माकं भविष्यति। यदर्थं पृथिवीलोकस्याध्यक्षत्वेन मया स्थातव्यमिति। यथा मनुष्याणां दुरुपसर्पत्वहेतुः घोरसंस्पर्शनमत्वलक्षणो धर्मो निवर्तते तथा कश्चिदुपायविशेषो भवद्भिश्चिन्त्यतामित्यर्थः।

1. ८ अथ देवानां वचनमाह—**ते-ऊचुः**। ते एवमग्निनोक्ता देवा उक्तवन्तः।

1. ९-११ किमित्यत आह—**तस्य-इति**। इतिशब्द ऊचुरित्यनेन संबन्धनीयः। इतिशब्दोक्तं प्रकारं प्रकटयति—तस्य। वैशब्दः स्मरणार्थः। घोरसंस्पर्शतमत्वनिवृत्त्युपायं विचारयतां तेषामीश्वरानुग्रहात् कश्चिदुपायविशेषः प्रत्यभात्। तदनुस्मरणद्योतनार्थोऽयं वैशब्दः। यद्वा अभ्यनुज्ञार्थः। तस्यातिशयेन घोरसंस्पर्शस्य ते भवतः तिस्रो[2] मूर्तयो विद्यन्ते। सन्ति किलाग्नेर्द्विप्रकारा मूर्तयः घोराः शिवाश्च। ता उभय्योऽपि 'ये ते अग्ने शिवे तनुवौ'[b] इत्यादिमन्त्रपदेषु प्रसिद्धाः। तथा ब्राह्मणमपि—'रुद्रो वा एष यदग्निः। तस्यैते तनुवौ घोरान्या शिवान्या'[c] इति। ता घोरास्तनूः वक्ष्यमाणाः पावकपवमानशुचिलक्षणाः। विनिधास्यामः विभज्य भवतः सकाशादन्योन्यं च विभिन्नाश्रयाः कृत्वा निधास्यामः। एकैकस्मिन् वस्तुनि स्थापयिष्यामः। ततश्च याभिस्तनूभिः त्वय्येकत्रैव संभूय वर्तमानाभिस्तव घोरसंस्पर्शत्वमभूत्, तासु विनिहितासु सतीषु घोरसंस्पर्शत्वं निवर्तेत इति भावः। अथानन्तरं विनिहितासु घोरासु तनूषु भवतो या शिवा समस्तपापपरिवर्जिता शग्मा निरतिशयसुखकरी। द्वयोरप्यनयोः

a. TS. 3. 2. 9. 7.
b. TB. 1. 1. 7. 2.
c. TS. 5. 7. 3. 3.

1. MSS. स्मृतिसिद्धं
2. T. तन्वो

सुखनामसु पाठाद्[a] अत्यन्तसुखकरीत्यर्थः । 'अभ्यस्ते भूयस्त्वमर्थस्य भवति'[b] इति न्यायात् । यद्वा सुखभेदाभिधायिनापौनरुक्त्येन व्याख्यातव्यम् । ऐहिकामुष्मिकसुखप्रदेत्यर्थः । यज्ञिया यजनीया तनूर्मूर्तिरस्ति । तया तन्वा । एवकारः क्रमं भित्त्वात्र संबध्यते । तथैवेह पृथिवीलोके तासु तासु यज्ञशालासु कालीकराल्यादिज्वालासप्तकविशिष्टः[c] सन् मनुष्येभ्यो मनुष्याणां यजमानरूपाणामैहिकामुष्मिकपुरुषार्थप्रसिद्ध्यर्थं भविष्यसि अध्यक्षत्वेन वर्तिष्यसे । देवानां मध्येऽग्नित एव पुरुषार्थावाप्तिः वाजसनेयके श्रूयते —'तस्मादग्नावेव देवेषु लोकमिच्छन्ते'[d] इति । कास्तर्हि ता घोरास्तन्वः कुत्र वा ता विनिहितवन्तः
इत्याकाङ्क्षायामाह—**तस्य-शुचिम्** । अप्छब्देन तदभिमानिनी देवता 1.१२-१४
विवक्ष्यते । यथा-'शृणोत ग्रावाणः,'[e] 'ओषधे त्रायस्वैनम्'[f] इत्यादिषु वाक्येषु ग्रावादिशब्दा ग्राव्ाद्यभिमानिदेवतावचनाः तद्वत् । 'अभिमानिव्यपदेशोक्तेश्च'[g] इति वैयासिकसूत्रात् । तस्याग्नेः पवमानाभिधानां घोरां तनूमग्नेः पृथक्कृत्य अप्सु निहितवन्तः । निधानं च तद्रूपतापादनम् । न तु कुण्डादौ बदरादिस्थापनवत् तदाधारीकरणम् । तथा वायौ देवतायां पावकां नामाग्नेः संबन्धिनीं घोरां तनूमदधुः इत्यनुषज्यते । एवमादित्ये देवतायां शुचिनामधेयां घोरां तनूं निहितवन्तः ।

**अथ-अतपत्** । अथानन्तरं निहितासु घोरासु तनूषु या खल्वस्याग्नेः शिवा 1.१५,१६
पूर्वोक्तलक्षणा क्वचिदप्यविनिहिता स्वस्मिन् धर्मिण्यग्नावेवाभूत् । तया तन्वा सहित एव सन्नग्निरिह पृथिवीलोके प्रतियज्ञशालम् आहवनीयाद्याकारेण मनुष्याणामनुग्रहार्थमतपत् । तपतिर्धातुर्दीप्तिकर्मा । 'येन सूर्यस्तपति तेजसेद्धः'[h] इत्यादिश्रुतौ तथा दर्शनात् । अदीप्यत ।

आख्यायिकामुपसंहृत्य तत्फलमाह—**एता-भवति** । या एताः पावक- 1.१७-१६
पवमानशुचिनामधेया देवताः सन्ति तास्तिस्रोऽप्यग्नेस्तन्वो मूर्तिविशेषा एव, न स्वतन्त्रा एवान्याः काश्चिद् देवता इति ज्ञातव्यम् । यस्मादेवं तस्मादेता

a. Nighaṇṭu. 3. 6.
b. P. *siddhi*, p. 6. ( अभ्यासे हि for अभ्यस्ते )
c. Cf. MuṇḍU. 1. 2. 4.
d. ŚB. 14. 4. 2. 27.
e. TS. 1. 3. 13. 1.
f. TS. 1. 2. 1. 1, etc.
g. BS. 2. 1. 5. where the reading is व्यपदेशस्तु
h. TB. 3. 12. 9. 7.

उक्ता देवता यजतीति यदस्ति अत्रास्मिन् यजनकर्मणि साङ्गोपाङ्गैरेताभिः पवमानपावकशुचिरूपाभिस्तनूभिः सहितः तथा शिवा शग्मेत्युक्तरूपया तन्वा सहितोऽग्निराधानकर्मणोत्पादितः प्रीतो भवति । अङ्गशब्देन पवमानाद्या मूर्तिविशेषा उच्यन्ते; तनूशब्देनावयवी विवक्ष्यत इति विशेषो द्रष्टव्यः ।

एवमाख्यायिकारूपेणार्थवादेन इष्टीनामुत्पत्तिविधिमुन्नीय संप्रति तासां
1.२०-२२ देवतानां त्रित्वसंख्यामनुभाष्य स्तौति—**ता–आप्नोति ।** ताः प्रकृता देवतास्तिस्र एव भवन्ति । वैशब्दोऽवधारणार्थः । इमे लोका भूर्भुवःस्वराख्यास्त्रिसंख्याका भवन्ति । वैशब्दः प्रसिद्ध्यर्थः । प्रसिद्धं हि लोकानां त्रिसंख्यत्वम् । तत् तेन त्रिसंख्याकदेवतायागेन इमान् पृथिव्यन्तरिक्षस्वर्गाख्यान् लोकानाप्नोति । असन्देहार्थ एवकारः । भोक्तृभोग्यभावेन संबन्ध एव च लोकानामाप्तिर्नाम न तु प्राप्तिमात्रम् । तस्याफलत्वात् । फलत्वेन चाप्तेरिह [1-]कीर्तितत्वात् । प्राप्तिश्च तावन्न सुखरूपा[-1] । स्त्र्यादिप्राप्तेरिव सुखसाधनत्वेनैव च प्राप्तेः फलत्वं वाच्यम् । सति संभवे च स्वभावतः पुरुषार्थस्यैव फलत्वकल्पनमुचितम् । तस्मादाप्नोतीति लोकत्रयवर्तिसमस्तभोग्यवस्तुभोग एव विवक्ष्यत इति द्रष्टव्यम् । एवमन्यत्रापि व्याख्येयम् ।

इति व्याक्रियाद्याद्यखण्डस्य हृद्या
मयाकारि कौषीतकिब्राह्मणेऽस्मिन् ।
इयं चेद् बताहो न विद्वज्जनेभ्यः
स्वदेत स्वदेतैव सप्तार्चिषे सा ॥

इति प्रथमः खण्डः

एवं प्रथमेन खण्डेनाग्न्युत्पत्त्यङ्गभूतानां पवमानेष्टीनां स्वरूपबोधको विधिः अर्थवादमुखेन प्रकटीकृतः । इदानीं तासामेव क्रमेण इतिकर्तव्यतां विधित्सुः
2. १ आद्याया इष्टेः पौर्णमासीविकृतित्वमाह—**पौर्णमासं–भवति ।** पूर्णमासस्येदं पौर्णमासम् । तन्त्रमितिकर्तव्यता विध्यन्त इत्यनर्थान्तरम् । प्रथमाया इति

1-1. M. omits.

षष्ठ्यर्थे चतुर्थी । प्रथमाया इष्टेः पौर्णमासं तन्त्रं भवतीत्यन्वयः । तथा च 'अग्निर्वृत्राणि जङ्घनत्'[a] 'त्वं सोमासि सत्पतिः'[b] इति प्रकृतिगतौ वार्त्रघ्नावेव आज्यभागौ स्यातामिति सिद्धं भवति । तथा च सूत्रम्—'अग्नये पवमानायेष्टिः पौर्णमासीविकारः'[c] इति । पवमानगुणायाग्नये काचिदिष्टिः प्रथमं कर्तव्या । सा चेष्टिः पौर्णमास्या इष्टेः प्रकृतिभूताया विकारो भवति । नित्यपुंलिङ्गत्वाद् [1-]विकारपदस्य इष्टिपदसामानाधिकरण्योपपत्तिः[-1] । पौर्णमासं तन्त्रम् अस्यामिष्ट्यामानेतव्यमिति सूत्रार्थः । सर्वासामिष्टीनां दर्शपूर्णमासप्रकृतित्वाद् दार्शं पौर्णमासं वा तन्त्रमिहानेतव्यमिति संदेहे निर्धारणार्थमिदं वाक्यम् ।

अथ द्वितीयेष्टेः अमावास्याविकृतित्वमाह—**आमावास्यं द्वितीयायै** । तन्त्रं 2. २
भवतीत्यनुषङ्गः । अमावास्याया इदमामावास्यम् । अत्रापि षष्ठ्यर्थे चतुर्थी । तथा च 'अग्निः प्रत्नेन मन्मना'[d] 'सोम गीर्भिष्ट्वा वयम्'[e] इति वृधन्वन्तावाज्यभागौ स्यातामिति सिद्धं भवति । तथा च सूत्रम्—'अग्नये पावकायाग्नये[2] शुचये द्वितीया अमावास्याविकारः'[f] इति । अनयोरिष्ट्योः पौर्णमासामावास्य-
तन्त्रत्वं प्ररोचनाय प्रशंसति—**तेन-भवतः** । हेति हर्षे । तेन दार्शपौर्णमासिक- 2. ३
तन्त्रविशिष्टेष्टिद्वयानुष्ठानेन । अस्य अनेन यजमानेन अन्वारब्धौ परिगृहीतौ भवतः । दर्शपूर्णमासयोर्यत् फलम् उपात्तदुरितक्षयः स्वर्गादिर्वा[3] तदप्येतयोरिष्ट्योरनुष्ठानादेव सेत्स्यतीति बहुफलत्वात् प्रशस्तमिदमित्यर्थः । प्रथमायामिष्टौ स्विष्टकृद्यागस्य याज्यापुरोनुवाक्यायुगलं लक्षणकथनेन उपदिशति—
**ईळितवत्यौ-संयाज्ये** । संयाज्याशब्दः स्विष्टकृद्यागस्य याज्यापुरोनुवाक्यावचनः । 2. ४
'संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्'[g] इत्याश्वलायनसूत्रात् । प्रथमाया इष्टेर्ये स्विष्टकृतो याज्यापुरोनुवाक्ये पठनीये ते ईळितशब्दहव्यत्वाद्च्छब्दवत्यौ

a. RV. 6. 16. 34.
b. RV. 1. 91. 5.
c. ŚS. 2. 2. 3-4.
d. RV. 8. 44. 12.
e. RV. 1. 91. 11.
f. ŚS.2.2. 7-8. (Printed edition has two च extra)
g. AŚ. 2. 1. 21.

1-1. T. विकारपदेष्टिपदयोः सामा°
2. T. adds च
3. T. स्वर्गादि वा

स्याताम् । ते हि 'तं हि शश्वन्त ईळते'[a] 'ते स्याम ये अग्नये'[b] इत्येते । तथा सूत्रकारेणोदाहृतत्वात्[c] । तयोरुक्तलक्षणत्वात् । यद्यपि याज्यायामुक्तलक्षणवत्ता न विद्यते तथापि 'छत्रिणो गच्छन्ति' इतिवदौपचारिक एवायं निर्देश इति द्रष्टव्यम् । यथा 'सृष्टीरुपदधाति'[d] इति । यथा वा 'अग्निना रयिमश्नवत् गयस्फानो अमीवह इति रयिमन्तावाज्यभागौ'[e] इति । यथा 'पृथुपाजवत्यौ धाय्ये'[f] इति । यथा चैतरेये 'समिधाग्निं दुवस्यत आप्यायस्व समेतु त इत्याज्यभागयोः पुरोनुवाक्ये भवत आतिथ्यवत्यौ रूपसमृद्धे'[g] इति ।

ननु तत्र 'सैषाग्नेय्यतिथिमती'[h] इत्यादिना आप्यायिधातुयोगेन कथं-
चिदाप्यायस्वेति सौम्यायामप्यतिथिशब्दत्वं स्वयमेवोपपादितम् । अतो नायं
दृष्टान्त इति । तर्हि दृष्टान्तान्तरमेवास्तु । तच्चोक्तमेव । इहापि वा कथंचिद्
2. ५ उक्तलक्षणवत्ता संपादनीया । एतत् स्तौति—**तत् संयाज्यारूपम् ।** यदेतद्
ईळितवत्त्वं हव्यवाड्वत्त्वं च तत् संयाज्ययो रूपमनुरूपम् । योग्यमिति यावत् ।
इज्यमानाया देवताया ईड्यत्वहव्यवोढृत्वलक्षणगुणावद्योतकत्वात् । अथ
2. ६ द्वितीयायामिष्टौ संयाज्ये विधत्ते—**द्व्यग्नी द्वितीयायै ।** संयाज्ये कुर्यादिति
शेषः । द्वावग्निशब्दौ ययोर्ऋचोस्ते तथोक्ते । ते च 'अग्निमग्निं हवीमभिः'[i]
'अग्निनाग्निः समिध्यते'[j] इत्येते । 'अग्निमग्निमग्निनाग्निरिति स्विष्टकृतः'[k] इति
सूत्रणात् । अनयोर्द्विरग्निश्रवणाद् द्व्यग्नित्वमुपपन्नम् ।

2. ७ अथास्य आभिरूप्यमाह—**द्वौ–यजति ।** यस्मादस्यामिष्टौ द्वौ पावकशुचिनाम-
धेयावग्नी इज्येते तस्मात् तदनुस्मरणार्थत्वाद् द्व्यग्नित्वमनुरूपमित्यर्थः ।

अथ प्रकृतितोऽतिदेशतः प्राप्तानां सामिधेनीनां साप्तदश्यलक्षणविशेष-
2. ८ विधानेन तृतीयामदितिदेवत्यां कांचिदिष्टिं विधत्ते—**सप्तदशसामिधेनीका**

a. RV. 5. 14. 3.
b. RV. 4. 8. 5.
c. Vide ŚS. 2. 2. 6.
d. TS. 5. 3. 4. 7.
e. MŚ. 5. 1. 3. 18.
f. APŚ. 16. 18. 3.
g. AB. 1. 17. 1.
h. AB. 1. 17. 2.
i. RV. 1. 12. 2.
j. RV. 1. 12. 6.
k. ŚS. 2. 2.11.

**तृतीया**। 'तृतीया काचिदिष्टिः कर्तव्या सा चादितिदेवत्या'[a] इति सूत्रकार-
वचनात् सिद्धयति। सैषेष्टिः सप्तदशसामिधेनीका कार्या। सप्तदश सामिधेन्यो
यस्यां सा तथोक्ता। अत एव पूर्वयोः पञ्चदशसामिधेनीकत्वमवसेयम्। तत्र
तावत् 'प्र वो वाजाः'[b] इत्याद्याः प्राकृत्यो निदेशतः प्राप्ताः पञ्चदश। तासु
येयमुपोत्तमा ऋगस्ति ततः प्राक् 'पृथुपाजा अमर्त्यः'[c] 'तं सबाधो यतस्रुचः'[d]
इति द्वे ऋचावावपेत्। एवं सति सप्तदश संपद्यन्ते। एतत् स्तौति—**सप्तदश-** 2. ९, १०
**आप्नोति**। इष्टयो दीक्षणीयादयः। पशुबन्धा ऐन्द्राग्नीषोमादयः। वैशब्दः
प्रसिद्धौ। तत् तेन सप्तदशसामिधेनीपठनेन यदिष्टिपशुबन्धफलं तदाप्नोति।

इदानीम् अस्यामेवेष्टौ प्राकृत्योराज्यभागपुरोनुवाक्ययोः ह्यवबाधनेन
पुरोनुवाक्यायुगलं विधत्ते—**सद्वन्तौ-भवतः**। अस्तिधातुयुक्ते ऋचावाज्य- 2. ११
भागयोः पुरोनुवाक्ये कुर्यात्। ते च 'त्वमग्ने सप्रथा असि,'[e] 'सोम यास्ते
मयोभुवः'[f] इत्येते। तयोः 'असि, सन्ति' इत्यस्तिधातुश्रवणात्। सद्वत्त्वं
स्तौति—**असानीति-कुरुते**। अस्तिधातुः सत्तावचनोऽपि श्रेष्ठत्वमभिधत्ते। 2. १२-१७
योऽग्नीनाधत्ते स इहैव लोके सर्वेषां मध्ये अहमेव श्रेष्ठः स्यां मदुपजीविनोऽन्ये
भवेयुः इत्येवमभिप्रायेण अग्न्याधानं करोति। न केवलमामुष्मिकफलाभि-
प्रायेणैव। एतदेव स्फुटयति। अयमग्न्याधानं कुर्वन् स्यां श्रेष्ठो भूयासमिति
कामनां करोति। तथा च मन्त्रे—'अहं भूयासमुत्तमः समानानाम्'[g] इत्यादौ।
ब्राह्मणेषु च 'वसिष्ठः समानानां भवति'[h] इत्यादौ। श्रेष्ठत्वस्य पुरुषार्थत्वं
तत्र तत्रोपलभ्यते। अत एव तलवकारब्राह्मणे श्रूयते—'यावद् वै कृत्वो यजते
तावद् बुभूषते तावत् कामयते श्रेयान् स्यामिति'[i] इति। भवत्वेवम्, ततः
किम्? इत्यत्राह—**स यदि ह वा** इति। निपातद्वयसमुदायः प्रसिद्ध्यर्थः।
यः सद्वन्तावाज्यभागौ करोति स यद्यपि पुत्रवित्तभृत्यादिराहित्यात् स्वस्य
एषे इष्यमाणे वस्तुनि अवीरोऽसमर्थ एव भवन् अग्न्याधानं कुर्यात्। तथापि

a. Cf. ŚŚ 2. 2. 12.
b. RV. 3. 27. 1.
c. RV. 3. 27. 5.
d. RV. 3. 27. 6.
e. RV. 5. 13. 4.
f. RV. 1. 91. 9.
g. TS. 3. 5. 5. 1.
h. TB. 2. 3. 1. 3.
i. JB. 3. 287.

क्षिप्रे क्षिप्रमेव सम्यक् पुत्रवित्तादिसर्वसंपत्प्राप्त्या सर्वेषां मध्ये श्रेष्ठतां प्राप्नोति । क्षिप्रमेव स्वैर्भोग्यतामुपजीवनीयतां प्राप्नोति । तस्मात् प्रत्यक्ष-दृश्यविशिष्टफलत्वात् प्रशस्तमिदमाज्यभागयोः सद्वत्त्वम् । इदानीं स्विष्ट-
2. १८ कृद्यागस्य याज्यापुरोनुवाक्ये विधत्ते—**विराजौ संयाज्ये ।** विराट्छन्दस्के ऋचौ स्विष्टकृतो याज्यानुवाक्ये कुर्यात् । ते च 'प्रेद्धो अग्ने दीदिहि पुरो नः'[a] 'इमो अग्ने वीततमानि हव्या'[b] इत्येते । तयोर्विराट्छन्दस्कत्वात् । 'अग्निं नरः'[c] इति पञ्चविंशत्यृचे सूक्ते प्रथमतोऽष्टादश संख्याकासु विराट्छन्दस्कास्वृक्षु कथितयोः ऋचोराम्नानात् । 'अग्निं पञ्चाधिका विराजोऽष्टादशाद्याः'[d] इत्यनु-क्रमणिकायामुक्तत्वात् । तथा चाश्वलायनसूत्र आधानप्रकरणे—'विराजा-वित्युक्त एते प्रतीयात्'[e] इत्येतावेवोदाहृत्य विराजाविति संज्ञा कृता । विराजं
2. १९, २० प्रशंसति—**श्रीः-उपाप्त्यै ।** येयं विराण्नाम छन्दोऽस्ति सा श्रीरेव भवति । विराजः प्रकाशरूपत्वात् । प्रकाशरूपत्वं च 'विराट् छन्दसां ज्योतिः'[f] इति श्रुत्यन्तरदर्शनात् । श्रीहेतुत्वाद् वा । यथा 'आयुर्घृतम्'[g] इति । तथा विराळ-न्नाद्यमेव । अत्तुं योग्यं शाल्यन्नादिनिष्पन्नमन्नम् । अन्नं चैव तदाद्यं चेत्यन्नाद्यम् । यद्वा अन्नं चाद्यं चान्नाद्यम् । आद्यशब्देनान्नस्यापि ग्रहणसंभवे पृथग् ग्रहणं प्राधान्याभिप्रायम् । 'अन्नं वै विराट्'[h] इति च श्रुत्यन्तरम् । तथा चैतद्विराजोः संयाज्ययोः पठनमन्नाद्यश्रीरूपाया विराजः प्राप्त्यै संपद्यते ।

एवमिष्टित्रयं विधाय तासु पठनीयानामृचां गायत्रीछन्दस्त्वमनूद्य स्तौति—
2.२१-२३ **ता-आधत्ते ।** वैशब्दः प्रसिद्धौ । त्रिपदात्वाद् गायत्रीत्वं प्रसिद्धमित्यर्थः । किम-तस्तत्राह-गायत्रो यस्मादग्निः । अग्निमन्थनीयाख्याभिः द्वादशभिः गायत्रीछ-न्दस्काभिरुत्पन्नत्वादग्नेः गायत्रत्वम् । प्रजापतेर्मुखाद् गायत्र्या सहोत्पन्नत्वाद् वा प्रथमसृष्टत्वाद् वा । तथा गायत्रच्छन्दाः । गायत्र्येव[1] गायत्रं सा[1] छन्दो

a. RV. 7. 1. 3. b. RV. 7. 1. 18.
c. RV. 7. 1. d. SA. VII. 1.
e. AŚ. 2. 1. 30. f. PB. 6. 3. 6.
g. TS. 2. 3. 2. 2. [ आयुर्वै घृतम् ] h. AB. 1. 5. 23.

1. T. omits.

यस्य स तथोक्तः। कथमग्नेर्गायत्रच्छन्दस्त्वमिति चेत्। अत्र कश्चिदितिहासः
ऐतरेयब्राह्मणे श्रूयते—'प्रजापतिर्वै यज्ञं छन्दांसि देवेभ्यो भागधेयानि व्यभजत्।
स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवनेऽभजत्। त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यंदिने
जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने'[a] इति। अत्र गायत्र्याः प्रजा-
पतिना स्वयमेवाग्नये समर्पितत्वाद् अग्नेर्गायत्रीछन्दस्त्वमवगतम्। यस्मादित्थ-
मग्नेः स्वभूतैषा गायत्री तस्माद् गायत्रीरेता ऋचः पठन् स्वभूतेनैव छन्दसाग्नी-
नाधत्ते। छन्दोऽन्तरं हि नाग्न्याधानकर्मण्यनुरूपम्। अतो गायत्रीछन्दस्त्व-
मस्मिन् कर्मणि प्रशस्तमित्यर्थः। अथैतासामृचाम् उपांशुपठनीयतां प्रशंसति—
**ता–भवन्ति**। वैशब्दः समुच्चये। ता ऋचः उपांशु भवन्ति पठनीया इत्यर्थः। 2. २४
वर्णाभिव्यक्तिपरिहारेण पठनीयत्वमुपांशुत्वम्। 'करणवदशब्दममनःप्रयोग-
मुपांशु'[b] इति लक्षितत्वात्। कुत इत्यत आह—**रेतःसिक्तिर्वा अग्न्याधेयम्**। 2. २५
यदेतदग्न्याधेयं नाम तद् रेतःसिक्तिरेव भवति। रेतःसेचनसदृशं भवतीत्यर्थः।
यथा रेतःसेको जन्तूनामुत्पत्तौ[1] कारणं तथा सर्वेषामुत्तरयज्ञक्रतूनाम् अग्न्याधे-
यजन्याग्नित्रयसाध्यत्वेन एतदपेक्षत्वाद् अग्न्याधेयं मूलकारणं भवतीति रेतः-
सिक्तित्वम्[2]। **उपांशु–सिच्यते**। इह[3-] उपांशुत्वं नाम मिथुनव्यतिरिक्तजना- 2. २६
ज्ञायमानत्वम्।[-3] पुरुषेण स्त्रिया योनौ रेतः सिच्यत इति यदस्ति तद् यस्मादु-
पांशु गुप्तमेव भवति, तस्मादुपांशुप्रयोज्यत्वमग्न्याधेयस्य घटत इत्यर्थः। इदानी-
माभिरूप्यं स्तौति—**अभिरूपा–समृद्ध्यै**। अभिरूपत्वं क्रियमाणकर्मविद्योत- 2.२७,२८
कत्वम्। यदेतद् यज्ञे क्रियमाणे कर्मणि ऋचामभिरूपं आभिरूप्यं नामास्ति।
भावपरोऽयं निर्देशः। तदाभिरूप्यं समृद्धं समृद्धिर्यज्ञस्य। भावे क्तः। समृद्धिः
नाम फलदानं प्रति निष्प्रतिबन्धसामर्थ्यशालिता। आभिरूप्यविरहे पुनरसं-
पूर्णता यज्ञस्य प्रसज्येतेति भावः। यत एवमतोऽत्रापि ऋचामेतासामभिरूपत्वं
यज्ञस्य समृद्ध्यै संपद्यते। असंदेहार्थ एवकारः। ऐतरेये चेत्थमेवाभिरूप्यं स्तुतम्–

a. AB. 3. 13. 1.

b. AppS. 1. 8. See Haradatta and Kapardi on this.

1. A. M. °मुत्पत्ति

2. T. रेतःसिक्तसारूप्यम्

3-3. A. M. omit

'एतद् वै यज्ञस्य समृद्धं यद् रूपसमृद्धम् । यत् कर्म क्रियमाणमृगभिवदति'[a] इति ।

2. २६ अथैतासु त्रिसंख्यास्विष्टिषु देयां दक्षिणां विधत्ते—**द्वादश दद्यात्।** यजमान इति शेषः। द्वादशसंख्याका गाः तिसृष्विष्टिषु प्रविभज्य दद्यात्।
2. ३०, ३१ स्तौति—**द्वादश–आप्त्यै।** वैशब्दः प्रसिद्धौ। ये द्वादशसंख्याका मासाश्चैत्रादयस्त एव संवत्सरः। मासानां संवत्सरावयवत्वात्। अवयवावयविनोरैकात्म्यात् सामानाधिकरण्यम्। यथा तन्तवः पट इति। ततश्च द्वादशसंख्याकदक्षिणादानं संवत्सरस्य प्रजापतिरूपस्य आप्त्यै संपद्यते। 'संवत्सरः प्रजापतिः'[b] इति श्रुत्यन्तरदर्शनात्। प्राजापत्यस्थानप्राप्तिरस्य दक्षिणादानस्य फलमित्यर्थः। अत्रैव त्रयोदशसंख्यापूरकस्य कस्यचिदश्वस्य दक्षिणादानं
2.३२,३३ विधत्ते—**अश्वं–आप्त्यै।** तच्चाश्वदानं यस्त्रयोदशो मासस्तस्याप्त्यै। अस्ति खलु द्वादशभ्यो मासेभ्य ऊर्ध्वभावी त्रयोदशसंख्यापूरकः कश्चिन्मासः योऽधिमास इति ज्योतिःशास्त्रे प्रसिद्धः। तथा च तद्विदां वचनम्—'अधिमासका युगे ते रविमासेभ्योऽधिकास्तु ये चान्द्राः'[c] इति। तथा च तैत्तिरीये—'उपयामगृहीतोऽसि संसर्पोऽस्यंहस्पत्यायेत्याह। अस्ति त्रयोदशमास इत्याहुः। तमेव तत् प्रीणाति'[d] इति। अत्र च इत्याहुरित्यभिज्ञप्रसिद्धिकथनेन इतरमासेष्विव लोकप्रसिद्ध्यभावः सूचितः। सा च लोकाप्रसिद्धिरैतरेये श्रूयते—'तस्मात् त्रयोदशो मासो नानुविद्यते'[e] इति। इह चोपरिष्टात् 'उपचरो विज्ञात इव'[f] इति। तस्यैतस्य त्रयोदशमासस्याप्त्यै तदश्वदानं संपद्यते॥

इति द्वितीयः खण्डः

अतिक्रान्तेन खण्डद्वयेन सहस्रसंवत्सरसत्रपर्यन्तसकलक्रतूपजीव्यमग्न्याधेयं प्रतिपादितम्। इदानीमाध्यायपरिसमाप्तेः खण्डत्रयेण पुनराधेयनामधेयं कर्म प्रतिपाद्यते।

a. AB. 1. 13. 31; 1. 16. 43.
b. AB. 1. 1. 14.
c. *Āryabhaṭīya, Kālakriyāpāda,* 6.
d. TS. 6. 5. 3. 4.
e. AB. 1. 12. 2.
f. KB. VII. 12. ४३.

ननु कोऽत्राधिकारी ? उच्यते । योऽग्न्याधेयादनन्तरं केनचिद् रोगविशेषेण पीडितो भवेत्; यस्य वा पुत्रपशुवित्तहिरण्यादीनि विनश्येयुः; सोऽत्र पुनराधेये कर्मण्यधिक्रियते । तथा च बौधायनीये वचनम्—'अथेदं पुनराधेयम्' इत्युपक्रम्य 'कियन्नु खलु पुनराधेयं भवतीति । अग्नीनाधाय पापीयानभवं मज्ज्याशिषि पुत्रो मे मृत इति तस्मिंस्त्वेवैतत् संवत्सरे दृष्टं भवति'[a] इति । ततश्चाग्न्याधेयादनन्तरं तस्मिन्नेव संवत्सरे कथितव्याध्यादिनिमित्तोत्पत्तौ पुनराधेयं कर्तव्यमिति सिद्धं भवति । भारद्वाजीयसूत्रे त्वाचार्यमतभेदेन कालविकल्प उक्तः—'यावज्जीवं पुनराधेयस्य कालो नात्येतीत्याश्मरथ्यः । संवत्सर इत्यालेखनः'[b] इति । सूत्रकारेण चोक्तम्—'काम्यं पुनराधेयमजानानस्य'[c] इति । पुनराधेयं कर्तव्यम् तच्च काम्यम् । काम्यन्तेऽभिलष्यन्त इति पशुहिरण्यादयः कामाः तेभ्यो हितं तत्साधनमिति यावत् । तत् पुनराधेयमजानानस्य आहिताग्नेर्भवति । अनेनाधिकारी कथितः । अग्न्याधेयानुष्ठानेन कामानप्राप्तवत इति यावत् । अनेन व्याधितत्वमप्युपलक्ष्यते । तथा चाश्वलायनीये—'आधानाद्यामयावी यदि वार्था व्यथेरन्'[d] इति । अत्र च तदा पुनराधेयं कर्तव्यमिति वाक्यशेषो द्रष्टव्यः । तैत्तिरीये च पुनश्चितिप्रकरणे दृष्टान्तत्वेन पुनराधेयाधिकारी श्राव्यते—'यथा वै पुनराधेय एवं पुनश्चितिः । योऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमा धत्ते । योऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुते'[e] इति । इहापि 'सर्वेषामेव कामानामाप्त्यै'[f] 'पुनर्मा वसु वित्तमुपनमतु'[g] इत्याद्यर्थवादादपि कामनाविषयपश्वादिसाधनत्वमवगम्यते । तदेतद् ऋद्धिकामाधिकारं पुनराधेयाख्यं कर्माध्यायशेषेण विधीयते । तत्र द्वितीयखण्डे पुनराधेयेष्टौ प्रकृतेरतिदिष्टेषु प्रयाजानुयाजेषु 'अग्न आ याहि वीतये'[h] इत्यादिकानामाग्नेयीनामृचां प्रतीकभूतानि विभक्तिसंज्ञितानि 'अग्न' इत्यादीनि पदानि प्रक्षिप्य तैः सह यागो विधास्यते । तदुपोद्घातत्वेन प्रयाजानुयाजानामग्निदेवत्यत्वं वक्तुमाख्यायिकां तावत् प्रस्तौति—**देवासुरा–परासुराः** । वैशब्दः पुरावृत्तत्वद्योतकः । एषु 3.१–१३

a. BŚ. 24. 18. 2–3

b. BhŚ. 5. 17. 7.

c. ŚŚ. 2. 5. 1.

d. AŚ. 2. 8. 4.

e. TS. 5. 4. 10. 4–5.

f. KB. I. 3. १९.

g. KB. I. 3. २१.

h. RV. 6. 16. 10.

लोकेष्विति निमित्तार्थे सप्तम्यौ। 'चर्मणि द्वीपिनं हन्ति'[a] इत्यादिवत्। एतान् भूर्भुवःस्वराख्यान् लोकान् निमित्तीकृत्य। लोकाधिपत्यमस्माकमेव भूयादित्येकप्रयोजनाभिलाषितयेति यावत्। संयत्ता अतिशयेन संनद्धाः। योद्धुमित्यर्थात्। आसुर्बभूवुः। प्रसिद्धो ह्येकार्थाभिलाषनिबन्धनो विरोधः। एवं देवेष्वसुरेषु चान्योन्यं युद्धाय संनद्धेषु सत्सु तेभ्यो देवेभ्यः सकाशादग्निः केनचिदभिप्रायेणापक्रान्तोऽभूत्। अपक्रम्य च सोऽग्निः स्वस्य देवैर्दुरुपलक्षत्वार्थं वसन्तादीन् ऋतून् प्रविश्य तत्र निगूढमवस्थितोऽभूत्। अथ देवाः कांश्चिदपलायिनः शूरानसुरान् निहत्य तदितरान् दुर्बलानसुरान् स्ववशे स्थापयित्वा अग्निमपश्यन्तः तस्यान्वेषणं कृतवन्तः। अन्वेषयतां च तेषां मध्ये यमवरुणौ तमग्निमनुगम्य ददृशतुः। अथ तत्सहिता देवास्तमग्निमुपेत्य 'हे अग्ने त्वमस्मानुपावर्तस्व हव्यं नो वह' इत्याद्युक्तवन्तः। अथ तस्मिन् स्वोक्तेऽर्थे विप्रतिपन्नमग्निम् अभिलषितार्थदानप्रतिज्ञाकरणेन संप्रतिपन्नं चक्रुः। तमज्ञपयन्नित्यत्र समज्ञपयन्निति समुपसर्गलोपो द्रष्टव्यः। 'ता एतयर्चा समज्ञपयत्। समन्या यन्त्युपयन्त्यन्या इति। ताः समजानत'[b] इति दर्शनात्। प्रतिज्ञाय च देवा वरमग्नये दत्तवन्तः। स चाग्निः 'प्रयाजान् मे अनुयाजांश्च केवलान्'[c] इति मन्त्रोक्तान् प्रयाजादीन् वरत्वेन वृतवान्। यस्मादेवमग्निना वरत्वेन वृताः प्रयाजादयः तस्मादग्निदेवत्याः प्रयाजादय इत्यभिज्ञानां प्रसिद्धिरासीत्। अनन्तरं वरदानप्रीतेनाग्निना संगता देवा निहतनिःशेषशत्रवोऽभवन्। सर्वेषां लोकानामाधिपत्यं विशिष्टज्ञानसहकृतेन कर्मणा प्राप्तवन्तः। असुरास्तु पराजयं प्रापुः।

3.१४,१५ आख्यायिकावेदितुः फलमाह—**भवति–वेद।** यः पुमान् एवमुक्तप्रकारेण आख्यायिकां वेद स आत्मना स्वयं भवति। सर्वेषां मध्ये श्रेष्ठो भवति। अस्य तु शत्रुः पराभूतो भवति।

एवं प्रयाजानुयाजानामग्निदेवत्यत्वं प्रतिपाद्य संप्रति पौनराधेयिकीमिष्टिं
३. १६ विधित्सुः आदौ पुनराधेयकालनिरूपणाय प्रश्नमुत्थापयति—**तदाहुः–इति।** तत्र

a. MB. on Pā. 2. 3. 36.
b. AB. 2. 20. 7.
c. RV. 10. 51. 8.

पुनराधेये केचिज्जिज्ञासवः[1] पृच्छन्ति यत् पुनराधेयं नाम कर्म तत् कस्मिन्
ऋतौ कर्तव्यमिति । प्रश्नस्योत्तरमाह—**वर्षासु–आहुः**। वर्षासंज्ञतौ पुनराधेयं 3. १७
कर्तव्यमिति केचिदभिज्ञा उक्तवन्तः। हशब्द ऐतिह्यार्थः। उपपन्नं चैतदित्याह—
**वर्षासु–आप्त्यै**। वैशब्दः प्रसिद्धौ। काम्यन्ते अभिलष्यन्त इति कामाः 3.१८,१९
व्रीह्यादयः। ते यस्माद् वर्षासंज्ञकऋतावुत्पद्यन्ते। 'वर्षाभिर्हीळितमन्नाद्य-
मुत्तिष्ठति'[a] इति पठिष्यमाणत्वात्। ऐतरेयके च न्यूङ्खार्थवादे वर्षास्वन्ना-
द्योत्पत्तिराम्नायते—'यदेलवा अभिगेष्णाश्चरन्त्यथान्नाद्यं प्रजायते'[b] इति।
अस्यार्थः—यदा यस्मिन् काले इलवाः। इला अन्नं तद्वन्त इलवाः कृषीवलाः।
गानं गेष्णं तद्युक्ता अभिगेष्णाश्चरन्ति। तदान्नाद्यमुत्पद्यत इति। पुनराधेयाख्यं
च कर्म सकलकामोत्पत्तिहेतुः। अतः स एवर्तुरस्य कर्मणोऽनुरूपः। ततश्च
तत्काले क्रियमाणमेतत् कर्म सर्वेषामपि कामानामाप्त्यै संपद्यते।

तत्रैव कालसंकोचं कुर्वन् नक्षत्रविशेषमुपदिशति—**मध्यावर्षे–इति**। 3.२०, २१
वर्षर्तोर्मध्यकालो मध्यावर्षम्। तस्मिन्नेव न तु प्रावृषि यस्मिन् कस्मिन्
कालांशे। तदापि पुनर्वसूसंज्ञं नक्षत्रं ज्योतिःशास्त्रदृष्ट्या पर्यालोच्य निर्धार्य
तस्मिन् नक्षत्रे पुनराधेयं कुर्यात्। तदा चायमभिप्रायः। नष्टनिःशेषकामं
वर्तमानं मां वित्तं पश्चात् प्राप्नोतु स्वयमिति। वसुशब्दस्य व्याख्या वित्तमिति।
अनेन च पुनर्वसूशब्दनिर्वचनेन पुनराधेयानुरूपत्वं दर्शितम्।

**अथो–उपाप्त्यै**। अथो तथा सति। तत् पुनराधेयं नष्टस्य कामस्य पश्चादा- 3. २२
हिताग्नेः पुनरवाप्तये संपद्यते। सूत्र्यते च—'मध्यावर्षं पुनराधेयकर्मकालः।
पुनर्वसू च नक्षत्रमुक्तम्'[c] इति। तथा तैत्तिरीये— 'पुनर्वस्वोरादधीत एतद् वै
पुनराधेयस्य नक्षत्रं यत् पुनर्वसू'[d] इति।

कालान्तरमुपदिदिक्षुः पूर्वमुक्तं कालविधिं प्रत्याचष्टे—**तद्वै–संपद्यते**। वैशब्दो 3. २३
विशेषार्थः। सत्यं वर्षर्तुः पुनराधेयकर्मानुरूपम्। पुनर्वसू च नक्षत्रं तदनुरूपम्।

a. KB. III. 4. २२.
b. AB. 5. 3. 5.
c. ŚS. 2. 5. 4–5
d. TS. 1. 5. 1. 4.

1. A. M. केऽपि for केचित्

किंतु तत् पुनराधेयं तस्मिन् मध्यावर्षात्मके काले यः पूर्वपक्षः तस्मिन् पुनर्वसुभ्यां न संपद्यते। अनुष्ठातुं न लभ्यते। तस्मिन् काले पुनर्वस्वोः संगमासंभवात्।

कस्तर्हि कालविशेषः यत्र पुनर्वसूनक्षत्रं संगच्छत इत्यत आह—**यैवैषा-**
3.२४-२६ **संपद्यते**। एषैवेति ज्योतिःशास्त्रसिद्धायाः साभिनयो निर्देशः। आषाढमासभवा आषाढी। तस्या अमावास्याया इति शेषः। सूत्र्यते च—'यैवाषाढ्योत्तरामा-
3.२७-३० वास्या'[a] इति। अमुं कालविशेषं स्तौति—**उपाप्तो-आदधीत**। योऽयममावास्यायां कामः 'अमावास्या सुभगा सुशेवा'[b] इति मन्त्रवर्णोक्तः। यश्च वर्षासु कामो व्रीह्यादिरूपः। यश्च पुनर्वसूनिमित्तो नष्टस्य पुनःप्राप्तिरूपः। स सर्वोऽप्युपात्तः स्वीकृतो भवति। पूर्वस्मिन् कालपक्षे त्वमावास्यापुनर्वसूनिमित्तः कामो नावाप्यते। अतोऽयमेव ग्राह्यः पक्ष इत्यर्थः।

3. ३१ संप्रति पौनराधेयिकीमिष्टिमेव विधत्ते—**पञ्चकपालः-भवति**। पञ्चसु कपालेषु श्रप्यत इति पञ्चकपालः। स चायं पुरोळाशोऽग्निदेवत्यः आधानगताष्टकपालस्थाने विहितत्वात्।

3.३२,३३ स्तौति—**पञ्चपदा-आप्त्यै**। पङ्क्तिर्नाम छन्दोविशेषः। सा पञ्चपदा पञ्चसंख्याकाः पदा यस्याः सा तथोक्ता। 'पञ्चमं पङ्क्तिः पञ्चपदा'[c] इत्यनुक्रमणिकापरिभाषायामुक्तत्वात्। यज्ञः पाङ्क्तः। वैशब्दः प्रसिद्धौ। यज्ञस्य पञ्चसंख्यान्वयित्वात्। यज्ञस्य पञ्चविधत्वं[1] च 'स एषोऽग्निहोत्रं[2] दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः'[d] इत्यैतरेयोपनिषद्वाक्यावसेयम्। यद् वा आत्मजायापुत्रवित्तविद्याभिः पञ्चभिरन्वितत्वाद् यज्ञस्य पाङ्क्तत्वं द्रष्टव्यम्। अतश्च पञ्चकपालत्वं यज्ञस्याप्त्यै संपद्यते। असंदेहार्थ एवकारः॥

इति तृतीयः खण्डः

a. ŚŚ. 2. 5. 6.
b. TB. 3.7.5.13.
c. SA. 8. 1.
d. AA. 2. 3. 3.

1. T. पञ्चसंख्यान्वयित्वं
2. T. पञ्चविधो for एषो

अथास्यामिष्टौ प्रकृतितोऽतिदेशतः प्राप्तेषु प्रयाजानुयाजेषु कंचिद् विशेषं
विधत्ते—**विभक्तिभिः–यजति**। प्रकृतौ ये पञ्चसंख्याकाः 'समिधो यजति'[a] 4. १
इत्यादिविधिभिः विहिताः प्रयाजनामका यागविशेषाः ये च प्रधानादूर्ध्वम-
नुष्ठेयाः त्रयोऽनुयाजाख्या यागाः त इह पौनराधेयिक्यामिष्टौ चोदकतः
प्राप्ताः। तानेतान् प्रयाजानुयाजान् विभक्तिभिः वक्ष्यमाणस्वरूपाभिः संयोज्य
यजेत्। तद् यथा—'समिधः समिधोऽग्नेऽग्न आज्यस्य व्यन्तु'[b] 'तनूनपादग्निमग्न
आज्यस्य वेतु'[c]। अत्रैव केषांचिद् 'नराशंसोऽग्निमग्न आज्यस्य वेतु'[d] इति
द्रष्टव्यम्। 'इळो अग्निनाग्न आज्यस्य वेतु'[e]। 'बर्हिरग्निरग्न आज्यस्य वेतु'[f]
इति। तथानुयाजयोरपि 'देवं बर्हिरग्नेर्वसुवने वसुधेयस्य वेतु'[g] 'देवो नरा-
शंसोऽग्ना वसुवने वसुधेयस्य वेतु'[h] इति। तथा च सूत्रम्—'त्रिषु प्रयाजेष्वग्नि-
शब्दो विकृतः। तनूनपादग्निमिडो अग्निना बर्हिरग्निः'[i] इति। 'देवं बर्हिरग्नेर्वसुवने
देवो नराशंसोऽग्ना वसुवने'[j] इति। स्तौति—**ऋतवो–समाहरति**। ये प्रयाजानु- 4. २, ३
याजास्ते वसन्तादयः ऋतव एव। अस्य अर्थवादान्तरप्रसिद्धिद्योतनार्थो
वैशब्दः। तथाहि तैत्तिरीये—'वसन्तमृतूनां प्रीणामीत्याह। ऋतवो वै प्रयाजाः।
ऋतूनेव प्रीणाति'[k] इति। तथा 'समिधो यजति वसन्तमेवर्तूनामवरुन्धे'[l]
इत्यादि प्रयाजानामृतुरूपत्वं प्रतिपाद्यते। ऋत्वात्मकाग्निदेवत्यत्वाद् वा तत्।
तत् तेन विभक्तिसाहित्येन प्रयाजाद्यनुष्ठानेन ऋतुषु प्रविष्टमेनमग्निं तेभ्यः
सकाशात् पश्चात् सम्यगाभिमुख्येन प्रापयत्येव होतेति शेषः।

विभक्तीनां स्वरूपं प्रदर्शयति—**अग्न–विभक्तयः**। प्रतीकमादिरुपक्रम इति 4. ४
पर्यायाः। आद्यं पदमग्निशब्द इति यावत्। तथा च सूत्रम्—'अग्निशब्दं चतुर्षु
पूर्वेषु प्रयाजेष्वनुयाजयोश्च विभक्तय इत्याचक्षते'[m] इति। विभक्तिगतां
षट्संख्यां स्तौति—**ता–समाहरति**। ता विभक्तयः षट्संख्याका भवन्ति। 4. ५-७

a. ŚB. 1. 5. 4. 1.
b. ŚŚ. 1. 7. 1.
c. ŚŚ. 1. 7. 2.
d. ŚŚ. 1. 7. 3.
e. ŚŚ. 1. 7. 4.
f. ŚŚ. 1. 7. 5.
g. ŚŚ. 1. 13. 1.
h. ŚŚ. 1. 13. 2.
i. ŚŚ. 2. 5. 10–11.
j. ŚŚ. 2. 5. 19.
k. TS. 1. 6. 11. 4–5.
l. TS. 2. 6. 1. 1.
m. ŚŚ. 2. 5. 20.

ऋतवो वसन्तादयश्च षट्संख्यया प्रसिद्धाः। तथा च तेन षट्संख्याकविभक्ति-पठनेन। एवकारः पौनर्वचनिकः।

अथ पञ्चमप्रयाजस्य तृतीयानुयाजस्य च प्रकृतिसिद्धेनैव रूपेण पठनीय-
4. ८. 4. ६ तामाह—**यथायथं-यजति**। तत् स्तौति—**तथा-भवति**। तथा यथायथं यागे सत्यस्य यजमानस्य पुनराधेयं प्राकृतेभ्यः प्रयाजानुयाजेभ्यः सकाशादनपक्रान्तं भवतीति तैः संपन्नं भवतीत्यर्थः। सर्वेषामप्यन्यथान्यथा[1] पठने सति प्राकृताः प्रयाजानुयाजाः परित्यक्ता भवेयुः। उत्तमस्य यथास्थितिपठने तु प्रयाजानुयाजाः प्रकृतितः प्राप्ताः परिगृहीता भवन्ति। चतुर्षु द्वयोश्च यः कश्चिद् विभक्ति-लक्षणो विशेषः कृत इत्येव स्यात्। न तु धर्मिणः स्वरूपेणैव व्यतिरेक इति यथायथमुत्तमप्रयाजानुयाजयोर्योगः। तथा च बौधायनीयं वचनम्—'स्वयं-संपन्न उत्तमः प्रयाजः,'[a] 'स्वयंसंपन्न उत्तमोऽनुयाजः'[b] इति।

अथाज्यभागयोः पुरोनुवाक्यां विधित्सुराद्यस्याज्यभागस्य प्रकृतिदृष्टामेव
4. १० पुरोनुवाक्यामनुजानाति—**वार्त्रघ्नः-वधाय**।[2-] उत्तरस्य विशेषविधानाय वार्त्रघ्नः पूर्व आज्यभाग इति[-2]। पूर्वस्याज्यभागस्य 'अग्निर्वृत्राणि जङ्घनत्'[c] इत्येषा पुरोनुवाक्या पठनीया इत्यर्थः। एतत् फलवचनेन स्तौति—पाप्मन एव वधाय इति। असमृद्धिहेतोः पापस्य निबर्हणाय तद्वार्त्रघ्नत्वं संपद्यते। वृत्रशब्दस्य पाप्मवाचकत्वात् तद्धातकत्वेन चाग्नेरिह[3] कीर्तनात्। इतोऽपि युक्तं वार्त्र-
4. ११ घ्नत्वमित्याह-**अथो-भवति**। अथो इत्यपि चेत्यर्थः। उत्तरस्या ह्यग्निपाव-मानत्वं विधास्यति। यद्यस्यापि प्रकृतादर्थान्तिरत्वं भवेत् तथा सत्यत्यन्तपरोक्षं पौर्णमासतन्त्रत्वं स्यात्। अतः पौर्णमासतन्त्रत्वसिद्ध्यर्थत्वादपि प्रशस्तमिदं वार्त्रघ्नत्वमित्यर्थः। अस्य यजमानस्य पुनराधेयं पौर्णमासात् तन्त्रादनपक्रान्तं भवति।

a. BŚ. 3. 2. 6.
b. BŚ. 3. 3. 6.
c. RV. 6. 16. 34.

1. A. M. omit one अन्यथा
2-2. T. omits.
3. T. omits च

पूर्वस्मिन्नाज्यभागे शाखान्तरीयं पक्षमुपक्षिपति—**अग्नि-इति**। अस्त्यग्निः 4.१२-१४
बुद्धिमद्गुणः । 'अग्निं स्तोमेन बोधय'[a] इत्यस्यामृचि बोधयेति बुधधातु-
मत्त्वदर्शनात् । तस्मादग्नये पूर्वमाज्यभागं कुर्यात् । ह्शब्दः पारंपर्यद्योतनार्थः ।
तथा च सूत्र्यते—'अग्निं स्तोमेन बोधयेति वाग्नये बुद्धिमते'[b] इति । [1-]अत्र
हेतुमप्याहुः[-1]—यो यजमानः पुनराधेयं कर्तुमग्नीनामुद्वासनमुत्सर्गं करोति एतस्य
यजमानस्याग्निः स्वपितीव स्वापं निद्रां करोतीव । इवशब्द एवकारार्थः ।
यद्वा वस्तुतोऽग्नेः निद्राराहित्यादिवशब्दः । तथा चाग्नेः नित्यजागृवित्वप्रतिपा-
दको मन्त्रः— 'अग्निर्जागार तमृचः कामयन्ते'[c] इति । ततश्चानभिव्यक्तिमात्रं
स्वापः । ततो निद्रावस्थामनुभवन्तमेनमग्निं तेन बुद्धिमद्गुणाग्निदेवत्यपुरोनु-
वाक्यापठनेन पश्चात् प्रबुद्धं निद्रावस्थारहितं जाग्रदवस्थं करोति । तस्मादस्यै-
वाज्यभागस्य अत्रानुरूपत्वमिति केचिच्छाखिन आहुरित्यर्थः । अमुं पक्षं प्रति-
क्षिपति—**वार्त्रघ्नस्त्वेव स्थितः**। उत्तरस्याज्यभागस्य प्रकृतिपठितपुरोनुवाक्या- 4. १५
वबाधनेन पुरोनुवाक्यान्तरं विधत्ते—**अग्न-पुरोनुवाक्या**। उत्तरस्याज्यभागस्य 4. १६
'अग्न आयूंषि पवसे'[d] इत्येषा पुरोनुवाक्या पठनीया। तथा च शातपथं
ब्राह्मणम्—'अथ यद्यग्नये पवमानायानुब्रूहीति ब्रूयात् सोऽन्वाह अग्न आयूंषि
पवस इति'[e] इति ।

स्तौति—**पवस-रूपम्**। अस्यामृचि पवस इति पदमस्ति । तेन च पवन- 4. १७
मभिधीयते । तच्च पवनं सोमस्य रूपम् । तस्य दशापवित्रेण पूयमानत्वदर्शनात् ।
'सोमः पवते'[f] इत्याम्नानाच्च ।

किमतस्तत्राह—**केवलाग्नेयो-भवति**। यज्ञ एव क्रतुर्यज्ञक्रतुः । न च यज्ञक्रतु- 4.१८-२०
पदयोः पर्यायत्वात् सामानाधिकरण्यानुपपत्तिराशङ्कनीया; विशेषसद्भावात् ।
क्रतुशब्दो हि मानस उपासनेऽपि प्रयुज्यमानो दृश्यते । यथा—'स क्रतुं कुर्वीत

a. RV. 5. 14. 1.
b. ŚŚ. 2. 5. 13.
c. RV. 5. 44. 15.
d. RV. 9. 66. 19.
e. ŚB. 2. 2. 3. 22.
f. RV. 9. 96. 5.

1-1. T. omits.

मनोमयः प्राणशरीरः'[a] इति। 'यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति'[b] इति च। अतस्तद्व्यावृत्त्यर्थं यज्ञपदेन विशिनष्टि। अयं पुनराधेयाख्यो यज्ञक्रतुः केवलाग्नेयो हि। केवलमग्निर्देवत्यः केवलाग्नेयः। देवतान्तरसंभेदविरहः कैवल्यम्। हिशब्दोऽर्थवादान्तरप्रसिद्धिसूचकः। तथा च तैत्तिरीये देवैरग्नेर्वरदानं श्रूयते—'सोऽग्निरब्रवीद् भाग्यसान्यथ व इदमिति पुनराधेयं ते केवलमित्यब्रुवन्'[c] इति। तत् तत्र पुनराधेयस्य केवलाग्नेयत्वे स्थिते। पवमानस्य पवमानं कीर्तयतीति यदस्ति। तथा सति अस्य यजमानस्य पुनराधेयं प्रकृतितः प्राप्तात् सौम्यादाज्यभागाद् अनपक्रान्तं भवति। किं तु तेनोपसंपन्नं भवति। एतदुक्तं भवति। प्रकृतौ हि 'उत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमाय'[d] इति उत्तराज्यभागस्य सोमदेवत्यत्वं श्रुतम्। पुनराधेयस्य तु केवलाग्नेयत्वात् तस्याप्याग्नेयत्वे कर्तव्ये सति चोदकप्राप्तः सौम्य आज्यभागः सर्वथा परित्यक्तो भवेत्। पवमानगुणकाग्निदेवत्यत्वाङ्गीकारे पुनः पवमानत्वगुणानुरोधेन प्राकृत आज्यभागः स्वीकृतः स्यात्। गुणभूताग्न्यनुरोधेन पुनराधेयत्वप्रयुक्तमाग्नेयत्वमपि परिगृहीतं भवेत्। अतः पवमानाग्निदेवत्य एवोत्तर आज्यभाग इति॥

इति चतुर्थः खण्डः

गते खण्डे प्रयाजानुयाजाज्यभागलक्षणेष्वङ्गेषु केचिद् विशेषाः प्रदर्शिताः। इदानीमादौ तावत् प्रधानस्य स्विष्टकृद्यागस्य च याज्यापुरोनुवाक्ये विधत्ते—

5. २ **पदपङ्क्त्यौ याज्यापुरोनुवाक्याः।** पदपङ्क्तिर्नाम गायत्रीच्छन्दोविशेषः। तल्लक्षणं चानुक्रमणिकापरिभाषायां प्रदर्शितम्—'पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः'[e] इति। अस्यार्थः—पदपङ्क्तिसंज्ञाया गायत्र्यास्तावत् पञ्च पादा भवेयुः। तेषां मध्ये चत्वारः पादाः पञ्चाक्षरयुक्ताः स्वतो वा व्यूहनेन वा। पञ्चमस्तु पादः षडक्षरसंयुक्तः। एवंविधपादपञ्चकयुक्ता पदपङ्क्तिर्नाम गायत्री विज्ञेया। अत्रोदाहरणम्—'अधा ह्यग्ने क्रतोः'[f]

a. ChU. 3. 14. 1.
b. TS. 1. 5. 1. 2.
c. TS. 2. 6. 2. 1.
d. ChU. 3. 14. 1-2
e. SA. 4. 2.
f. RV. 4. 10. 2.

इति । एवमेकः प्रकारः । अन्योऽपि प्रकारो विद्यते । आद्यास्त्रयः पादाः पञ्चाक्षराः । चतुर्थः पादश्चतुरक्षरः । पञ्चमस्तु षडक्षरः । एवमेका पदपङ्क्तिः । अत्रोदाहरणम्—'अग्ने तमद्याश्वं न स्तोमैः'[a] इति । इह पदपङ्क्तय इति पदपङ्क्तिच्छन्दस्का 'अग्ने तमद्य'[a] इति चतस्र ऋच उच्यन्ते । 'अग्ने तमद्य पदपाङ्क्तम्'[b] इत्यनुक्रमणिकायामुक्तत्वात् । प्रधानहविषः स्विष्टकृतश्चेति वाक्यशेषः ।

**पञ्चपदा-आप्त्यै ।** उक्तार्थम् । अत्र च यथाम्नानक्रममेव 'अग्ने तमद्य'[c] 5. २, ३
'अधाह्यग्ने'[d] इत्येते प्रधानस्य याज्यानुवाक्ये । 'एभिर्नो अर्कैः'[e] 'आभिष्टे अद्य'[f]
इत्येते स्विष्टकृत इति भायात् । याज्यापुरोनुवाक्या इत्यविशेषनिर्देशात् ।
तद्व्यावृत्त्यर्थमाह—**व्यतिषक्ता भवन्ति ।** व्यतिषङ्गो व्यत्यासः । पाठक्रम- 5. ४
मुल्लङ्घ्य प्रधानयागे 'अग्ने तमद्य'[g] इत्येतामाद्यामृचं पुरोनुवाक्यामुक्त्वा 'अधा
ह्यग्नेः क्रतोः'[h] इत्येतामुज्झित्वा तृतीयाम् 'एभिर्नो अर्कैः'[i] इति याज्यां पठेत् ।
स्विष्टकृद्यागे द्वितीयाम् 'अधा ह्यग्ने'[j] इत्येतां पुरोनुवाक्यामुक्त्वा चतुर्थीम्
'आभिष्टे अद्य'[k] इत्येतां याज्यां पठेत् । एवं प्रधानस्विष्टकृतोरेता ऋचो
व्यत्यस्य याज्यापुरोनुवाक्ये[1] कुर्यादित्यर्थः । सूत्र्यते हि—'अग्ने तमद्येति
प्रथमातृतीये हविषो द्वितीयाचतुर्थ्यौ स्विष्टकृतः'[l] इति । व्यतिषक्तत्वं स्तौति—
**व्यतिषक्ता-इति ।** इतिशब्दो हेत्वर्थः । यस्मादिमे परिदृश्यमानाश्चक्षुरादयः 5. ५
प्राणाः सुसंबद्धा एव सन्त आत्मानं शरीरं पालयन्ति । वैशब्दः प्रसिद्ध्यर्थः । तस्माद् व्यतिषक्ता याज्यापुरोनुवाक्या भवन्ति । पालनं नाम स्वोचिततत्तत्प्रवृत्तिहेतुत्वम् । संबन्धश्चान्योन्यं साहाय्याचरणम् । न हि चक्षुरादीनामन्योन्यवार्तानभिज्ञत्वे तन्निमित्ता शरीरप्रवृत्तिरुपपद्यते । तथा सत्यस्य

a. RV. 4. 10. 1.
b. SA. IV. 10.
c. RV. 4. 10. 1.
d. RV. 4. 10. 2.
e. RV. 4. 10. 3.
f. RV. 4. 10. 4.
g. RV. 4. 10. 1.
h. RV. 4. 10. 2.
i. RV. 4. 10. 3.
j. RV. 4. 10. 2.
k. RV. 4. 10. 4.
l. ŚŚ. 2. 5. 18.

1. T. याज्यानुवाक्ये

काष्ठलोष्टादितुल्यत्वप्रसङ्गात् । अनेन चार्थवादेन प्रधानस्विष्टकृतोरात्मत्वं याज्यापुरोनुवाक्यानां चोपकारकत्वेन प्राणत्वमुन्नेतव्यम् । यद्वा आत्मशब्दो भोक्तृवाचकः । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'[a] इत्युक्तेः । अन्योन्योपकृतानामेव चक्षुरादीनां भोक्तुः शब्दादिविषयभोगसाधकत्वात् प्राणानामात्मपालकत्वमवसेयम् ।

5. ६ अथास्या इष्टेरुपांशुप्रयोज्यतां विधत्ते—**सा-अनुयाजाभ्याम्** । सा पुनराधेयेष्टिः सर्वैवोपांशु भवतीत्यन्वयः। सर्वशब्दस्याङ्गिमात्रपरत्वशङ्कां वारयति—ससामिधेनीकेति । सामिधेन्योऽप्युपांश्वेव पठनीया इत्यर्थः । एवं सत्युत्तमानुयाजादेरङ्गकलापस्याप्युपांशुत्वं प्रसज्येतेति तन्निवृत्त्यर्थमाह—आ पूर्वाभ्यामनुयाजाभ्यामिति । आङयमभिविध्यर्थः । न मर्यादार्थः । पूर्वाभ्यामनुयाजाभ्यां सहार्वाचीनं सर्वमङ्गजातम्[1] अङ्गि चोपांश्वेव प्रयोक्तव्यमित्यर्थः । सूत्र्यते हि—'सर्वं वा सह पूर्वाभ्यामनुयाजाभ्याम्'[b] इति । उत्तमानुयाजप्रभृतेरङ्गकलापस्यानन्तरमेव उच्चैष्ट्वं विधास्यति । आश्वलायनीयसूत्रे च उपांशुविधिप्रकरणे 'पौनराधेयिकी च प्रागुत्तमादनुयाजाद्'[c] इति ।

5. ७ किमिति तावत एवोपांशुत्वमित्यत आह—**आ-भवन्ति** । आगन्तुत्वेन विभक्तीनामुपांशुप्रयोज्यत्वं सिद्धवत्कृत्य इदमुच्यते । तस्माद् विभक्तयोऽग्नेऽग्निमित्याद्या अस्मादनुयाजद्वयादा तदभिव्याप्यानुबद्धा भवन्ति । नोत्तरेऽङ्गजाते विशेषः कश्चिद् दृश्यते । अतस्तस्य प्राकृतत्वादुत्पत्तिशिष्ट एव स्वर
5. ८-१० आदरणीयः । पूर्वस्य त्वागन्तुत्वादुपांशुत्वमेव । हेत्वन्तरमाह—**अथो-आप्त्यै** । अथो इत्यपि चेत्यर्थः । वैशब्दो यस्मादर्थे । यस्मात् सर्वे कामा विभक्तिषु निहिता इति शेषः । तद्धेतुत्वात् । यथा बीजे वृक्षः तिले तैलमित्यादिव्यपदेशः । विभक्तयः सर्वकाम्यवस्तुलब्धिहेतव इत्यर्थः । तस्मादुपांशु विभक्तयो भवन्ति । विभक्तयो हि सर्वकामावाप्तये प्रयुज्यन्ते । कामानां च लाभावस्थायां लोके

a. KU. 1. 3. 4.
b. ŚŚ. 2. 5. 24.
c. AŚ. 2. 15. 9.

1. T. omits सर्वम्

गृह्यमानता दृश्यते । तथा च तैत्तिरीये—'उपांशु यजति यथा वामं वसु विविदानो गूहति तादृगेव तत्'[a] इति । तस्मादुपांशुप्रयोगः सर्वेषां कामानामवाप्त्यै सम्पद्यते । अथोत्तमानुयाजादेरङ्गजातस्य[1] उच्चैष्ट्वं विधत्ते—**उच्चैः-आह** । 5.११,१२
एतद् दृष्टान्तोपन्यासपुरःसरं स्तौति—**तद्-इति** । तत् तत्र लोके यथा 5.१३,१४
कश्चित् पुरुषः[2] चोरापहृतं धनं येन केनचिदुपायेनान्विष्य लब्ध्वं सदहमेतद्धनं लब्धवानस्मीत्याविष्कुर्यात् परेभ्यः । तथा अयमप्याधानोत्तरकालमलब्धतया नष्टप्रायान् कामांस्तदुपायभूतेनानेन पुनराधेयकर्मणा लब्ध्वा कामानशेषान् प्राप्तवानस्मीत्युद्घोषयत्येव । यदेतदुत्तमानुयाजादेरुच्चैः सङ्कीर्तनं तदात्मनः कृतार्थत्वोद्घोषणमेवेत्यर्थः । इदानीमुपांशुविधौ पक्षान्तरमुपक्षिपति—**त्रयम्-** 5. १५
**इति** । उशब्द एवकारार्थः । हशब्दः सांप्रदायिकत्वद्योतकः । एके शाखिनः त्रयमेवोपांशु कुर्वन्ति । अन्यत् सर्वं तूच्चैरेव कुर्वन्ति । किं तत् त्रयमिति ? तदाह—विभक्तीरुत्तरमाज्यभागं हविरिति । अत्र हेतुमप्याहुरित्याह—**एतावद्-** 5. १६
**इति** । कृत्वेति शेषः । आगन्तु अनित्यं प्रकृतेरप्राप्तमौपदेशिकमित्यर्थः । प्राकृतं पुनरुत्पत्तिशिष्टेनैव स्वरेण प्रयोक्तव्यम् । हिशब्दो हेत्वर्थः । उपांशुत्वोच्चैष्ट्वे प्रत्येकमभिष्टूय ते समुदितरूपेणाभिष्टौति—**सा-आप्नोति** । सा पौनराधेयि- 5.१७-१९
कीष्टिः उपांशु भवति । निरुक्ता निष्कृष्य विस्पष्टमुच्चैरुक्ता निरुक्ता उच्चैः प्रयोज्या च भवति । तत्र चाग्ने रूपद्वयमस्ति निरुक्तं सर्वलोकप्रत्यक्षं प्रतियज्ञशालं परिदृश्यमानमेकम् । अपरं त्वनिरुक्तमतीन्द्रियं शब्दैकावगम्यं सूक्ष्मम् । तदेतद् रूपद्वयमप्यस्याग्नेः[3] संबन्धि तेनोपांशुनिरुक्तेष्ट्यनुष्ठानेन प्राप्नोति । इह जन्मनि निखिलान् भोगान् भुक्त्वा[4] परत्र सर्वदेवतात्मकाग्न्यात्मकत्वं प्राप्नोतीत्यर्थः ।

एवं पुनराधेयं विधाय तत्र शाखान्तरीयं कंचित् पक्षमुपन्यस्यति—
**सर्वाग्नेयं-कुर्वन्ति** । एके शाखिन एतत् पुनराधेयं सर्वाग्नेयं कुर्वन्ति । सर्वमङ्ग- 5. २०
जातमङ्गि चाग्निदेवताकं यस्य तत् सर्वाग्नेयम् । एवं सति य उत्तर आज्यभाग

a. TS. 1. 5. 2. 3.

1. T. omits जात
2. A. M. omit.
3. T. omits अस्य
4. A. M. लब्ध्वा

इहाग्निपावमान उक्तः सोऽप्याग्नेय इति सिद्धम्। ततश्च द्वावप्याज्यभागौ वार्त्रघ्नावेव भवतः। या त्वदितिदेवत्या द्वितीयेष्टिः विधास्यते याश्च शाखान्तरीया आग्निवारुणीष्ट्यादयः तासां सर्वासामप्यभावः सिध्यति; सर्वशब्द-
5. २१ प्रयोगात्। अमुं पक्षं प्रत्याचष्टे—**न-कुर्यात्।** तथेति सर्वाग्नेयत्वेनेत्यर्थः। न चात्र हेतुः कश्चिद् वचनीय इति शङ्कनीयम्। हेतुसापेक्षतया स्वार्थविधायकत्वे अनपेक्षत्वलक्षणस्य प्रामाण्यस्य प्रहाणप्रसङ्गात्। अत एव विद्वद्भिः[1] 'तेन ह्यन्नं क्रियते'[a] इत्यादौ हेत्वर्थहिशब्दश्रवणेऽपि हेत्वन्यनिराकरणेन स्तुत्यैवान्वयः समर्थितोऽर्थवादाधिकरणे[b]। तेन चात्रापि हेतुवचना येऽर्थवादा दृश्यन्ते तेऽपि स्तुतिपरतया योजनीयाः। न हि शास्त्रमपेक्षाकलामपि सोढुं प्रभवति। न च विचारापेक्षत्वमाम्नायस्य अनपेक्षत्वविघाति। तस्य वेदान्तर्भूतत्वात्। स्वव्यतिरिक्तापेक्षत्वं हि सापेक्षत्वम्। अत एवोक्तमभियुक्तैः—'मीमांसापूजितस्तर्कैस्तर्को[2] वेदसमुद्भवः। सोऽतो वेदो रुमाप्राप्तकाष्ठाम्बुलवणात्मवत्'[c] इति। निशितबुद्धयस्तु वेदार्थप्रतिपत्तिप्रतिबन्धकासंभावनाविपरीतभावनानिरसनमुखेन विचारस्य वेदोपकारकत्वमास्थिषत। तन्मते तु न सापेक्षत्वगन्धोऽपीत्यास्तां तावत्।

5. २२ इदानीं पौनराधेयिक्या इष्टेर्दक्षिणां विधत्ते—**तस्यै-दक्षिणा।** षष्ठ्यर्थे चतुर्थी। तस्या इष्टेरिति शेषः। जरन् शीर्णः[3]। संव्यायः पटः प्रावारो वा। स च पुनः पश्चादुत्स्यूतः। नूतनैरन्यैस्तन्तुभिः स्यूतः। कद्रथः शिथिलावयवतया कुत्सितो रथः। स च पुनः संस्कृतः। नूतनैर्दारुखण्डैर्दृढीकृतः। तथानड्वान् बलीवर्दः। अत्रैव विकल्प्याह—हिरण्यं वा इति।

अत्र सर्वत्र यद् द्रव्याणां साधारण्येन पुनर्निर्वर्त्यत्वमुक्तं तत् स्तौति—
5. २३ **पुनःकर्म ह्येतत्।** यदेतत् पुनराधेयनामकं कर्म तद् यस्मात् पुनः क्रियमाणं कर्म भवति। तस्मादमीषां दक्षिणात्वमनुरूपमित्यर्थः।

a. ŚB. 2. 5. 2. 23.
b. Śabara on JS. 1. 2. 26.
c. *Nyāya-vārttika-tātparya-ṭīkā* p. 61.

1. T. तत्रभवद्भिः
2. MSS. मीमांसापूजितस्तर्को
3. T. जीर्णः

अथादितिदेवत्यां कांचिद् द्वितीयामिष्टिं विधत्ते—**आदित्या-द्वितीया।** 5. २४
स्तौति—**प्रतिष्ठा-एव।** 'अदितिरदीना पृथिवी भवति'[a] इति नैरुक्ताः। सा च 5.२५,२६
प्रतिष्ठा प्रतितिष्ठन्त्यस्यां भूतानीति व्युत्पत्तेः। तथान्यत्रापि 'इयं वा अदितिः'[b] इति पृथिव्या अदितित्वमाम्नायते। अतश्चादितिदेवत्यैषेष्टिः प्रतिष्ठित्यै इहलोके चिरजीवित्वाय परत्र चामृतत्वप्राप्तये संपद्यते। असंदेहार्थ एवकारः। अभ्यासोऽध्यायपरिसमाप्त्यर्थः॥

इति पञ्चमः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मूर्छालमोहाम्बुधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
आधानं पुनराहितिं च कथयन् कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय आद्यो गतः॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**प्रथमदशके प्रथमोऽध्यायः**

a. Cf. N. 4. 22. 1; *Nighaṇṭu* 1. 1.

b. AB. 3. 31. 9.

अथ

# द्वितीयोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ।।
आधानपुनराधानविधिः प्रकटितोऽग्रिमे ।
अध्यायेऽथ द्वितीयेऽस्मिन्नग्निहोत्रं विधीयते ।।

प्रथमेऽध्याये तावदशेषश्रौतस्मार्तप्रवृत्तिहेतुभूतमग्न्याधेयमुपवर्णितम् । इदानीं द्वितीयेनाध्यायेन आधानानन्तरमनुष्ठेयमग्निहोत्रं विधित्सुः आदौ 'अग्निहोत्रं जुहुयाद्'[a] इत्युत्पत्तिविध्युन्नयनार्थं प्रवर्ग्यत्वसंपादनेन कर्मस्वरूपमेव
I. १ स्तौति—**घर्मो-अग्निहोत्रम् ।** कर्मणि कर्मान्तरसंपादने किं प्रयोजनमिति चेद् उच्यते । न तावत् कस्मिंश्चित् कर्मणि किञ्चिदेव कर्मान्तरं संपाद्यमानं दृश्यते । किं तु स्वल्पे कर्मणि महत् कर्म । यथा 'एष वै हविर्धानीयो दर्शपूर्णमासयाजी'[b] इति । अत्र हि दर्शपूर्णमासकर्मणि सोमयागापेक्षया स्वल्पे महत् सोमयागाख्यं कर्म संपादितम् । तच्च संपादनं फलभूयस्त्वाय कल्पते । तदेतत् 'प्रजापतिर्यज्ञानसृजत'[c] इत्यादिना अग्निहोत्रिणो विदुषः अग्निष्टोमादिफलप्राप्तिरभिहिता । अतः स्वल्पे कर्मणि महत् कर्म संपाद्यानुष्ठाने महाकर्मफलप्राप्तिविवक्षावगम्यते । अग्निहोत्रापेक्षया महच्चैतत् प्रवर्ग्याख्यं कर्म अधिकारतः स्वरूपतः फलतश्च । अधिकारतस्तावद् अग्निहोत्रे तावत् कृताधानोऽधिकारी । प्रवर्ग्ये तु न कृताधानत्वमेव केवलमधिकारकारणम् । किं तु अन्यदपि किंचिदवगम्यते । पठिष्यति—'शिरो वा एतद् यज्ञस्य यन्महावीरः । तन्न प्रथमयज्ञे प्रवृञ्ज्यात् । उपनामुक उ एवैनमुत्तरो यज्ञो भवति यः प्रथमयज्ञे न प्रवृणक्ति । कामं तु योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यात् । आत्मा वै स यज्ञस्य । आत्मनैव तद् यज्ञं समर्धयति'[d] इति । अत्र महावीरशब्दाभिहितस्य प्रवर्ग्यकर्मणः प्रथमयज्ञानुष्ठाने दोषकीर्तनेन अननुष्ठेयत्वमुक्त्वा अनूचानत्वादिगुणविशिष्टस्य

a. Maitrī U. 6. 36.
b. TS. 2. 5. 6. 3.
c. TS. 1. 6. 9. 1.
d. KB. VIII. 4. १–६.

विकल्पेनानुष्ठेयत्वमुक्तम् । तथा च तन्मूलं सूत्रम्—'अप्रवर्ग्यः प्रथमयज्ञः । विकल्पः श्रोत्रियस्य'[a] इति । आश्वलायनीये च 'प्रथमयज्ञे नैके घर्मम्'[b] इति । अत्रैतद्[1] वयमवगच्छामः । नेतरेष्विव कर्मसु कृताधान एव प्रवर्ग्यकर्मण्यधिकारी । किंतु यः कृताधानः सन्ननुष्ठिताग्निष्टोमप्रथमप्रयोगः अनूचानत्वादिगुणविशिष्टः सोऽत्राधिक्रियत इति । उक्तविशेषविरहिणः कृताधानस्यापि सत एतदनुष्ठाने सत्युत्तरयज्ञानुपनतिदोषकीर्तनात् । तदेवमधिकारतो महत्त्वं सिद्धम्[2] । स्वरूपतो महत्त्वं तु व्यक्तमेव । तथा फलतोऽपि । उत्तरत्रापि इह 'तमेकशतेनाभिष्टुयाद्'[c] इति प्रस्तुत्य 'तमेतमात्मानं यजमानोऽभिसंभवति । यमेतमादित्ये पुरुषं वेदयन्ते । स इन्द्रः स प्रजापतिस्तद् ब्रह्म । तदत्रैव यजमानः सर्वासां देवतानां सलोकतां सायुज्यमाप्नोति'[d] इति सर्वदेवतात्मकपरब्रह्मप्राप्तिलक्षणं फलमुक्तं स्तुत्यर्थम् । यदेतदग्निहोत्राख्यं कर्मास्ति तदेतद् घर्मः प्रवर्ग्याख्यं कर्म क्रियत इति वेदितव्यम् । **तद्-प्रीणाति ।** तत् तत्राग्निहोत्रस्य 1. २, ३
प्रवर्ग्यत्वे सति । यो घर्म इति प्रसिद्धः सोऽयमादित्य एव । य आदित्यो दिवि द्योतते । 'घृ क्षरणदीप्त्योः'[e] इति दीप्त्यर्थाद् धातोरुत्पन्नस्य घर्मशब्दस्य······ देवताभिधायकत्वात् । तत्प्राप्तिहेतुत्वाच्च तदात्मकत्वनिर्देशः । तथा च तेनाग्निहोत्रकर्मणा एतमादित्यमेव प्रीणयति । एवं 'यत् स्तूयते तद् विधीयते'[f] इति न्यायेन स्तुत्याग्निहोत्रोत्पत्ति······'ऋङ्मयो यजुर्मयः साममयो वेदमयो ब्रह्ममयोऽमृतमयः । संभूय देवता अप्येति । य एवं वेद यश्चैवं विद्वानेतेन यज्ञक्रतुना यजते'[g] इति । तदेवं महत्तमं तावत् प्रवर्ग्याख्यं कर्म । तदत्राग्निहोत्रकर्मणि संपाद्य विधत्ते···विधीयत इति न्यायात् ।

तत् कर्म विशिष्टकालानुष्ठेयतया विधत्ते—**स-जुहोति ।** न चात्र काल 1. ४
एव विधीयत इति शङ्क्यम् । कालस्यानुपादेयता प्रयाजादिवद् विधेयत्वानुपपत्तेः ।

a. ŚS. 5. 9. 1–2.
b. AŚ. 4. 8. 16.
c. KB. VIII. 4. ९.
d. KB. VIII. 4. १३–१६
e. DhP. 1096.
f. Ānandagiri on BUp.bhāṣya 1. 3. 1.
g. AB. 1. 22. 15.

1. T. अत्र चैतद्
2. T. omits.

ननु 'यावज्जीवमग्निहोत्रं जुहोति'[a] इति सातत्यहोमविधायिप्रधानवाक्यविरुद्धत्वात् 'स वै सायं च प्रातश्च जुहोति' इति वाक्यमन्यथा व्याख्येयमिति चेत् निर्णीतं ह्येतदधिकारलक्षणे[b]—'यावज्जीवमग्निहोत्रं जुहोति इति श्रूयते। तत्र जीवनस्य निमित्तत्वेनोक्तत्वात् सति च निमित्ते[1] नैमित्तिकस्यावश्यंभावात् जीवतः पुरुषस्यानुष्ठानसातत्यमुच्यत इति प्राप्तम्। न च सायंप्रातःकालयोरङ्गत्वेन चोदितत्वात् सातत्यहोमपक्षे अङ्गलोपः स्यादिति वाच्यम्; प्रधानलोपादङ्गलोपस्यैव वरीयस्त्वात्। तस्मादर्थाविरुद्धेषु कालेषु सातत्येन होमः कर्तव्य इति पूर्वः पक्षः। सिद्धान्तस्तु—स्यादेतदेवम्। यदि प्रयाजादिवत् कालोऽङ्गं विधीयेत, न त्वेवम्; तस्यानुपादेयत्वेनाविधेयत्वात्। किं तु तस्मिन् काले स्वतःप्राप्ते कर्मानुष्ठेयतया विधीयते। तथा च तस्य जीवननिमित्तसङ्कोचतयैवान्वयः। सायंप्रातःकालावच्छिन्नजीवने[2] निमित्ते सति नैमित्तिकं कर्म कर्तव्यमिति। तथा सति जीवननिमित्तमेव कालोऽपि। न विशेषः कश्चित्। अतो न सातत्यम्। किं तु सायंप्रातःकालयोरनुष्ठानम्' इति।

नन्वेवं तर्हि सकृदेव सायंप्रातरग्निहोत्रहोमः कर्तव्यः किं न स्यात्? न स्यात्। तत्रैवाधिकारलक्षणे होमावृत्तेर्निर्णीतत्वात्। तथाहि समनन्तराधिकरणे स्थितम्— उदाहृत एव वाक्ये सन्देहः। किं सकृत् सायंप्रातरादिकाले कर्तव्यमग्निहोत्रादि[3] किं वा आवृत्त्या होतव्यमिति। अग्निहोत्रादेः सकृदेवानुष्ठानमिति प्राप्तम्; तावतैव विधायकस्य चरितार्थीभावादिति पूर्वः पक्षः। सिद्धान्तस्तु—आगते आगते काले प्रयोक्तव्यम्। कालविशिष्टं हि जीवनं निमित्तम्। अतो निमित्तस्यावृत्तौ नैमित्तिकस्यावृत्तिः सिद्धैव। किं च 'अव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वातिपातयेत्'[c] इत्यागते काले प्रयोगावश्यकत्वदर्शनादप्यावृत्तिरिति'। तथा च पारमर्षं सूत्रम्—'तेषामौत्पत्तिकत्वादागमेन प्रवर्तेरन्'[d] इति। तस्मादा-

a.
b. Cf. JS. 6. 2. 23-26.
c. TS. 2. 2. 5. 4.
d. JS. 6. 2. 27.

1. T. omits.
2. T. °जीवन
3. T. होतव्यम् for कर्तव्यम्

वृत्त्या यावज्जीवं सायंरात्र्युपक्रमे प्रातर्दिवसोपक्रमे चाग्निहोत्रहोमः कर्तव्य इति शास्त्रार्थः । कालविषयः प्रपञ्चः 'उदिते होतव्य३म्'[a] इत्यादिना अध्यायान्ते वर्तिष्यते ।

अथ क्रमेण कालद्वयावच्छेदेन देवताद्वयमुपदिशति—**अग्नये-प्रातः** । 1. ५
जुहुयादिति शेषः । स्तौति—**सौर्य-प्रीणाति** । सूर्यस्येदं सौर्यम् । अग्नेरिय- 1. ६, ७
माग्नेयी । तत्र 'अह्नां केतुः'[b] इत्यादिश्रवणात् सौर्यत्वमह्नः । रात्र्या आग्नेयीत्वं श्रुत्यन्तरे श्रुतम्—'अहर्देवानामासीद् रात्रिरसुराणाम् । तेऽसुरा यद् देवानां वित्तं वेद्यमासीत् तेन सह रात्रिं प्राविशन् । ते देवा हीना अमन्यन्त । तेऽपश्यन् आग्नेयी रात्रिराग्नेयाः पशव इममेवाग्निं स्तवाम स नः स्तुतः पशून् पुनर्दास्यतीति । तेऽग्निमस्तुवन् । स एभ्यः स्तुतो रात्रिया अध्यहरभि पशून् निरार्जत्'[c] इति । अस्यायमर्थः—अहोरात्रयोर्मध्ये देवा अहराश्रितवन्तः । असुरास्तु रात्रिमाश्रितवन्तः । तत्रासुरा बलीयांसः सन्तो यद् देवानां किंचित् स्वं विद्यते तदपहृत्य देवैर्दुरुपसर्पा स्वकीयां रात्रिं प्रविश्य स्थितवन्तः । अथ देवा निःस्वतया दुःखितास्तत्प्राप्त्युपायं विचार्य रात्र्यधिदेवता अग्निरेव तेन तमभिष्टूय तत्प्रसादाद् असुरैरपहृतं लप्स्यामह इति निश्चित्य तथा कृतवन्तः । तत्राग्निः तत्कृतस्तुत्या प्रसन्नमानसः सन् रात्रिनिगूढानसुरान् निहत्य तदपहृतं धनं देवेभ्यो दत्तवान् इति । अस्यामाख्यायिकायां रात्र्या आग्नेयीत्वं व्यक्तमवगम्यते । ततश्च तेन देवताद्वयसंप्रदानकेन कालद्वयानुष्ठितेन यागेन आगमनवेलायामेव अहोरात्रे यजमानः प्रीणयति । यथा स्वगृहानायान्तमतिथिं तदागमनवेलायामेव विधिवत् प्रत्युद्गमनादिभिरुपचारैः प्रीणयति तद्वत् ।

कालदेवते उपदिश्य द्रव्यमुपदिशति—**पयसा जुहुयात्** । पयोऽग्निहोत्र्या 1. ८
धेनोः क्षीरं, न तु लौकिकम् । स्तौति—**एष-प्रीणाति** । यत् पयो नामास्ति स 1. ९,१०
एष सर्वासामप्योषधीनां रसनीयः सारभूतोंऽश एव भवति । एतत्प्रसिद्धिद्योतकौ हवैशब्दौ । गोभिर्भक्षितानामोषधीनां परिणाम एव पय इति तावदावृद्धा-

a. KB. II. 7. १६.
b. RV. 10. 85. 19.
c. TS. 1. 5. 9. 2–3.

ङ्गनाबालं[1] लोकप्रसिद्धमेव । तृणभक्षणविरहे पयसोऽदर्शनात् । तद्भावे च तदुपलम्भात् । श्रुतिप्रसिद्धं च । तथा च सांनाय्यविध्यर्थवादे तैत्तिरीये श्रूयते-- 'इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्यारत् । तदोषधयो वीरुधोऽभवन् । स प्रजापतिमुपाधावत् । वृत्रं मे जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्याच्छंत् । तदोषधयो वीरुधोऽभूवन् इति । स प्रजापतिः पशूनब्रवीत् एतस्मै सं नयतेति । तत् पशव ओषधीभ्योऽध्यात्मन् समनयन् । तत् प्रत्यदुहन् । यत् समनयन् तत् सांनाय्यस्य सांनाय्यत्वम्'[a] इति । तत् पयसा होमे सत्ययं यजमानः सर्वैरेवौषधिरसैरग्नीन् प्रीणयति । पयसः सर्वौषधिरसत्वात् सर्वौषधिरसहोमे सति यादृशी प्रीतिः संभाव्यते सा पयोहोम एव संपत्स्यत इत्यर्थः ।

1. ११-१३ अथ दध्यादिद्रव्यान्तराणि विधत्ते—**तदु-प्रीणाति** । इतिशब्दस्य आहुरित्यनेनसंबन्धः । तत् तत्र द्रव्यविधौ । केचिदभिज्ञा आहुः । निपातद्वयं विशेषद्योतकम् । किमाहुरित्यत्राह—यद् यदीत्यर्थः । अश्यते उपयुज्यते इत्यशनं दध्यादि । तत् सर्वमेव जुहुयात् । तत् तर्हि स्वेनैवान्नेन अग्नीन् प्रीणयति । कथमस्याग्न्यन्नत्वमित्यत आह—सर्वं वा इदमग्नेरन्नम् इति । यदेतद् दृश्यमानं जगदस्ति तत् सर्वमप्यग्नेरन्नमेव । अग्नेः सर्वात्तृत्वात् । तत्र यद्धोमयोग्यं दध्यादिद्रव्यं तस्याग्न्यन्नत्वं किं वक्तव्यम् ? अग्नेः सर्वान्नत्वं 'युवानं विश्पतिं कविं विश्वादम्'[b] इति मन्त्रपदसिद्धम् । विश्वं समस्तं जगदत्तीति विश्वात् । तथा च तद्धोमे सति यथा स्वगृहानायातमतिथिं तदीप्सितसमस्तोपकरणसहितान्नसमर्पणेन कश्चिद् गृहमेधी संतोषयति तद्वदग्नीनपि यजमानः प्रीणयति । देवताप्रीतेश्च पश्वादिफलप्राप्तिहेतुभूतत्वं श्रूयते—'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति'[c] इति ।

इत्थमाग्निहोत्रिकं द्रव्यमुपदिश्य तस्य पयःप्रभृतिकस्य द्रव्यस्य गार्ह-
1. १४ पत्याग्नौ पचनमाहवनीये होमं च विधत्ते—**गार्हपत्ये-जुहुयात्** । गार्हपत्यः

a. TS. 2. 5. 3. 2–3.
b. RV. 8. 44. 26.
c. TS. 2. 5. 4. 3.

1. T. आविब्रदङ्गनाबालं for आवृद्धा

पश्चिमाग्निः। आहवनीयः पूर्वाग्निः। एतद्द्वयत्रस्थापकं हेतुमाह—**श्रपणो-आहवनीयः।** श्रप्यन्ते पक्वानि क्रियन्ते चरुपुरोळाशादीनि यस्मिन् स 1.१५,१६
तथोक्तः। आभिमुख्येन हूयन्ते क्षिप्यन्ते हवींषि यस्मिन् स तथा। वैशब्दः प्रसिद्धौ। **तस्माद्–जुहुयात्।** प्रतिज्ञातस्य निगमनमेतत्। 1. १७

अथोपरिष्टाद् विधित्स्यमानयोः अधिश्रयणावद्योतनयोः अङ्गत्वेन गार्ह-पत्यस्थानामङ्गाराणाम् उदङ् निरूहणं विधत्ते—**व्यन्तान्–करोति।** गार्हपत्य- 1. १८
स्थानङ्गारान् व्यन्तान् कुर्यात्। विभक्तः पृथग्भूतः अन्तः स्वरूपं येषां ते तथोक्ताः। उत्तरतो निरूहणं चात्र विवक्षितम्। तथैव सूत्रकारवचनात्[a]।

व्यन्तत्वं स्तौति—**इमौ–नानेव।** यद् व्यन्तीकरणं तेन इमौ पृथिवी- 1.१९,२०
द्युलोकौ विभक्तौ करोति। तरतिधातोर्गत्यर्थत्वात्। यस्मादेतत् कर्म लोक-विभागकरणरूपं तस्मादेव खल्विमौ पृथिवीद्युलोकौ वंशस्योत्तराधरदलवत् सर्वदा सहैव वर्तमानावपि भिन्नावेव भवतः। अतः सकलजीवस्थितिहेतोः द्यावापृथिवीविभागस्य हेतुत्वात् प्रशस्तमिदमुदङ्निरूहणकर्मेत्यर्थः।

अथाङ्गारेष्वधिश्रिते अग्निहोत्रद्रव्ये अङ्गारदीप्तया समिधावद्योतनकर्मणा एनद्धोमीयं द्रव्यं शृतं करोत्येव। स्तौति—**अथ–तत्।** अवद्योतनं प्रकाश- 1.२१,२२
जननम्। तेनावद्योतनकर्मणा एनद्धोमीयं द्रव्यं शृतं करोत्येव। दृष्टे शृतत्व-फले संभवति अदृष्टफलकल्पनानुपपत्तिः एवकारार्थः। तथा च दृष्टसमवायि-तया अदृष्टफलमपि विवक्षितं द्रष्टव्यम्।

अधिश्रितेऽवद्योतिते चाग्निहोत्रहविषि उदकबिन्दवः स्रुवेण क्षारयितव्या इत्यमुं विधिमनूद्य स्तौति—**अथ–कृत्स्नतायै।** यदेतदपां प्रत्यानयनं नाम[1] 1.२३-२५
किंचित् कर्मास्ति तद्धविषः कृत्स्नतायै संपद्यत इत्यन्वयः। कुतोऽनेन कार्त्स्न्य-संपत्तिरिति? तदाह—यस्मादाप एव कृत्स्नानि हवींषि भवन्ति। कृत्स्नानीत्यस्य व्याख्यानं सर्वाणीति। अपां सर्वकारणत्वाद् वा हविःसंपादनस्याप्रपश्चद्धारम्भ-पुरःसरत्वाद् वा अद्भिः प्रोक्षितस्य हविष्ट्वसंपत्तेर्वा अपां सर्वहविष्ट्वम्। यस्मादेवं तस्माद् अप्प्रत्यानयनेन हविषः कार्त्स्न्यसंपत्तिः उपपत्तिमतीत्यर्थः।

a. Cf. ŚŚ. 2. 8. 8.

1. T. omits.

अप्प्रत्यानयनोत्तरकालमपि पूर्ववदवद्योतनं कर्तव्यमित्याह—**अथ-**
1.२६,२७ **श्रपयति ।** पूर्वेणावद्योतनेन हविस्तावच्छृतमभूत् । अनन्तरमस्मिन् प्रत्यानीता
अश्रृता या आपः सन्ति ता अप एव पुनरवद्योतनकर्मणा श्रृताः करोति ।
इतरथा श्रृताश्रृतं हविः स्यादिति भावः ।

1. २८ अथ श्रृतस्य हविषोऽङ्गारेभ्योऽवरोपणं विधत्ते—**त्रिरुपसादम्-त्रैवि-
ध्याय ।** अङ्गाराणामुदग्देशे होमीयं द्रव्यमवरोपयेत् । तच्च त्रिरुपसादं त्रिवार-
मुपसाद्योपसाद्य त्रिषु स्थानेषु क्रमेण निधायान्ततः स्थानत्रयस्योदग्देशे
हविर्निदध्यात् । उद्वासनस्य त्रिवारं कर्तव्यतां स्तौति—त्रैविध्यायेति । तिस्रो
विधाः प्रकारा यस्य तदुपसादनं त्रिविधम् । तस्य भावस्त्रैविध्यम् । तत्सिद्ध्यर्थं
त्रिरुपसादमेवोद्वासयेत् । त्रिविधत्वं किमिति संपाद्यत इति तत्राह—**त्रिवृद्धि**
1. २९ **देवकर्म ।** यद् देवसंबन्धि किंचित् कर्मास्ति तत् सर्वं त्रिवृद् भवति । तिस्रो
वृतो वृत्तय आवृत्तयो यस्य तत् तथा । हिशब्दो हेतौ प्रसिद्धौ वा । तथा
ह्यर्थवादः—'त्र्यावृद्धि यज्ञः'[a] इति ।

1. ३० उद्वासन एव नियमान्तरं विधत्ते—**अनुच्छिन्दन्निव हरेत् ।** हविषोऽङ्गा-
रेभ्योऽवरोपणे हि पृथिव्याः सकाशाद् व्युच्छेदो[1] भवेत् । स च न युक्तः वक्ष्यमाण-
दोषात् । अतस्तमकुर्वन्नेव हविष्पात्रीं पृथिव्या संस्पर्शयन्नेव उद्वासयेदित्यर्थः ।
1. ३१ अनुच्छेदे प्रयोजनमाह—**तथा-भवति ।** अनुच्छेदेन हरणे सति यजमानोऽप्रच्या-
वुको भवेत् । प्रच्यावुकः प्रच्यवनशीलः । न प्रच्यावुकोऽप्रच्यावुकः । ऐहिकादा-
मुष्मिकाच्च पुरुषार्थादप्रच्युतिः अनुच्छेदेन हरणे फलमित्यर्थः । तत एव विच्छेदे
प्रच्युतिदोष उक्तो भवति ।

1. ३२ इतिकर्तव्यतान्तरं विधत्ते—**अथ-इति ।** उपवेषो नाम वत्सापाकरणार्थं
छिन्नायाः पलाशशाखाया मूलतः परित्यक्तो भागः । इह तु समिन्मात्रमेवोच्यते ।
सांनाय्याभावेन पलाशशाखाच्छेदादेरभावात् । तेनोपवेषेण गार्हपत्यस्य दक्षिण-
भागे येऽङ्गाराः स्थिताः सन्ति तान् 'नमो देवेभ्यः'[b] इति मन्त्रं वदन् उप-

a. TB. 2. 1. 3. 4. b. ŚS. 2. 8. 14.

1. T. विच्छेदो

स्पृशेत् । तदेतद् देवानां निरतिशयप्रीतिनिबन्धनमित्याह—**न–देवाः ।** हिशब्दः I. ३३
प्रसिद्धौ । तथा च सोमप्रणयने 'नमो देवेभ्य' इत्यध्वर्युमन्त्रस्य ब्राह्मणम्—'नमो
देवेभ्य इत्याह । नमस्कारो हि देवानाम्'[a] इति । देवा मनुष्यैः क्रियमाणं
नमस्कारं नातिक्रामन्ति । अतिक्रमणं नामानादरणम् । किं तु तेन [1]-प्रसन्नाः
सन्तो-[1] नमस्कर्तुरभिलषितमखिलं समर्पयन्ति ।

अथ प्रागुदङ्निरूढानामङ्गाराणां गार्हपत्याग्नावेव समूहनं विधत्ते—
**सुप्रत्यूळ्हान्–प्रत्यूहेत् ।** ये पूर्वमधिश्रयणार्थमुदङ्निरूढा अङ्गारास्तान् I. ३४
पुनर्गार्हपत्य एव संश्लेषयेत् । कथं ? सुप्रत्यूळ्हान् कृत्वा । सुष्ठु लेशतोऽपि
विभागेन द्रष्टुमशक्यतया संश्लेषितान् कृत्वा प्रत्यूहेत् ।

स्तौति—**तथा–नश्यति ।** तथा सुप्रत्यूहने कृते सति या अस्य यजमानस्य १. ३५
स्वभूता अन्तमचारिणी पत्नी । चन अपि । न केवलं स्वस्य यजमानस्यैवाप्रच्या-
वुकत्वं किं तु पत्न्या नाशोऽपि न भवेदिति चनशब्दार्थः ॥

इति प्रथमः खण्डः

अथ शृतस्य अङ्गारेभ्योऽवरोपितस्य हविषश्चतुर्वारमुन्नयनं विधत्ते—
**चतुरुन्नयेत् ।** उन्नयनं स्रुवेण स्थाल्या उद्धृत्य हविषः स्रुचि प्रापणम् । तथा च 2. १
सूत्रम्—'उन्नयति स्थालीतश्चतुष्कृत्वः पञ्चकृत्वो वा'[b] इति । चतुर्वारं
कर्तव्यतां स्तौति—**चतुष्टयं–आप्त्यै ।** यदिदं दृश्यमानमशेषं जगदस्ति तच्चतुष्ट- 2. २, ३
यमेव भवति । जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुरवयवयुक्तं भवति । तत्र
जरायुजं मानुषशरीरजातम् । अण्डजं कुक्कुटादि । स्वेदजं मत्कुणादि ।
उद्भिज्जं वृक्षवल्ल्यादि । ततश्चतुर्वारं क्रियमाणं हविरुन्नयनमस्य सर्वस्याप्त्यै
ईश्वरत्वाय संपद्यते ।

यदुच्यते सूत्रकारेण पञ्चकृत्वो वोन्नयतीति तत् प्रदर्शयति—**पञ्चकृत्व–**

a. TS. 6. 3. 2. 5. b. Cf. ŚS. 2. 8. 16–17.

1–1. T. omits.

2. ४, ५ **आप्त्यै** । अत्र च वाशब्दो द्रष्टव्यः । फलवचनार्थवादस्तु प्रथमेऽध्याये[a] व्याख्यात एवेति न पुनर्व्याख्यायते ।

अथ स्वल्पे कर्मणि महतः कर्मणः संपादनेन वेदने महाफलावाप्तिमभि-
प्रेत्य[1] अग्निहोत्रीयद्रव्यस्य विधास्यमानेषु त्रिषु सादनेषु क्रमेणोपसत्त्रयदृष्टिः
2. ६ कर्तव्येत्याह—**उपसदो-वेदितव्याः** । अग्निहोत्रे कर्मणि तत्सम्बन्धिषु हविः-
सादनेष्विति यावत् । तिस्र उपसदो यजमानेन वेदितव्याः । सन्ति हि सोम-
यागे दीक्षाहःसु गतेषु सोमाभिषवदिवसात् पूर्वं प्रयोज्या असुरस्वीकृतलोकत्रय-
प्राप्तिहेतुतया स्तूयमानाः त्रय उपसन्नामका यागाः ये 'उपसदः । असुरा वा
एषु लोकेषु'[b] इत्युपरिष्टादेव विधास्यन्ते । तत्र च त्रिभिरुपसादनैः यथाक्रमम्
उपसत्त्रयफलप्राप्तिं जानीयादित्यर्थः ।

प्रथमोपसादनस्वरूपं तत्र प्रथमोपसत्फलप्राप्तिं च दर्शयति—**उन्नीय-**
2. ७, ८ **आप्नोति** । अग्निहोत्रहोमसाधनं पयआदिकं द्रव्यं स्थालीतः स्रुवेणोद्धृत्य
पात्र्यां प्रापय्य गार्हपत्यस्योत्तरतो निधानेन पृथिवीलोकं प्राप्नोति । उपसाद-
2. ९,१० नान्तरं तत्र द्वितीयोपसत्फलावाप्तिं च दर्शयति—**आहवनीये-आप्नोति** । होमं
करिष्यन् गार्हपत्यस्योत्तरदेशात् स्रुचमुद्धृत्य आहवनीयसमीपे दर्भमये विष्टरे
निदध्यात् । तेन च निधानेनान्तरिक्षमाप्नोति । उपसादनान्तरं तत्र तृतीयोप-
2.११,१२ सत्फलप्राप्तिं च दर्शयति—**हुत्वा-आप्नोति** । आहवनीय उपसादयतीत्यनुषञ्ज-
नीयम् । अमुं द्युलोकमित्यर्थः । इदानीं विधास्यमानाग्निहोत्रहोमाङ्गत्वेन
2. १३ समिद्धोमं विधत्ते—**पालाशीं-अभ्यादधाति** । अभ्याधानं होमः । 'ततः समि-
धोऽभ्यादधाति यथागृहीतम्'[c] इत्यादौ तथा दर्शनात् । समिच्छब्दो हि
सामान्यवचनः । प्रयोगस्तु विशिष्टविषय एव । अतः समिधः प्रकृतिद्रव्यं
प्रदर्शयति पालाशीमिति । पलाशः पर्णापरपर्यायो वृक्षविशेषः । पलाशं स्तौति—
2. १४ **सोमो-पलाशः** । यः पलाशो नाम स सोम एव । वैशब्दो मन्त्रब्राह्मणप्रसिद्धि-

a. Cf. KB. I. 3. ३३.
b. KB. VIII. 9. १-२.
c. AŚ. 3. 6. 27.

1. T. omits महा

द्योतनार्थः । तथा हि मन्त्रः—'गायत्रिया ह्रियमाणस्य यत्ते पर्णमपतत् तृतीयस्यै दिवोऽधि । सोऽयं पर्णः सोमपर्णाद्धि जातः ततो हरामि सोमपीथस्यावरुद्ध्यै'[a] इति । तथा ब्राह्मणमपि—'तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्याहरत् । तस्य पर्णमच्छिद्यत । तत् पर्णोऽभवत् । तत् पर्णस्य पर्णत्वम्'[b] इति । द्युशब्दस्याकाशे प्रसिद्धत्वात् तद्व्यावृत्त्या स्वर्गलोकविवक्षां दर्शयितुम् इतस्तृतीयस्यामित्युक्तम् । पृथिवीलोकमारभ्य गणनायां तृतीयः स्वर्गलोको भवति । तत्र स्वर्गलोक एव पूर्वं सोम आसीत् । नेदानीमिव पृथिव्यामभूत् । तदेतदैतरेये श्रूयते—'सोमो वै राजामुष्मिन् लोक आसीत्'[c] इति । 'सोमो वै राजा गन्धर्वेष्वासीद्'[d] इति च । कथं पुनरस्य पृथिव्यामवतारः ? उच्यते । तं सोमं गायत्री पक्षिरूपमवलम्ब्य पृथिवीलोकमाहृतवती । तदेतत् 'कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेताम्'[e] इत्यत्र विस्तरेण प्रतिपादितम् । ऐतरेये च 'ते देवा अब्रुवन् गायत्रीम्'[f] इत्यस्मिन् खण्डे प्रपञ्चितम् । सोमाहरणवेलायां च सोमपालकैर्गन्धर्वैः सह समरसंमर्दे संजाते सति तत्संक्षोभात् सोमलताया लूनं किमपि पर्णं पृथिव्यामपतत् । पक्षिरूपाया गायत्र्याः पक्षलेशः पतित इति केचित् । पृथिव्यां पतितं च तत् पर्णं पलाशवृक्षरूपेण पृथिव्या उदतिष्ठत् । एतदेव पलाशस्य पर्णशब्दवाच्यत्वे निमित्तमिति । न च पर्णात् कथं वृक्षोत्पत्तिरिति शङ्कनीयम् । वेदवचसोऽनाशङ्कनीयत्वात् । न च प्रमाणान्तरविरोधाद् 'आदित्यो यूपः'[g] इत्यादिवद् अप्रामाण्यमाशङ्कनीयम् । विधातुरीश्वरस्य अचिन्त्यशक्तित्वेन पर्णादपि वृक्षोत्पत्त्युपपत्तौ प्रमाणान्तरविरोधाभावात् । न चैवं सति सर्वत्रापि पर्णाद् वृक्षोत्पत्तिः प्रसज्येतेति शङ्क्यम् । ईश्वरसङ्कल्पाभावेनातिप्रसङ्गपरिहारस्य सुशकत्वात् । अन्यथा बीजाद् वृक्ष इत्यत्रापि क्व बीजं क्व वृक्ष इत्यस्यापि पर्यनुयोगस्य सुलभावसरत्वात् । अस्तु पलाशस्य सोमरूपत्वम्; तावता किमायातमिति तत्राह—**सा-सोमाहुतिः**। यस्मात् पलाशः 2. १५
सोम एव तस्मात् सा समिध आहुतिः अग्निहोत्राद्यनुष्ठानक्रमेण अनुष्ठास्य-

a. TB. 1. 2. 1. 5–6.
b. TS. 3. 5. 7. 1.
c. AB. 3. 25. 1.
d. AB. 1. 27. 1.
e. TS. 6. 1. 6. 1.
f. AB. 3. 26. 1.
g. TB. 2. 1. 5. 2.

मानायाः सोमाहुतेः प्रथमा काचित् सोमाहुतिर्भवति। सोमाहुतौ यत् फलं तदिह समिदाहुतिमात्र एव संपत्स्यत इत्यर्थः। आधानोत्तरकालं कर्मणां प्रवृत्तिक्रम आपस्तम्बेनेत्थं प्रदर्शितम्—'अथैकेषामग्नीनाधाय हस्तावविनिज्य संवत्सरमग्निहोत्रं हुत्वाथ दर्शपूर्णमासावारभते। ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते। तत ऊर्ध्वमन्यानि .कर्माणि कुरुते'[a] इति। आश्वलायनेन चोक्तम्—'दर्शपूर्णमासमिष्ट्वेष्टिपशुचातुर्मास्यैः अथ सोमेन'[b] इति।

2. १६ होम्यायाः समिधः परिमाणमुपदिशति—**प्रादेशमात्री भवति**। 'प्रादेशस्तु दशाङ्गुलः'[c] इत्यग्निवेश्यवचनात् दशाङ्गुलपरिमिता समिद् भवति। परिमाणं
2. १७ स्तौति—**प्रादेशमात्रं-प्राणाः**। आत्मशब्दो मध्यदेहवाचकः 'मध्यं ह्येषामङ्गानामात्मा'[d] इति श्रुत्यन्तरदर्शनात्[1]। 'आत्मैकविंशः'[e] इति चान्यत्र मध्यदेहवाचितया आत्मशब्दस्य प्रयोगात्। यस्मादिमे हृदयादूर्ध्वं संचरन्तः प्राणा[2] वायवः प्रादेशपरिमाणा भवन्ति तस्मात् प्रादेशपरिमिता समिद् भवति। अनेन चार्थवादेन समिधि प्राणदृष्टिः संपाद्येति सिद्धं भवति। प्राणानां च प्रादेशमात्रत्वमैतरेये श्रूयते—'प्रादेशमात्रे स्यादित्याहुः। एतावता वै प्राणाः संमिता इति'[f] इति।

2. १८ इदानीमङ्गिभूतमग्निहोत्रहोमं विधत्ते—**द्व्यङ्गुलं-अभिजुहोति**। द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम्। अनेन च द्व्यङ्गुलपरिमितः समित्प्रदेशो लक्षणयोच्यते। अङ्गुलीद्वयपरिमितः समिद्भागो योऽस्ति तमतिक्रम्य तस्याः समिध
2. १९ उपरि जुहुयात्। **द्व्यङ्गुले-धीयते**। यस्माद् द्व्यङ्गुले। सामीप्यमात्रं सप्तम्यर्थः। 'सद्यो द्वादशाहे मास ऋतौ संवत्सरे वा'[g] इत्यादिवत्। अङ्गुलिद्वयपरिमितं चिबुकप्रदेशमतिक्रम्य वर्तमाने[3] मुखसंबन्धिनि मुखबिल एव लोकैरन्नं निधी-

a. APŚ. 5. 23. 2.
b. AŚ. 4. 1. 1.
c.
d. AA. 2. 3. 5.
e. AB. 1. 19. 11.
f. AA. 1. 2. 4.
g. ŚŚ. 2. 2. 2.

1. T. श्रुत्यन्तरात्
2. T. प्राण
3. T. omits.

यते। तस्माद् द्वयङ्गुलमतिक्रम्यैव होमः कार्यः। अत एवार्थवादात् समिधि मुखदृष्टिराहुत्यां चान्नदृष्टिः कार्येत्युन्नेयम्। अथ कामनाभेदावलम्बनेन
होमकालविकल्पान् प्रदर्शयति—**धूमायन्त्यां-पशुकामस्य**। अभ्याहिता समिद् 2.२०-२२
यदा धूमं करोति तस्मिन् काले होमः कार्यः। किमविशेषेण सर्वस्य? नेत्याह— ग्रामकामस्येति। धूमोद्गमानन्तरं यदा समिद् ज्वालां करोति तदा ब्रह्मवर्चसकामेन होमः कार्यः। वेदविद्यासंपत्तिर्ब्रह्मवर्चसम्। यदा तु ज्वलनानन्तरं समिद् अङ्गारावस्थामनुभवति तदा पशुकामेन होमः कार्यः।

एतेषां पक्षाणां पूर्वपक्षतयोपेक्षणीयत्वं द्योतयन् सिद्धान्ततया पक्षान्तर-
मुपक्षिपति—**अभ्याधाय-स्थितम्**। समिद्धोमानन्तरमेव धूमोद्गमाद्यवस्था- 2. २३
वधीरणेन अग्निहोत्रहोमः कर्तव्य इति स्थितः सिद्धान्तपक्षः। तस्मात् स एव
पक्षः स्वीकर्तव्यः। कुत इत्यत आह—**अत्र-इति**। इतिशब्दो हेतौ। अभ्याधा- 2. २४
नानन्तरं यः कालस्तस्मिन् काले कृते होमकर्मणि सर्वे पूर्वोक्ता ग्रामादयः कामा आसाद्यन्त एव इत्यतो हेतोरभ्याधायैव होमोऽनुष्ठेयः। धूमोद्गमज्वलनाङ्गारभावावस्थानाम् अभ्याहितसमिद्वत्त्वेन कथित एव कालेऽन्तर्भावात् तन्निबन्धनग्रामादिफलावाप्तेरप्रत्यूहत्वाद् इतरेषु कालविकल्पेषु एकैकस्यैव ग्रामादिफलस्यावाप्तुं शक्यत्वाद् अयमेव पक्षः साधीयानित्यर्थः।

अथ तूष्णींप्रयोज्यां प्रजापतिदेवत्याम् 'उत्तरामसंसृजंस्तूष्णीं भूयसीं पूर्वस्याः'[a] इति सूत्रकृदभिहितां द्वितीयामाहुतिं सिद्धवत्कृत्य होमद्वयकरणोत्तरं
कस्यचिन्मन्त्रस्य जपं विधत्ते—**उभे-जपति**। कोऽसौ मन्त्र इति तमुत्पादयति— 2. २५
**या-इति**। विहितसकलाङ्गकलापसाहित्येन समृद्धस्य यज्ञस्य या आशीः 2. २६
आशास्यते प्रार्थ्यत इत्याशीः फलं शास्त्रैकावगम्यं स्वर्गादिफलमस्ति तन्मे समृद्ध्यतामिति मन्त्रस्यार्थः।

अमुं मन्त्रार्थं हृदि निधाय जपविधिं फलाव्यभिचारकथनेन स्तौति—
**या-भवति**। वैशब्दः 'अग्निहोत्रं जुहुयात् स्वर्गकामः'[b] इत्यादिशास्त्रप्रसिद्धिं 2. २७
फलस्य द्योतयति। यदुक्तं सूत्रकारेण 'भूयसीं पूर्वस्या' इति तदेतद् विधत्ते—

a. ŚS. 2. 9. 4.    b. Maitrī U. 6. 36.

2. २८ **उत्तरावतीः–जुहुयात्** । आहुतीनामुत्तरावतीत्वस्य लक्षणमुक्तं तैत्तिरीय-ब्राह्मणग्रन्थे—'उत्तरावतीं वै देवा आहुतिमजुहवुः अवाचीमसुराः' इत्युपक्रम्य, 'यं कामयेत वसीयान् स्यादिति कनीयस्तस्य पूर्वं हुत्वा उत्तरं भूयो जुहुयात् । एषा वा उत्तरावत्याहुतिः । तां देवा अजुहवुः । ततस्तेऽभवन् । यस्यैवं जुह्वति वसीयान् भवति'[a] इति । उत्तरावती उत्तरबहुलेत्यर्थः । भूम्नि वतुप्[b] । तथा 'उत्तरावती भवतोऽभिक्रान्त्या'[c] इत्यादि । बहुवचनमनेकाहःप्रयोगाद्यपेक्षया ।

2. २९ ताः स्तौति—**उत्तरोत्तरिणः–आप्नोति** । भूराद्यान् सत्यपर्यन्तान् निरतिशय-प्रीतिस्थानभूतान् परोवरीयसः स्वर्गान् लोकान् उत्तरावत्याहुतिहोमेनाप्नोति । भूरादीनां स्थानतः सुखोत्कर्षतारतम्याच्च परोवरीयस्त्वं द्रष्टव्यम् । इतिकर्त-

2. ३० व्यतान्तरं विधत्ते—**स्रुचो–उपस्पृशति** । स्रुचो मूलभागेन आवहनीयगतानङ्गारान्

2. ३१ उपस्पृशेत् । स्तौति—**स्वर्गं–दधाति** । तेनोपस्पर्शनकर्मणा यजमानं स्वर्गलोके स्थापयत्येव ॥

इति द्वितीयः खण्डः

अङ्गारोपस्पर्शनानन्तरं तां स्रुचमुत्तराशाभिमुखीं कृत्वा द्विवारमुद्यम्यो-

3.१.3.२ पसादयेदित्याह—**द्विः–उद्यच्छति** । उद्यमनं स्तौति—**रुद्रम्–अवसृजति** । तेन द्विवारमुद्यमनेन देवानां मध्ये क्रूरं रुद्रनामानं देवमग्निहोत्रकर्मणा प्रसाद्य स्वसंबन्धिन्यां दिशि प्रहिणोति । रुद्रस्यासाधारण्येन खलूत्तरा दिगाम्नायते । तथा च तैत्तिरीये शतरुद्रीयहोमविधिप्रकरणे—'उदङ् तिष्ठन् जुहोति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते'[d] इति । अत्र प्रसङ्गात्

3. ३ पुरुषार्थरूपं कंचिन्नियमं विधत्ते—**तस्माद्–तिष्ठेत्** । यस्मादग्नेरुत्तरभागो रुद्रस्य गमनाय मार्गभूतः तस्माद्धूयमानस्य अग्नेरुत्तरतोऽवस्थानं न कुर्यात् । कुत

3. ४ इत्यत आह—**नेद्–इति** । नेदित्येष निपातः परिभयार्थः । 'अथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये'[e] इति यास्कवचनात् । एतस्य रुद्रस्य देवानां

a. TB. 2. 1. 4. 1.
b. Cf. MB. on Pā. 5. 2. 94.
c. TS. 5. 4. 8. 5.
d. TS. 5. 4. 3. 3.
e. N. 1. 11. 1.

मध्ये क्रूरस्य देवस्य सर्वविजिगीषोः प्रस्थातुकामस्य मार्गे तन्निरोधकतया परिगतः प्राप्तो भवानीत्येवं परिभयेन उत्तरतोऽवस्थानं न कुर्यात् । अवस्थाने तु रुद्रहेलनतः सर्वपुरुषार्थप्रच्युतिः प्रसज्येत ।

प्रसङ्गात् किंचिदुक्त्वा प्रकृतमेवोपसंक्रम्य इतिकर्तव्यतान्तराणि विधत्ते—
**ताम्-प्रतीचीम्** । द्विःपदमिहाप्यनुषञ्जनीयम् । स्तौति—**आदित्यं-नयति** । 3.५.3.६
तेनोपमार्जनेन आदित्यमस्तं नयतीति वेदितव्यम् । **प्रातःकालीने** अग्निहोत्र-
कर्मण्युपमार्जनं विधत्ते—**दक्षिणत-प्रातः** । उपमार्ष्टीत्यनुषङ्गः । पुष्करमध्यस्थ- 3. ७
रेखाया दक्षिणभागमूर्ध्वदिगाभिमुख्येन द्विवारमुपशोधयेत् । स्तौति—**आदित्यं-
उन्नयति** । तत् तेन आदित्यमुन्नयति[1] । उदयाद्रेरुद्गमयति । सायं प्रातश्च यदुप- 3. ८
मार्जनद्वयमुक्तं ताभ्यामुभाभ्यामपि कर्तव्यं विधित्सुः आद्योपमार्जनलेपेन
दर्भेषु लिम्पनं विधत्ते—**यत्-निलिम्पति** । यत् पयआदिद्रव्यपुष्करलेपनं[2] 3. ९
पूर्वमुपशोधयति तत् स्वहस्तलिप्तं सत् स्रुग्धारणार्थे कूर्चे निलिम्पेत् । 'पूर्व-
मुपमार्जनं कुशेषु निलिम्पत्योषधीः प्रीणामीति मनसा'[a] इति सूत्रकारवचनात् ।
अत्र चौषधीः प्रीणामीति सङ्कल्पः कर्तव्य इत्यभिप्रेत्य स्तौति—**ओषधीः-
प्रीणाति** । ओषधिशब्दस्तदभिमानिदेवतावचनः । प्रीतेश्चेतनैकाश्रयत्वात् । 3. १०
दृश्यते चाचेतनेष्वभिमानिदेवताविवक्षया चेतनोचितो व्यवहारः । यथा 'ओषधे त्रायस्वैनं'[b] 'शृणोत ग्रावाणः'[c] इत्यादि । तेन लिम्पनेन ओषधीः प्रीणयति ।

द्वितीयमार्जनेन यत् कर्तव्यं तद् विधत्ते—**यद्-निदधाति** । यद् द्वितीय- 3. ११
मुपमार्ष्टि तदेवं कुर्यात् । तेन लेपेन सहितं पाणिं कूर्चस्य दक्षिणभाग उत्तानी-
कृत्य स्थापयेत् । तत्र च 'पितॄन् प्रीणामि'[d] इति मन्त्रस्य मनसा स्मरणं कर्तव्य-
मिति मत्वा स्तौति—**पितॄन्-प्रीणाति** । तेन दक्षिणतः पाणिनिधानेन पितॄन् 3. १२
प्रीणयति । सूत्र्यते हि–'उत्तरं दक्षिणतः पाणिमुत्तानं निदधाति पितॄन् प्रीणा-
मीति मनसा'[e] इति । अथ प्राशनं विधत्ते—**अथ-प्राश्नाति** । प्रदेशिनी अङ्गुष्ठाद् 3. १३

a. ŚS. 2. 9. 12.
b. TS. 1. 2. 1. 1.
c. TS. 1. 3. 13. 1.
d. ŚS. 2. 9. 13.
e. ŚS. 2. 9. 13.

1. T. omits आदित्यम्
2. T. omits पय

अनन्तरवर्तिनी अङ्गुलिः। तया प्रदेशिन्या द्विवारं प्राश्नीयादिति यदस्ति तत्र यत्
3. १४ पूर्वं प्राशनमस्ति तत् स्तौति—**गर्भान्-प्रीणाति।** पूर्वप्राशनेन गर्भान् स्त्रीणां
गर्भाशयवर्तिनः प्राणिनः प्रीणयति। तेषां प्रीतिसद्भावे गमकमाह—**तस्माद्-**
3. १५ **प्राणन्ति।** यस्मात् पूर्वप्राशितं द्रव्यं सूक्ष्मरससंक्रान्त्या गर्भस्थान् प्राणिनः
प्रीणयति अत एव तेऽनश्नन्तोऽपि सन्तः प्राणनं कुर्वते। न ह्यशनमन्तरेण
प्राणनमवकल्पते। 'अन्नं हि प्राणः[1]'[a] इति श्रुतेः। न चैतेऽशनं कर्तुं क्षमन्ते।
असमर्थत्वात्। अतस्तेषु भूतपञ्चकद्वारा सूक्ष्मरस उपसंक्रान्तस्तान् प्राणय-
3. १६ तीति निश्चीयते; शास्त्रप्रामाण्यात्। उत्तरं प्राशनं स्तौति—**वयांस्युत्तरेण।**
3. १७ उत्तरेण प्राशनेन पक्षिणः प्रीणयति। अत्रापि गमकमाह—**तस्माद्-प्रस्नावयन्ति।**
यस्मादेषोऽग्निहोत्रद्रव्यस्य रसांशो वयसां शरीरमुपसंक्रम्य तानि प्रीणयति तस्माद्धेतोर्बहुप्रकारं नानाजातीयं च व्रीहिकणादिवस्तुजातं भक्षयन्त्यपि वयांसि जठरे जीर्णं सत् श्वेतमेव पायुद्वारा निर्गमयन्ति। स एष श्वेतिमा सूक्ष्मरसद्वारा पक्षिदेहे संक्रान्तः तद्भक्षितवस्तुसंसृष्टः अग्निहोत्रीयद्रव्यसंबन्धी पुरीषेऽप्युपलभ्यते। न च धर्मिणमपहाय धर्मभूतस्य सूक्ष्मरसस्य कथं पक्ष्यादिदेहसंक्रान्तिरिति वचनीयम्। निर्दोषवेदवचनबलादेव तस्यार्थस्य विश्वसनीयत्वात्। 'नास्ति वचनस्यातिभारः। किं हि वचनं न कुर्याद्'[b] इति हि स्थितिः। यथा चाग्नौ हुतस्य चरुपुरोळाशसोमादिद्रव्यस्य प्रत्यक्षग्राह्ये स्थूलेंऽशे भस्मीभावमुपगतेऽपि सूक्ष्मः शास्त्रैकगम्यो रसांशो भूतपञ्चकद्वारा देवानां शरीरम् उपसंक्रम्य तान्[2] प्रीणयतीति 'हुतादश्चैव देवानहुतादश्च यजमानः प्रीणाति ते यजमानं प्रीणन्ति'[c] इत्यादिशास्त्रबलादेवाभ्युपगम्यते। एवमेव यजमानेन भक्षितस्यापि पयःप्रभृतिद्रव्यस्य सूक्ष्मभूतो रसांशः पक्षिशरीरमुपसंक्रम्य तान् प्रीणयतीति शास्त्रबलादेव किं नाभ्युपेयते ?

अथ स्रुचि शिष्टं कात्स्न्येन हस्ते समानीय पुनरपि प्राश्नीयादिति विधि-
3.१८,१९ मनूद्य स्तौति—**अथ-प्रीणाति।** स्रुक्च्छब्दः सादृश्याद्धस्तवाचकः। एवं 'स्रुचं

a. ŚB. 3. 8. 4. 8.
b. Śabara on JS. 3. 5. 18., 10. 5. 11.
c. TS. 5. 4. 5. 2.

1. Mss. read अहं ह् प्रा
2. T. देवान्

निर्लेळ्हि'[a] इत्यत्रापि द्रष्टव्यम् । हस्तेन भक्षयतीति यदस्ति तेनातीतमागामि च प्राणिजातं प्रीणयति । **अथ–प्रीणाति** । इहापि स्रुकूर्च्छब्देन हस्तस्याभि- 3.२०,२१ धानम् । निर्लेळ्हीति जिह्वया नितरामास्वादयति । सर्पशरीरावलम्बिनो देव- जनाः सर्पदेवजनाः । **अथ–प्रीणाति** । मार्जयते क्षालयति । रक्षःशरीरावल- 3.२२,२३ म्बिनो देवजना रक्षोदेवजनाः ।

अथ प्रक्षालितायां जलमानीय तया प्रागुदीचीमपराजितापरपर्यायां दिशमभिमुखीकृत्य अपामुत्सेचनं कर्तव्यमित्याह—**अथ–प्रीणाति** । गन्धर्वाश्चा- 3.२४,२५ प्सरसश्च गन्धर्वाप्सरसः । 'ऋताषाडृतधामा'[b] इत्यादिमन्त्रोक्ताः । यद्वा विश्वा- वसुप्रभृतय ऊर्वश्यादयश्च ।

अथ तामेव स्रुचं पूर्वोक्तामेव दिशमभिमुखीकृत्य उद्यमयेदित्याह— **अथ–दधाति** । उदग्दिक्सम्बन्धात् प्रागुदग्दिशोऽपि रुद्रसंबन्धित्वं ज्ञेयम् । 3.२६,२७ निगमयति—**एवम्–प्रीणाति** । एवमुक्तप्रकारेण सर्वाणि भूतान्यग्निहोत्राख्येन 3. २८ कर्मणा प्रीणयतीत्यतः प्रशस्तमिदं कर्मेत्यर्थः ॥

## इति तृतीयः खण्डः

एवं तावदाहवनीयाग्नावग्निहोत्रहोमः सहाङ्गैः खण्डत्रयेण प्रतिपादितः । अथ गार्हपत्यान्वाहार्ययोरपि होमकर्तव्यतां विवक्षन् तद्विरोधिनं शाखान्तरीयं कंचित् पक्षं पूर्वपक्षतयोपक्षिपति—**आहवनीय–आहुः** । 'श्रपणो वै गार्हपत्यः'[c] 4. १ इति गार्हपत्यस्य हविःश्रपणार्थत्वावगमाद् दक्षिणाग्नेश्च ऋत्विग्दक्षिणा- रूपान्वाहार्यनिष्पत्त्यर्थत्वान्न तयोर्होमाधारत्वम् । 'यज्जुहोति तदाहवनीये'[d] इति वचनाद् आहवनीयस्य होमाधारता अवगम्यते । अत आहवनीय एव होमः कर्तव्य इति केचिच्छाखिनः प्रतिपेदिर इत्यर्थः । सिद्धान्तमाह—**सर्वेषु- जुहुयात्** । तुशब्द एकपक्षहोमव्यावृत्त्यर्थः । एकस्मिन्नाहवनीय एव होमः 4. २ कर्तव्य इति यदुक्तं तन्नोपपद्यते । सर्वेष्वेव आहवनीयगार्हपत्यान्वाहार्यसंज्ञितेषु

a. KB. II. 3. २०.
b. VS. 18. 38.
c. KB. II. 1. १५.
d. Cf. BŚ. 24. 8. 4.

4. ३ त्रिष्वग्निषु होमः कर्तव्यः। कुत इत्याशङ्क्य हेतुमाह—**होमाय-आधीयन्ते।**
यस्मादेते त्रयोऽप्यग्नयो होमाय आधानकर्मणोत्पाद्यन्ते न प्रयोजनान्तराय।
तस्यादृष्टरूपत्वात्। दृष्टे च प्रयोजने संभवति अदृष्टकल्पनस्यान्याय्यत्वात्।
तस्मात् त्रिष्वप्यग्निषु होमः कर्तव्य इति।

4. ४-७ अथाग्निहोत्राहुतिसंख्यां स्तोतुमनुवदति—**चतस्रो-संपद्यन्ते।** गार्हप-
त्याग्नौ चतुःसंख्याका आहुतयो भवन्ति। तथान्वाहार्यश्चरुः पच्यतेऽस्मिन्निति
अन्वाहार्यपचनो दक्षिणाग्निः। तस्मिन्नपि चतस्रः। आहवनीये द्वे आहुती
भवतः। ताश्चैताः संभूय दशसंख्याका भवन्ति। अथ दशसंख्याकास्वेतास्वा-
4. ८ हुतिषु विराट्छन्दस्त्वं संपादयति—**दश-विराट्।** या एता दशाहुतयः
सा दशिनी दशत्वयुक्ता विराट् नाम छन्दो भवति। विराजो दशिनीत्वं
'दशाक्षरा विराट्'[a] इति श्रुत्यन्तरे प्रसिद्धम्। दशत्वसामान्यादाहुतीनां विराट्-
4. ९, १० छन्दस्त्वं द्रष्टव्यम्। स्तौति—**श्रीः-उपाप्त्यै।** उक्तार्थम्। विराजं प्रशस्य
4.११,१२ तदभिसंपत्तिमग्निहोत्रकर्मणा स्तौति—**स-आप्नोति।** 'अथो पञ्चवीर्यं वा
एतच्छन्दो यद् विराड्'[b] इत्यादिना बह्वृचब्राह्मणे विराजः सर्वच्छन्दोरूपत्वं
प्रतिपादितम्। तथा च सर्वच्छन्दःसाध्यसर्वकामप्राप्तिहेतुभूतविराडभिसंपन्न-
मग्निहोत्रकर्मापि सर्वान् कामान् प्रसूते। यो यजमान उक्तप्रकारेण विराडा-
त्मना संपन्नमग्निहोत्रं जुहोति स सर्वान् कामानैहिकानामुष्मिकांश्च प्राप्नोति।
अथ 'उपप्रयन्तो अध्वरम्'[c] इत्यादिभिर्मन्त्रैरग्नीनामुपस्थानं विधत्ते—
4.१३,१४ **अथ-वदते।** होमानन्तरमग्नीनुपतिष्ठत इति यदस्ति तद्धोमेनाग्नीन् सन्तोष्य
अन्ततः अन्तेऽवसाने देवेषु द्योतमानेष्वग्निषु सन्तुष्टानग्नीन् विषयीकृत्य।
अर्थम् अर्थ्यतेऽभिलष्यत इत्यर्थः फलम्। 'आयुर्दा'[d] इत्यादिकं मन्त्रोक्तमायु-
रादिकम्। वदते विस्पष्टं प्रार्थयत एव। यथा लोके कश्चित् स्वशक्त्यनुसारेण
निष्पादितं जम्बीरफलादिकं राज्ञे समर्प्य तत्समर्पणसंतुष्टं तं स्वाभि-
लषितमर्थं प्रार्थयते, स च तदभिलषितमखिलमस्मै प्रयच्छति; तथैव
तदुपस्थानकर्म।

a. AB. 6. 20. 20. b. AB. 1. 6. 1.
c. RV. 1. 74. 1. d. TS. 1. 3. 14. 4.

अथास्य 'उपप्रयन्त'[a] इत्यादिमन्त्रसाध्यस्योपस्थानस्य अभिज्ञजनप्रसिद्धं
वात्सप्रनामधेयं निर्ब्रुवन्नभिष्टौति—**यद्वेव-भवन्ति**। यस्मादस्मिन् उपस्थान- 4.१५-१७
कर्मण्यग्निहोत्रीधेनोर्वत्सं स्पृशति यजमानः तस्मादेवैतदुपस्थानं वात्सप्रनामकं
संपन्नम्। तथा च सूत्रम्—'मयि वः कामधरणमिति वत्सस्य ललाटमुप-
स्पृश्य'[b] इति। तथा च वात्सप्रनामकेऽस्मिन्नुपस्थाने कृते सति वत्सस्पर्शनेन
पशूनां परिगृहीतत्वाद् अस्माद् यजमानात् पशवोऽनुत्कामुका भवन्ति।
उत्क्रमणशीला उत्कामुकाः। न उत्कामुका अनुत्कामुकाः। चोरादिभिरपहरण-
मकालमरणादिश्चोत्क्रमः। समग्रसकलगोगणशालिनः सन्तो यजमानस्य
चिररात्रायोपभोग्या भवन्ति।

अथाचमनपूर्वकं वाग्विसर्गविधिं स्तौति—**अथ-पुनर्होमात्**। तथा च 4.१८-२०
सूत्रम्—'सत्येनावभृतमभ्यवैम्यप्सु व्रतमित्याचम्य वाचं विसृजते'[c] इति। यदेत-
दाचमनपूर्वकं व्रतविसर्जनमस्ति तेन यद् व्रतं कर्मारम्भकाले स्वस्मिन् यजमा-
नात्मन्यवस्थितं तच्छ्रद्धाजननद्वारा सकलयज्ञनिर्वोढ्र्यामबभिमानिन्यां देवतायां
स्थापयति। स्वस्य वागादिप्रवृत्तिसाध्यलौकिकव्यापारसिध्यर्थम्[1]। इतरथा
तदभावप्रसंगात्। ताश्चापो यजमानसंबन्धि व्रतं स्वात्मनि निहितं पुनः
पश्चाद्धोमः तमवधीकृत्य रक्षन्ति। पुनर्होमोपक्रमे हि व्रतमप्सु निहितमाच-
मनेनात्मनि यज्ञनिष्पत्त्यर्थं स्थाप्यते। यज्ञान्ते पुनराचमनेनैव आत्मन उत्कृष्याप्सु
निधीयते। व्रतविसर्गश्च विपक्षे बाधककथनेन अवश्यकर्तव्यतयोक्तः तैत्तिरीये—
'ईश्वरं वै व्रतमविसृष्टं प्रदहोऽग्ने व्रतपते व्रतमचारिषमित्याह व्रतमेव वि
सृजते शान्त्या अप्रदाहाय'[d] इति।

अथापरिसमाप्त एवाग्निहोत्रविधावुपस्थानप्रसङ्गात् प्रवासं कर्तुकामेन
प्रवासं कृतवता यजमानेन चाग्नीनामुपस्थानं कर्तव्यमित्यमुं विधिं स्तौति—
**अथो-भवति**। प्रवासो दूरदेशगमनम्। तत् करिष्यन् प्रवासं कृतवांश्चाग्नीना- 4.२१,२२
मुपस्थानं कुर्यात्। तच्चैतद्देवतायै। षष्ठ्यर्थे चतुर्थी। देवतासंबन्धितया क्रिय-

a. RV. 1. 74. 1. b. ŚŚ. 2. 12. 4.
c. ŚŚ. 2. 12. 12. d. TS. 1. 7. 6. 6–7.

1. T. adds प्रवृत्ति after व्यापार

माणोऽभिवाद एव । स्वस्त्ययनप्रार्थनैव । लोके जिगमिषतामागतानां च गुर्वादिषु स्वस्तिवचनप्रार्थनादर्शनात् । यदयं यजमानोऽग्नीनामुत्काशमपरोक्षं यथा तथा भवति । यथान्तेवासिनोऽभिवादनार्थिन आसीनस्य गुरोः प्रत्यक्षं गत्वा विनीताः सन्तस्तिष्ठन्ति । तथायमप्युपस्थानं कुर्वन् यजमानोऽग्निसमीपवर्ती संस्तदाभिमुख्येन तिष्ठति । ततोऽभिवादनमेवैतदुपस्थानं भवति । किं च
4.२३,२४ **अथो–भवन्ति ।** अपि चैतेन उपस्थानेनात्मानं यजमानाख्यमग्निभ्यः परिददात्येव । न केवलमग्निभ्यः आत्मैव समर्प्यते किं तर्हि ये यजमानमन्वञ्चोऽनुगच्छन्तः पुत्रकलत्रवित्तवेश्मादयो भवन्ति तेऽपि सर्वेऽग्निभ्यः समर्प्यन्त एवानेनोपस्थानकर्मणेत्यर्थः ।

अथ राष्ट्रपरिभयादिभिः वास्तोष्पतिहोमपुरःसरमग्निभिर्भार्यया च सह प्रवासे कर्तव्ये अग्नीनामरण्योः समारोपणं कर्तव्यमित्यमुं विधिं प्रवास-
4.२५-२८ प्रसङ्गादुपक्षिप्य स्तौति—**अथ–समश्नुते ।** य एते अरण्यौ अधरा चोत्तरा च त एते देवरथ एव भवति । देवानां रथो देवरथः । यथा लोके रथिनः सुखेन रथे वर्तन्ते अभीप्सितं प्राप्यदेशं गच्छन्ति च । तथा देवानामप्येते अरण्यौ भवतः । यस्मादेवं तस्मादेनानग्नीनरण्योः समारोपणेन देवरथ एव समारोपयते । तथा च स यजमानोऽग्नीनां समारोपयिता स्वयमप्येतेनारणीरूपदेवरथेन विनाशरहितं यथा भवति तथा स्वर्गं लोकं प्राप्नोति । देवरथस्य स्वर्गलोकप्राप्तिहेतुत्वं श्रुत्यन्तरे श्रूयते—'सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथः'[a] इति ।

अथ प्रवसता यजमानेन सायंप्रातश्चाग्निहोत्रहोमार्थमग्नीनां निर्मन्थनं[1]
4.२९,३० कर्तव्यमिति विधिमभिप्रेत्य स्तौति—**यद्वेव–भवति ।** पौनःपुन्येनाग्निमन्थनं[2] क्रियत इति यदस्ति तेनैवास्य यजमानस्य पुनराधेयकर्म स्वीकृतं भवति । पुनराधेयकर्म विनापि तत्फलप्राप्तिहेतुत्वाद्[3] एतत् पुनर्निर्मथनकर्म महाफलत्वात् प्रशस्तमित्यर्थः ।

a. TS. 5. 4. 10. 1.

1. T. निर्मथनं
2. T. °मथनं
3. T. omits प्राप्ति

'अथो यत् प्रवत्स्यंश्च'[a] इत्यारभ्यैतदन्तेन वाक्यसंदर्भेण प्रसङ्गात्
प्रवासोपस्थानादिकं निरूपितम् । इत आरभ्य आ अध्यायसमाप्तेः प्रकृतोऽग्नि-
होत्रविषय एव विधिर्निरूपयिष्यते । तत्रापि 'स वा एषोऽग्निः'[b] इत्यतः
प्राक्तनेन सायंप्रातर्होममन्त्रविनियोगविधिः सार्थवादः प्रकटीक्रियते । तत
आरभ्य 'उदिते होतव्या३मनुदिते'[c] इत्यतः प्राक्तनो वेदनसहिताग्निहोत्र-
कर्मप्रशंसापरः संदर्भः । शेषस्तु कालनिरूपणपर इति विभागः । तत्र तावद्
'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहुयाद्'[d] इति विधिमभिप्रेत्य
सायमनुष्ठीयमानाहुतिरूपान्नस्य देवानन्दहेतुत्वं सामान्यमुखेन प्रसाधयति—
**ये–कारोतरः** । वैशब्दो लोकप्रसिद्धिद्योतनार्थः । लोकेऽन्नपानमिथुनजन्या ये 4.३१-३३
प्रीतिविशेषाः सन्ति ते सर्वेऽपि रात्र्यैव क्रियन्त उत्पाद्यन्ते । न चाहन्यपि
प्रीतिविशेषाणां केषांचिदुपलम्भात् कथमवधारणमिति वाच्यम् । यतः सान्त-
त्येनैते रात्रावेवानुभवितुं शक्यन्ते । सन्तता इत्यस्य विवरणमव्यवच्छिन्ना
इति । अहनि तु कर्मान्तरव्यापारतन्त्रे मनसि नैते नैरन्तर्येणानुभवितुं शक्यन्ते ।
यत् किंचित् कदाचिदेव । तदापि कर्मानुष्ठानजनितक्लेशानुवेधाद् आनन्दस्या-
स्पष्टत्वमेव । रात्र्यां तु विरतसकलव्यापारत्वादतिप्रसन्ने स्वस्थे मनसि
विषयेन्द्रियसंप्रयोगजन्याः सुखविशेषाः स्वयमेवाभिव्यज्यन्ते । अतो युक्तं
रात्र्या आनन्दहेतुत्वम् । रात्र्या क्रियन्त इत्येतदेव स्पष्टयति—तेषां रात्रिः
कारोतर इति । तेषामानन्दानां रात्रिरेव कर्ता भवति । अत एवोक्तम्—

'दिवा कार्यव्याकुला वै पुमांसो रात्र्यां हि संभोगपरा भवन्ति'[e] इति ।
निमित्तकारणमुक्त्वा आनन्दानामुपादानकारणमभिधत्ते—**य–जायन्ते** । 4.३४,5.१
उकारः समुच्चये । एवकारेण पानादेरानन्दजनकत्वं व्यावर्त्यते । पानस्य
तावदन्न एवान्तर्भावान्न पृथगानन्दजनकत्वम् । मिथुनस्याप्यन्नोपयोगाभावे
सति आनन्दजनकत्वाभावात् । तद्भावे च सति तद्भावादन्वयव्यतिरेकाभ्यामेव
अन्नस्यैवानन्दजनकत्वसिद्धेर्न स्वातन्त्र्येणानन्दजनकत्वं येनावधारणानुपपत्तिः
आशङ्क्येतेति । अन्नादेव सर्वेऽप्यानन्दविशेषा उत्पद्यन्ते । यस्मादेवं लोके

a. KB. II. 4. २१.
b. KB. II. 6. २३.
c. KB. II. 7. १६.
d. TB. 2. 1. 9. 2. ( जुहोति for जुहुयात् )
e. Quoted by ṢŚ on AB. 12. 11

तस्माद् रात्रावनुष्ठीयमानाहुतिरूपान्नस्यापि देवान् प्रत्यानन्दसन्दोहकत्वमस्तीति पार्यन्तिकोऽर्थः ॥

इति चतुर्थः खण्डः

अथैवंविधस्य सायमग्निहोत्रहोमस्य 'अग्निर्ज्योतिः'[a] इत्यादिसत्यस्वरूपमन्त्रपठनेन सत्यमययजमानकृतस्यैव देवप्रतिग्राह्यतां दर्शयितुं देवानां सत्य-
5. २,३ मयत्वयोग्यस्य वाङ्मयस्य पुरुषस्य समुत्पिपादयिषां दर्शयति— **ते-इति ।** ते श्रुत्यादिप्रसिद्धा अग्न्यादयो देवा अन्योन्यमब्रुवन् वयमिमानानन्दान् अस्मत्समानधर्मणः पुरुषविशेषात् कथं प्रतिग्रहीष्याम इति । प्रसिद्धं हि देवानां कर्मानधिकारित्वेन अन्यदत्तान्नभोक्तृत्वम् । प्रसिद्धं च स्वसदृशादेव प्रतिग्रहो न्याय्य इति । तेनायमर्थः-अमी खल्वानन्दा अस्माभिरुपभोक्तव्याः । न चाप्रतिगृह्यैव स्वयमुत्पाद्यास्माभिरुपभोक्तुं शक्यन्ते । देवत्वस्य फलोपभोगमात्रावस्थत्वेन कर्मानुष्ठानशक्त्यभावात् । तत्र सत्यमयानामस्माकं सत्यमयादेव पुरुषादानन्दप्रतिग्रहो न्याय्यः । ततः सत्यमयः कश्चित् पुरुषोऽस्माकमनुरूपो जनयितव्य इत्यन्योन्यमुक्तवन्तः इति ।

5. ४,५ **ते-समभवन् ।** एवं निश्चित्य मनसाप्यचिन्तनीयानुभावास्ते देवा अप्रतिघविशुद्धविज्ञानचक्षुःसाक्षात्कृतपूर्वार्जितकर्मकलापपरिपाकफलाः[1] तदनुरोधेन अपामादित्यरश्मिनाडीभ्यो निर्गतानां मेघोदरात् पृथिव्यां निपतितानां वृष्ट्युदकानां रसं सारभूतं सूक्ष्ममंशमद्भ्यः पृथक्कृत्योर्ध्वमगमयन् । उद्गतश्च सोऽपां रस ओषधिरूपेण वनस्पतिरूपेण च प्रादुरभूत् । घर्मकाले संतप्ताया वृष्ट्युदकेन सिच्यमानाया हि पृथिव्या ओषधिवनस्पतय उत्पद्यन्ते । उदकसेचनविरहे सत्योषध्यादीनामनुत्पत्तिदर्शनात् । ओषधयो व्रीह्यादयः । वनस्पतय आम्रादयः । एवमुपरितनान्यपि योजयितव्यानि ।

a. TB. 2. 1. 9. 2.

1. T. कालाः for फलाः

**ओषधीनां-अभवत्।** फलस्य भोग्यत्वादोषध्यादिसारत्वम्। फलस्यापि पलालबुसादिमत्त्वात् तत्राप्यन्नस्यैव सारत्वम्। अन्नेऽपि रेत एव सारं न त्वन्नपरिणामरूपमपि पुरीषादि। रेतस्यपि पुरुष एव सारांशः न तु रेतोमात्रम्। वन्ध्यायामुत्सृष्टस्य निरर्थकत्वात्। अत्र च देवानामचिन्त्यशक्तित्वेन तत्तत्कारणवस्त्वनुप्रवेशेन तत्तदुत्पत्तौ प्रयोजकत्वमवसेयम्। 5. ६-१३

एवमबादिक्रमेण पुरुषस्योत्पत्तिमुपपाद्य तस्य सत्यमयत्वं संपादयितुं वाङ्मयत्वं प्रतिपादयितुं खण्डशेषः सोऽयं पुरुषो यद् इत्यादि। तत्र पारिशेष्यतो वाङ्मयत्वं सिसाधयिषुः प्रथमं प्राणापानात्मकत्वं निषेद्धुं तयोर्वाच्येवान्तर्भावं साधयति—**सोऽयं-भवतः।** स एवमुक्तकारणपरिपाट्या पूर्वं देवैः- 5. १४-१७
रुत्पादित इदानीमस्माभिरुपलभ्यमानः पुरुषः प्राणापानात्मकः प्रत्येतव्यः। यस्मात् स पुरुषो लोके प्राणनव्यापारं नासिकाछिद्राभ्यामान्तरस्य वायोर्निःसारणलक्षणम्, अपाननं तस्यैवान्तरवस्थापनलक्षणं च करोतीति यदस्ति तद् वस्तु प्रत्ययदशायां परप्रत्यायनदशायां वा ताभ्यां प्राणापानाभ्यामेवेत्थं न वदति। किं तु वाचैव तद् वदति। इतिशब्दोक्तं प्रकारमेव स्पष्टयति प्राणिषं वापानिषं वेति। अहं प्राणनव्यापारं कृतवानस्मि अपाननं कृतवानस्मीति च प्राणापानयोर्वदनसामर्थ्याभावात् ताभ्यां वक्तुं न शक्नोति। तस्मादेतौ प्राणापानौ वाचं वागिन्द्रियमेवापीतः संप्राप्नुतः। वागिन्द्रियापेक्षत्वात् स्वसिद्धेः तस्य गुणभावेनैवावतिष्ठेते। वाचश्च स्वयमेवानन्यापेक्षयैव सर्वनिर्वाहकत्वात् प्राधान्येनावस्थानमुचितम्। ततश्च तौ वाङ्मयावेव वागात्मकावेव भवतः। तद्व्यतिरेकेण निरूपयितुमशक्यत्वात्।

**अथ-भवति।** एवं चक्षुरादीनामङ्गपर्यन्तानां करणानां वाङ्मयत्वप्रतिपादको वाक्यसंदर्भ उक्तवदेव योजनीयः। पदार्थास्तु लेशतः कथ्यन्ते। चक्षुः रूपानुभूतावसाधारणं करणम्। पश्यति शुक्लादिद्रव्यविशेषमिति शेषः। यच्छब्दोऽत्रापि वाक्यार्थपरामर्शकः। अद्राक्षं दृष्टवानस्मि। श्रोत्रं शब्दग्रहणे असाधारणं करणम्। शृणोति शब्दानिति शेषः। अश्रौषं श्रुतवानस्मि। मनः सुखादिज्ञाने असाधारणं करणम्। सङ्कल्पयते सामान्यतोऽवगते वस्तुनि तत्र विशेषानुट्टङ्कयति। समचीक्लृपं सङ्कल्पं कृतवानस्मि। अङ्गैर्हस्तपादादिभिः 5.१८-३३

सुशीमं शोभना सीमा मर्यादा स्वरूपं यस्य तत् सुशीमम्। सकारस्य शकारश्छान्दस्या प्रक्रियया द्रष्टव्यः। शोभनरूपं सूक्ष्मवस्त्रादिकं सुशीमम्। तद्विपरीतं दुःखावहं कण्टकगण्डोपलादिकं दुःशीमम्। सर्व आत्मेति देहावयवी विवक्षितः। उपलक्षणं चैतदन्येषामपि करणानाम्। तेषामपि यथासंभवं वाङ्मयत्वं द्रष्टव्यम्।

एवं प्राणादीनां वाङ्मयत्वमुपपत्त्या प्रतिपाद्य तत्रैव मन्त्रमपि प्रमाण-
5.३४,३५ यति—**तदेतद्-इति**। यदेतत् पुरुषात्मनो वाङ्मयत्वमुक्तम्, एतदेव वाङ्मयत्वं 'नेन्द्रादृते पवते धाम किंचन'[a] इति पादोपलक्षितयर्चा विस्पष्टमुक्तम्। अतो नास्मिन्नर्थेऽनाश्वासः कर्तव्य इत्यर्थः।

ननु कथमनयर्चा वाङ्मयत्वं प्रतिपाद्यते। यावतास्यामृचि इन्द्रस्य देवताविशेषस्यैव स्तुतिरवसीयते। न वाचः प्राधान्यमवगम्यते। अतः कथमे-
5. ३६ षोक्तार्थसंपादिका इत्याशङ्क्य व्याचष्टे—**वाग् वा इन्द्रः**। इन्द्रशब्देन वागेवाभिधीयते। इन्दतेरैश्वर्यार्थत्वात्। वाचश्च सर्वव्यवहारनिर्वोढृत्वेनेश्वरत्वात्। वैशब्दः प्रसिद्धौ। 'प्राणो वा अहमस्म्यृषे'[b] 'प्राणोऽस्मि प्रज्ञात्मा'[c] इत्यादौ प्राणरूपत्वमवगम्यते। आन्तरस्य प्राणात्मनो वायोः शब्दात्मना परिणममाणत्वादिन्द्रस्यैव प्राणात्मकत्वमुपपन्नम्। यद्वा इन्द्रो हि बलाभिमानिनी देवता। वाक् च बलनिर्वर्त्या। अत इन्द्रस्य वाग्रूपत्वम्। तथा चैतरेयके ऐन्द्रवायवग्रहयाज्यापुरोनुवाक्यार्थवादे—'अथ यैन्द्रवायवी तस्यै यदैन्द्रं पदं तेन वाचं कल्पयति वाग्घैन्द्री'[d] इति। तैत्तिरीये च—'वागस्यैन्द्री सपत्नक्षयणी'[e] इति। याजमानमन्त्रब्राह्मणव्याख्याने 'ऐन्द्री वै वाग् वाचमेवैन्द्रीमात्मन् धत्ते'[f] इति। वाग्रूपस्य बृहतीच्छन्दसः प्राणात्मकत्वाद्वा। पदार्थमुक्त्वा वाक्यार्थमाह—
5. ३७ **न-किंचन**। न हि किमपि धाम चक्षुरादिकरणं वाग्व्यापारमन्तरेण स्वकार्याय पर्याप्नोति। किं तु तदपेक्षमेव सत् तद्गुणभावेनैवेति वाङ्मयमेव सर्वमित्यर्थः। एतदेवाभिप्रेत्य शब्दब्रह्मविद आहुः—

a. RV. 9. 69. 6.
b. AA. 2. 2. 3.
c. KBU. 1. 3. 1.
d. AB. 2. 26. 6.
e. TS. 1. 6. 2. 2.
f. TS. 1. 6. 10. 6.

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमं बिना ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥'[a]
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥'[b] इति ॥

इति पञ्चमः खण्डः

एवं पुरुषस्य वाङ्मयत्वं प्रसाध्य सत्यमयत्वं साधयितुं सायमग्निहोत्रहोमे
विनियुक्तं ब्राह्मणोत्पन्नं मन्त्रमनुवदति—**स-इति** । वैशब्दोऽनुवादार्थः । तेन 6. १
च 'अग्निर्ज्योतिरित्यादिमन्त्रेण सायं जुहुयाद्' इति विधिरुन्नेयः । अथैतन्मन्त्र-
वदितुः सत्यमयत्वं प्रतिपादयति—**तं-भवति** । एतं मन्त्रं पठन् यजमानस्तमग्निं 6. २-४
ज्योतिः प्रकाशकं सन्तं ज्योतिरित्याह नाप्रकाशभूतं प्रकाशभूतमाह,
येनासत्यत्वं स्यात् । तस्मात् स यजमानः सत्यं यथार्थरूपं वाक्यमेव वदति
नायथार्थम् । ततश्च तस्य यजमानस्यायं दृश्यमानो वाङ्मयः सन्नात्मा सत्य-
मयो भवति । सत्यवागभिधानात् ।

अथापि किमित्यत आह—**सत्यमया उ देवाः** । देवा अग्न्यादयः सत्यमया 6. ५
इति प्रसिद्धम् 'सत्यसंहिता वै देवाः'[c] इत्यादौ श्रुत्यन्तरे । अतो यजमानस्य
देवतासादृश्यं संपन्नं यद्देवैरर्थितम् 'अस्मादृशस्यैव प्रतिगृह्णीयाम'[d] इति ।
एवं यजमानस्य देवतासादृश्यमुपपाद्य दानाभिधायि स्वाहापदमनूद्य तद्दत्ता-
हुतेर्देवप्रतिग्रहयोग्यतामाह—**अथ-वदति** । सत्यवाक्योक्त्यानन्तर्यमथशब्दार्थः । 6. ६-८
यत् स्वाहेत्युक्त्वा होमं करोति तस्मिन् होमकर्मणि कृते तत्कर्तुर्यजमानस्य
कथितमन्त्रसंस्कृतामेतामाहुतिं देवाः प्रतिगृह्णन्ति । कुतः ? यजमानस्य सत्य-
हुतत्वात् । सत्यवचनेन सहितं हुतं होमो यस्य स तथोक्तः । कुतोऽस्य सत्यहुत-
त्वमिति । तत्राह—रात्र्या निशीथिन्या शीर्षन्नुपक्रमे यस्मात् स सत्यम् 'अग्नि-
ज्योतिः' इत्यादिकं मन्त्रं वदति तस्मादस्य सत्यहुतत्वं सिद्धम् ।

a. VP. 1. 124. b. VP. 1. 1.
c. AB. 1. 6. 7. d. KB. II. 5. ३.

ननु रात्र्युपक्रमे सत्यवचनादेव चेदस्य सत्यहुतत्वसंपत्त्या देवप्रतिग्राह्याहुतित्वं हन्त तर्हि तदुत्तरकालम् 'अनृतसंहिता मनुष्याः'[a] इति न्यायात् मिथ्यावादित्वसंभवे सति असत्यहुतत्वेन देवाप्रतिग्राह्याहुतित्वप्रसङ्गः। तथा च सत्य-
6. ९-११ रूपमन्त्रपाठोऽप्यकिंचित्कर एव स्यादित्याशङ्कामनूद्य परिहरति—**स-वदति**।
स यजमानो यद्यप्यग्निहोत्रहोमादूर्ध्वं मृषा असत्यमपि वचो वदत्येव। न खलु कश्चिदपि जननमरणधर्मा सन्नाप्रायणकालं यथार्थमेव वचो[1] वदतीति निदर्शयितुं शक्यम्। भीमाग्रजेऽपि यथादृष्टार्थवादित्वस्यासंभवात्। तथाप्यस्य हुतं सत्यमेव भवति। कुतः ? यस्मात् स रात्र्या उपक्रमे सत्यं वदत्येव। तावतैव सत्यहुतत्वं संपद्यत एव। उत्तरकालीनासत्यवचनस्य आहुतिसंबन्धाभावात्। 'सत्यं हैवास्योदितं भवति' इति पाठेऽपि नार्थभेदः कश्चित्। 'रात्र्या उ हि' इति पाठेऽपि हेत्वर्थो हिशब्दः प्रसिद्ध एव। 'अथ प्रातर्जुहोति' इत्यादि हि प्रातरग्निहोत्रमन्त्रविनियोगविध्यर्थवादः[2] पूर्ववदेव योजनीयः। पाठस्तु
6.१२-२२ लिख्यते—**अथ-वदति**।

एवं तावदतीतेन प्रबन्धेनाग्निहोत्रकर्म साङ्गं विधायेदानीं 'यदेव विद्यया करोति'[b] इत्यादिश्रुतेरुपासनासहितस्य कर्मणः फलभूयस्त्वावगमात् तत्सहित-
6.२३,२४ मग्निहोत्रकर्म विधित्सुः प्रथममुपास्यं वस्तु प्रदर्शयति—**स-जुहोति**। ननु भूतार्थोपदेश एवायं किं न स्यात् ? मैवम्। उत्तरत्र 'स य एतानि षड् जुह्वति वेद'[c] इति वेदनशब्दवाच्योपासनाविषयत्वावगमेन[3] उपास्यवस्तुनिर्देशपरत्वावगमात्[4]। न च यथार्थविषयं प्रमाणजन्यं ज्ञानमेव वेदनशब्दार्थः नोपासनमिति वाच्यम्। अग्न्यादीनां वास्तवहोमकर्तृत्वायोगात् तद्विषयज्ञानस्य यथार्थत्वासंभवात्। भूतार्थोपदेशपरत्वे प्रयोजनाभावाच्च। अथ उपास्तिक्रियामन्तरेण फलासंभवात् मानसत्वसाम्येन विदिधातुर्मानसीं क्रियां लक्षयतीति युक्तम्। योऽयं प्रकृतोऽग्निहोत्रदेवतारूपः 'अग्निर्ज्योतिः'[d] इत्यादिमन्त्रप्रतिपादितः स एष

a. AB. 1. 6. 7.
b. ChU. 1. 1. 10.
c. KB. II. 7. ४.
d. TB. 2. 1. 9. 2.

1. T. omits.
2. T. omits मन्त्रविनियोग
3. T. °वगमात्
4. T. omits.

वक्ष्यमाणरूपोऽग्निरुदयाद्रेरूर्ध्वं गच्छति प्रातरादित्येऽधिकरणभूते आत्मानं स्वस्यैव रूपं पयआदिस्थानीयं होमद्रव्यं कृत्वा जुहोति। तथा सायं सायं रात्र्युपक्रमे असावादित्योऽस्तमस्ताचलं गच्छन् अग्नावधिकरणभूते स्वात्मानं जुहोति। श्रूयते हि श्रुत्यन्तरे—'एषोऽस्माल्लोकादुत्क्रम्याहन्यग्निरादित्यं गच्छति रात्रावादित्यस्तम्'[a] इति। दृश्यते च रात्रावाग्नेयमेव तेजः प्रकाशते अहनि तु सौर्यमेवेति। तथा च श्रुत्यन्तरं—'आग्नेयी रात्रिः'[b] इति। ऐतरेये—'अग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसाहस्तेजस्वद्'[c] इति। इह चाध्यायाद्यखण्डे 'सौर्यं वा अहराग्नेयी रात्रिः'[d] इति। सति चैवं दिवसारम्भे योऽग्नेरादित्यमूर्त्यनुप्रवेशः स तस्य तस्मिन्नात्मानमग्निहोत्रद्रव्यं कृत्वानुष्ठीयमानोऽग्निहोत्रहोम एवेत्युपासितव्यम्। एवं रात्र्युपक्रमे योऽयमग्नावादित्यस्य प्रवेशः 'आदित्यो वा अस्तं यन्नग्निमुपविशति'[e] इति श्रुतिप्रसिद्धः स तत्कर्तृकः स्वात्मद्रव्यकोऽग्निहोत्रहोम एवेति द्रष्टव्यम्। एवं रात्र्यादावपि योज्यम्॥

इति षष्ठः खण्डः

**रात्रिः–प्राणे**। एवकारः समुच्चयः। तथा रात्रिरात्मानमहन् अह्नि 7. १, २
जुहोति। रात्र्यादेरप्यहरादावनुप्रवेशे श्रुत्यन्तरप्रसिद्धिर्मृग्या। प्रत्यक्षसिद्धं चैतदह्नः प्रादुर्भावे रात्रिरुपरंस्यतीति। तथा रात्र्या उपक्रमेऽहरुपरतं भवतीति। मुखे नासिकाद्वारा बहिर्निर्गच्छन् रेचनवृत्तिः प्राणः। तथा तयैव नासिकाद्वारान्तर्गच्छन् पूरणवृत्तिरपानः। तयोरप्यन्यतरवृत्त्याविर्भावे अन्यतरव्यापारोपरमः प्रत्यक्षसिद्ध एव। श्रुतिप्रसिद्धिश्चान्वेष्या। ततश्च तयोरन्योन्यस्मिन्नात्मद्रव्यकाग्निहोमकर्तृत्वदृष्टिः कर्तव्या। निगमयति—**तानि–**
**आत्मानम्**। यान्येतान्यग्न्यादीनि तान्यन्योन्यस्मिन्नात्मानं जुह्वतीति वेदि- 7. ३
तव्यम्। अग्निरादित्ये जुहोत्यादित्यश्चाग्नौ। एवमितरेष्वपि ज्ञेयम्। अथैतदु-

a. Quoted by Śabara on JS. 1. 2. 2; Cf. TB. 2. 1. 2. 9.
b. TB. 1. 5. 3. 4.
c. AB. 5. 29. 6.
d. KB. II. १. ६.
e. AB. 8. 28. 9.

पासनं प्रसिद्धाग्निहोत्रफलस्य स्वयमेवानन्यापेक्षया निष्पादकत्वादतिप्रशस्त-
7. ४, ५ मित्यभिप्रेत्य स्तौति—**स-भवति**। यः पुमानेतान्यग्न्यादीनि षट्संख्याकानि परस्परस्मिन्नधिकरणे स्वात्मानं होम्यद्रव्यं कृत्वा होमं कुर्वन्तीत्युपास्ते। अनेनाग्निहोत्रहोममकुर्वतापि सता अग्निहोत्रहोमः कृत एव भवति। तत्फलस्य निष्पन्नत्वात् कृतमेव भवति। बहुप्रयासकरणीयस्य फलस्यानायासेनैव संपादकत्वात् प्रशस्ततरमिदमुपासनमित्यर्थः।

अथैवं स्तुतस्य महानुभावस्योपासनस्य अग्निहोत्रकर्मोपकारकत्वं विवक्ष-
7. ६ न्नाह—**जुह्वत-चेद**। यः पुमानेवमुपास्ते अस्यैवाग्निहोत्रहोमं कुर्वतः सतः तदग्निहोत्रं द्विर्वारं हुतं भवति। द्विवारहोमानुष्ठाने[1] यः फलविशेष उत्पद्यते स उपासनासहितेन कर्मणा निष्पद्यते। तस्मात् फलभूयस्त्वाय उपासनासहितमेव कर्म कर्तव्यमित्यर्थः। श्रूयते हि—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति'[a] इति।

देवाप्रतिग्राह्याहुतित्वापादकदोषनिवर्तकत्वादप्येवंवित्ता प्रशस्तेत्याह—
7. ७, ८ **स-गृह्णन्ति**। प्रसिध्यर्थौ हवै इत्येतौ निपातौ। स यजमानो यद्यपि सुरुशात् सुतरामकल्याणं निषेधशास्त्रेण हेयतया प्रतीयमानं लशुनादिकमभक्ष्यं वस्तुजातमत्ति भक्षयतीति सुरुशात्। असाधुकारीति यावत्। तथापि यद्येवं विद्वानग्न्यादीनां होमकर्तृत्ववेदनवान् अग्निहोत्रहोमं कुर्यात्। तर्हि देवा अग्न्यादयोऽस्य सम्बन्धिनी एते द्वे आहुती प्रतिगृह्णन्त्येव। निषिद्धानुष्ठानजनितप्रत्यवायेनास्य अभोज्याहुतित्वं न गणयन्तीत्यर्थः। प्रत्यवायोऽप्येवंवित्तयैव निवर्त्यते यतः।

7. ९,१० देवैराहुतिप्रतिग्रहे कृते को दातुः पुरुषार्थ इत्यत आह—**यस्यो-अमृतः**। भवतीति शेषः। यस्य हि यजमानस्य आहुतिलक्षणमन्नं देवाः सकृदप्युपयुञ्जते। आस्तां क्रियासमभिहारः। तस्मादेवानन्यापेक्षात् कारणात्[2] स यजमानोऽमृतो देवभूयं गतो भवति। एवं च सति न केवलं प्रत्यवायनिवृत्तिरेवैवं-

a. ChU. 1. 1. 10.

1. T. omits होम

2. T. omits.

वित्तायाः फलम्, अपि तु देवत्वावाप्तिरपीत्याह—**सत्यमयो-वेद** । सत्यवादि- 7. ११
त्वेनैव सत्यमयत्वस्य सिद्धत्वात् कथं सत्यमयत्वमुपासनाफलं भवेदित्या-
शङ्क्याह—अमृतमय इति । 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते'[a]
इत्युक्तत्वादमृतमयत्वम् । यद्वा सत्यमय इत्यनेन हिरण्यगर्भभाव उक्तः ।
अमृतमयेति ब्रह्मात्मभावः । सत्यशब्दस्य कार्यब्रह्मणि प्रयोगात् 'सत्यमिति
ब्रूयाद्'[b] इत्यादौ । अमृतशब्दस्य च परस्मिन् ब्रह्मणि रूढत्वात् । उपासनानां
च क्रममुक्तिफलत्वात् ।

इदानीं श्रद्धादिविरहिणोऽपि यजमानस्य श्रद्धादिसहकृताग्निहोत्रहोमे
यत् फलं तदेवंवित्तयैव केवलया संपद्यत इति कथयन्नभिष्टौति—**तद्-जुहोति** । 7.१२-१४
तत् तत्र लोके । श्रद्धादेवत्वादिविशिष्टस्य यजमानस्य यथाविधं यत्फलकं हुतं
होमो भवति । एवंविधमेतत्फलकमेवास्य श्रद्धादिविरहिणोऽपि यजमानस्य हुतं
भवति । य एवमुपासीनः सन्नग्निहोत्रहोमं करोति । श्रद्धैव देवः प्रधानं यस्य
स तथोक्तः । श्रद्धावत इत्यर्थः । सत्यमेव वदितुं शीलमस्येति सत्यवादी तस्य ।
तपः कृच्छ्रचान्द्रायणाद्यनुष्ठानं तद्वतः । यस्मादुक्तन्यायेन महानुभावमेतदु-
पासनं तस्मादुपासनपुरःसरमेवाग्निहोत्रमनुष्ठेयमित्युपसंहरति—**तस्माद्-इति** । 7. १५
इतिशब्दोऽग्निहोत्रकर्मविधिप्रकरणावसानद्योतकः । इदानीं 'काले कर्म विधी-
यते'[c] इति न्यायेन कर्मविधेः कालापेक्षत्वादग्निहोत्रकर्माङ्गभूतं कालविशेषमुप-
दिदिक्षुः तद्विषयं विचारमुपक्षिपति—**उदिते-मीमांसन्ते** । विचारे प्लुतिः । 7. १६
केचित् खलु शाखिनः आदित्योदयादनन्तरमग्निहोत्रं जुह्वति । अपरे पुनरादि-
त्योदयात् प्रागेव । एवमनुष्ठानं विषयीकृत्य परस्परविरुद्धयोः पक्षयोर्जाग्रतोः
ब्रह्मवादिनो विचारं कुर्वते किमस्माभिरुदितहोमपक्ष आश्रयणीयः आहोस्वि-
दनुदितहोमपक्ष इति । ननु 'स वै सायं च प्रातश्च जुहोति'[d] इति कालोपदेशः
कृत एवाध्यायारम्भे । किमर्थमेष पुनरारभ्यते ? सत्यम् । तस्यैव विशेषं निरूप-
यितुमयमारम्भ इत्यदोषः ॥

इति सप्तमः खण्डः

a. *Viṣṇupurāṇa* 2. 8. 97.
b. KBU. 1. 6. 1.
c. Cf. JS. 6. 2. 27
d. KB. II. 6, २.

8. १-५ तत्र प्रथममुदितहोमपक्षं निरस्यानुदितहोमपक्षं स्थापयति—**स–होतव्यम्।** प्रवसते गच्छते एतद्धोमरूपम्। महते देवायादित्याय। 'एक एव वा महानात्मा देवता। स सूर्य इत्याचक्षते। स हि सर्वभूतात्मा। तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्च इति'[a] इति वचनाद् आदित्यस्य सर्वभूतात्मकत्वात् महत्त्वम्। देवत्वं च स्वप्रकाशरूपत्वात्। यथा अतिथिविशेषे स्वगृहानागते सति तत्क्षणं प्रमादादिभिरातिथ्यं कर्तुमलभमानः पश्चात्तस्मिन्नतिथौ भग्नाशे ततो निष्क्रम्य गृहान्तरं गच्छति पाद्यार्घ्यादि यथाविधि पूजोपकरणं संपाद्य सम्यगातिथ्यं करोति। स चातिक्रान्तस्वकालत्वेन यातयामं तन्न प्रतिगृह्णाति। किंतु अनादृत्यैव गच्छति। तच्च केवलमात्मनः प्रयासायैव संपद्यते। एवमुदितहोमोऽपि स्यात्। अथशब्दः प्रकृतादर्थादर्थान्तरे। यथा लोके कश्चित् कुटुम्बी दूरादेव स्वगृहानायान्तं कंचिदतिथिविशेषमवलोक्य तदागमनात् पूर्वमेव कृत्स्नामप्यातिथ्योपकरणकलां संपाद्य प्रतिपाल्यासीनः तस्मिन्नागतवति यथाविध्यातिथ्यं प्रयुङ्क्ते। स च कालप्रयुक्तत्वादशेषमेव तत् प्रतिगृह्णाति च। परितुष्टचित्तः सन् इष्टमर्थममुष्मै [1]ददाति च[1]। एवमेवायमनुदितहोमः। यस्मादेवं तस्मादनुदित एव होमः कर्तव्य इति सिद्धम्। अमुं पक्षं वृषशुष्मादिब्रह्मवादिवचनोपन्यासच्छलेन प्रतिक्षिप्य अहोरात्रसन्धिकाल एव होमः कार्य इति

8. ६ प्रतिपादयति—**तद्धापि–उवाच।** हशब्द ऐतिह्यार्थः। तत् तत्र कथितेऽनुदितहोमपक्ष इत्यर्थः। अपिशब्दोऽरुचिं सूचयति। वृषशुष्मः एतन्नामको महर्षिः। वृषभस्येव शुष्मं बलं यस्य स तथोक्तः। अप्रतिहतदिव्यज्ञानशक्तियुक्त इत्यर्थः। 'शुष्ममिति बलनाम शोषयतीति सतः'[b] इति हि यास्कः। वतावतस्य महर्षेरपत्यं वातावतः। पूर्वेषां पूर्वकालवर्तिनां महर्षीणां मध्ये एकः प्रधानभूतः। तपोज्ञानाद्यतिशयशालित्वात्। जीर्णिः जीर्णः प्रवया इत्यर्थः। अत एव शयानः। अनेन परलोकं प्रति जिगमिषा द्योतिता। स चानुदितहोमिभिः कैश्चित् तत्कालीनैरुभे अप्यग्निहोत्राहुती रात्रावेवानुष्ठीयमाने पश्यन्नुक्तवान्।

8. ७-१५ तदीयं वाक्यमाह—**रात्र्याम्–उवाच।** किममी रात्रावेव सायंप्रातःप्रयोज्ये द्वे

a. SA. 2. 14-17 (Var. एकैव) b. N. 2. 24. 1.

1-1. T. omits.

अप्याहुती जुह्वतीति पार्श्वस्थान् प्रति महर्षेः प्रश्नः। तेषां प्रतिवचनं रात्र्यां हीतीति। अमी रात्र्यामेवाहुतिद्वयं जुह्वतीति। स च महर्षिस्तद्वचनमाकर्ण्य तदसामञ्जस्यं प्रतिपादयितुमुक्तवान्। किमित्यत आह—वक्तास्मः। लुडन्तमेतत् पदम्। इदमुडन्तमिति शेषः। इदं शरीरं परित्यज्यामुं स्वर्गाख्यं लोकं गत्वा पितृभ्यो वयं वक्तास्मः। ते च पितरः एतद् वक्ष्यमाणमुभयेद्युः पूर्वैर्हुतस्य आधुनिकैरन्येद्युर्होमलक्षणमनुष्ठानवैपरीत्यं न श्रद्धातारः विश्वासपूर्वकमङ्गीकर्तारो भवन्ति। किं तु निराकुर्वत एव। स्पष्टीकृत्यैनदित्युक्तं वाक्यमेवाह—यद्वैवैतद् यदेवैतद् अग्निहोत्रं पूर्वैरग्निहोत्रिभिरुभयेद्युर्हुतमभूत् तदेवाग्निहोत्रं एतर्हीदानीं अन्येद्युरेवाधुनिकैः अग्निहोत्रिभिर्हूयते। उभयेद्युरन्येद्युरिति निपातौ कालवचनौ। अन्येद्युरित्येतद् व्याचष्टे—रात्र्यामेवेति। इतिशब्दस्यैतदित्यनेन सम्बन्धः। वृषशुष्मोक्त एवार्थे ब्रह्मवाद्यन्तरवचनं समुच्चिनोति—एतदेव। यदेतद् वृषशुष्मेणोक्तमेतदेव काचित् कुमारी गन्धर्वेण गृहीता सती अभिहितवती। प्रसिद्धं हि कुमारीणां गन्धर्वगृहीतत्वम्। अयं तु गन्धर्वो निष्प्रतिबन्धस्वाभाविकातीन्द्रियज्ञानशक्तिः। स कुमारीशरीरानुप्रविष्टः सन्नित्थमुक्तवान्। वस्तुतो गन्धर्वस्यैवेयमुक्तिः। तस्य तु कुमारीशरीरानुप्रविष्टत्वात् पृथग्जनदृष्ट्या कुमारीकर्तृकत्वमारोप्य कुमार्युवाचेत्युक्तम्। रात्र्यां हीत्यन्तं वृषशुष्मवाक्यवद् व्याख्येयम्। कुमार्या अपि वृषशुष्मवदेव सिद्धान्तः। न तु तया वक्तास्म इत्यादिना परपक्षनिरासे प्रवृत्तम्। किं तु तदीयं पक्षमनादृत्य पक्षान्तरं प्रदर्शितम्। अत एव वृषशुष्मस्यापि सन्धिहोमपक्ष एवाभिमत इति गम्यते। उदितहोमपक्षो वा। सा कुमारीत्थमुक्तवती। कथमित्यत्राह—
**सन्धौ जुहुयात्**। अह्नो रात्र्याश्च योऽयं संसर्गकालः तस्मिन् काले होमः 8. १६
कर्तव्य इति। स्तौति—**समुद्रो-जुहोति**। अहोरात्रे इति यदस्ति एष समुद्र एव 8.१७-२०
भवति। तं विशिनष्टि—सर्वहर इति। सर्वाणि भूतानि संहरतीति सर्वहरः। अत एवोक्तम्—'कालः सृजति भूतानि कालः संहरते प्रजाः'[a] इति। प्रसिद्धसमुद्रस्यापि बलवता सलिलौघेन सर्वहरत्वमस्त्येव। तस्य समुद्रस्य गाधे जनैरवगाहनीये तीर्थे एत एव भवतः। के? यत् संध्ये। प्रातःसंध्या सायंसंध्या च। ते द्वे समुद्रस्याहोरात्रात्मकस्य तीर्थे भवतः। तत्र च यथा गाधाभ्यां तीर्थाभ्यां

a. MBh. 1. 1. 248,

जनः समुद्रमतिक्रम्य पारभूमिं प्राप्नुयात् तथैवैतद् ज्ञेयम्, यदेतद् संधौ जुहोतीति। अहोरात्रकृतपरिच्छेदराहित्येन प्राजापत्यस्थानप्राप्तिः संधिहोमात् सेत्स्यतीत्यर्थः।

8.२१-२४ पुनः प्रकारान्तरेण स्तौति—**अथो–जुहोति**। देवसंबन्धिनी सेना देवसेना। कीदृशी? अध्वगाः अध्वा निःश्रेयसप्रापको मार्गः तं गच्छन्तीत्यध्वगाः प्रजाः। ता हनिष्यन्ती विनाशयन्ती। एवंभूता देवसेनैवाहोरात्रे नाम। तस्याः सेनायाः पक्षसी पार्श्वभागस्थानीये एते यदेते संध्ये नाम। तत्र यथा कंचिदध्वानं तीक्ष्णपाषाणकण्टकादिविषमम् अत एव सुखेन गन्तुमशक्यं तद्रहिताभ्यां तदीयपार्श्वभागाभ्यामनुसृत्य गच्छति पान्थलोकस्तथैवायं संधिहोमः।

8.२५-२७ अथान्येन प्रकारेण स्तौति—**अथो–जुहोति**। मृत्युः संहाराभिमानी देवः। तस्याहोरात्रे बाहुस्थानीये भवतः। तत्रैवं सति लोके कश्चिन्निगृहीतुकामेन केनचिद् बलीयसा पुरुषेण प्रसारिताभ्यां बाहुभ्यां गृह्यमाणः सन् दैवात् किंचिदन्तरं लब्ध्वा तेनातिमुक्तो भवति तद्वदेष संधिहोमः तस्यातिमुक्तिहेतुरित्यर्थः। तस्मात् संधौ होमः कर्तव्य इति कुमार्युक्तवतीति पूर्वेणान्वयः॥

इत्यष्टमः खण्डः

एवं पक्षद्वयं प्रदर्श्य तस्य पूर्वपक्षतां द्योतयन् सिद्धान्तमुपक्रमते—**तदु–**
9. १ **कौषीतकिः**। तत् तत्र एवं स्थिते पक्षद्वय इत्यर्थः। उशब्दो विशेषार्थः। हृशब्द
9. २-४ ऐतिह्यार्थः। कुषीतकस्यापत्यं कौषीतकिः। किमित्यत आह—**सायम्–पति**।
सायं तस्मिन् काले जुहुयादिति संबन्धः। 'स वै सायं च प्रातश्च जुहोति'[a] इति सामान्येन ह्युक्तम्। अतस्तद्विशेषनिरूपणार्थमयमारम्भः। कस्मिन्नित्यत उक्तम् आदित्येऽस्तमिते अन्धकाराविर्भावात् पूर्वो यः कालांशः तस्मिन् काले जुहुयात्। स्तौति—स कालांशो देवयानः देवान् यान्ति प्राप्नुवन्ति अनेन होमेनेति देवयानः। केतुः केतुवत् स्थितोऽवष्टम्भदण्डः। तमारभ्य आश्रयतयावलम्ब्य[1]

a. KB. II. 1. ४.

1. A. अवस्कम्भ for अवलम्ब्य

स्वस्ति विनाशरहितं यथा तथा सुखेन स्वर्गं प्राप्नोति होमकर्ता। अत एव सूत्रम्—'प्रथमास्तमिते जुहोति'[a] इति।

प्रातर्होमकालं निरूपयति—**प्रातः-प्रति**। अन्धकारे विगलिते सूर्यस्योदयाद्रेरु- 9. ५-७
द्गमनात् प्राक्। उक्तमर्थं विपक्षे बाधकोपन्यासेन समर्थयते—**अथ-विखिदतः**। 9. ८, ९
अथेत्यर्थान्तरोक्तौ। यो यजमानोऽतः उक्तप्रकारादन्येन प्रकारेणान्यस्मिन् काले महारात्रे महाह्ने वेत्यर्थः। अग्निहोत्रहोमं करोति। अस्य यजमानस्य तदग्निहोत्रं श्यामशबलनामानौ विखिदतः उपतापयतः। भक्षयत इति यावत्। कुत एतत्? 'श्यामः श्वा आहुतिमभ्यवहरति तस्य योऽनुदिते जुहोति। शबलः श्वा आहुतिमभ्यवहरति तस्य य उदिते जुहोति'[b] इति श्रुत्यन्तरे दर्शनात्।

एतदेव विभज्य प्रदर्शयति—**अहर्वै-विखिदति**। रात्रेः पश्चिमो यामो 9.१०-१५
महारात्रः। 'महारात्रे बुध्वा'[c] इति प्रातरनुवाकप्रकरणे आपस्तम्बवचनात्। इह तु तमोऽन्वितकालमात्रवचनः। अपहते तमसि इत्युक्तत्वात्। तथा महाह्नशब्दः आदित्योदयादनन्तरकालवचनः। यथा शुना लीढं वस्तु लोके नोपभोग्यं एवमग्निहोत्रहोमोऽपि विहितेतरकालप्रयुज्यमानो देवान् न गच्छति। प्रमादादिना कदाचिदभिहितकालातिलङ्घनप्रसक्तौ सत्यां कर्मवैगुण्यपरिहारोपायं
सामान्येनोपदिशति—**तद्वै-इति**। ब्रह्मवादिन आहुरिति शेषः। कौषीतकिराहेति 9.१६,१७
वा। उदितेऽनुदिते संधौ वा यस्मिन्नेव कालेऽग्निहोत्रहोमः क्रियते तदा कर्मणोऽवसाने हुतस्याग्निहोत्रकर्मणः समृद्धिमवैगुण्यं फलदातारमीश्वरं प्रार्थयेत। इदमिदानीं क्रियमाणं कर्म समृध्यतामिति। न हि कस्यचिदप्यवैगुण्यसंपादनेन कर्मानुष्ठानं संभवति। निपुणतरधिषणानामपि कदाचित् सूक्ष्मापराधप्रसङ्गोपलम्भात्। प्रायश्चित्तविध्यानर्थ्यस्यापाताच्च। 'अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु'[d]। 'यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरम्'[e]। 'तद्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सुमतीकृतम् कुर्वन्नियादेवमेवैतद् यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं सुशस्तं कुर्वन्नेति'[f]। 'यद्वै यज्ञस्य क्रूरं यद् विलिष्टम्'[g]

a. ŚŚ. 2. 7. 1.
b.
c. APŚ. 12. 1. 1.
d. TB. 3. 7. 11. 5.
e. APŚ. 3. 12. 1. ( Cf. ŚB. 14. 9. 4.24 )
f. AB. 3. 38. 4.
g. TS. 1. 7. 3. 1.

इत्यादिमन्त्रवर्णब्राह्मणलिङ्गदर्शनाच्च। तस्मात् कृतस्य कर्मणः समृद्धिसिध्यर्थं सर्वैरप्याशासितव्यमेव। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति नवमः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
अध्यायः कथिताग्निहोत्रिकविधिः कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय आसीद् गतः॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**प्रथमदशके द्वितीयोऽध्यायः**

अथ

## तृतीयोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
इत्थं द्वितीय उक्तः स्फुटमध्यायेऽग्निहोत्रविध्यन्तः ।
अथ तु तृतीये क्रमतः प्रदर्श्यते दर्शपूर्णमासविधिः ॥

तत्र दर्शपूर्णमासौ तावद् विधित्सुस्तदङ्गभूतं ततः पूर्वं कर्तव्यमुपवासाख्यं
कर्म विधत्ते—**यद्-इति ।** दर्शपूर्णमासशब्दौ मुख्यवृत्त्या कालवचनावपि निरूढ- 1. १-४
लक्षणया कर्मविशेषवचनौ द्रष्टव्यौ । दर्शस्य पूर्वनिपातनमल्पाच्तरत्वात् ।
उपवासो नाम यथाप्राप्ताशनपानादिनिवृत्तिविषयसङ्कल्परूपव्रतधारणम् ।
तदाहुः—'व्रतं नाम च सङ्कल्पः स चाव्रत्यनिवर्तनम्'[a] इति । यज्ञस्य समीपे
तदनुष्ठानयोग्यताप्राप्त्या वसति; ईश्वरोऽनुष्ठेयो यज्ञः अस्योप समीपे वर्तते;
योग्यत्वलाभादस्य समीपे देवता वसति इति वोपवासशब्दार्थनिर्वचनं द्रष्टव्यम् ।
दर्शपूर्णमासयोरुद्देश्ययोः तदङ्गभूतमुपवासाख्यं कर्मानुतिष्ठति यजमान इति
यदस्ति तद् युक्तमेव । न खल्वव्रतस्याननुष्ठितव्रतस्य अत एवानधिकारिणो
यजमानस्य स्वभूतं हविर्देवा अग्न्यादयोऽश्नन्ति । अव्रतस्याप्रतिग्राह्यान्नत्वात् ।
यस्मादेवं तस्माद्धेतोः मदीयं हविर्दत्तं देवाः कथमश्नीयुरिति साशंसया बुद्धचा
श्रद्दधानः सन् उपवासाख्यं कर्म कुर्यात् । अथोपवासकालविशेषम् आचार्यमत-
भेदप्रदर्शनेन दर्शयति—**पूर्वा-कौषीतकम् ।** द्वे खलु पौर्णमास्यौ कालविदां 1. ५, ६
प्रसिद्धे । तयोः पूर्वस्यां पौर्णमास्यामुपवासकर्म कर्तव्यमिति पैङ्गचस्य महर्षे-
र्मतम् । कौषीतकिमहर्षेस्तु नैवम् । किं तूत्तरस्यां पौर्णमास्यामुपवासः कर्तव्य
इति ।

a. .

भवत्वेवं मतभेदः। एतदेव तावन्न जानीमः। का पूर्वा पौर्णमासी का वोत्तरेति। पौर्णमासीत्येकैव हि[1] तिथिर्लोके[2] प्रसिद्धेति। तत्र लक्षणकथनेन
1. ७ तद्भेदं दर्शयति— **यां–स्थितिः।** यस्यां तिथौ पर्यस्तमयम् आदित्यास्तमयसमीपे पूर्णश्चन्द्रमा उद्गच्छेत् सा पूर्वा पौर्णमासीति सैषा कालविदां स्थितिः। अत एव यस्यां तिथौ सूर्येऽस्तमिते सति पूर्णश्चन्द्रमा उद्गच्छेत् सोत्तरेति सिध्यति। तथा च सूत्रकारः—'द्वे पौर्णमास्यौ द्वे अमावास्ये च। यां पर्यस्तमयं पूर्णश्चन्द्रमा उदीयाद् यां चास्तमिते ते पौर्णमास्यौ। श्वो न द्रष्टेति यदहश्च न
1.८-१० दृश्येत ते अमावास्ये'[a] इति। तत्र पैङ्ग्यस्य मतं प्रपञ्चयति— **पूर्वां–उत्तराम्।** तत्र पौर्णमासयागे तावत् पूर्वस्यां पौर्णमास्यामुपवासः कर्तव्यः। अमावास्यायागे[3] पुरस्तात् पूर्वस्यां दिशि चन्द्रमसमुत्सर्पन्तम् अनिर्ज्ञायादृष्ट्वा तस्यां तिथावुपवासं कुर्यात्। तदेतदेवमुपवासपूर्वकं यजनं पूर्वोत्तराभिमानिचेतनदेवताप्रीतिहेतुत्वात् प्रशस्तम्। यत् पूर्वस्यां पौर्णमास्यामुपवासकर्मास्ति तेन पूर्वां पौर्णमासीं तदभिमानिदेवतां प्रीणयति। यदुत्तरस्यां यागकर्मास्ति तेनोत्तरां प्रीतां करोति।

1.११-१४ एवं पैङ्ग्यमतं प्रदर्श्य कौषीतकिमतं[4] प्रपञ्चयति— **उत्तराम्–उपवसेत्।** उत्तरस्यामेव हि पौर्णमास्यां समुद्रः स्वभूतं दैवतं देवतां सोमम्। अपां सोमदेवत्यत्वात्। अनु लक्षीकृत्य विजते चलति। पर्वणि समुद्राभिवृद्धेः प्रसिद्धत्वात् समुद्राभिवृद्धिलिङ्गेन चन्द्रमसस्तस्यां संपूर्णत्वमनुमीयत इत्यर्थः॥

इति प्रथमः खण्डः

एवं तावत् प्रथमेन खण्डेन यागदिनात् पूर्वस्मिन्नुपवसथसंज्ञितेऽहनि कर्तव्यं दर्शपूर्णमासाङ्गमुपवासाख्यं कर्मोपवर्णितम्। अथाध्यायशेषेण दर्शपूर्णमासयोर्यद्धोत्रा कर्तव्यं कर्मास्ति तत् क्रमेणैव प्रतिपाद्यते। तत्र सूत्रम्—'आम-

a. ŚS. 1. 3. 5–6.

1. T. omits.
2. T. लोके
3. T. अमावास्यां यागे
4. T. कौषीतकमतं

न्त्रितो होता प्रपद्यान्तरेण प्रणीतोत्करौ दक्षिणेन प्रपदेन बर्हिराक्रमणम् । वेद्यन्तसंमिता पश्चात्पार्ष्णिः । विक्रम्य च स्थानं तद्धोतृषदनम् । अग्नये समिध्यमानायेति संप्रेषितः । कं प्रपद्ये तं प्रपद्ये यत्ते प्रजापते शरणं छन्दस्तत् प्रपद्ये यावत्ते विष्णो वेद तावत्ते करिष्यामि देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि नमोऽग्नय उपद्रष्ट्रे नमो वायव उपश्रोत्रे नम आदित्यायानुख्यात्रे जुष्टामद्य देवेभ्यो वाचं वदिष्यामि शुश्रूषेण्यां मनुष्येभ्यः स्वधावतीं पितृभ्यः प्रतिष्ठां विश्वस्मै भूताय प्रशास्त आत्मना प्रजया पशुभिः प्रजापतिं प्रपद्येऽभयं नोऽस्तु प्राजापत्यमनुवक्ष्यामि वागार्त्विज्यं करिष्यति वाचं प्रपद्ये भूर्भुवः स्वरिति जपित्वा। त्रिर्हिंकृत्य। प्र वो वाजा इत्युपसंधाय मध्यमया वाचा। अग्न आ याहि वीतय इति ईळेन्यो नमस्य इति तृचौ। अग्निं दूतं वृणीमह इत्येका। समिध्यमान इत्येका। तिस्रः साप्तदश्ये। तदन्यत्र सायनाभ्यां दर्शपूर्णमासाभ्याम्। समिद्धो अग्न आहुतेति द्वे'[a] इति। अस्यायमर्थः—हविरासादनानन्तरम् अध्वर्युणा 'होतरेहि' इत्याहूतो होता प्रणीतोत्करान्तरालप्रदेशेन पश्चादागत्य यथा वेदिपश्चिमभागेन संमितः पादस्य पश्चिमभागो भवति तथा दक्षिणपादाग्रेण वेद्यां स्तीर्णं बर्हिराक्रम्य तथावस्थितदक्षिणपाद एव सव्यं पादं पश्चात् कृत्वा शरीरमृजु कुर्वाणः तस्मिन् होतृषदनाख्ये स्थाने तिष्ठन् 'अग्नये समिध्यमानायानुब्रूहि'[b] इति संप्रैषश्रवणसमनन्तरकालमेव 'कं प्रपद्ये'[c] इत्यादिकं 'भूर्भुवः स्वः'[c] इत्येवमन्तं जपधर्मेण पठित्वा हिमिति शब्दं परस्परेणासंहितं त्रिवारमुच्चार्य 'प्र वो वाजा अभिद्यवः'[d] इत्येतामृचं हिंकारेण प्राणमात्रसंहितां पठेत्। अत्र च हिंकारादिमध्यमस्वरो भवति। 'त्रिप्रभृतिष्वृग्गणेषु'[e] इति परिभाषानुरोधेन प्रथमायाः 'प्र वो वाजा'[d] इत्येतस्या उत्तमाया 'आ जुहोता'[f] इत्येतस्याश्च त्रिवारमुच्चारणं कुर्यात्। आद्यामृचं त्रिवारमुच्चार्य 'अग्न आ याहि वीतये'[g] इत्याद्या 'आ जुहोता दुवस्यत'[f] इत्यन्ता दशर्चः पठेद् इति।

a. ŚŚ. 1. 4. 1–13.
b. TS. 6. 3. 7. 1.
c. ŚŚ. 1. 4. 5.
d. RV. 3. 27. 1.
e. ŚŚ. 1. 1. 18.
f. RV. 5. 28. 6.
g. RV. 6. 16. 10.

तत्र यदुक्तं संप्रेषितः 'कं प्रपद्ये'[a] इत्यादि 'भूर्भुवः स्वः'[a] इत्यन्तं मन्त्रं जपि-
2. १, २ त्वेति तस्य मूलभूतं विधिमनूद्य स्तौति—**अथ–कुरुते।** अथशब्दः प्रारम्भार्थः। होत्रा कर्तव्यं कर्म प्रारब्धमित्यर्थः। यद्वा संप्रैषादनन्तरमित्यर्थः। 'प्र वो वाजा'[b] इत्यादिसामिधेनीपाठात् पूर्वं 'कं प्रपद्ये'[c] इत्यादिकं शाखान्तरीयं मन्त्रं जपधर्मेण पठेत्। यच्चैतज्जपकर्मास्ति तत् तेन स्वस्त्ययनं क्षेमप्राप्तिमेव होता करोति। 'मम विनाशो मा भूयाद् भद्रमेव सर्वत्र भूयाद्' इति प्रार्थनैवानेन निगदेन क्रियत इत्यर्थः। सर्वदेवताविग्रहस्य महानुभावस्याग्नेरपि भयजनकं खल्वेतद्धौत्रं कर्म। यत्प्रतिपादकं 'अग्नेस्त्रयो ज्यायांसो भ्रातरः'[d] इत्यादिकं तैत्तिरीयकम्। 'महत् तदुल्बम्'[e] इत्यादि दाशतयीमन्त्रजातं च। तस्मादस्मादृशाम् अस्माद्धौत्रादनिष्टापत्तिरवश्यमाविर्भवेदेव। तेन तन्निवारणमनेन जपकर्मणा क्रियते। सामिधेन्यनुवचनविधिमभिप्रेत्य तद्विध्यनुवादेन
2. ३ सामिधेन्यङ्गत्वेन हिंकारोच्चारणं विधत्ते—**हिंकृत्य–अन्वाह।** हिमिति शब्द-
2. ४, ५ मुच्चार्य सामिधेनीः पठेत्। हिंकारं स्तौति—**वज्रो–हन्ति।** योऽयं हिंकारः स वज्र एव वज्रवच्छत्रुविनाशहेतुत्वात्। शत्रुश्च वस्तुवृत्तपर्यालोचनायां पाप्मैव। अत एव तत्र तत्र 'पाप्मा भ्रातृव्यः'[f] इति सामानाधिकरण्येन प्रयोगो दृश्यते। अतो वज्ररूपेणानेन हिंकारेण यजमानस्य पूर्वार्जितत्वेन संभाव्यमानं पाप्मरूपं शत्रुं सम्यग् विनाशयति। यदुक्तं 'त्रिर्हिंकृत्य'[g] इति तस्यैतद्विधानम्—
2. ६-८ **त्रिः–अभिसंपादयति।** हिंकारं त्रिवारं पठेत्। त्रिभिस्तावन्निर्याणवायनैः त्सरुदण्डफलैर्वोपेतत्वाद् वज्रस्य त्रिवृत्त्वं प्रसिद्धम्। ततश्च हिंकारस्य वज्ररूपस्य त्रिवारं पठनेन वज्रस्त्रिवृत्त्वेन संपादितो भवति। वज्रनिष्पादनेन यजमानस्य को लाभ इत्याशङ्क्य शत्रुविजय एवेति पुराकल्पप्रदर्शनेनाह—
2.९,१० **एतेन–नुदते।** पुरा किल देवा यथोक्तेन हिंकाराख्येन त्रिवृता वज्रेण भूर्भुवस्वराख्येभ्यः त्रिभ्यो लोकेभ्यः सकाशात् स्वशत्रूनसुराननुत्सार्य लोकान् स्ववशे स्थापयामासुः। यस्मादेवं तस्मात्तथैवेदानीं यजमान एतेनैव वज्रेण लोकत्र-

a. ŚŚ. 1. 4. 5.
b. RV. 3. 27. 1.
c. ApŚ. 24. 11. 2.
d. TS. 2. 6. 6. 1.
e. RV. 10. 51. 1.
f. AB. 2. 15. 6; 16. 5; 31. 3.
g. ŚŚ. 1. 4. 6.

याच्छत्रूनुत्सार्य स्वाधीनीकरोति । लोकावाप्तिप्रतिबन्धकं पाप्मानमपहत्य लोकानवाप्नोतीत्यर्थः । यद्वा अस्य शत्रुर्लोकत्रयेऽपि स्थातुं न शक्नोतीत्यर्थः । सामिधेनीसंख्यां स्तौति—**एकादश-आप्नोति ।** सामिधेन्यो हि गण्यमाना 2.११-१४
एकादशसंख्याकाः संपद्यन्ते । त्रिष्टुप् चैकादशाक्षरयुक्तपादचतुष्टयोपेता । इन्द्रश्च त्रैष्टुभ इति प्रसिद्धम् । इन्द्रस्य त्रिष्टुभश्च सहैकस्मात् कारणादुत्पन्नत्वाद्वा प्रजापतिना त्रिष्टुभ इन्द्राय समर्पितत्वाद्वा त्रिष्टुभ इन्द्रेण स्वयं गृहीतत्वाद्वा इन्द्रस्य त्रिष्टुप्सम्बन्धित्वं द्रष्टव्यम् । एकस्मात् कारणादिन्द्रत्रिष्टुभोरुत्पत्तिः यजुर्ब्राह्मणे श्रूयते—'प्रजापतिरकामयत प्रजायेय' इत्युपक्रम्य त्रिवृदाद्युत्पत्तिप्रतिपादनानन्तरमाम्नायते—'उरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवता अन्वसृज्यत त्रिष्टुप् छन्दो बृहत् साम राजन्यो मनुष्याणामविः पशूनाम्'[a] इति । प्रजापतिनेन्द्राय त्रिष्टुभो दत्तत्वप्रतिपादकमैतरेयब्राह्मणम् 'गायत्रो वा अग्निः'[b] इत्येतद्वाक्यव्याख्यानावसरे प्रदर्शितम् । इन्द्रेण त्रिष्टुभः स्वयं गृहीतत्वमैतरेय एव 'इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्य'[c] इत्यत्र खण्डे प्रपञ्चितम् । तत्र हि वृत्रं हत्वा महत्त्वं प्राप्तस्येन्द्रस्य देवानुमत्या माध्यंदिनसवननिष्केवल्यशस्त्रत्रिष्टुप्पृष्ठसाम्नां स्वयं ग्रहणं श्रूयते—'स एतं माहेन्द्रं ग्रहमब्रूत माध्यंदिनं सवनानां निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां पृष्ठं साम्नाम्'[d] इति । इह चोपरिष्टादेव पठ्यते—'इन्द्रस्यैतच्छन्दो यत् त्रिष्टुप्'[e] इति । ततश्च तत् तेनैकादशसंख्यसामिधेनीपठनेन होतोभौ इन्द्राग्नी इन्द्रमग्निं च प्राप्नोति । इन्द्रस्य तावदुक्तन्यायेनात्र संबन्धः संभवति । सामिधेनीनामग्निदेवत्यत्वात् अग्नेश्चात्राप्तिर्युज्यते इत्युभयोरप्यत्र प्राप्तिरुपपन्ना ।

प्रथमोत्तमयोः[1] ऋचोः त्रिवारमावृत्तिविधिमभिप्रेत्य तत्सहितां संख्यां स्तौति—**त्रिः-आप्नोति ।** ता वस्तुत एकादशसंख्याका ऋचस्त्रिरावृत्तया 2.१५-१७
प्रथमया त्रिरावृत्तया चोत्तमयर्चा मिलिताः सत्यः संभूय पञ्चदशसंख्याका

a. TS. 7. 1. 1. 4.
b. KB. I. 2. २२.
c. AB. 3. 21. 1.
d. AB. 3. 21. 2.
e. KA. 1. 2.

1. T. V. प्रथमोक्तयोः

भवन्ति । शुक्लपक्षे कृष्णपक्षे च यानि प्रतिपदादीनि पञ्चदश्यन्तान्यहानि तान्यपि पञ्चदशसंख्याकानीति प्रसिद्धम् । सति चैवं संख्यासामान्यात् सामिधेनीभिः पक्षद्वयगतान्यहान्याप्नोति । तदेव पाञ्चदश्यं प्रकारान्तरेण[1] प्रशंसति—

2.१८-२० **अथो–हन्ति ।** अथो अपि च या एताः सामिधेन्यः सन्ति ता वज्र एव; शत्रुनिबर्हणहेतुत्वात् । वज्रस्य च पञ्चदशत्वप्रसिद्धेः पञ्चदशसंख्यासामिधेनीवचनं पञ्चदशत्वविशिष्टवज्ररूपं संपद्यते । तेन च यजमानस्य पापविनाशः संपाद्यते ।

2.२१,२२ आद्यन्तयोः ऋचोः त्रिरावृत्तिविधिं विशेषतः प्रशंसति—**यद्वेव–अविस्रंसाय ।** निपातद्वयसमुदायः पौनर्वचनिकः । 'प्र वो वाजा'[a] इत्येतां प्रथमाम् 'आ जुहोता'[b] इत्युत्तमां च त्रिवारं पठेदिति यदस्ति तेन यज्ञस्य बर्सं वस्त्रान्तभागं नह्यति बध्नाति । यथा लोके वस्त्रेण कम्बलेन वा व्रीहीन् वोढुकामः पुरुषस्तदन्तर्भागद्वयं बध्नाति । तच्च बन्धनं स्थैर्याय संपद्यते । तद्वदिदमपि स्थेम्ने स्थिरत्वाय स्रंसनराहित्याय च भवति । स्थेम्न इत्यस्य वा विवरणमविस्रंसायेति । तथा च ब्राह्मणान्तरम्—'त्रिः प्रथमामन्वाह त्रिरुत्तमाम् । यज्ञस्यैव तद् बर्सं नह्यत्यप्रस्रंसाय'[c] इति । सामिधेनीगताक्षरसंख्यां स्तौति—

2.२३-२५ **तासां–आप्नोति ।** त्रिरभ्यस्ताभ्यां ऋग्भ्यां सह पञ्चदश तावत् सामिधेन्य इति स्थितम् । तासां च सामिधेनीनां सम्बन्धीनि यान्यक्षराणि तेषां गणनायां सत्यां षष्ट्युत्तरशतत्रयं संपद्यते । गायत्रीछन्दस्कत्वादेकैका तावदृक् चतुर्विंशत्यक्षरा । तासां पञ्चदशसंख्यासंबन्धे सति कथिता संख्या संपद्यते । संवत्सरस्य च चैत्रादिद्वादशमासात्मकस्य तावत्संख्यान्यहानि । 'तस्मिन् त्साकं त्रिशता न शङ्कवोऽर्पिताः । षष्टिर्न चलाचलासः'[d] इति मन्त्रदर्शनात् । 'त्रीणि वै षष्टिशतानि संवत्सरस्याहोरात्राः'[e] इति ब्राह्मणाच्च । तथा चाक्षरसंख्या

2. २६-३० संवत्सराहस्संख्या च समेति कृत्वा संवत्सराहःप्राप्तिर्भवति । **ता–समृद्ध्यै ।** यज्ञस्यैव समृद्ध्यै इत्यन्तः संदर्भः प्रथमाध्याय एव व्याख्यात इति इह न

a. RV. 3. 27. 1.
b. RV. 5. 28. 6.
c. TS. 2. 5. 7. 1–2.
d. RV. 1. 164. 48.
e. Cf. AA. 3. 2. 1.

1. MSS. प्रकरणान्तरेण

व्याख्यायते। यदुच्यते सूत्रकारेण—'अग्ने महाँ असि ब्राह्मण भारतेति प्रणवेन संधाय'[a] इति तस्यायं विधिः—**उत्तमायै-उपसंदधाति ॥** 2.३१

इति द्वितीयः खण्डः

**अग्ने-इति ।** 'आ जुहोता दुवस्यत'[b] इत्येषा सामिधेनीनामन्त्या । 3. १
तस्यास्त्रिवारं पठनं कर्तव्यमिति ह्युक्तम्। तत्र च यत् तृतीयं वचनमस्ति तदवसाने यः प्रणवस्तेन सह 'अग्ने महाँ असि'[c] इत्यादि निगदं संधाय पठेत्। 'वृणीध्वं हव्यवाहनो अग्ने महाँ असि ब्राह्मण भारत' इति। अस्य प्रवरमन्त्रस्यायमर्थः—हे अग्ने त्वं देवानां मध्ये महत्त्वयुक्तोऽसि। महत्त्वं च सर्वदेवतात्मकत्वात्। सर्वाहुत्याधारत्वाच्च। ब्राह्मणेत्यग्नेः संबोधनम्। ब्राह्मणवर्णाभिमानित्वाद् ब्राह्मणत्वम्। तच्च 'आग्नेयो वै ब्राह्मणः'[d] इति ब्राह्मणादवसेयम्। एककारणप्रभवत्वाच्च। तदिदं पदद्वयं सुगमं मन्वानो भारतेत्यामन्त्रणपदं व्याचष्टे—**अग्निः-भरति ।** भारत एव भरतः। तद्धितोऽनति- 3. २, ३
रिक्तार्थः यथा रक्ष एव राक्षस इत्येतदभिप्रायेण भरत इति व्याख्येयपदानुवादः। कथं पुनरग्नेर्भरतशब्दवाच्यत्वमिति चेत्। नायमग्नौ रूढिवृत्त्या शब्दो वर्तितुं भवति। अपि तु अवयवार्थतो योगेन। अस्ति चात्रार्थान्वयः। यस्मात् सोऽग्निर्देवेभ्यो यजमानदत्तं[1] हविर्भरति धारयति। अतो भरतत्वमग्नेरुपपन्नम्। तथा चाध्वर्युवेदब्राह्मणे एतत्पदव्याख्यानरूपं ब्राह्मणमधीमहे—'भारतेत्याहैष हि देवेभ्यो हव्यं भरति'[c] इति। अत्र सूत्रम्—'अमुतोऽर्वाञ्चि यजमानस्य त्रीण्यार्षेयाण्यपि व्याहृत्य षट् तु द्विगोत्रस्य पुरोहितप्रवरेणाब्राह्मणस्य मानवेति सर्वेषाम्'[e] इति। अस्यार्थः—वर्तमानं यजमानमपेक्ष्य पूर्वभावी यो गोत्रस्य प्रवर्तते तदपत्यपरंपरयार्वाञ्चि यानि यजमानसंबन्धीनि

a. ŚŚ. 1. 4. 14.
b. RV. 5. 23. 6.
c. TS. 2. 5. 9. 1.
d. TS. 5. 6. 4. 5.
e. ŚŚ 1. 4. 15.

1. T. V. यजमाने दत्तं

आर्षेयाणि ऋषेरपत्यानि तद्धितप्रत्ययान्तानि आमन्त्रितविभक्तियुक्तानि ब्रूयात्। तद् यथा—'अग्ने महाँ असि ब्राह्मण भारत शाक्त्य पाराशर्य' इति। इह वसिष्ठस्यापत्यं शक्तिस्तस्यापत्यं पराशरः तत्सन्ततिजातो यजमान इत्यर्वाक्त्वं गम्यते। तथा च तैत्तिरीयम्—'परस्तादर्वाचो वृणीते तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते'[a] इति। प्रपिपत इति पालयन्तीत्यर्थः। यदि पुनर्यजमानो गोत्रद्वयवान् भवेत् तदा षड् वा त्रीणि वार्षेयाणि विकल्पेन वृणीत। तुशब्दस्य विकल्पार्थत्वात्। ब्राह्मणानामुक्तो विधिः। यदा पुनरब्राह्मणो ब्राह्मणव्यतिरिक्तः क्षत्रियादिर्यजमानः स्यात् तदा पुरोहितप्रवरेण आर्षेयाणि ब्रूयात्। 'पुरोहितस्यार्षेयेण प्रवरं वृणीरन्'[b] इति श्रुतिवचनात्। तथा चाश्वलायनः—'पौरोहित्यान् राजविशाम्'[c] इति। ऐतरेये च 'पुरोहितस्यार्षेयेण प्रवरं प्रवृणीरन्'[d] इति। त्रयाणामपि वर्णानां साधारण्ये मानवेत्येवार्षेयवरणं कुर्यात्। आश्वलायनीये[e] तु तस्य विषयभेदोऽपि
3. ४-६ दर्शित इति तदेवार्षेयवरणं विधत्ते—**अथ-आह**। यस्मादार्षेयरहितस्य हविर्देवा अभोज्यान्नत्वबुध्या[1] न स्वीकुर्वते तस्मादार्षेयवरणमवश्यं कर्तव्यम्। अत एवार्षेयवरणस्यावश्यकत्वमभिप्रेत्य 'सर्वेषां मानवेति संशये'[f] इत्युक्तम्। असाधारणार्षेयसंशये संजातेऽप्यार्षेयवरणं कर्तव्यम्। 'अग्ने महाँ असि ब्राह्मण भारत मानव' इति। न हि मनुसन्ततिजत्वं प्रति सन्देहः संभवी। 'मानव्यो वै प्रजाः'[g] इति हि श्रुतिः। सर्वथाप्यार्षेयवरणमावश्यकमित्यर्थः। अत्रैवार्षेयमित्येकवचनमविवक्षितम्। त्र्यार्षेयस्य कर्माधिकारसंभवस्य न्यायसिद्धत्वात्। तथा ह्यधिकारलक्षणे[h] स्थितम्—दर्शपूर्णमासयोः 'आर्षेयं वृणीते'[a] इति विधाय 'एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चाति वृणीते' इति श्रूयते। तत्रैकार्षेयद्व्यार्षेयत्र्यार्षेयवात्रयेषु विशेषादर्शनात्

a. TS. 2. 5. 8. 7.
b. Cf. AB. 7. 25. 4.
c. AŚ. 1. 3. 3.
d. AB. 7. 25. 4.
e. Cf. AŚ. 1. 3. 3-5.
f. AŚ. 1. 3. 5.
g. TS. 3. 4. 3. 7.
h. Cf. JS. 6. 1. 43.

1. T. V. add देवा

त्रयोऽपि विधय इति प्राप्तम् । नैतद्युक्तम् ; वाक्यभेदप्रसङ्गात् । तत्परिहाराय त्रीन् वृणीत इत्यस्यैव विधित्वम् । अन्यत्तु वाक्यद्वयमनुवृत्य पाठेन स्तावकम् । यदैकवरणद्विवरणे अपि कर्तव्ये तदा त्रिवरणस्य **कर्तव्यत्वं** किमु वक्तव्यमिति स्तुतिः । चतुरादिनिषेधस्याप्यप्रसक्तत्वात् निषेधविध्यर्थत्वाभावात् नित्यस्तुतिपरत्वमेव । तस्मात् त्र्यार्षेयवरणविधिरेवायम्¹ इति ।

ननु वासिष्ठादिशब्दानां यजमानवाचित्वात् कथमेतैः शब्दैरग्नेरामन्त्रणाम् ? न ह्यन्यवाचिना शब्देनान्यस्य आमन्त्रणं कुर्वन् अनुन्मत्तः स्यात् । उच्यते । यद्यपि वासिष्ठादिशब्दा यजमानवाचकाः तस्य वसिष्ठाद्यपत्यत्वात् तथापि यजमानाग्न्योरभेदाद् यजमानाभिधायिनोऽपि भवन्त्यग्न्यभिधायकाः । अभेदश्चोत्पाद्योत्पादकत्वनिबन्धनः । उत्पाद्योत्पादकभावश्च 'अग्नीनादधीत'[a] इति द्वितीयाश्रुतेरवगम्यते। न हि द्वितीयाभिहितमग्नीना कर्मत्वमुत्पाद्यत्वमन्तरेणान्येन प्रकारेण संगच्छते । तथा च मन्त्रः—'अहं त्वदस्मि मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि'[b] इति । परस्परस्य परस्परशब्दवाच्यत्वं च मन्त्रान्तरे श्रूयते—'मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे । तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्ने ।।'[c] इति । प्रवरमन्त्रपाठानन्तरं 'अग्निर्देवेद्धः'[d] इत्यादिकानां 'परिभूरसि'[e] इत्यन्तानां पदानां पाठं विधत्ते—**अथ-**
**उपसंदधाति** । पञ्चदशसंख्यानि पदानि 'अग्निर्देवेद्धः'[d] इत्यादीनि यस्य स तथोक्तः । 3. ७
एतं बुद्धिस्थतया प्रकृतम् । उपसंदधाति पठेत् । पञ्चदशपदत्वं स्तौति—**एषा-**
**सामिधेन्यः** । यथा मरुत्वतीयादिशस्त्राणाम् 'इन्द्रो मरुत्वान्'[f] इत्यादिका निवित् 3. ८-१०
पठ्यते, एवं 'अग्निर्देवेद्धः'[d] इत्यादिको निगदः सामिधेनीनां निवित्स्थानीयो भवति । अतः सामिधेन्यङ्गत्वात् सामिधेनीवत् पञ्चदशसंख्योपेत इति श्लिष्यते ।
अथास्य निगदस्य यजुर्मन्त्रत्वं स्तौति—**स-स्तवानीति** । छन्दसा गायत्र्यादी- ३.११-१३
नामन्यतमेन नियतपरिमाणतया परिच्छिन्नो न भवतीत्यच्छन्दस्कृतम् । 'इष

a. PB. 25. 13. 1.
b. TB. 1. 2. 1. 20.
c. TS. 1. 5. 10. 1.
d. SS. 7. 9. 3.
e. SS. 1. 4. 21.
f. SS. 8. 16. 1.

1. T. त्र्यार्षेयविधिपरत्वमेव

त्वा'[a] इत्यादिवद् यजुर्मन्त्रत्वात् । वैशब्दोऽच्छन्दस्कृतस्य प्रसिद्धिमाह । तथा ह्यैतरेयोपनिषदि यजुर्मन्त्राणाममितत्वरूपमच्छन्दस्कृतत्वं प्रतिपाद्यते । 'यजुर्निगदो वृथा वाक् तदमितम्'[b] इति च । यदेव किंचिद् वाचकशब्दरूपमस्ति तच्छन्दस्कृताच्छन्दस्कृतभेदेन द्विविधं भवति । वेदे 'अग्निमीळे'[c] इत्यादिकम् लोके 'अस्त्युत्तरस्याम्'[d] इत्यादिकं च छन्दस्कृतम् । 'इषे त्वा'[a] इत्यादिकं वेदे··· लोके चाच्छन्दस्कृतम् । न च कथितराशिद्वयानन्तर्भूतः प्रकारो वाचकशब्दजातस्य दृश्यते उपपद्यते वा । ततश्च प्रथमं सामिधेनीरनन्तरमेतन्निगदं च पठन्[1] होता छन्दस्कृताच्छन्दस्कृतभेदभिन्नेन कृत्स्नेनापि वाङ्मयेन अग्नेः स्तुतिः कृता भवतीति प्रतिपत्त्या पठेत् । यच्छन्दस्कृतं शब्दरूपमस्ति तत् सामिधेनीष्वन्तर्भवति । अन्यत्तु 'अग्निर्देवेद्धः'[e] इत्यस्मिन्निगदे । तथा च सर्वः शब्दप्रपञ्चोऽग्नेः स्तुतिरूप इति प्रतिपत्तिः ।

3. १४-१६ निगदपाठे कंचिद् विशेषं विधत्ते—**तस्य-आप्त्यै** । प्रथमं 'घृताहवन'[f] इत्यन्तानि सप्तपदानि परस्परं संधाय 'घृताहवन'[f] इत्यत्रोच्छ्वस्य विरमेत् । पुनः 'प्रणीर्यज्ञानाम्'[f] इत्यादीनि चत्वारि पदानि संधाय पठित्वा 'तूर्णिर्हव्यवाड्'[f] इत्यत्र विरमेत् । पुनश्च 'आस्पात्रं जुहूः'[f] इत्यादीनि संधायोक्त्वा 'परिभूरसि'[f] इत्यत्र विरमेत् । स च विरामो गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्याख्यानां सप्तसंख्यानां छन्दसां परिगृहीत्यै संपद्यते । चतुष्टयं वा इत्यादि गतम् ।

अत्र सूत्रम्—'व्यवस्यन्नावाहयति देवताः'[g] इति । अस्यार्थः—देवता अग्न्यादिका व्यवस्यन् पृथक्पृथगवसानं प्रतिवाक्यं कुर्वन्नावाहयेदिति । तस्यैतद्
3. २०-२२ विधानम्—**अथ-आवाहयति** । प्रतिवाक्यं विच्छिद्य विच्छिद्य देवता आवाहयेत् । तच्चैतद् युक्तम् । यस्मादाभ्यो देवताभ्यः पृथक् पृथगेव हविषां ग्रहणं निष्पादनं

a. TS. 1. 1. 1. 1.
b. AA. 2. 3. 6.
c. RV. 1. 1. 1.
d. Kumāra. 1. 1.
e. ŚŚ. 7. 9. 3.
f. ŚŚ. 1. 4. 21.
g. ŚŚ. 1. 4. 22.

1. M. पठेत्

कृतम् तस्मात् तत्समर्पणार्थमावाहनमपि पृथक् पृथगेव कर्तव्यमिति श्लिष्यते। अत्र 'आ वह देवान् यजमानाय'[a] इत्यादिरावाहननिगदः। तत्र 'आ वह देवान् यजमानाय' इति सामान्येन देवानामावाहनप्रार्थनां कृत्वा 'अग्निमग्न आवह'[a] इत्यादिना निगदेन प्रत्येकमावाहनं प्रार्थ्यते। हे अग्ने आहवनीय त्वमग्निं प्रथमाज्यभागदेवताममुं देवयजनदेशं प्रति प्रापय। अत्र तावदेकस्यैवाग्नेः आवाह्यत्वमावाहनकर्तृत्वं च प्रतीयते। तदसमञ्जसमिव भाति। कर्तृत्व-कर्मत्वयोरेकार्थवर्तित्वासंभवाद् इत्याशङ्कां रूपभेदप्रदर्शनेन परिहरन् तात्पर्यार्थं
दर्शयति—**अथ-तदाह।** अग्निना प्रयोज्यकर्त्रा अग्निमावाहयति होतेति यदस्ति 3. २३-२७
तदुपपन्नमेव। अस्ति ह्यग्ने रूपद्वयमपरोक्षं परोक्षं च। तयोराद्येन रूपेण आवाहनकर्तृत्वमितरेण आवाह्यत्वम्। तत्र येन रूपविशेषेण कर्तृत्वं तेन तद् दर्शयति—एषेति। यास्याग्नेर्हव्यवाडिति प्रसिद्धा यज्ञिया यज्ञस्य संपादनीया तनूरस्ति सा तनूः। एषा इत्यभिनयपूर्वको निर्देशः। पुरोऽवस्थिताहवनीयरूपेत्यर्थः। अनया तन्वा विशिष्टः सन्नग्निर्देवेभ्यो हव्यं यथायथं वहति। अनयैव च देवान् देवयजनदेशं प्रापयति। यद्विषयो व्यपदेशोऽग्नेर्होतृत्वदूतत्वादिगोचरः। अथ येन रूपेणावाहनकर्मत्वं तद् दर्शयति—सा वा असौ इति। असाविति परोक्ष-तया निर्देशः। यस्माद् यज्ञनिष्पादकतनूव्यतिरिक्ता यजनीयास्याग्नेः काचित्त-नूरस्ति या देवसमीपं प्रति हव्यप्रापणेन हव्यवाडिति प्रसिद्धा सा पुनरसौ शास्त्रैकगम्यतया परोक्षतनूः। अमुष्य दृश्यमानस्यादित्यस्य स्थानादुपरिष्टाद्वर्त-माने स्थाने दिवि द्योतमाने लोके ज्योतिः प्रकाशरूपतया वर्तमानं भाति प्रकाशते तदेवासौ तनूरिति द्रष्टव्यम्। अनेन चोक्तेन रूपेणावाह्यत्वम्। अत आवाहकावह्ययोर्भेदान्न विरोधः। तत् तत्र 'अग्निमग्न आवह'[a] इति यद् वाक्यं होता वदति तेन वाक्येन तां दिवि वर्तमानामग्नेस्तनूमिहानयेत्येव आहवनीयं प्रति होता प्रार्थयते। 'देवाँ आज्यपाँ आ वह'[a] इत्यस्य तात्पर्यमाह—
**अथ-आवाहयति।** प्रयाजानुयाजानामाज्यहविष्ट्वाद् आज्यपशब्देन प्रयाजानु- 3.२८, २९
याजदेवता विवक्ष्यन्त इत्यर्थः। 'अग्निं होत्रायावह'[a] इत्यत्र अग्निशब्देन न पूर्व-वाक्योक्तोऽग्निर्विवक्ष्यते। किं तु स्विष्टकृन्नामकोऽग्निविशेष इत्यभिप्रायेणाह—

a. ŚŚ. 1. 4. 23.

3. ३०-३४ **अथ-महिमा** । स्वशब्द आत्मीयवचनः । अग्नेर्यः स्वभूतो महिमा महत्त्वमस्ति स वायुरेव ॥

इति तृतीयः खण्डः

कथमन्यदीयमहत्त्वस्यान्यात्मकत्वमिति चेत् वायोरग्निमहत्त्वहेतुत्वात्
4. १ तद्रूपत्वव्यपदेश औपचारिक इत्याह— **तेन-गच्छति** । हिः प्रसिद्धौ । लोके ह्यग्निर्वायुना संगम्य महिमानं महत्त्वं प्राप्नोति । विशिष्टकाष्ठपृष्ठाधिष्ठितस्य जातवेदसो मातरिश्वना प्रेरितस्य प्रभूतत्वदर्शनात् । तद्धेतौ च वस्तुनि तद्रूपत्वव्यपदेशो लोकवेदयोः प्रसिद्धतर एव । यथा 'लाङ्गलेन वयं जीवाम' इति । यथा वा 'आयुर्घृतम्'[a] इति । ननु देवतावाहनं तावत् तासां यागार्थमेव युक्तम् । अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात् । स्वमहिमशब्दवाच्याया वायुदेवतायास्तु न यागः; अग्न्यादीनामेवात्र यागदर्शनात् । तथा च यागार्थं देवतामावाह्य यागाननुष्ठाने 'देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते'[b] इति न्यायापत्तेः होतुर्यजमानस्य दुर्निवारानर्थपरंपराप्राप्तिरित्या-
4. २, ३ शङ्क्य स्वस्य महिम्नोऽपि यागं संपादयति— **यद्वेव-भवति**। वाचा वागिन्द्रियेण करणभूतेनान्वाह अनुवाक्यां पठति होतेति यदस्ति, यच्च वाचा याज्यां पठति, तेनास्थानेन होत्रा स्वो महिमा वायुरिष्टो यागेन विषयीकृतो भवति । याज्यापुरोनुवाक्यापठने यो वागिन्द्रियस्य व्यापारः स[1] प्राणात्मिकाया वायुदेवताया याग एवेति वेदितव्यम् । आवाहननिगदावसाने यदेतन्निगमनवाक्यं
4. ४, ५ तस्यार्थमाह—**आ-तदाह** । हे जातवेदः जातप्रज्ञ जातधन वा अग्ने । एवमुक्तेन प्रकारेण देवानावह आहूतांश्च तान् आज्यभागादिस्विष्टकृदन्तान् सुयजा शोभनेनानेन यागकर्मणा यज । अथवा शोभनो यष्टा भूत्वा यज । न केवलमावाहनमेवेह त्वया कर्तव्यम् । तेषां यागोऽपि त्वयैव कार्य इति निगमनवाक्यतात्पर्यमित्यर्थः । यदुक्तं सूत्रकारेण—'आवाह्योर्ध्वज्ञुरुपविश्य दक्षिणेन प्रादेशेन

a. TS. 2. 3. 2. 2. b. TS. 2. 4. 11. 4.

1. T. V. व्यापारहेतोः for व्यापारः स

भूमिमन्वारभ्य जपति'[a] इति तद् विवृत्ते—**अथ-उपरिष्टाच्च।** सामिधेनीरूपो 4. ६-८
हि वज्रः प्रयुक्तः सन् प्रयोक्तुर्होतुर्यजमानस्य च महतेऽनर्थाय कल्पेत। अत-स्तस्य शान्तिरवश्यमनुष्ठेया। तत्र 'कं प्रपद्ये'[b] इत्यादिको यो जपः पूर्वं विहितः यश्चायं 'अस्यै प्रतिष्ठायै'[c] इत्यादि, ताभ्यामुभाभ्यां जपाभ्यामेनं सामिधेनीरूपं वज्रमुभयतः शान्तं करोति। शान्तिहेतुभ्यां जपाभ्यामुभयोः पार्श्वयोः परिगृहीतः सन् वज्रः शान्ति प्राप्नोतीत्यर्थः।

अत्रायं प्रयोगक्रमः—सामिधेनीपाठानन्तरम् 'अग्ने महाँ असि'[d] इत्या-दिकमार्षेयं निगदं पठेत्। अथ 'देवेद्धः'[e] इत्यादीनि पञ्चदशपदान्युक्त्वा 'आ वह देवान् यजमानाय'[f] इत्यादिकम्, 'आ च वह जातवेदः सुयजा च यज'[g] इत्यन्तमावाहननिगदं पठेत्। अथोर्ध्वज्ञुर्भूत्वोपविश्य वेद्यां स्तीर्णं बर्हिरपनीय दक्षिणेन प्रादेशेन भूमिं स्पृष्ट्वा 'अस्यै प्रतिष्ठायै'[h] इत्यादिकं शाखान्तरीयं मन्त्रं जपधर्मेणोक्त्वा 'अमुकशर्मा होता मानुषः' इत्यध्वर्युणोक्ते 'देव सवितः'[i] इत्यादिकं 'विश्वचर्षणिः'[i] इत्यन्तं मन्त्रं जपधर्मेण पठेत्। अथोत्थाय तस्मिन्नेव प्रदेशे स्थित्वा दक्षिणहस्तप्रादेशेनाध्वर्योर्वामहस्तप्रादेशेनाग्नीध्रस्य च दक्षिणमंसं युगपदेव स्पृष्ट्वा 'इन्द्रमन्वारभामहे'[j] इत्यादिकम् 'उभे इमे'[j] इत्यन्तं मन्त्रं जपित्वा अंसौ विमुच्य 'षण्मोर्वी'[k] इत्यादिकम् 'ओषधयश्च'[k] इत्यन्तम् जपधर्मेण पठेत्। अनन्तरमत्रैव स्थितः 'ऐन्द्रीमावृतम्'[l] इत्यादिना प्रदक्षिणमा-वृत्य होतृषदनाच्छुष्कं तृणमादाय मूलतोऽग्रतश्छित्वा दक्षिणापरदिगन्तरालं प्रति 'निरस्तः परावसुः'[m] इत्यादिना निरस्याप उपस्पृश्याशुष्कं तृणं होतृषदन उदगग्रं निधाय अद्भिः प्रोक्ष्य 'इदमहम्'[n] इत्यादिना होतृषदन उपविशेत्। अथोपस्थं दक्षिणावयवोद्गततरं कृत्वा पाणी प्राचीं दिशं प्रत्यञ्चन्तौ

a. ŚŚ, 1. 5. 8.
b. ŚŚ. 1. 4. 5.
c. ŚŚ. 1. 5. 9.
d. TS. 2. 5. 9. 1.
e. ŚŚ. 7. 9. 3.
f. TS. 2. 5. 9. 4.
g. ŚŚ. 1. 5. 7.
h. VS. 2. 25.
i. ŚŚ. 1. 6. 2.
j. ŚŚ. 1. 6. 3.
k. ŚŚ. 1. 6. 4
l. ŚŚ. 1. 6. 5.
m. ŚŚ. 1. 6. 6.
n. ŚŚ. 1. 6. 9.

प्रगुणाङ्गुली संपुटितौ च विधाय 'नमो द्यावापृथिवीभ्याम्'[a] इत्यादिकं जपन् गार्हपत्याहवनीयावीक्षेत । अथ किंचिदुदक् सर्पन् 'एष वामाकाशः'[b] इति मन्त्रं ब्रूयात् । पुनश्च 'विश्वे देवाः शास्तन'[c] इत्येतां 'तदद्य वाचः प्रथमम्'[d] इत्येतां 'नमो महद्भ्यः'[e] इत्येतामृचं च जपधर्मेण पठेत् ।

अथ 'अग्निर्होता वेतु'[f] इत्यादिकं 'होतारमवृथा'[g] इत्यन्तं मन्त्रं पठेत् । अत्र च 'यजमानदेवता'[f] इत्यत्र विरम्योच्छ्वासः कर्तव्यः । 'योऽग्निम्'[g] इत्यादिकं चोपांशु ब्रूयाद् इति विशेषो द्रष्टव्यः । अनन्तरं 'घृतवतीमध्वर्यो स्रुचम्'[h] इत्यादिना निगदेनाध्वर्युं स्रुचौ ग्राहयेत् । तमेतं विधिमनूद्य स्तौति—**अथ-**
4. ९-११ **समश्नुते** । स्रुचौ जुहूपभृतौ आदाप्येते अध्वर्युणा ग्राह्येते येन सोऽयं निगदस्तथोक्तः । स च 'घृतवतीम्'[h] इत्यादिः । 'घृतवतीशब्देन जुहूपभृतावादाय'[i] इत्याध्वर्यवे सूत्रेऽभिहितत्वात् । 'अथ यत्र होतुरभिजानाति घृतवतीमध्वर्यो स्रुचमास्यस्वेति तज्जुहूपभृतावादायात्याक्रम्याश्राव्याह समिधो यजेति'[j] इति बोधायनवचनाच्च । तेन निगदेन[1] जुहूपभृतावध्वर्युं ग्राहयतीति यदस्ति तेनायं होता देवरथं देवसंबन्धिनं रथमेव युनक्ति योजयति । यथा लोके कश्चित् पुरुषः अभिमतं देशं प्राप्तुं कंचिद् रथं संयोजयति तथा होतापि देवान् गन्तुं तद्योग्यं रथं स्रुगादापनव्याजेन संयोजयति । 'सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथः'[k] इत्यर्थवाददर्शनात् । ततश्च स होता युक्तेनानेन देवरथेन विनाशरहितं यथा भवति तथा स्वर्गं लोकं सुखेन प्राप्नोति ।

इदानीं प्रयाजनामकान् दर्शपूर्णमासयोः आरादुपकारकान् यागविशे-

a. ŚS. 1. 6. 11.
b. ŚS. 1. 6. 12.
c. RV. 10. 52. 1.
d. RV. 10. 53. 4.
e. RV. 1. 27. 13.
f. ŚS. 1. 6. 14.
g. ŚS. 1. 6. 15.
h. TS. 2. 5. 9. 6.
i. APŚ. 2. 17. 1.
j. BŚ. 1. 16. 1.
k. TS. 5. 4. 10. 1

1. T. V. add स्रुचा

षान् विधत्ते—**प्रयाजान्-प्रीणाति ।** गतमेतत् । संख्यां प्रशंसति— 4.१२-१४
**ते-आप्नोति ।** ते प्रयाजाः पञ्चसंख्याका भवन्ति । तैः पञ्चसंख्यैः प्रयाजैः 4.१५, १६
अध्यात्मं शरीरमधिकृत्य आधिदैविकं देवतामधिकृत्य यत् किंचित् पञ्चविधं पञ्चप्रकारान्वितं वस्तु विद्यते। तत्राधिदैवतं पञ्च जनाः अध्यात्मं पञ्चेन्द्रियाणि। तत् सर्वमयं होता यजमानश्च प्राप्नोति ।

अथ प्रत्येकं समिदादियागान् प्रशंसति । तत्र तावद् आद्यं प्रयाजं
स्तौति—**समिधो-समिध्यते ।** समिधो यजतीति यदस्ति तेन वसन्ताख्यमृतुमेव 4.१७, १८
यजति । उक्तं हि पुरस्तात् 'ऋतवो वै प्रयाजानुयाजाः'[a] इति । तैत्तिरीये चैवमाम्नायते—'समिधो यजति वसन्तमेवर्तूनामव रुन्धे'[b] इति । कथं समिच्छब्देन वसन्तस्याभिधानमित्यत उक्तं वसन्ते वा इति । यस्मादिदं सर्वं जगत् वसन्तकाले समिद्धमादित्यरश्मिभिः प्रदीप्तं भवति तस्मात् सम्यक् इध्यते दीप्यत इति व्युत्पत्त्या समिच्छब्देन वसन्ताभिधानं घटत इत्यर्थः । द्वितीयं प्रयाजं
प्रशंसति—**तनूनपातं-तपति ।** ग्रीष्मे वसन्तकालादप्यादित्यस्योग्रतरत्वात् 4.१९, २०
तत्र प्राणभृतां शरीराणि तप्तानि भवन्ति । ततस्तन्वं शरीरं तपति पीडयतीति व्युत्पत्त्या तनूनपाच्छब्देन ग्रीष्मोऽभिधीयते । तृतीयं स्तौति—
**इळो-उत्तिष्ठति ।** इळ्छब्देन बहुवचनान्तेन वर्षर्तुरभिधीयते । यस्मादन्नाद्यं 4.२१, २२
व्रीह्यादिकं वर्षाभिरीळितं स्तुतं वृष्ट्युदकेनाप्यायितं सदुत्थितं भवति । तस्मादीळिधातुयोगादिळ्छब्देन वर्षाभिधानं युक्तम् । चतुर्थं स्तौति—
**बर्हिर्-भवन्ति ।** बर्हिष्ठा अतिशयेन प्रवृद्धा ओषधयः व्रीह्यादयः । 4.२३, २४
पञ्चमं प्रशंसति—**स्वाहाकृतिमन्तं-स्वाहाकृतम् ।** स्वाहाकृतिशब्दान्मतुप् । 4.२५, २६
स्वाहाकारशब्दवानित्यर्थः । यस्मादिदं सर्वं हेमन्ते स्वाहाकृतद्रव्यसदृशं भवति । यथाग्नौ हुतं चरुपुरोडाशादि तत्क्षणमेव शुष्यत् गतरसं संपद्यते तद्वद्धेमन्ते सर्वमिदं प्राणिजातमवसन्नं भवति । तथा चार्थवादान्तरम्—'स्वाहाकारं यजति हेमन्तमेवाव रुन्धे । तस्मात् स्वाहाकृता हेमन् पशवोऽवसीदन्ति'[c]
इति। अत्र चोदयति—**तदाहुर्-इति ।** तत् तत्र प्रयाजैः ऋतव एवेज्यन्त इत्युक्ते 4. २७

a. KB. I. 4. २.    b. TS. 2. 6. 1. 1,
c. TS. 2. 6. 1. 1,

केचिद् वक्ष्यमाणं प्रश्नवाक्यमुक्तवन्तः। किमित्याह—पञ्च प्रयाजा भवन्तीति
तावदविवादम्। ऋतवः पुनः षट्संख्याका इत्यप्यविवादम्। तत्र प्रयाजैः ऋतु-
यागपक्षे षष्ठमृतुं शिशिराख्यं कस्मिन् प्रयाजे होता यजतीति वक्तव्यमिति
4. २८ चोद्यम्। उत्तरमाह—**यदेव–अनुविभजति**। चतुर्थः प्रयाजः बर्हिर्यागः। तं यष्टुं
उपभृति गृहीतस्याज्यस्यार्धं जुह्वां समानेतव्यम्। तथा चाध्वर्युब्राह्मणम्—
'समानयत उपभृतः'[a] इति। कल्पवचनं च 'चतुर्थं यक्ष्यन् अर्धमौपभृतस्याज्यस्य
जुह्वां समानयते'[b] इति। यदेतत् समानयनमस्ति तत् तेन एनं षष्ठं शिशिरा-
ख्यमितरेषु वसन्तादिषु पञ्चस्वृतुषु अनुविभजति[1] क्रमेण विभज्य स्थापयति
अन्तर्भावयति[1]। तथा च षष्ठस्य पञ्चस्वेवानुप्रविष्टत्वात् न तस्य पृथग्यागः
कार्यः। किंतु य एव पञ्च यागाः पञ्चानामृतूनां सन्ति त एव षष्ठस्यापि
यागः। अत एव 'द्वादश मासाः पञ्चर्तवः'[c] इत्यादिषु पञ्चसंख्यत्वमप्यृतूनां
क्वचिदाम्नायते। ऐतरेये तु 'पञ्चर्तवो हेमन्तशिशिरयोः समासेन'[c] इति
पञ्चत्वसंख्याम्नानानुपपत्तिः स्वयमेवाशङ्क्य परिहृता। अतो न संख्यावैषम्य-
कृतो दोषः॥

इति चतुर्थः खण्डः

अथ स्वाहाकारनामके पञ्चमे प्रयाजे याज्यायां द्वितीयाविभक्त्यन्तैः
१-४ पदैः आज्यभागादिदेवतानामनुद्रवणं प्रशंसति—**अथ–करोति**। उत्तमे प्रयाजे
देवताः समावपतीति यदस्ति तेन समावापेनैना देवताः प्रयाजभाज एव
करोति। प्रयाजान् भजन्ते सेवन्त इति प्रयाजभाजः। प्रयाजानामग्निदेवत्यानां
सतामितरदेवताभिः सम्बन्ध एवानेन संपाद्यते। तथा संपादने[2] च यथाग्निः
सर्वेष्वग्नीषोमीयादिष्वपि हविःषु भागी भागवान् भवति। 'ऊर्जस्वन्तं हविषो
दत्त भागम्'[d] इति सर्वेषामपि हविषामग्निना होत्रार्थिनां देवानां सकाशादवर-

a. TS. 2. 6. 1. 2.
b. BŚ. 1. 16. 3.
c. AB. 1. 1. 14.
d. RV. 10. 51. 8.

1. T. omits.
2. A. M. संपादनेन

त्वेन स्वीकृतत्वात् । अग्नेः सर्वदेवमुखत्वाच्च । न हि मुखेन विना कस्याश्चिदपि देवताया हविर्भोगः शक्यसंपादनः । तथैवाग्नेर्भागे प्रयाजाख्ये देवता अग्नीषोमादिका अपि देवता भागयुक्ताः करोति । प्रयाजानामाग्नेयत्वमाख्यायिकारूपया श्रुत्या प्रथमाध्याय एव प्रपञ्चितम् । न ह्येतत् हृदयंगमम्—देवदत्तस्य भागे यज्ञदत्तो भागवान्, न पुनः देवदत्तो यज्ञदत्तभागे भागवानिति । अतोऽग्नेर्देवतानां च भागसाम्यसम्पादनार्थोऽयं देवतासमावापः ।

अथ देवताः समावपतीत्यविशेषेणोक्ते स्विष्टकृतोऽपि समावापप्रसक्तौ निषेधति—**न–आह** । अत्र उत्तमे प्रयाजे । अत्र हेतुमाह—**पशवो–इति** । ये 5.५.5.६-८
प्रयाजा नाम ते पशव एव । तद्धेतुत्वात् । स्विष्टकृदग्निश्च रुद्र एव । तच्च तैत्तिरीयादवगम्यते—'देवा वै यज्ञाद् रुद्रमन्तरायन् । स यज्ञमविध्यत् । तं देवा अभि समगच्छन्त । कल्पतां न इदमिति । तेऽब्रुवन् । स्विष्टं वै न इदं भविष्यति यदिमं राधयिष्याम इति । तत् स्विष्टकृतः स्विष्टकृत्त्वम्'[a] इति । 'यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद् रुद्रं समर्धयति'[b] इति च । एवं सति यदि होतोत्तमे प्रयाजे इतरदेवतावत् स्विष्टकृतमप्यावपेत् तर्हि पशूनां रुद्रेण सह सम्बन्धापातात् यजमानस्य पशवो विनश्येयुः । रुद्रस्य देवतायाः क्रूररूपत्वात् । 'रुद्रो वै क्रूरो देवानाम्'[c] इति दर्शनात् । तस्माद् यजमानस्य स्वभूतान् पशून् रुद्रेण क्रूरदेवतया प्रसजानि प्रकर्षेण संबद्धानत एव तेन हिंसितान् संपादयामीति परिभयं द्योतयन्नुत्तमे प्रयाजे स्विष्टकृत आवापं न कुर्यात् । उत्तम एव प्रयाजे शाखान्तरिभिरभिमतं कंचित् पाठमुपन्यस्य दूषयति—**स्वाहा–असमिष्टम्** । यज्ञस्य यागस्य एकमर्धमाज्यम् । अपरं चरुपुरोडाशादिरूपं हविः । 5. ९-१३
द्रव्यत्यागात्मकस्य यागस्योभयविधद्रव्यसाध्यत्वात् । एवं स्थिते स होता यत् यद्यन्यतरदर्धमाज्यस्येत्येव वा हविषः इत्येव वा ब्रूयात् तदा यज्ञस्यार्धमेव आज्यरूपमेव वा हवीरूपमेव वा समिष्टं सम्यगिष्टं देवतामुद्दिश्य त्यक्तं स्यात् । इतरं त्वर्धमसमिष्टमेव भवेत् । तथा च क्रतुवैकल्यापत्त्या यजमानस्य नाभिमत-

a. TS. 2. 6. 8. 3.
b. TS. 2. 6. 6. 5.
c. TS. 6. 1. 7. 7–8.

फलप्राप्तिः। प्रत्युतानर्थप्राप्तिरेव स्यात्। यस्मादेवं तस्मादित्थं पाठः कर्तव्य
5. १४ इति सिद्धान्तयति—**तस्मात्–ब्रूयात्**। अथाज्यभागयोः पुरोनुवाक्ये उपदिशन्
5. १५, १६ प्रथमं पौर्णमासयागवर्तिनोराज्यभागयोः पुरोनुवाक्ये दर्शयति—**अथ–अहन्**। वार्त्रघ्नौ वृत्रहशब्दयुक्तौ। ते च 'अग्निर्वृत्राणि जङ्घनत्',[a] 'त्वं सोमासि सत्पतिः'[b] इत्येते। 'अग्निर्वृत्राणि जङ्घनत् त्वं सोमासि सत्पतिः इत्याज्यभागौ वार्त्रघ्नौ पौर्णमास्याम्'[c] इति सूत्रवचनात्। यदेतत् वार्त्रघ्नत्वं तत् पौर्णमासानुरूपम्। यस्मादिन्द्रः पूर्वं पौर्णमासेन कर्मणा वृत्रनामानमसुरं निहतवान्। पौर्णमासस्य कर्मणो वृत्रवधहेतुत्वम् 'अग्नीषोमौ वा अन्तर्वृत्र आस्ताम्'[d] इत्येतद्वाक्य-व्याख्यानावसरे अनन्तरमेव प्रपञ्चयिष्यामः। अमावास्येष्टचाज्यभागयोः
5. १७-१९ पुरोनुवाक्ये दर्शयति—**अथ–वर्धयति**। वृधन्वन्तौ वृधिधातुयुक्तौ। अमावास्यां चन्द्रः क्षयं गच्छति। आदित्येनामा सह चन्द्रो वसति यस्यां तिथौ सा तिथिरमावास्या। अतश्चन्द्रस्य पृथगुपलम्भाभावात् क्षयं गच्छतीत्युच्यते। तं क्षयं गतं चन्द्रमेतद् एतेन वर्धनार्थधातुसंकीर्तनेनाप्याययति। आप्याययतीत्येतद् व्याचष्टे—तं वर्धयतीति। तस्माद् वृधन्वतोरमावास्यायामनुरूपत्वमस्ति। तथा च सूत्रम्—'अग्निः प्रत्नेन सोमगीर्भिरित्यमावास्यायां वृधन्वन्तौ'[e] इति॥

इति पञ्चमः खण्डः

6. १ अथाज्यभागयोर्याज्यामुपदिशति—**तौ–भवतः**। जुषाणशब्दवान्निगदो याज्या ययोस्तौ तथोक्तौ। आज्यभागयोर्द्वयोरपि जुषाण एव याज्या भवति। वैशब्दः प्रसिद्धयर्थः। तथा श्रुत्यन्तरम्—'ऋचमनूच्याज्यभागस्य जुषाणेन
6. २ यजति'[f] इति। अत्र हेतुः—**समानहविषौ–भवतः**। समानं हविराज्यलक्षणं हविर्ययोस्तौ तथोक्तौ। प्रयाजानामाज्यहविष्ट्वं प्रसिद्धम् 'आज्येन प्रयाजा इज्यन्ते'[g] इत्यादौ, आज्यभागयोरपि 'यजान् व आज्यभागौ'[h] इत्यादि वाक्या-

a. RV. 6. 16. 34.
b. RV. 1. 91. 5.
c. ŚŚ. 1. 8. 1.
d. KB. III. 7. १८.
e. ŚŚ. 1. 8. 2.
f. TS. 2. 6. 2. 2.
g. TS. 6. 3. 11. 6.
h. TS. 2. 6. 3. 1.

दाज्यहविष्ट्वं प्रसिद्धम् । अतो यथा प्रयाजानां निगदयाज्यत्वमेवमाज्यभागयोरपि निगदयाज्यत्वं युक्तम् ।

इतश्चाज्यभागयोर्जुषाणयाज्यत्वमादरणीयमित्याह—**अथो–प्रयच्छति** । 6. ३, ४
योऽयं जुषाणोऽस्ति स ब्रह्मैव वेद एव भवति । निगदानां यजुर्मन्त्रविशेषत्वात् । तथा सति जुषाणयाज्यापठने ब्रह्मणा वेदेनैव देवेभ्यो हविर्होता ददाति ।

अथाज्यभागौ चक्षुष्ट्वेन प्रशंसितुं त्रैविध्यं दर्शयति—**तौ–भवतः** । तावाज्य- 6. ५
भागौ त्रिप्रकारयुक्तौ भवतः । कथमित्यत्राह—**येयजामहो–वषट्कारः** । 6. ६
ये यजामह इत्ययं भागो येयजामहः । 'नानुयाजेषु येयजामहं करोति'[a] इतिवत् । जुषाण इत्यादिर्निगदः । वौषडित्ययमंशो वषट्कारः । ततः किमित्यत्राह—
**चक्षुर्वा आज्यभागौ** । यावेतावाज्यभागौ तौ यज्ञस्यावयविनश्चक्षुरेव भवतः । 6. ७
कथं यज्ञस्येति गम्यत इति चेत्, सामर्थ्यादर्थवादान्तरदर्शनाच्च । तथा च श्रूयते—'चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यजति चक्षुषी एव तद् यज्ञस्य
प्रति दधाति'[b] इति । चक्षुष्ट्वसिद्धौ त्रिवृत्त्वस्योपयोगं दर्शयति—**त्रिवृद्–इति** । 6. ८
शुक्लकृष्णादिभिः त्रिगुणं चक्षुरिति प्रसिद्धमेव । आज्यभागलक्षणं च चक्षुरुक्तेन प्रकारेण त्रिवृदिति चक्षुष्ट्वमाज्यभागयोरुपपन्नमेव ।

अथ पशोरिष्टिविकृतित्वेन 'प्रकृतिवद् विकृतिः'[c] इति चोदकेनाज्यभागयोः तदितरेषु चाङ्गकलापेषु प्रसक्तेषु आज्यभागपर्युदासेनाङ्गान्तरविषये चोदकं
व्यवस्थापयति—**तौ–करोति** । तावाज्यभागौ पशौ न कुर्यात् । किंतु आज्यभागौ 6. ९
परित्यज्याङ्गान्तरमेव कुर्यात् । न सोम इत्येतन्निषेधशेषो दृष्टान्तरूपोऽर्थवादः । यथा तौ न सोमयागे क्रियेते, तथा पशुयागेऽपि तौ न कुर्यादिति । कुतः
पशावाज्यभागपर्युदसनमित्यत्र हेतुमाह—**पशुना–इति** । अध्वरः पशुयागरूपः 6.१०,११
पशुनैव चक्षुष्मान् चक्षुःसहितो भवति । तत्राज्यभागौ यद्यनुष्ठीयेयातां तदा यज्ञस्य चत्वार्यक्षीणि भवेयुः । आज्यभागयोश्चक्षूरूपत्वस्योक्तत्वात् । सति चैवं यज्ञस्य बीभत्सत्वं पश्यतां जनानां जुगुप्साविषयत्वमवश्यंभावि ।

a. ApŚ. 24. 13. 6. b. TS. 2. 6. 2. 1.
c. Cf. Śabara on JS. 10. 5. 29.

तस्मादध्वरं पशुयागं चतुरक्षम् अत एव बीभत्सं करवाणीति परिभयं द्योतयन् पशावाज्यभागं न कुर्यात् । किमिति पुनः 'न सोमे करोति'इत्येतद् दृष्टान्ततया व्याख्यायत इति चेत् न्यायबलादिति ब्रूमः ।

तथा हि—मीमांसायां बाधविचारपरस्य दशमस्याध्यायस्याष्टमे पादे द्वितीयाधिकरणे चिन्तितम् । दर्शपूर्णमासयोराज्यभागौ प्रकृत्य 'न तौ पशौ करोति'[a] इति निषिध्य पश्चात् 'न सोमेऽध्वरे'[b] इति श्रूयते । निषेध इति तावत् प्राप्तः, नञः स्वसंबन्धिवस्तुनिषेधरूपत्वेनोत्सर्गतः प्राप्तत्वात्; यथैकाकी न गच्छेदिति । यदि पुनर्नाम्ना वा धात्वर्थेन वा सह तस्य समस्तता भवेत् तदास्तु पर्युदासविषयत्वम् । यथा 'अब्राह्मणमाकारयति, अधर्मं करोति' इति । तदाहुरभियुक्ताः—

नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः ।
वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ ॥[c] इति ।

इह तु व्यस्तोऽयं नकारः करोतीति क्रियापदेन संबध्यमान आज्यभागानुष्ठानं प्रतिषेधतीति युक्तम् ।

ननु पशुयाग इष्टिविकृतिभूतः । अतस्तत्र चोदकेनेतराङ्गतुल्यकक्ष्यतया आज्यभागावपि प्रसक्तौ सन्तौ निषिध्येते इति युक्तम् । सोमस्य पुनरिष्टिविकृतित्वाभावात् न तत्राज्यभागयोः प्रसक्तिः । तत् कथं तत्र तन्निषेधः ? न ह्यप्रसक्तं प्रतिषिध्यमानं प्रेक्षावतां हृदयमनुप्रविशति । सत्यम्, सोमो नेष्टिविकृतिभूतः[1] । तथापि तदङ्गभूता दीक्षणीयादीष्टयः तद्विकृतिभूताः । तासु च याज्यभागादीतिकर्तव्यताप्रसक्तिः । सैव सोमेऽपि प्रसक्तिर्भविष्यति । अतो निषेध एवायमिति प्राप्तम् ।

अथवा पर्युदासोऽस्तु । यथानुयाजव्यतिरिक्तेषु येयजामहः कर्तव्यः

a. Cf. KB. III. 6. ९. b. Cf.KB. III. 6. ९.
c. ŚV. Apoha. 33.

1. A. M. रूपः for भूतः

वरणव्यतिरिक्तमङ्गजातमनुष्ठेयमित्यनुयाजवरणपर्युदासेन न विधिविशेषकत्वं 'नानुयाजेषु येयजामहं करोति'[a] 'नार्षेयं वृणीते'[b] इत्यादौ नञ्पदस्य पूर्वाधिकरणव्यवस्थापितं तथेहापि सोमव्यतिरिक्तेष्वाज्यभागौ कुर्यादिति पर्युदासविषयत्वमास्थीयताम्। अन्यथा चोदकप्रतिषेधकवचनाभ्यां दीक्षणीयादावाज्यभागौ कुर्यात् न कुर्याद् वा इत्यष्टदोषदुष्टो विकल्पो निष्प्रकम्पः प्रसज्येत। अतः पर्युदास एवायमिति प्राप्तम्।

सिद्धान्तस्तु न तावन्निषेधः; सोमे प्रसक्त्यभावात्। न चैष्टिकविध्यन्तग्राहिषु दीक्षणीयादिषु प्रसक्तिसद्भावेन निषेधोपपत्तिरिति वाच्यम्। सोमशब्दलक्षणाप्रसङ्गात्। एवं सति हि सोमशब्देन दीक्षणीयादयो लक्षणीया स्युः। न च पर्युदासः संभवति। पर्युदासवादिना हि पर्युदासात् पूर्वमेव सोमे तदितरत्र च साधारण्येनाज्यभागप्रसक्तिः वाच्या। सा तावन्नोपदेशात्। दर्शपूर्णमासप्रकरणावरुद्धस्योपदेशस्य सोमे प्रसञ्जकत्वाभावात्। नातिदेशाच्च; अन्योन्याश्रयात्। वाक्यार्थप्रतीतौ सत्यां चोदकेन प्रसक्तिः; प्रसक्तौ च सत्यां पर्युदासनिर्णयः। तस्मान्न पर्युदासः। तस्मात् 'न सोमेऽध्वरे'[c] इत्येष 'पशौ न करोति'[d] इति निषेधशेषभूतो दृष्टान्तरूपोऽर्थवादः। यथा तौ न सोमे करोति तथा तौ पशौ न कुर्यादिति। तथा च तद्विदां वचनम्—'न पशावित्यस्यायमर्थवादः स्यात् प्रतिवस्तूपमया'[e] इति। एवं न्यायतो निर्णीतत्वादित्थमस्माभिर्व्याख्यातम्। न्यायानुरोधित्वाद् वाक्यार्थतत्त्वनिर्णयस्येति।

अत्र सूत्रकारेण 'अग्निर्मूर्धेत्याग्नेयस्य'[f] इत्यादिना प्रधानहविषां[1] याज्यापुरोनुवाक्याः प्रदर्शिताः। तासां विधानमभिप्रेत्य तल्लक्षणवत्तां स्तौति—**अथ–प्रयच्छति।** प्रधानहविषां पुरोनुवाक्यायागात् पूर्वं पठनीया ऋच एवं- 6.१२-१४
लक्षणा भवेयुः। आ इत्युपसर्गवत्यः। हूतवत्यः ह्वयतिधातुमत्यः। याज्याः पुनरेवंलक्षणाः। प्रोपसर्गवत्यः। प्रदानार्थधातुमत्यः। यदेतदुक्तलक्षणयाज्यापुरोनुवाक्यापठनमस्ति, तत् तेन देवेभ्योऽग्न्यादिभ्यो हूत्वा आह्वानमामन्त्रणं

a. ApŚ. 24. 13. 6.
b. TB. 1. 6. 9. 1.
c. Cf. KB. III. 6. ९.
d. Cf. KB. III. 6. ९.
e. Cf. Śabara on JS. 10. 8. 5.
f. ŚŚ. 1. 8. 4.

1. T. omits.

कृत्वा हविः प्रयच्छति ददात्येव। यथा लोके 'हे देवदत्त इहागच्छतु भवान्' इत्यामन्त्रणं कृत्वागताय तस्मै यथाभिलषितमन्नं प्रयच्छति तथैवैतद् भवति। पुरोनुवाक्यानां गायत्रीछन्दस्त्वं याज्यानां त्रिष्टुप्छन्दस्त्वं च स्तौति—

6. १५-१८ **ता-प्रयच्छति**। ताः पुरोनुवाक्या याज्याश्च क्रमेण गायत्र्यस्त्रिष्टुभश्च भवेयुः। पुरोनुवाक्या गायत्र्यः याज्यास्त्रिष्टुभः। तथा चाश्वलायनः—'गायत्र्यावती हूतवत्युपोत्तवती पुरस्ताल्लक्षणवती पुरोनुवाक्या। त्रिष्टुप् प्रवती वीतवती जुष्टवत्युपरिष्टाल्लक्षणा याज्या'[a] इति। अस्मत्सूत्रकारश्च—'अनादिष्ट-याज्यापुरोनुवाक्यासु गायत्रीत्रिष्टुभौ तद्देवते परीच्छेत्'[b] इत्यादि। तत्र च गायत्री सा ब्रह्म ब्राह्मणजातिरेव भवति। सहैकस्मात् कारणादुत्पन्नत्वात्। या त्रिष्टुप् सा क्षत्रं क्षत्रियजातिरेव। उक्तादेव हेतोः। एतत्प्रतिपादकं च यजुर्ब्राह्मणं पूर्वमेवोदाहृतम्। ततश्च गायत्रीत्रिष्टुभोः पठनेन ब्रह्मक्षत्राभ्या-मेव देवेभ्यो हविर्ददाति। प्रकारान्तरेण गायत्रीत्रिष्टुभौ प्रशंसति—**अथो-**

6. १९,२० **प्रयच्छति**। योऽयं छन्दसो विकारः भेदो गायत्र्यादिरूपः प्रसिद्धः, स एतावान् गायत्रीत्रिष्टुम्मात्ररूप एव भवति। छन्दसां मध्ये गायत्रीत्रिष्टुभोः प्राधान्यात्। तच्च देवताप्राधान्यात्। तथा सर्वैरेव छन्दोविशेषैर्देवेभ्यो हविर्ददाति होता।

अथ याज्याया अवसाने वषट्कारोच्चारणं विधत्ते— **ऋगन्ते वषट्-**

6. २१ **करोति**।

6. २२ याज्यान्ते तस्य पठनीयतां स्तौति—**तथा-भवन्ति**। तथा याज्यान्ते वषट्कारोच्चारणे सति सर्वा याज्या रूपवत्यः लक्षणवत्यः भवन्ति। यासां याज्यालक्षणं विस्पष्टं न लभ्यते तासामपि वषट्कारेण संयोगे सति लक्षणवत्ता

6. २३-२५ संपद्यत इत्यर्थः। वषट्कारं स्तौति—**षळिति-प्रीणाति**। इतिः प्रकारार्थः। ऋतूनां षट्संख्यत्वात्। षळित्येवं वषट्कारं कुर्वंस्तानृतून् प्रीतान् करोति॥

इति षष्ठः खण्डः

याज्यान्ते वषट्कारः कर्तव्य इत्युक्तम्। तत्र कंचिद् विशेषं विधत्ते—

7. १ **बार्हतराथन्तरं-ह्रस्वम्**। वौषडित्येवंरूपेण वषट्कारं ब्रुवन् होता बृहतो

a. AŚ. 2. 14. 19-20. b. ŚS. 1. 17. 9.

रथन्तरस्य च रूपं संपादयन् वषट्कारं ब्रूयात् । कथमित्यत्राह—पुरस्ताद्दीर्घ-
मुपरिष्टाद्ध्रस्वम् इति । षळित्यस्मात् पूर्वं दीर्घं भवति । वौ इति चतुर्मात्रं
ब्रूयादित्यर्थः । षळित्यस्योपरिष्टाद् ह्रस्वं भवति । षळितिमात्रं ब्रूयादित्यर्थः ।
तथापि कथं बृहद्रथन्तररूपसंपादनमित्यत्राह—**यद्-बृहत्।** लोकद्वयप्रतिष्ठाहेतु- 7. २, ३
त्वेनापि बृहद्रथन्तरसंपादनं प्रशस्तमित्याह—**अथो-प्रतितिष्ठति ।** इयं पृथिवी 7. ४, ५
रथन्तरम् । असौ द्युलोको बृहत् । पूर्वोत्तरत्वसाम्यात् । बृहद्रथन्तरयुक्तकर्म-
फलत्वाद् वा । 'अयं वै लोको रथन्तरमसौ लोको बृहत्'[a] इति चान्यत्र
दर्शनात् । तत् तेन बृहद्रथन्तररूपसंपादनेन अनयोः पृथिवीद्युलोकयोः
प्रतितिष्ठति । सुचिरं सुखेनावस्थितिलाभः प्रतिष्ठा । प्रकारान्तरेण स्तौति—
**अथो-प्रयच्छति ।** योऽयं वाचो विकारोऽस्ति स एतावान् बृहद्रथन्तरमात्ररूप 7. ६, ७
एव भवति । तथा चैवं वषट्कारं पठन् होता सर्वैरेव वाग्विकारैः देवेभ्यो
हविर्ददाति ।

येयजामह इत्यस्मात् पूर्वं वषट्कारोत्तरकालं च क्रमेण कयोश्चिन्मन्त्रयो-
र्जपं विधत्ते—**भूः-इति ।** 7. ८, ९

स्तौति—**वज्रो-च ।** यस्माद् वषट्कारो वज्रसमानधर्मा अतः क्रूरत्वाद- 7. १०, ११
नर्थहेतुरपि स्यात् । तेन तत्क्रौर्यशमनार्थमुभयतः शान्तिहेतू जपौ कुर्यात् ।
शान्तश्च सन्महते पुरुषार्थायैव संपद्यते । वषट्कारोत्तरकालं पठनीयं मन्त्रं
विशेषतः प्रशंसति—**अथो-शमयति ।** ओजो दीप्तिः बलं वा । सहः प्रसह्य- 7. १२, १३
करणसामर्थ्यम् । ओजश्च सहश्चेति यौ स्तः ते एते वषट्कारस्य शरीरिणोऽ-
तिशयेन प्रेमास्पदीभूते तन्वौ शरीरे एव भवतः । तथा सति ताभ्यां तनूभ्यां
संयोगे सति प्रीत्यतिशयलाभाद् वषट्कारः शान्तिमश्नुवानो[1] यजमानायाभि-
लषितमखिलं समर्पयति । तथा चान्यत्र श्रूयते—'ओजश्च ह वै सहश्च वषट्-
कारस्य प्रियतमे तन्वौ । प्रियेणैवैनं तद् धाम्ना समर्धयति'[b] इति ।

अथ दर्शपूर्णमासयोरुभयोरपि साधारणमाग्नेययागं प्रशंसति—**अथ-
प्रीणाति ।** दर्शपूर्णमासदेवतानां मध्येऽग्निं प्रथमं यजतीति यदस्ति तदुपपन्नमेव । 7. १४-१६

a. AB. 8. 2. 3.  b. AB. 3. 8. 6-7

1. A. M. आपन्नो for अश्नुवानो

यस्मादग्निः सर्वदेवतानां मुखस्थानीयो भवति । तथा च मन्त्रः—'अग्निर्मुखं प्रथमो देवतानाम्'[a] इति । ततश्चाग्नेः प्रथमं यागेन सर्वान् देवान् मुखत एव प्रतिस्वं यागात् पूर्वमेव प्रीतान् करोति ।

7. १७ अथ **पौर्णमासे** कर्मणि कर्तव्यमग्नीषोमीययागं प्रशंसति—**अथ-यजति ।**

7. १८-२० तत्प्रशंसार्थमाख्यायिकामाह—**अग्नीषोमौ-पौर्णमासम् ।** अत्रेत्थं कश्चिदितिहासो भवति । पुरा खलु त्वष्टुस्तनयो विश्वरूपनामधेयेन लोकेषु प्रसिद्धो बभूव । यः खलु सात्त्विकराजसतामसैः सोमपानान्नादनसुरापानैः[1] त्रिभिः शिरोभिरुपेतत्वात् त्रिशिरा इत्यपरामाख्यामवाप । स तु देवानां पुरोहितः असुराणां भागिनेयः । स च यज्ञमण्टपेषु गत्वा सर्वेषां श्रोत्रप्रत्यक्षं यथा भवति तथा देवेभ्यो हविर्भागो युक्त इति वक्ति । सर्वेषां परोक्षं यथा भवति तथा रहसि ऋत्विग्भिः सह अयं हविर्भागोऽसुरेभ्य एव युक्तः अतस्तानेवोद्दिश्य प्रयच्छथ इत्येवं वदति । तेषां चर्त्विजां तस्मिन् परोक्षवादे विश्वास उत्पन्नः । तस्य हृदयपूर्वकत्वात् । लोकेऽपि हृदयपूर्वक एव वचने सत्यमेवेदमिति विश्वासोत्पत्तिः दृश्यते । अमुं च वृत्तान्तम् इन्द्रः श्रुत्वा तस्माद् विश्वरूपात् महतीं भीतिमकरोत् । असौ खल्वस्मत्तोऽपनीय मदीयं राष्ट्रमसुरेभ्यः समर्पयिष्यतीति । स चैवं निश्चिकाय । असौ विश्वरूपो मया हन्तव्य एवेति । निश्चित्य च स्वकीयमायुधं वज्रमुद्यम्य तस्य विश्वरूपस्य शिरांसि चिच्छेद । मृते तु विश्वरूपे स्वपुत्रे त्वष्टा रुष्टः सन् इन्द्ररहितं सोमयागं कर्तुमुपचक्रमे । तस्मिंश्च यागे मामाह्वय इत्येवमिन्द्रोक्तः त्वष्टा 'मम पुत्रं त्वं हतवानसि तस्मात् त्वामहं नाह्वयामि' इत्युक्त्वा नोपाह्वयत् । अथेन्द्रः तेनानुपहूतः सन् स्वयमेव तदीययज्ञविघातं कृत्वा बलात्कारेण सोमं पीतवान् । अनन्तरं त्वष्टा तस्येन्द्रेण बलात् पीतस्य सोमरसस्य यत् किंचित् पात्रे परिशिष्टमासीत् तद् गृहीत्वा कुपित इन्द्रस्य घातयितारं कंचित् पुरुषविशेषम् उत्पिपादयिषुः 'स्वाहेन्द्रशत्रुर्वर्धस्व'[b] इति मन्त्रेण आहवनीयाग्नौ जुहाव । अस्य च मन्त्रस्याय-

a. AB. 1. 4. 8. b. MS. 2. 4. 3.

1. T. V. सुरादनैः for सुरापानैः

मर्थः—हे अग्ने तुभ्यमिदं स्वाहा हुतमस्तु । त्वमिन्द्रस्य मत्पुत्रहन्तुः शातयिता हन्ता कश्चित् पुरुषो भूत्वा वर्धस्व इति । तत्र च किल स्वरापराधेनाभिप्रेत-कार्यसिद्धिविपर्ययं सूचयन् आहवनीयाग्निः विरतज्वालाकलापः सन्नशाम्यत । कः पुनः स्वरापराध इति चेदुच्यते । इन्द्रशत्रुर्वर्धस्व इति मन्त्रे इन्द्रशत्रुरिति इन्द्रस्य शातयितेति हि त्वष्ट्रा विवक्षितम् । तथा च तत्पुरुषसमासत्वाद् अन्तोदात्तेन भवितव्यम् । अयं तु शब्द आद्युदात्तो दैवगत्या प्रयुक्तः । स च बहुव्रीहित्वं द्योतयति । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्'[a] इति पूर्वपदोदात्तत्व-विधानात् । एवं सति चेन्द्रः शातयिता हन्ता यस्येत्यर्थः संपन्नः । तथा च न केवलं स्वाभिलषितकार्यासिद्धिः, प्रत्युत अनभिलषितकार्यप्राप्तिरपि । सोऽयं स्वरापराधः । स चाग्निः पुरुषरूपेणोदतिष्ठत् । उत्तिष्ठंश्चायमग्नीषोमौ सर्वजगदात्मकौ स्वमुखरन्ध्रे प्रक्षिप्य उभयोः पार्श्वयोः ऊर्ध्वाधोभागदन्त-पङ्क्तिभ्यां दष्ट्वैवोत्तस्थौ । स च प्रतिदिनं प्रवर्धमानः सन् स्वशरीरेण सर्वलोकावरणात् वृत्रनामा समपद्यत । अथेन्द्रः तस्माद् वृत्रनाम्नः पुरुषविशेषाद् बिभ्यन् ममासौ कश्चिद् दुर्जयः शत्रुर्जात इति प्रजापतिमसेवत । स प्रजापति-स्तदीयं वज्रं तीक्ष्णतरं कृत्वाभिमंत्रितजलेन प्रोक्ष्य 'अनेन तं शत्रुं मारय'इती-न्द्राय दत्तवान् । तदनु तं वज्रमिन्द्र उद्यम्य वृत्रे प्रजिहीर्षुः तन्मुखान्तर्भागवर्तिनौ स्वयूथ्यावग्नीषोमौ दृष्ट्वा प्रहर्तुमपारयंस्तयोर्निर्गमनं प्रार्थयामास । अथाग्नी-षोमौ 'यदि मन्निर्गमनं भवतोऽभिलषितं तर्हि भवानावयोः भागधेयं प्रयच्छतु ततो निर्गमिष्याव' इत्यूचतुः । अथेन्द्रः ताभ्यामेतम् अग्नीषोमीययागमुत्कोचत्वेन कल्पितवान् । अथाग्नीषोमयोर्गृहीतभागधेययोः वृत्राद् विनिष्क्रान्तयोः इन्द्रो वृत्रं हतवानिति । तामेतां शाखान्तरेण विस्तरेण वर्णितां कथां संक्षेपेणाह—अग्नीषोमौ वा इत्यादिना । पुरा खल्वग्नीषोमौ वृत्रस्यान्तर्मुखे दन्तपङ्क्तिभ्याम-भिसंदष्टौ स्थितावभूताम् । तस्मिंश्च काल इन्द्रो वृत्रं हन्तुकाम उद्यतवज्रः सन्नग्नीषोमावभिलक्ष्य वज्रं प्रहर्तुमशक्तोऽभूत् । अथ 'हे अग्नीषोमौ मयायं वृत्रो हन्तव्यः तस्मादस्य शरीराद् युवां निर्गच्छतम्'इत्युक्ताभ्यामग्नीषोमा-भ्यामुत्कोचत्वेन भागधेयं प्रार्थित इन्द्र एतं पौर्णमासीसंबन्धिनं भागं

a. Pā. 6. 2. 1.

कल्पितवान् । अतः पौर्णमासस्य कर्मणोऽग्नीषोमदेवत्यत्वमुपपन्नम् । अत्रैवाग्नी-
षोमीयोपांशुयाजविधिमपि सिद्धवत्कृत्य उपांशुयाजस्योपांशुत्वं पुरोळाश-
7. २१ यागस्योच्चैष्ट्वं च दर्शयति—**तौ–अजामितायै ।** तावग्नीषोमावुपांशू भवतः ।
देवतानामुपांशुत्वाद्ययोगात् तद्यागस्योपांशुत्वादि विवक्ष्यते । आद्योऽग्नीषो-
मीययाग उपांशु प्रयोक्तव्यः । द्वितीय उच्चैः प्रयोज्यः । अनेन प्रकारेण यागश्च
अजामितायै कल्पते । उभयोरप्येकेन प्रकारेण प्रयोगे सति जामितादोषः
प्रादुःष्यात् । तत्परिहाराय प्रथममुपांशु द्वितीयमुच्चैः प्रयोक्तव्यम् । विधान्तरेण
7. २२-२३ स्तौति—**यद्–अग्निम् ॥**

इति सप्तमः खण्डः

अथामावास्यायां सांनाय्यरहितस्य यजमानस्यैन्द्राग्नयागं स्तौति—
8. १, २ **अथ–एव ।** प्रतितिष्ठन्त्यनयोर्लोका इतीन्द्राग्नी विश्वाधारभूतौ भवतः । तच्चा
न्यत्राम्नायते—'इन्द्राग्निभ्यां वा इमौ लोकौ विधृतौ'[a] इति । तस्मात् प्रतिष्ठा-
फलोऽयम् ऐन्द्राग्नयागः । अथ[1] अमावास्यायामेव सांनाय्यं कुर्वतो दधिपयोद्रव्यकं
8. ३-५ यागं प्रशंसति—**अथ–दृश्यते ।** संनयन् सांनाय्ययागं कुर्वन् सोमयाजी । कुत
एतत् ? सोमयाजिन एव तद्विधानात् । असोमयाजिनस्तन्निषेधाच्च । 'नासोम-
याजी सं नयेत् । अनागतं वा एतस्य पयो योऽसोमयाजी । यदसोमयाजी सं
नयेत् परिमोष एव सोऽनृतं करोति । अथो परैव सिच्यते । सोमयाज्येव सं
नयेत् । पयो वै सोमः । पयः सांनाय्यं पयसैव पय आत्मन् धत्ते'[b] इति ।
परिमोषस्तस्करः । सोमयागात् पूर्वं दर्शयाजी सांनाय्यं नानुतिष्ठेत् । यस्मादे-
तस्यासोमयाजिनः पयोऽनागतमप्राप्तम् । सोमस्यौषधिरसत्वेन तदभावे सत्यो-
षधिरसविशेषस्य पयसः सुतरामभावात् । एवं सति यद्यसोमयाजी संनयेत्
तर्ह्यसौ तस्कर एव सन्ननृतम् अन्याय्यं करोति । किं च वह्नौ सिच्यमानं तत्
सांनाय्यमशास्त्रीयत्वात् परासिच्यत एव विनाश्यत एव । तस्मात् सोम-

a. TS. 5. 3. 2. 1. b. TS. 2. 5. 5. 1.

1. T. V. omit

याज्येव संनयेत्। न चास्येतरवत् पयोऽप्राप्तम्। सोमस्यौषधिरसत्वेन पयोरूपत्वात्। सांनाय्यमपि तथाविधम्। अतः सोमयाजी सोमरूपेण पयसा सह सांनाय्यरूपं पय आत्मनि धारयतीति शाखान्तरीयवाक्यार्थः। तस्मात् सोमयाजिन एव सांनाय्यानुष्ठानम्। सांनाय्यदेवतां विषयीकृत्याधिकारिभेदेन व्यवस्थितं विकल्पमाह—इन्द्रं यजति महेन्द्रं वेति। कोऽधिकारिभेद इति चेत्, अत्रैवमध्वर्युवेदे अधिकारिभेद आम्नायते–'नागतश्रीर्महेन्द्रं यजेत। त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यः। तेषां महेन्द्रो देवता। यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते। न परां प्राप्नोति। पापीयान् भवति'[a] इति। गतश्रीव्यतिरिक्तः पुरुषो महेन्द्रयागं न कुर्यात्। के पुनर्गतश्रियः? यः शुश्रुवान् वेदत्रयाभिज्ञः स एको गतश्रीः। यं गता प्राप्ता श्रीः स गतश्रीरुच्यते। वेदत्रयस्य च श्रीरूपत्वात् तदभिज्ञः प्राप्तश्रीर्भवति। श्रीरूपत्वं च वेदत्रयस्याम्नायते—'अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रयिविदा विदुः। ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्'[b] इति। ग्रामाध्यक्षो ग्रामणीः। राज्ञः पुत्रो राजन्यः। अनयोस्तु प्राप्तश्रीकत्वं प्रसिद्धम्। एते त्रयो गतश्रियः। तेभ्योऽन्ये महेन्द्रयागं न कुर्युः। यस्मात् तेषां त्रयाणामेव महेन्द्रो देवता भवति नेतरेषाम्। सति चैवं यः पुरुषः स्वकीयां देवतामतिक्रम्य परकीयां यजते एतेषु त्रिषु कश्चिदिन्द्रं यजेदन्यो वा महेन्द्रं यजेत् स स्वकीयाया देवतायाः प्रच्युतः सन् परां देवतां न प्राप्नोति। तद्देवताशापेन पापीयान् दरिद्रश्च भवेत्।

अगतश्रियो विशेषं प्रदर्शयति—'संवत्सरमिन्द्रं यजेत। संवत्सरं हि व्रतं नाति। स्वैवैनं देवतेज्यमाना भूत्या इन्धे वसीयान् भवति'[c] इति। अगतश्रीः पुरुषः संवत्सरमिन्द्रमेव यजेत्। यस्मात् संवत्सरमतिक्रम्य व्रतं नानुष्ठेयं भवति। एवं सति स्वकीया देवता संवत्सरमिज्यमाना सती भूत्यर्थं यजमानं प्रकाशयति। अयं यजमानो धनवत्तरः भवति। अनन्तरं महेन्द्रयागाधिकारप्रतिबन्धहन्त्रीं कांचिदिष्टिं विधाय तस्या इष्टेरूर्ध्वम् इन्द्रमहेन्द्रयागयोः

a. TS. 2. 5. 4. 4.
b. TB. 1. 2. 1. 26.
c. TS. 2. 5. 4. 4–5.

कामचारं श्रावयति—'संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्। संवत्सरमेवैनं वृत्रं जघ्निवांसमग्निर्व्रतपतिर्व्रतमालम्भयति। ततोऽधि कामं यजेत'[a] इति। ततोऽधि तस्या इष्टेरूर्ध्वम्। काममिन्द्रं वा महेन्द्रं वेत्यर्थः। एवं गतश्रियः माहेन्द्रयागो नियतः। तदन्यस्य संवत्सरादर्वाग् ऐन्द्रयागः, तत ऊर्ध्वमिन्द्रमहेन्द्रयोरिच्छानुरोधेन याग इति। तदिदमुक्तम्—इन्द्रं यजति महेन्द्रं वा इति। स चायमिन्द्रमहेन्द्रयागः प्रशस्तः। यस्मादमावास्या तिथिरेतज्ज्योतिर्भवति। एताविन्द्रमहेन्द्रौ ज्योतिश्चन्द्रस्थानीयौ भवतः। मुख्ये सति कथं प्रतिनिधेरवतार इति चेत्; यस्मादमावास्यायां मुख्यश्चन्द्रो नोपलब्धुं शक्यते, सूर्येण सह वसति ततस्तस्य तस्यां तिथौ द्रष्टुमशक्यत्वात्। अतस्तिथ्यन्तरवद् अमावास्याया ज्योतिष्मत्त्वहेतुत्वात् तद्दिन इन्द्रमहेन्द्रयाग उपपद्यते।

अथामावास्यायां सांनाय्यरहितस्य यजमानस्याग्नेयोत्तरकालमुपांशुयाज-
8. ६ नामकं यागं विधत्ते—**अथ-अजामितायै।** पुरोळाशावाग्नेयैन्द्राग्नौ। आज्यस्येति तृतीयार्थे षष्ठी। अजामिताया इति। तथा च श्रूयते—'जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोळाशावुपांशुयाजमन्तरा यजत्यजामित्वाय'[b] इति। अत्राग्नेयोत्तरकाल एव उपांशुयाजस्य काल इति न्यायतः स्थापितं मीमां-
8. ७ सायाम्[c]। सांनाय्यवतः सोमयाजिनः उपांशुयाजं विधत्ते—**अथ-ब्राह्मणम्।** तस्य विधेरजामिताया इति यदुक्तं तदेव ब्राह्मणं द्रष्टव्यम्। न तु वक्तव्यान्तरमस्ति।

एवं प्रधानभूतान् आग्नेयादिषड्यागान् विधाय स्विष्टकृद्यागं स्तौति—
8. ८-१० **अथ-भजते।** अन्ततः प्रधानहविषामवसाने स्विष्टकृतं यजेत्। एतच्चोपपन्नमेव। यस्मादेष स्विष्टकृदाख्योऽग्निः देवेभ्योऽग्न्यादिभ्यो हविः प्रयच्छति। लोके च यः पुरुषः बहुभ्यो भोक्तृभ्योऽन्नं विभज्य ददाति स तावत् स्वयं न ततः पूर्वं तत्समकालं वान्नं भुङ्क्ते। अपि तु तद्भोजनावसाने सति तद्भुक्तशिष्टमन्नमुपयुङ्क्ते। अतोऽस्यापि भोजयितृत्वात् सर्वेषामवसान एव याग

a. TS. 2. 5. 4.5. b. TS. 2. 6. 6. 4.
c. Cf. Śabara on JS. 10. 8. 69

इति युक्तमेव । इतश्चान्तत एव याग उपपत्तिमान् इत्याह–**अथो–यजति ।** 8.११-१३
स्विष्टकृतो रुद्ररूपत्वं पूर्वमेव प्रतिपादितम् । अन्तं अवसानं भजत इत्यन्तभाक् । तथा च 'अन्तत एव रुद्रं निरवदयते'[a] इत्यादिरर्थवादः श्रूयते । यस्माद् रुद्रोऽन्तभाक् तस्मात्तद्रूपः स्विष्टकृदपि अन्ततो यष्टव्यः । स्विष्टकृद्याज्यापुरोनुवाक्ययोः 'पिप्रीहि देवान्'[b] 'अग्ने यदद्य'[c] इत्येतयोर्मध्ये 'अयाळग्निरग्नेः प्रिया धामानि'[d] इत्यादेर्निगदस्य पाठं विधत्ते—**तस्य–व्यवैति ।** तस्य स्विष्ट- 8. १४
कृतः समानं छन्दस्त्रिष्टुब्लक्षणं ययोस्ते तथोक्ते । 'पिप्रीहि देवान्'[b] 'अग्ने यदद्य'[c] इत्येतयोर्द्वयोरपि त्रिष्टुप्छन्दस्त्वात् सच्छन्दस्त्वम् । अन्यत्र 'वर्षीयसी तु याज्या,'[e] 'न तु याज्या ह्रसीयसी'[f] इत्यादिवचनानुसारेण विच्छन्दस्त्वात् सच्छन्दसाविति विशेषणम् । ते सच्छन्दसौ याज्यापुरोनुवाक्ये 'पिप्रीहि देवान्'[b] 'अग्ने यदद्य'[c] इत्येते ऋचौ निगदः 'अयाळ्'[d] इत्यादिर्व्यवैति व्यवहिते करोति । पुरोनुवाक्यां पठित्वा ये यजामह इत्यस्यानन्तरं 'अयाळग्निः'[d] इत्यादिनिगदमुक्त्वा 'अग्ने यदद्य'[c] इति याज्यां पठेत् । अन्यत्र हि पुरोनुवाक्यायाः याज्यायाश्चान्तरालेऽन्यन्न पठनीयमस्ति । तेन तत्राव्यवधानं स्थितम् । इह तु मध्यपातिना निगदेन ते व्यवहिते भवतः । अस्य चैतत् फलमित्याह—**तेन–भवति ।** तेन व्यवायेन समानच्छन्दस्त्वेनैकरूपयोः ऋचोर्नैरन्तर्येण पठने सति 8. १५
जामितादोषः प्रादुर्भवेत् । निगदस्य तु यजुर्मन्त्ररूपत्वात् तत्परिहारो मध्ये निगदपाठस्य प्रयोजनम् ।

यदुक्तं सूत्रकृता—'वषट्कृत्योपस्पर्शनम्'[g] इति । तस्यायं विधिः—
**वषट्कृत्य–उपस्पृशति ।** 8. १६

स्तौति—**शान्तिः–क्रियते ।** या आपः ताः शान्तिः शान्तिहेतुः । 'आपो 8. १७,१८
वै शान्ताः'[h] इति श्रवणात् । तथा आपः भेषजं रोगनिवर्तकमौषधम् । 'अमृतं वा आपः तस्मादद्भिरवतान्तमभिषिञ्चन्ति,'[i] 'भेषजं वा आपः'[j] इत्यादि-

a. TS. 5. 4. 3. 3.
b. RV. 10. 2. 1.
c. RV. 6. 15. 14.
d. TB. 3. 5. 7. 5.
e. ŚŚ. 1. 17. 1.
f. AŚ. 2. 14. 21.
g. ŚŚ. 1. 9. 3.
h. TS. 5. 4. 4. 3.
i. TS. 5. 6. 2. 1-2
j. TS. 3. 3. 4. 3.

श्रवणाद् 'अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा'[a] इति मन्त्रे अपां सकलौषधास्पदकत्वश्रवणाच्च भेषजत्वम्। यस्मादेवं तस्माद् अपामुपस्पर्शनेन यज्ञे क्रूरस्य सोढुमशक्यस्य शान्तिः शमनमेव क्रियते। तथा यत् प्रमादादिभिः विकलमङ्गमनुष्ठितं तस्य भेषजं प्रतिसंधानमेवानेन क्रियत इति द्रष्टव्यम्।

यदुक्तं सूत्रकारेण—'इळामुपह्वास्यमानस्य दक्षिणस्य पाणेः प्रदेशिन्या-मनक्ति। उत्तमे च पर्वणि मध्यमे च वाचस्पतिना ते हुतस्य प्राश्नामीषे प्राणाय इति पूर्वमञ्जनमधरोष्ठे निलिम्पते। मनसस्पतिना ते हुतस्य प्राश्नाम्यूर्जे उदानाय इत्युत्तरोष्ठ उत्तरम्'[b] इति। तस्यायं विधिः—**अथ-**
8. १९-२५ **प्रीणाति**। अङ्गुष्ठादनन्तरवर्तिन्यङ्गुली प्रादेशिनी। तस्यामिळोपह्वानार्थ-मधरोष्ठे पूर्वमञ्जनं लिम्पेत्। उत्तरमञ्जनमुत्तरोष्ठे निलिम्पेत्। अत्र च योऽधरोष्ठः स पृथिवीलोक एव, अधोवर्तित्वात्। उत्तरोष्ठो द्युलोकः, उपरि-वर्तित्वात्। यच्चोष्ठद्वयान्तरालदेशः सोऽयमन्तरिक्षलोकः, छिद्रत्वसाम्यात्। एवं लोकत्रयदृष्टया लिम्पन् होता लोकानां परस्परं संधानं तेषां प्रीतिं च संपादयति॥

इत्यष्टमः खण्डः

यदुच्यते सूत्रकारेण—'उपस्पृश्य दक्षिणेनोत्तरेळां धारयन्नप्रसारिताभिरङ्-गुलीभिरमुष्टीकृताभिर्मुखसंमितमुपह्वयते'[c] इति तमेतमिळोपाह्वाननिगदं
9. १, २ प्रशंसति—**अथ-इच्छते**। इळाह्वाननिगदं पठतीति यदस्ति तेन सर्वेषु निगदमन्त्रवर्णदृष्टेषु भूतेषु बृहद्द्युलोकसूर्यचक्षुरादिषु उपहवमनुज्ञां होता
9. ३-६ प्रार्थयते। प्रकारान्तरेण स्तौति—**अथो-आप्त्यै**। अपि च येयमिळा सा अन्नमेव भवति। ईड्यते सर्वैः स्तूयत इति व्युत्पत्त्या इळाशब्दस्यान्नवाचक-त्वात्। ततश्चेळाह्वानेन होता अन्नमेवात्मनि स्थापितवान् भवति। अपि च

a. RV. 1. 23. 20. b. ŚŚ. 1. 10. 2–3.
c. ŚŚ. 1. 10. 4.

इळा पशव एव । अत्रापि पूर्वोक्तैव व्युत्पत्तिः । अथवा इळेति पृथिवीवाचकं पदम् । अन्नस्य च पशूनां च तात्स्थ्यात् ताच्छब्द्यम् । एवमन्यत्र परश्शतं प्रयोगदर्शनात् । तथा चेदमिळाह्वानं पशूनां समृद्धये संपद्यते । अथास्मिन्निगदे
चतुर्षु स्थानेषु उच्छ्वासं विधत्ते—**तस्यां-अवानिति ।** तस्मिन् निगदे 9. ७
चतुर्वारमुच्छ्वासं कुर्यात् । तत्र मैत्रावरुणीत्यत्र प्रथम उच्छ्वासः । ब्रह्मदेवकृतमुपहूतमित्यत्र द्वितीयः । वर्धानित्यत्र तृतीयः । पुत्रे इत्यत्र चतुर्थः । एवं
चतुर्षु स्थानेषूच्छ्वसेत् । **चतुष्टयं-अवानिति ।** इळानिगदस्य पञ्चपदत्वं प्रदर्श्य 9. ८-१०
प्रशंसति—**तथा-आप्त्यै ।** इळानिगदे चतुरवानितीति यदस्ति तथा सति 9. ११-१३
सेयमिळा पञ्चपदी भवति । तच्च यज्ञावाप्तिहेतुत्वात् प्रशस्तम् । अथोत्तरेळाप्राशनं विधाय प्रशंसति—**अथ-शमयति ।** जपः 'इळासि स्योनासि'[a] इत्यादिः 9. १४-१६
शाखान्तरीयो मन्त्रः । तेनोत्तरेळां होता प्राश्नातीति यदस्ति तेन जपस्य ब्रह्मरूपत्वाद् उत्तरेळां ब्रह्मणा शान्तां करोतीति यदस्य घोरं रूपमस्ति तदनेन शान्तं करोति । इळाह्वानमध्येऽध्वर्युर्दक्षिणं पुरोळाशं चतुर्धा कृत्वा वेद्यां स्तीर्णे बर्हिषि स्थापयति । तथा च बौधायनः—'अथ यत्र होतुरभिजानाति दैव्या अध्वर्यव उपहूताः उपहूता मनुष्या इति तद्दक्षिणं पुरोळाशं चतुर्धा कृत्वा बर्हिषदं करोति'[b] इति । तमेतमाध्वर्यवं विधिं प्रसङ्गादनूद्य स्तौति—
**अथ-प्रीणाति ।** 9. १७,१८

इळाङ्गभूतं मार्जनं विधत्ते—**अथ-क्रियते ।** 'इदमापः'[c] इत्यादिना 9. १९-२१
तृचेन वेद्यन्तःस्थापिते पवित्रयुक्ते पात्रे प्रक्षिप्ताभिरद्भिः मार्जनं कुर्यात् । तथा च सूत्रम्—'इदमापः इति तृचेन पवित्रवत्यन्तर्वेदि मार्जयन्ते'[d] इति । ब्रह्मभागपरिहारानन्तरं दक्षिणाग्नौ पक्वस्यान्वाहार्यपचनसंज्ञस्यौदनस्य
दक्षिणात्वेनाहरणं विधत्ते—**अथ-आहरन्ति ।** एषोऽन्वाहार्यो दक्षिणा ययोस्तौ 9. २२-२४
तथोक्तौ । 'यथा ह वा इदमनोऽपुरोगवं रिष्यत्येवं हैव यज्ञोऽदक्षिणो रिष्यति तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यप्यल्पिकापि'[e] इत्याम्नानाद् यज्ञे दक्षिणादानमवश्यं कर्तव्यमवसीयते । तत्रान्येषां पशुबन्धादीनाम् अन्यद् वस्तु

a. ŚŚ. 1. 12. 5.
b. BŚ. 1. 18. 15.
c. RV. 1. 23. 22.
d. ŚŚ. 1. 12. 8.
e. AB. 6. 35. 11.

गवादिकं दक्षिणा भवति। दर्शपूर्णमासयोः पुनः अन्वाहार्याख्य ओदन एव दक्षिणा। 'अथो दक्षिणैवास्यैषा'[a] इति श्रवणात्। यस्मादेवं तस्माद् एनां दक्षिणामाहरेत्।

अथ 'एषा ते'[b] इत्यादिना मन्त्रेणाहवनीये प्रक्षिप्तायाः समिधोऽनुमन्त्रणं
9. २५-२७ विधत्ते—**अथ-अनुस्तौति**। यस्मादेषा समिद् एकविंशतिदारुण इध्मस्य संबन्धिनी 'परि समिधं शिनष्टि'[c], इति वचनादिध्महोमवेलायामतिशिष्टा भवति। तस्मादेनां समिधं सामिधेनीभिरिध्ममिव अनेन मन्त्रेणानुस्तौतीत्युपपन्नमेव॥

इति नवमः खण्डः

10. १-३ अथोदीच्यान् अनुयाजसंज्ञांस्त्रीन् अङ्गयागान् विधत्ते—**अथ-आप्नोति**। त्रित्वसाम्यात् त्रिभिरनुयाजैः लोकत्रयावाप्तिरुपपद्यते[1]। 'देवं बर्हिर्वसुवने वसुधेयस्य वेतु'[d] इति प्रथमोऽनुयाजः। 'देवो नराशंसो वसुवने वसुधेयस्य वेतु'[e] इति द्वितीयः। 'देवो अग्निः स्विष्टकृत् सुद्रविणा मन्द्रः'[f] इत्यादिकस्तृतीयः। तत्र पूर्वयोः प्रतीकेन यागः। अन्त्ये तु कृत्स्नेन मन्त्रेण। तदेतत् स्तौति—
10. ४-७ **अथ-एव**। उत्तमानुयाजस्य स्विष्टकृदग्निर्देवता। 'देवो अग्निः स्विष्टकृत्'[f] इति दर्शनात्। 'अग्नेः स्विष्टकृतोऽहं देवयज्यया'[g] इति याजमानमन्त्राच्च। स्विष्टकृच्च प्रतिष्ठा समाप्तिहेतुः। 'अग्निं स्विष्टकृतमन्ततो यजति'[h] इति वचनात्। अत उत्तमोऽनुयाजः प्रतिष्ठित्या एवेति। सूक्तवाकस्य प्रतिष्ठाहेतुत्वात् प्रतिष्ठात्वम्। 'उपश्रुती दिवस्पृथिव्योः'[i] इत्यादिकं विशेषतः
10. ८,९ स्तौति—**अथ-एव**। षष्ठी द्वितीयार्था। प्रतितिष्ठन्त्यनयोः प्राणिन इति प्रतिष्ठे।

a. TS. 1. 7. 3. 1.
b. ŚŚ. 1. 12. 12.
c. BŚ. 1. 15. 5.
d. TB. 3. 5. 9. 1; ŚŚ. 1. 13. 1.
e. TB. 3. 5. 9. 1; ŚŚ. 1. 13. 2.
f. TB. 3. 5. 9. 1; ŚŚ. 1. 13. 3.
g. TS. 1. 6. 2. 4.
h. KB. III. 8. ८.
i. ŚB. 1. 9. 1. 4.

1. T. °रिरुच्यते

अथ 'अग्निर्हविरजुषत'[a] इत्यादिनिगदखण्डे स्वाभिमतं पाठं स्थापयितुं पाठान्तरमुपन्यस्य दूषयति—**अग्निः-कुर्यात् ।** 10.१०,११

हेतुमाह—**अभ्यावर्तते-आह ।** यदि हविःशब्दात् पूर्वं इदंशब्दः प्रयुज्यते 10.१२-१४
तदा स्वकीयं भागमुपयुज्य प्रस्थिता सती देवता पुनरपि यजमानमभिलक्ष्यागच्छत्येव । कस्मादिति चेत्, इदंशब्दसामर्थ्यात् । अयं हि शब्दः सन्निहितपुरोऽवस्थितवस्तुविशेषवाचितया प्रसिद्धः । यथा 'अयं घटः' इति । तथा चैतच्छब्दश्रवणे सति किमनेन यजमानेन पुनरपि यज्ञः प्रारब्ध एव; श्रूयते हीदं हविरिति; अतोऽयं पुनरपि मह्यं हविः प्रदातुमुपक्रमते; सन्निधातव्यमेव तावन्मयेति[1] निश्चिन्वाना देवता ससंभ्रममागच्छत्येव । आगता[2] च सती तस्य हविषो वार्तामप्यनुपलभमाना भग्नाशा सती तस्य यजमानस्याशासनीयानर्थान् निवर्तयति । उत्पन्नस्य विनाशो भविष्यतश्चानुत्पत्तिर्निवृत्तिः । तस्मादिदंशब्दावधीरणेन पाठः कर्तव्य इत्याह—**तस्माद्-ब्रूयात् ।** प्रतिदेवतादेशं 10. १५
'हविरजुषत' इत्यस्याभिधानायतां वक्तुं 'हविरजुषत हविरजुषत' इति वीप्साप्रयोगः । 'अग्निर्हविरजुषतावीवृधत महो ज्यायोऽकृत । सोमो हविरजुषतावीवृधत महो ज्यायोऽकृत' इत्यादिप्रयोगो द्रष्टव्यः । प्रकारान्तरेण स्तौति—
**अथो-प्रतितिष्ठति ।** एतदेतस्मिन् कर्मणि । पुरस्तात् पूर्वं यागकाले । ताभिरेव 10.१६,१७
देवताभिः । एतदत्र । अन्ततोऽवसाने । प्रतिष्ठां समाप्तिं करोति ।

अथ 'आशास्तेऽयं यजमानः'[b] इत्येवमन्तं निगदं पठित्वा यजमानस्य यद् विशेषणमस्ति तद् यजमानशब्देन समानविभक्तिकं निर्दिशेदिति विधिमनूद्य स्तौति—**अथ-जायते ।** एष इति शास्त्रीयदृष्ट्या निर्देशः । देवः 10.१८-२१
देवसंबन्धी । इतरस्य षाट्कौशिकस्य शुक्लशोणितसंयोगजनितस्य शरीरस्य भस्मीभावपर्यन्तत्वेन देवसंबन्धित्वाभावात् । 'अथेदं भस्मान्तं शरीरम्'[c] इति श्रुतेः । [3]आत्मा देहः[3] । कोऽसावात्मा ? यमात्मानमृत्विजः सम्यगनुष्ठिततत्तत्कर्मभिः संस्कृत्य संपादयन्ति । तथा चैतदभिप्राया स्मृतिः—

a. SS. 1. 14. 6; 8.
b. TS. 2. 6. 9. 7; SS. 1. 14. 16.
c. IsāU. 17.

1. T.V. तावन्नचेति
2. A.M. सन्निहिता
3–3. T. omits

'मातुरग्रेऽधिजननं द्वितीयं मौञ्जबन्धने ।
तृतीयं यज्ञदीक्षायां द्विजस्य विधिचोदितम् ॥'[a] इति ।

यस्मादेष एव यजमानस्यात्मा नान्यो मानुषः तस्मादस्य यजमानस्य नाम गृह्णीयात् । यस्माद् यजमानोऽत्रैव यज्ञ एव जन्म प्राप्नोति । न तु मानुषदेहोत्पत्तौ । मानुषस्य देहादिकस्य[1] आगमापायित्वेन यजमानसंबन्धित्वाभावात् । जातस्य च नामग्रहोऽवश्यं कर्तव्य इत्यतः सूक्तवाके नामग्रह उपपद्यते ।

10. २२,२३ नामग्रहस्योच्चैष्ट्वं विधत्ते—**उच्चैर्-भवति** । यद्यप्ययं होतुराचार्यो गुरुर्भवेत्, तथापि तदीयं नामोच्चैरेव गृह्णीयात् । गुरोर्नामग्रहस्यायुक्तत्वाद् उपांशुत्वं मा भूदिति यद्यपीत्युक्तिः । तथा चापस्तम्बः—'व्युपतोदव्युपजापोदामन्त्रणनामधेयग्रहणप्रेषणानि इति गुरोर्वर्जयेद्'[b] इति । तथा सति उच्चैः नामग्रहणे कृते सति । 'उत्तरां देवयज्यामाशास्ते'[c] इत्यादेः निगदखण्डस्य पाठं
10.२४-२६ प्रशंसति—**अथ-अश्नुते** । इळायामिळाह्वाननिगदे । पञ्च तिस्रो मिलित्वा अष्टौ संपद्यन्ते । तदेतदाशिषामष्टसंख्यत्वं प्रशस्तम् । पुरा खलु देवाः एताभिरष्टसंख्याभिः आशीर्भिः सर्वा अष्टीः अखिलान् प्राप्तव्यानर्थान् प्राप्तवन्तः । यथैव देवाः पुरा प्राप्तवन्तः तथैवेदानीं यजमानः एताभिरेवाष्टसंख्याभिराशीर्भिः सर्वान् प्राप्तव्यानर्थान् प्राप्नोति ।

10. २७ इदानीं ब्राह्मणोत्पन्नस्य कस्यचिन्मन्त्रस्य जपं विधत्ते—**अथ-इति** । वेद्यामास्तीर्णे बर्हिषि प्रागभिमुखमञ्जलिं हस्तसंनिवेशविशेषं[2] निधाय 'नम
10. २८ उप'[d] इत्यमुं मन्त्रं जपधर्मेण पठेत् । **न-देवाः** । उक्तार्थम् । अथ 'शंयोर्ब्रूहि'[e] इत्यध्वर्युणा संप्रेषितेन कर्तव्यं 'तच्छंयोरावृणीमहे'[f] इत्यमुं
10.२९,३० मन्त्रपाठं स्तौति—**अथ-एव** । 'तच्छंयोरावृणीमहे'[f] इत्येष मन्त्रः शंयोर्वाकः । 'शंयुवाकाय संप्रेषितः तच्छंयोरावृणीमह इत्याह'[g] इति सूत्रान्तरात् ।

a. Manu. 2. 169.
b. APDh. 1. 8. 15.
c. TB. 3. 5. 10. 5; ŚS. 1. 14. 17.
d. ŚS. 1. 14. 20.
e. TB. 3.3 8.11; ŚS. 1. 14. 21.
f. RVKh. 10. 191. 15.
g. AŚ. 1. 10. 1.

1. T. V. गृहादिव
2. A.M. हस्तं निवेश्य विशेषेण

प्रकारान्तरेण स्तौति—**अथो-आह**। बृहस्पतेरपत्यं शंयुनामा महर्षिः देवै- 10.३१,३२
रभ्यर्थितः सर्वान् यज्ञान् शान्तान् चकार। तदेतत् 'देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन्। ते शंयुं बार्हस्पत्यमब्रुवन्'[a] इत्यनुवाके तैत्तिरीये प्रपञ्चितम्। तादृशस्य शंयोः प्रतिपादकत्वात् अयं मन्त्रो यज्ञस्य शान्तिहेतुः। अतो यज्ञशान्तिफलः शंयोर्वाकपाठः। **अथ-क्रियते**। उक्तार्थम्॥ 10.३३-३५

इति दशमः खण्डः

एवमाहवनीये कर्तव्यं कर्मजातं विधाय संप्रति गार्हपत्ये कर्तव्यान्
पत्नीसंयाजनामकान् यागान् विधत्ते—**अथ-चरन्ति**। पत्नीसंयाजैश्चरन्ति 11. १-४
पत्न्याग्नीध्राध्वर्यवः। ते च गार्हपत्याग्नौ कर्तव्या इत्येतदुपपन्नम्। यस्मात् पत्न्यो गार्हपत्यभाजो भवन्ति। तथा च बौधायनः—'जघनेन गार्हपत्यमुपसीदति पत्नी'[b] इति। मन्त्रोपि 'गार्हपत्योपनिषदे'[c] इति। ब्राह्मणं च 'पश्चात् प्राची पत्न्यन्वास्ते'[d] इति। यजमानश्चाहवनीयभाक्। एवं स्थानव्यवस्थाया विद्यमानत्वात् पत्नीसंज्ञाविशिष्टानां तत्संबन्धिगार्हपत्याग्नौ प्रयोग
उपपन्न एव। यागानां संख्यां स्तौति—**ते-प्रजात्यै**। यत् प्रजननहेतुभूतं द्वन्द्व- 11. ५, ६
लक्षणमिथुनमस्ति तत् सर्वं चतुःसंख्यामभिव्याप्यैव भवति। तथा च तलवकारब्राह्मणम्—'आचतुरं ह खलु वै मिथुनं प्रजननममिथुनं पराचीनं एकं च वा एका च द्वौ च द्वे च त्रयश्च तिस्रश्च चत्वारश्च चतस्रश्च। एतद् वा आचतुरं मिथुनम्'[e] इति। ततश्च चतुःसंख्यत्वं प्रजोत्पत्तिफलाय संपद्यते।

अथ याज्यापुरोनुवाक्यानामुपांशुत्वं प्रदर्शयति—**ते-सिच्यते**। ते पत्नी- 11. ७-९
संयाजा उपांशु भवन्ति। याज्यापुरोनुवाक्या उपांशु पठेदित्यर्थः। ये पत्नीसंयाजास्ते रेतःसिक्तिरेव। प्रजोत्पत्तिहेतुत्वात्। रेतःसेचनं चोपांशु गुप्तं क्रियत इति प्रसिद्धम्। **अभिरूपा-समृद्ध्यै**। उक्तार्थमेतत्। 10.१०,११

a. TS. 2. 6. 10. 1. b. BŚ. 1. 12. 16.
c. TB. 3. 7. 5. 10-11. d. TS. 5. 3. 7. 3.
e. JB. 2. 281.

11. १२ चतुर्णां यागानां क्रमेण देवताः प्रदर्शयति—**अथ-इति**। यजतीति शेषः।

11. १३-१५ स्तौति—**एता-दधति**। एताः सोमाद्या देवता मिथुनानां स्त्रीपुंसयुगलानामीश्वरा भवन्ति। ता एता मिथुनेश्वरभूता देवता अस्मिन् कर्मणि होत्रादयः प्रीताः कुर्वन्ति। प्रीतियुक्ताश्च ता देवता अस्मै यजमानाय मिथुनानि स्त्रीपुंसयुगलानि दधति धारयन्ति॥

इत्येकादशः खण्डः

12. १-६ अथ चतुरो यागान् क्रमेण प्रशंसति—**सोमं-यजति**। सोमदेवत्यो यागः प्रथमं कर्तव्यः। तेन च सोमयागेन रेतःसेक एव क्रियत इति ध्येयम्। रेतःसेको हि प्रजोत्पत्तेः प्रथमभावी। सोमयागश्च प्रथममितरयागेभ्यः क्रियत इत्यतः सोमदेवत्ययागेन[1] रेतःसेकः क्रियत इत्युपपन्नम्। सोमयागानन्तरं त्वष्टृदेवत्यो यागः; तदप्युपपन्नमेव। त्वष्टा खलु देवः स्त्रिया योनौ गर्भाशयस्थाने ऋतुकाले आहितं सद् रेतो विकृतं करचरणशिरउदरादिसंस्थानान्तरविशिष्टं करोति। तथा च मन्त्रः—'त्वष्टा रूपाणि पिंशतु'[a] इति। ब्राह्मणं च—'रेतः सिक्तं न त्वष्ट्राऽविकृतं प्रजायते। यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत् प्रजायते'[b] इति। त्वष्टृयागानन्तरं देवपत्नीदेवत्यो[2] यागः कर्तव्यः। पत्न्य इति द्वितीयार्थे प्रथमा। ततश्च यजतीत्यनुषङ्गः। एते चत्वारोऽपि[3] यागाः पत्नीसंयाजाः पत्नीसंयाजसंज्ञा भवन्ति हि। न केवलमयमेव तृतीयो यागः, मुख्यो ह्यस्मिन् तृतीय एव यागे पत्नीसंयाजशब्दः तद्योगादितरेष्वपि यागेषु छत्रिन्यायेन प्रवर्तते। अतः स्वस्मिन्निव परस्मिन्नपि स्वशब्दप्रवर्तयितृत्वात् प्रशस्तोऽयं यागः। पत्नीदेवत्ययागानन्तरं गृहपतित्वगुणविशिष्टस्याग्नेर्यागः कर्तव्यः। एतदप्युपपद्यत एव। यस्मात् पत्नीसंयाजाख्या यागाः एतत्स्विष्टकृतो भवन्ति। एषोऽग्निर्गृहपतिः स्विष्टकृद् येषां ते तथोक्ताः। स्विष्टकृद्यागश्चावसाने कर्तव्य इत्यधस्तादुपपादितम्।

a. RV. 10. 184. 1. b. TS. 1. 5. 9. 1-2.

1. T. सोमयागेन 2. T. omits देवत्यो
3. T. V. omit अपि

तस्मात् स्विष्टकृत्त्वादस्यावसाने याग उपपद्यते । यथा स्विष्टकृदनन्तरमपामु-
पस्पर्शनं विहितं, तथात्रापि तद् विधत्ते—**अथ-ब्राह्मणम्** । 'शान्तिर्वै भेषजम्'[a] 12. १०
इत्यादि यत् पूर्वमुक्तं तदिहापि द्रष्टव्यमित्यर्थः ।

अनन्तरं 'यथा ह त्यद् वसवः'[b] इत्येतस्या ऋचो जपधर्मेण पठनं विधत्ते—
**अथ-कुरुते** । तथा च सूत्रम्—'यथा ह त्यद्वसव इति जपित्वेळामुपह्वयते'[c] 12. ११
इति । अथेळाह्वानमार्जनशंयोर्वाकविषयान् विधीननूद्य तेषु पूर्वोक्तं ब्राह्मणमति-
दिशति—**अथ-ब्राह्मणम्** । इळामुपह्वयत इति यदस्ति तस्य 'सर्वेष्वेव तद् 12. १२
भूतेषु उपहवमिच्छते'[d] इत्यादिकं यद् ब्राह्मणं तदनुसंधेयम् । मार्जयते इति
यदस्ति[1] तस्य 'शान्तिर्वै भेषजमापः'[e] इत्यादिकं ब्राह्मणं द्रष्टव्यम् । शंयोर्वा-
कमाहेति यदस्ति तस्य 'प्रतिष्ठा वै शंयोर्वाकः'[f] इत्यादिकमेव द्रष्टव्यम् ।

अथ वेदं विस्रस्य 'प्र त्वा मुञ्चामि'[g] इति मन्त्रेण पत्नीसंनहनं योक्त्रं
विमुञ्चेत् । विमुक्ते च तं वेदयोक्त्रं पत्न्या अञ्जलौ निधाय अद्भिः परिषि-
ञ्चन् 'कामाय त्वा वेदोऽसि'[h] इति मन्त्रं जपधर्मेण पठेत् । अथ योक्त्रमपनीय
वेदे च पत्न्या अञ्जलौ सत्येव 'वेदोऽसि वित्तिरसि'[h] इत्यादिकं मन्त्रं भाणयेत् ।
तदेतत् प्रशंसति—**अथ-दधाति** । योऽयं वेदः स वृषा रेतःसेचनसमर्थः 12.१३-१६
पुमान् । पुंलिङ्गान्तत्वात् । पत्नी तु स्त्री । तदुभयं संबद्धं मिथुनं स्त्रीपुंसयुगळं
भवति । ततश्च तेन वाचनेन होता पत्नीषु मिथुनमेव स्थापयति । प्रयोगात्
पत्नीनां मिथुनीभाव एव संपद्यते ।

उक्तमर्थवादमुपजीव्य विध्यन्तरमुन्नयति—**तस्मात्-कुरुते** । यस्माद् 12. १७
वेदस्य पुंसः संयोगः प्रजोत्पत्तिहेतुः तस्मात् कारणात् पत्नी वेदसंबन्धीनि
तृणान्यूरुमध्ये मन्त्रपाठादनन्तरं प्रक्षिपेत् । तथा च सूत्रम्—'सा तृणानि
प्रवृत्त्यान्तरेणोरू न्यस्यते'[i] इति । अथ 'तन्तुं तन्वन् रजसो भानुमन्विहि'[j]

a. KB. III. 10. ३४.
b. RV. 4. 12. 6.
c. SS. 1. 15. 5.
d. KB. III. 9. २.
e. KB. III. 9. २०.
f. KB. III. 10. ३०.
g. RV. 10. 85. 24.
h. SS. 1. 15. 12.
i. SS. 1. 15. 14.
j. RV. 10. 53. 6.

1. T.V. यद्

इत्यनेन मन्त्रेण गार्हपत्यादारभ्य आहवनीयपर्यन्तं वेदतृणानामास्तरणं
12.१८,१९ विधत्ते—**अथ-भवतः**। यदेतद् दार्शस्य पौर्णमासस्य वा कर्मणोऽवसाने वेद-
तृणास्तरणकर्मास्ति, तेन कर्मणास्य यजमानस्य दर्शपूर्णमासौ संततौ विच्छेद-
रहितौ भवतः। अतिक्रान्तेन दार्शेन पौर्णमासेन वा कर्मणा भावि दार्शं
पौर्णमासं वा कर्म अनेककालव्यवधानसद्भावाद् विच्छिद्यमानं सदनेन स्तरण-
कर्मणा विच्छेदरहितं क्रियत इति प्रतिपत्त्या आस्तरणकर्म कर्तव्यम्।
12. २० फलान्तरवचनेन पुनरपि प्रशंसति—**अथो-भवति**। न केवलं दर्शपूर्णमासयोः
सातत्यमेवास्य फलम्। अपि तु फलान्तरमपीत्यथोशब्दार्थः। एतेन स्तरण-
कर्मणैवास्य यजमानस्याग्निहोत्रकर्मापि स्तीर्णबर्हिर्भवति। स्तीर्णं बर्हिर्यत्र
तत् तथोक्तम्। अग्निहोत्रकर्मणि हि बर्हिषः स्तरणं दर्शपूर्णमासादिष्विव न
विद्यते। तदप्येतेन स्तीर्णबर्हिः कृतं भवति। तस्य तदुत्तरकालभावित्वात्।

अथाहवनीयान्तं स्तीर्णस्य वेदतृणकदम्बस्य यत् परिशिष्यते तस्य तत्रैव
12.२१,२२ निहितस्य 'आपृणोऽसि'[a] इत्यनेन मन्त्रेणोपस्थानं विधत्ते—**अथ-वदते**।
वेदस्यातिशेषः वेदातिशेषः। अतिशिष्यत इति शिष्टं बर्हिरतिशेष उक्तः।
अथानन्तरं 'एतेनाग्ने ब्रह्मणा वावृधस्व'[b] 'अयाडयज्ञम्'[c] इत्याभ्यामृग्भ्याम्
12.२३,२४ आहवनीयोपस्थानं विधत्ते—**अथ-वदते**। उपस्थानं भक्तिनम्रेण मनसाभि-
12.२५-२७ लषितार्थसिद्धये देवतोपधावनम्। **अथ-क्रियते**। अन्ते कर्मणोऽवसान
इत्यर्थः। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति द्वादशः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मूर्छालमोहाम्बुधे-
राचार्यस्य वटद्रुमूलवसतेराशस्य चानुग्रहात्।
सम्यग्दर्शितदार्शपौर्णिमविधिः कौषीतकिब्राह्मण-
व्याख्याने बुधसौख्यदायिनि तृतीयोऽध्याय आसीद् गतः॥

## इति कौषीतकिब्राह्मणव्याख्याने
## प्रथमदशके तृतीयोऽध्यायः

a. SS. 1. 15. 16.
b. RV. 1. 31. 18.
c. SS. 1. 15. 17.

अथ

# चतुर्थोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
तृतीये प्रकृतिर्दर्शपूर्णमासौ प्रपञ्चितौ ।
विधित्स्यन्तेऽथ यत्नेन चतुर्थे विकृतीष्टयः ॥

तत्रादौ तावत् पौर्णमास्याममावास्यायां च यथाक्रममनुनिर्वाप्यां विमृ-
द्गुणकेन्द्रदेवत्यामदितिदेवत्यां चेष्टिं विधित्सुः प्रस्तौति–**अनुनिर्वाप्यया–अपहते।** 1. १, २
प्रधानयागस्य पश्चान्निर्वपयोग्या अनुनिर्वाप्या । तया **वैमृध्या**दिकयेष्टया
पूर्वं देवा असुरान् हिंसितवन्तः । यथा पूर्वमेवमासीत्, तथैवैतदिदानीमपि
यजमानोऽनुनिर्वाप्येष्टयनुष्ठानेनैव अनन्यापेक्षेण शत्रून् हिनस्ति । अतः शत्रु-
जननिबर्हणहेतुत्वाद् इदमनुनिर्वाप्येष्टयनुष्ठानं प्रशस्तमित्यर्थः ।

तत्र पौर्णमास्यामनुनिर्वाप्येष्टिं विधत्ते–**स–निर्वपति ।** स पौर्णमासीमनुष्ठाय 1. ३
स्थितो यजमानः । कुत एवं व्याख्यायत इति चेत्, 'संस्थितायां पौर्णमास्यां
इन्द्रायेष्टिर्विमृधे'[a] इति सूत्रादिति ब्रूमः । 'इन्द्रं वृत्रं जघ्निवांसं मृधोऽभि
प्रावेपन्त । स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत् । तन्निरवपत्'[b] इति शाखा-
न्तरे दर्शनाच्च । इह चानन्तरमेव 'यत् पौर्णमास्यामिन्द्रं यजति'[c] इत्याम्ना-
नात् । विनाशिता मृधः शत्रवो येन स इन्द्रो विमृत् । तस्मै । स्तौति–
**इन्द्रो–विहन्ति ।** मृधां शत्रूणामिन्द्रो विहन्ता भवति । वैशब्दः प्रसिद्धौ । तथा 1. ४, ५
च मन्त्रः–'येषामिन्द्रस्ते जयन्ति'[d] इति । तथा च सति स इन्द्र एवास्य
यष्टुर्मृधः शत्रून् अशेषतो हिनस्ति । अथास्या अमावास्याविकारत्वमभिप्रेत्य
स्तौति—**अथो–यजति ।** न केवलं शत्रूणां विनाश एवास्याः फलं, किं तु यदा- 1. ६
मावास्यम् अमावास्यासंबन्धि कर्मास्ति तदेतेन पुनरनुष्ठितं भवति । एतदित्युक्तं

a. ŚŚ. 3. 1. 1.
b. TS. 2. 5. 3. 1.
c. KB. IV. 1. ६.
d. RV. 8. 16. 5.

व्यनक्ति—यत्पौर्णमास्यामिन्द्रं यजतीति। पौर्णमास्यामिन्द्रं यजतीति यत् तेनामावास्येष्टिरेव पुनरनुष्ठिता भवति, तद्विकारत्वात्। तच्च सूत्रकारेण दर्शितम्—'अमावास्याविकारः'[a] इति। ततश्च वृधन्वन्तावाज्यभागाविति सिद्धम्।

1. ७, ८ अमावास्यायाः पुनरनुष्ठितत्वसिद्धौ किं फलमित्यत्राह—**अत्र-स्यात्।** भवतीति शेषः। अत्रेति वैमृधेष्टिपर्यन्ते। पौर्णमासकर्मण्येवेत्यर्थः। संस्थितौ समाप्तौ दर्शपूर्णमासौ यस्य स तथोक्तः। पौर्णमासी तावदनुष्ठितैव। एतदि-ष्ट्यनुष्ठानेन चामावास्याप्यनुष्ठिता भवति। अतो दर्शपूर्णमासावुभावपि पौर्णमास्यामेव निष्पन्नौ भवतः। तावता किमायातमिति चेत् तत्राह—यद्यपर-पक्षे भङ्गं नीयात् नास्य यज्ञविकर्षः स्यात्। न खलु कश्चिदपि निपुणमति-राप्रायणकालमप्रत्यूहमेवाविच्छेदेन दर्शपूर्णमासावनुतिष्ठन्नुपलभ्यते। तद्विच्छे-दनिबन्धनप्रायश्चित्तविध्यानर्थक्यप्रसङ्गात्। अतो यजमानो यद्यमावास्या-मनुष्ठातुं न लभेत तर्हि अस्य वैमृधेष्ट्यनुष्ठातुः यज्ञस्य विकर्षो विलोपो न भवेत्। तस्य पौर्णमास्यामेव संस्थितदर्शपूर्णमासत्वाद् यज्ञविनाशप्रसङ्गाभा-वात्। प्राशस्त्यप्रतिपत्तिफला स्तुतिरियम्। अतोऽपि प्रशस्तमिदं कर्मेत्यर्थः।

1. ९, १० इदानीममावास्यायां संस्थितायामनुनिर्वाप्यामिष्टिं विधत्ते—**अथ-सभार-तायै।** स चादितियागः यज्ञस्यैव सभारतायै सगौरवत्वाय संपद्यते। तस्य पौर्ण-मासीविकारत्वेन पौर्णमासीष्टिसाहित्याद् अमावास्यायाः सभारत्वं संभाव्यते। दर्शितं हि सूत्रकृता—'अदितये अमावास्यायां संस्थितायाम्। पौर्णमासीवि-कारः'[b] इति।

1. ११ अथास्यां स्विष्टकृतो याज्यानुवाक्यायुगलं दर्शयति—**सा-भवति।** सा प्रकृता अदितिदेवत्येष्टिः विमृद्गुणेन्द्रदेवत्या या पूर्वमुक्तेष्टिः सैव भवति। किं सर्वथैव? नेत्याह। संयाज्यातः स्विष्टकृद्याज्यापुरोनुवाक्याभ्याम्। न सर्वथा ये वैमृधस्य संयाज्ये ते अस्या अपि भवत इत्यर्थः। तथा च सूत्रम्—'ये वैमृधस्य ते स्विष्टकृतः'[c] इति। ते च 'जुष्टो दमूना अतिथिर्दुरोणे'[d] 'अग्ने शर्ध महते

a. ŚŚ. 3. 1. 2.
b. ŚŚ. 3. 1. 5–6.
c. ŚŚ. 3. 1. 7.
d. RV. 5. 4. 5.

सौभगाय'[a] इत्येते। 'जुष्टो दमूना अग्ने शर्वेति स्विष्टकृतः'[b] इति वैमृधे सूत्रकारेणोदाहृतत्वात् ॥

इति प्रथमः खण्डः

गते खण्डे आनुनिर्वाप्यमिष्टिद्वयं विहितम्। इदानीं नैमित्तिकीमभ्युदिताख्यां कांचिदिष्टिं विधित्सुः प्रतिजानीते—**अथ-अभ्युदितायाः** विधिर्वक्ष्यत 2. १
इति वाक्यशेषः। अथात इत्यखण्डशब्द आनन्तर्यार्थः। अभ्युदितेति इष्टेः संज्ञा। चन्द्रमसोऽभ्युदयनिमित्ते विधीयमानत्वात् निमित्तनैमित्तिकयोरभेदोपचारात् निमित्तशब्देन नैमित्तिकव्यपदेशः। अथ नैमित्तिकविधानस्य निमित्तोपदेशसापेक्षत्वात् तदेव तावत् कथयति—**एति-दृश्यते**। यस्य प्रतिपद्दिने यियक्षोः ततः 2. २,३
पूर्वस्मिन्नुपवसथसंज्ञकेऽहनि प्रत्यूषकाले पूर्वस्यां दिशि चन्द्र उद्यन्नुपलभ्यते स एष यज्ञपथाद् यज्ञमार्गाद् एति गच्छत्येव। न यज्ञं प्राप्नोति। अस्वकालेऽनुष्ठातुमारब्धत्वात्।

ननु कोऽस्य विषयः? किं पौर्णमासीमधिकृत्येदमुच्यते अमावास्यां वा? नाद्यः; तत्र चन्द्रमसो दर्शनासंभवात् कथितेष्टिनिमित्तत्वासंभवात्। न द्वितीयः; अमावास्यायां चन्द्रमसो लेशत्वेऽपि द्रष्टुमशक्यत्वात्। उच्यते। यस्य चतुर्दश्यामेवामावास्येयमिति भ्रान्त्या दार्शं कर्म प्रक्रान्तं भवेत् तस्य चतुर्दश्यां प्रत्यूषकाले चन्द्रदर्शनसंभवाद् एतन्निमित्तं संभवत्येव। तथा चोक्तं सूत्रकारेण—'अनागते पर्वण्यामावास्ये प्रवृत्तेऽभ्युदितेष्टिः'[c] इति। अनागते पर्वणि पर्वभ्रान्त्या चतुर्दश्यामेवारब्धे दार्शे कर्मणीत्यर्थः। आरम्भश्च हविर्निर्वापान्तो वा ततः पूर्वं वा यथासंभवं द्रष्टव्यः। उभयथापि वक्ष्यमाणेष्टिरनुष्ठेया।

ननु तैत्तिरीये 'वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति'[d] इति हविर्निर्वापादूर्ध्वं चन्द्रोदयस्य निमित्तत्वं श्राव्यते। अतः कथमिह 'यस्योपवसथ' इत्यविशेषेणोच्यते।

a. RV. 5. 28. 3.
b. ŚŚ. 3. 1. 4.
c. ŚŚ. 3. 2. 1.
d. TS. 2. 5. 5. 1–2.

'व्याख्यानतो विशेषप्रतिपत्तिः'[a] इति न्यायेन वा हविर्निर्वापानन्तर्याभिप्रायो वक्तव्य इति । अत्रोच्यते । अविहितकाले कर्मोपक्रममात्रमेवेष्टिनिमित्तं भवितुमर्हति । तदभिप्रायेणैव 'यस्योपवसथ' इत्यविशेषनिर्देशः । तथाहि षष्ठाध्याये[b] स्थितम् । अभ्युदयेष्टिं विषयीकृत्य संशयः । सा किं हविर्निर्वापादूर्ध्वं चन्द्रोदय एव कर्तव्या आहोस्वित् प्रागपीति । 'निरुप्तं हविरभ्युदेति' इत्युक्तत्वात् निर्वापोत्तरकालमभिहितनिमित्तोत्पत्तावेव इष्टिरनुष्ठेयेति पूर्वः पक्षः । सिद्धान्तस्तु—हविरभ्युदय एवेह निमित्तं भवितुमर्हति; निर्वापस्य विशेषणत्वात् । अतः तस्य न विवक्षाविषयत्वम् । उभयस्यापि विवक्षाविषयत्वे वाक्यभेदापत्तेः। हविरभ्युदेति । तच्च हविर्यदि निरुप्तम् इत्येवं वाक्यभेदः । तस्मान्निर्वापात् प्रागपि चन्द्रोदये सत्यविहितकाले कर्मोपक्रममात्रेणेयमिष्टिः कर्तव्येति ।

ननु प्रातर्निर्वापकालो न तु दार्शम् । तथा सति दर्शभ्रान्त्यापि चतुर्दश्यां निर्वापाभावाद् ऊर्ध्वं चन्द्रोदयो न प्राप्नोति । नायं दोषः । दध्नो द्व्यहकालीनत्वेन अर्थसिद्धे पूर्वेद्युरेव दोहनातञ्चने । तदभिप्रायेण निरुप्तमित्युच्यते । अथ वा व्रीहिनिर्वापोऽपि पूर्वेद्युर्विकल्पित एव । तथा च श्रुत्यन्तर एवमाम्नायते—'यदि बिभीयादभि मोदेष्यतीति । महारात्रे हवींषि निर्वपेत् । फलीकृतैस्तण्डुलैरुपासीत । अर्धं दधि हविरातञ्चनस्य निदध्याद् अर्धं न । यद्यभ्युदियात् तेनातच्य प्रचरेत् । यद्यु न ब्राह्मणान् भोजयेद्'[c] इति ।

अयमर्थः—चतुर्दश्यां प्रातरग्निहोत्रहोमादूर्ध्वम् अमावास्याभ्रान्त्या वत्सानपाकृत्य सायं दुग्ध्वा दध्यर्थम् आतञ्चनं च विधाय पश्चात्तिथौ सन्दिहानो यदि मां प्रति चन्द्रोऽभ्युदेष्यति इति भीतो भवति, तदा रात्रिमध्ये हवींषि निरुप्य फलीकरणान्तं कृत्वा तादृशैस्तण्डुलैः युक्तः चन्द्रोदयं प्रतीक्षेत । पूर्वातञ्चनेन निष्पन्नस्य दध्नोऽर्धमुत्तरस्यां रात्रौ पुनरातञ्चनार्थमवस्थापयेत् । इतरत्त्वर्धं न पृथगवस्थापयेत् । किंतु तण्डुलैः सह पुरतोऽवस्थाप्य चन्द्रोदयं प्रतीक्षेतैव । यदि चन्द्रोऽभ्युदियात् तदा तण्डुलैर्दध्यर्धेन च दर्शकर्म निष्पाद्य पृथगवस्थापितेन अर्धान्तरेण ब्राह्मणान् भोजयेदिति । एवं स्थिते सति यजमानस्य तण्डुलफलीकरणपर्यन्तं हविर्निर्वापकर्म पूर्वेद्युरेव घटते ।

a. MB. on लण् *sūtra*.

b. cf. JS. 6. 6. 1.

c. Quoted by Śabara on JS. 6. 5. 4.

तस्मिंश्च काले चन्द्रमसोऽभ्युदये निमित्ते जाते ततः पूर्वं च प्रक्रान्त एव कर्मणि वक्ष्यमाणेष्टिः कर्तव्येति सिद्धम् ।

एवं निमित्तमुपदिश्य नैमित्तिकीमिष्टिं विधत्ते—**सो-इति** । निर्वापात् 2. ४-१४
प्राक् चन्द्राभ्युदयज्ञाने सति एतानि त्रीणि हवींषि संपादयेत् । तत्र प्रथमस्य अष्टाकपालपुरोळाशस्य दातृत्वगुणविशिष्टोऽग्निर्देवता । द्वितीयस्य प्रदातृत्वगुणविशिष्ट इन्द्रः । तृतीयस्य शिपिविष्टत्वगुणविशिष्टो विष्णुः । तत्राग्नीन्द्रयोः दातृत्वप्रदातृत्वयोः मन्त्रब्राह्मणप्रसिद्धत्वाद् यज्ञदातृत्वमुपपन्नम् । विष्णोश्च यज्ञत्वं वेदे तत्र तत्र प्रसिद्धमिति तस्यापि यज्ञादुपगतस्य यज्ञावाप्ति-हेतुत्वमुपपद्यत एव । एषा चेष्टिः त्रिहविष्का । अनया चेष्टया अग्न्यादीरुक्ता देवता यजतीति यदस्ति तद् यज्ञमार्गादपगतो भवेयमिति परिभयं द्योतयन् कुर्यात् । यज्ञमार्गापगमनसमाधानेन यज्ञावाप्तिहेतुत्वात् प्रशस्तमिदं कर्मेत्यर्थः । हविषि निरुप्ते चन्द्राभ्युदयदर्शने तान् निरुप्तान् तण्डुलान् पूर्वदेवताभ्योऽपनीय कथिताभ्य एव अग्न्यादिदेवताभ्यः प्रदद्यात् । तदुक्तं सूत्रकृता—'निरुप्ते जानं-स्तानेव विभजेत्'[a] इति । तथा च श्रूयते—'त्रेधा तण्डुलान् वि भजेद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद् ये स्थविष्ठाः तानिन्द्राय प्रदात्रे दधँश्चरुम् येऽणिष्ठाः तान् विष्णवे शिपिविष्टाय शृते चरुम्'[b] इति । अयमर्थः—दर्शभ्रान्त्या चतुर्दश्यां केनचिद्धविर्निरुप्तं भवति । ततः प्रत्यूषे पूर्वस्यां दिशि चन्द्रमा अभ्युदेति । तदा निरुप्तास्तण्डुलास्त्रेधा विभक्तव्याः । अखण्डिता ईषत्खण्डिता अतिक्षुद्रकणाश्चेति । ते च त्रिविधाः दात्रादिगुण-विशिष्टाभ्योऽग्न्यादिदेवताभ्य इति ।

अथ दक्षिणां विधत्ते—**तिसृधन्वं-रूपम्** । तिसृभिः इषुभिः सहितं 2. १५,१६
धनुरस्यां दक्षिणा भवति । तच्च स्वस्त्ययनस्य क्षेमप्राप्तेः रूपमनुरूपं कारण-मिति यावत् ॥

इति द्वितीयः खण्डः

a. ŚS. 3. 2. 3. b. TS. 2. 5. 5. 2; GP. 2. 1. 9.

3. १-१६ **अथ-रूपम्** । अथातोऽभ्युद्दृष्टायाः इत्यादिभिः नैमित्तिकेष्टयनन्तर-विधिपरः खण्डो निगदव्याख्यातः । अभ्युद्दृष्टं चन्द्रं निमित्तीकृत्य विहितेष्टि-रभ्युद्दृष्टेत्युच्यते । प्रतिपद्दिने दर्शभ्रान्त्या श्वो यष्टुं केनचित् कर्म प्रक्रान्तं भवति । तस्य प्रतीच्यां दिशि सायाह्ने चन्द्रमसो दर्शनं भवति । स च वक्ष्य-माणामिष्टिं कुर्यात् । तत्राद्यस्य हविषः पथिकृदग्निर्देवता । स च यजमानमनेन कर्मणा प्रीतः सन् यज्ञमार्गं प्रापयति । द्वितीयस्य वृत्रहेन्द्रो देवता । तृतीय-स्यादित्यात्मको वैश्वानरः । तावप्येतस्य यज्ञमार्गावाप्तिं विधत्तः । अस्या इष्टेः दण्ड उपानहौ च दक्षिणा भवति । सा च भयपरिहाराय संपद्यते । तदेतत् सर्वमुक्तं सूत्रकारेण–'अतीते पर्वण्यमावास्ये प्रवृत्ते अभ्युद्दृष्टेष्टिः'[a] इत्यादिना।।

इति तृतीयः खण्डः

गतैः खण्डैः दर्शपूर्णमासविकृतिभूता अनुनिर्वाप्यादय इष्टयो विहिताः । इत उत्तरं चतुर्भिः खण्डैः दर्शपूर्णमासयोरेव गुणविकृतिभूतानि अदीक्षितायनानि विधित्स्यन्ते । तत्र प्रथमं दाक्षायणयज्ञसंज्ञम् अदीक्षितायनं विधित्सुः प्रस्तौति–

4. १ **अथ-दाक्षायणयज्ञस्य** । तत्रेत्थं दाक्षायणयज्ञशब्दनिर्वचनमाचार्या आहुः— 'अयनमित्यावृत्तिरुच्यते । दक्षस्येमे दाक्षाः तेषामयनम्'[b] इति । दक्ष[1] उत्साही पुनः पुनरावृत्तावालस्यरहितः । तदीयानां प्रयोगाणामावृत्तिर्दाक्षायणशब्दार्थः । तथा च आवृत्तिगुणयुक्तः प्रकृतो दर्शपूर्णमासात्मको यज्ञो दाक्षायणयज्ञः । आवृत्तिप्रकारस्तु–'द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत'[c] इत्यादिवाक्यादव-गम्यते । तथाविधस्य दर्शपूर्णमासगुणविकृतिभूतस्य दाक्षायणयज्ञस्य विधिर-नन्तरं वक्ष्यत इत्यर्थः ।

4. २ तत्र प्रथममारम्भकालमुपदिशति—**दाक्षायणयज्ञेन-प्रयुञ्जे** । फाल्गुने मासे भवा फाल्गुनी । तस्यां पौर्णमास्यां तिथौ दाक्षायणयज्ञं प्रारभेत । कुत इत्यत

a. ŚŚ. 3. 3. 1.
b. Śabara on JS. 2. 3. 10.
c. AŚ. 2. 14. 7.

1. T. V. दक्षश्च

आह—**मुखं-प्रयुज्यन्ते ।** द्वादशमासात्मकस्य संवत्सरस्य मुखमारम्भकालः 4. ३,४
फाल्गुनी पौर्णमासी । तस्मात् तस्यां पौर्णमास्यां संवत्सरप्रयोज्यानि अदीक्षि-
तायनानि प्रारभ्यन्ते । तेन दाक्षायणयज्ञस्य तस्यां पौर्णमास्यामारम्भकालः ।
तथा च सूत्रम्–'फाल्गुन्यां पौर्णमास्यां प्रयोगोऽदीक्षितायनानाम्'[a] इति ।

इदानीं दाक्षायणयज्ञशब्दनिर्वचनाधिकारविधिमुन्नयति–**अथो–आप्त्यै ।** 4. ५-७
ह वै पुरा । नाम्ना दक्षः पर्वतस्यापत्यं पार्वतिः । एतेन वक्ष्यमाणस्वरूपेण ।
सर्वान् पुत्रपशुवित्तस्वर्गादीन् । अत्र दक्षस्येदं दाक्षं तच्चायनं चेति निर्वचनं
विवक्षितम् । तत्रैवं सति दाक्षायणयज्ञेन यजत इति यत् तत् सर्वकामप्राप्ति-
हेतुः । तेन च सर्वकामोऽधिकारीति सिद्धयति ।

अथ विधास्यमानकर्माङ्गभूतम् अपरपक्षेऽनुष्ठेयं कंचिद् व्रतविशेषं विधत्ते–
**न-आपयीत ।** अग्निहोत्रहोमाद्यवशिष्टाशनम् अत्राशनशब्देनोच्यते । न तु 4. ८
लौकिकं हविरुच्छिष्टाशनम् । कुत इति ? सूत्रकृतोक्तत्वात् । तस्मिन् अशने
कामं तृप्तिं न प्राप्तो भवेत् । यथा सुतृप्तता न भवति तथाश्नीयादित्यर्थः ।
तथा च सूत्रम्—'न सौहित्यं प्राप्नुयात्'[b] इति । अत्र कामो निषिद्धः । तस्मिन्ने-
वाशने नियमान्तरं विधत्ते—**सोमं-अश्नीयात् ।** अशने सोमं राजानं चन्द्रमसं 4. ९
भक्षयामीति प्रतिपत्तिः कर्तव्या । तथा च सूत्रम्–'सोमं राजानं चन्द्रमसं भक्षया-
मीति ध्यायन्नश्नीयात्'[c] इति । सोमभक्षणदृष्टिदृष्टं हविरुच्छिष्टाशनं प्रशंसति–
**तद्-इति ।** तत् तत्र सोमं राजानमित्यस्मिन् वाक्ये सोमराजचन्द्रम- 4. १०-१३
शब्दैः आकाशे दृश्यमानं कलाषोडशकविशिष्टं ज्योतिरेवाभिधीयते । तं
चैतं सोमं राजानं देवा अग्न्यादयः कृष्णपक्षे नैरन्तर्येणाभिषुण्वन्ति । अभि-
षुण्वन्तीत्यनेन अभिषवपूर्वकं भक्षणं लक्ष्यते । अभिषुत्य पिबन्तीत्यर्थः ।
तथा च सोमस्य देवैः भक्षितत्वप्रतिपादको मन्त्रवर्णः–'यमक्षितमक्षितयः
पिबन्ति'[d] इति । यं सोममक्षितं पौर्णमास्यामक्षीणबिम्बं कृष्णपक्षे प्रतिदिनं
वह्निरव्यादयः स्वयमक्षितयः क्षयरहिताः सन्तः पिबन्तीत्यर्थः । सोमोत्पत्तौ
च देवादिभिः सोमस्य क्षयवृद्धयादि पृष्टेन व्यासेन परिणामादिकं प्रदर्श्य

a. ŚŚ. 3. 8. 1.
b. ŚŚ. 3. 8. 14.
c. ŚŚ. 3. 8. 15.
d. TS. 2. 4. 14. 1.

सोमस्य क्षयोपपत्तिं प्रदर्शयितुं देवैरग्न्यादिभिः प्रतिदिनं भक्षितत्वं प्रतिपाद्यते—'प्रथमां पिबते वह्निः'[a] इत्यादिना। तत्रैवं सति कृष्णपक्षे साकल्येन दाक्षायणयज्ञसंबन्धीनि हविरुच्छिष्टाशनादिलक्षणानि व्रतानि करोतीति यदस्ति तद् देवानां संबन्धिनं सोमं चन्द्रमसं भक्षितवान् भवेयमित्यभिप्रायेण कुर्यात्।

अत्र 'दाक्षायणयज्ञेन सुवर्गकामः'[b] इति प्रकृत्यापस्तम्बः तत्स्वरूपं प्रदर्शितवान्—'द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत। आग्नेयोऽष्टाकपाल अग्नीषोमीय एकादशकपालः पूर्वस्यां पौर्णमास्याम्। आग्नेयोऽष्टाकपाल ऐन्द्रं दध्युत्तरस्याम्। आग्नेयोऽष्टाकपाल ऐन्द्राग्न एकादशकपालः पूर्वस्याममावास्यायाम्। आग्नेयोऽष्टाकपालो मैत्रावरुण्यामिक्षा द्वितीयोत्तरस्याम्'[c] इति। आश्वलायनश्च—'दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत। नित्ये पूर्वे यथाऽसंनयतोऽमावास्यायाम्। उत्तरयोरैन्द्रं पौर्णमास्यां द्वितीयम्। मैत्रावरुणममावास्यायाम्'[d] इति। अस्मत्सूत्रकारस्तु—'दाक्षायणयज्ञस्य पौर्णमासानि। पूर्वस्यां पौर्णमास्यां अग्नीषोमीयो वाग्नेयः। सांनाय्यं वैन्द्रम् उत्तरस्याम्। आमावास्यानि। पूर्वस्याममावास्यायामैन्द्राग्नो वाग्नेयः। मैत्रावरुणीया पयस्योत्तरस्याम्'[e] इति।

अत्र दाक्षायणयज्ञकेषु हविर्यागेषु सोमयागसंपत्त्या प्रशंसा क्रियते। प्रथमं तावत् पूर्वस्यां पौर्णमास्यां योऽयमाग्नेययागादनन्तरमग्नीषोमीयपुरोळाशयागः
4.१४-१६ तस्मिन् सोमयागाङ्गभूताग्नीषोमीयपशुयागसंपत्तिं दर्शयति—**अथ-आप्नोति।** उपवसथे पूर्वस्यां पौर्णमास्यां सोमस्योपवसथे। सोमाभिषवदिवसात् पूर्वस्मिन् अहनि। तेनाग्नीषोमीयपुरोळाशेन। अस्य सोमस्य संबिन्धिनम्। तमग्नीषोमीयपशुमेवाप्नोति। पुरोळाशयाग एव पशुयागफलं संपद्यते। उत्तरस्यां पौर्णमास्यां
4. १७-१९ य ऐन्द्रदधिरूपसांनाय्ययागः तं सोमयागसंपादनेन स्तौति—**अथ-आप्नोति।** प्रातः उत्तरस्यां पौर्णमास्यां आमावास्येन सांनाय्येन सुत्याहनि क्रियमाणं सोमयागाख्यं कर्म हीन्द्रदेवत्यम्। 'ऐन्द्रः सोमः'[f] इति हि श्रूयते। सांनाय्य-

a. *Somotpatti*, v. 6.
b. APŚ. 3. 17. 4.
c. APŚ. 3. 17. 5–6.
d. AŚ. 2. 14. 7–10.
e. ŚŚ. 3. 8. 6–18 ( Pr. edn. varies )
f. TS. 3. 1. 8. 2.

मपि इन्द्रदेवताकम् । 'ब्रह्मवादिनो वदन्ति किंदेवत्यं सांनाय्यम्'[a] इत्यादिना तैत्तिरीये सांनाय्यस्यैन्द्रत्वसमर्थनदर्शनात् । तस्मादेकदेवत्यत्वसाम्यात् सांनाय्य-यागः सोमयाग एव । पूर्वस्याममावास्यायाम् आग्नेययागादनन्तरम्[1] अनुष्ठेय-
मैन्द्राग्नयागं तृतीयसवनसंपत्त्या स्तौति–**अथ–आप्नोति ।** तृतीयसवनमित्यु- 4. २०-२२
क्थ्यशस्त्राभिप्रायम् । तेषामैन्द्राग्नत्वात् । 'ऐन्द्राग्नान्युक्थ्योक्थानि भवन्ति'[b] इति वक्ष्यमाणत्वात् ।

ननु तेषु शस्त्रेषु देवतान्तरस्यापि विद्यमानत्वात् कथमैन्द्राग्नत्वमुच्यत इत्यत्रोक्तं सामत इति । यद्यपि शस्त्रपर्यालोचनायामैन्द्राग्नत्वं न संगच्छेत[2], तथापि तत्संबन्धिनां साकमश्वादिसाम्नाम् ऐन्द्राग्नीष्वृक्षु गीयमानत्वाच्छस्त्राण्य-प्यैन्द्राग्नान्युच्यन्त इति[3] । तदप्युपरिष्टादेव **वक्ष्यते**—'आग्नेयीषु मैत्रावरुणाय प्रणयन्त्यैन्द्रीष्वितरयोः । तेन तान्यैन्द्राग्नानि भवन्ति'[c] इति । तथा चैकदेवत्य-त्वाद् ऐन्द्राग्नयागे तृतीयसवनप्राप्तिरुपपद्यते ।

अथोत्तरस्याममावास्यायाम् आग्नेयादूर्ध्वं कर्तव्यं पयस्यायागम् अनूबन्ध्या-
संपत्त्या स्तौति—**अथ–आप्नोति** । दाक्षायणयज्ञिकेषु हविर्यागेषु सोमयाग- 4. २३-२५
संपत्तिं प्रदर्शितामुपसंहरति—**स–अनुप्रविष्टः ।** सोमः सोमयागः । यदेतद् 4. २६
दाक्षायणयज्ञस्य सोमयागरूपत्वं संपादितम्, तत् सिंहावलोकितन्यायेन
पूर्वोक्तव्रतविधाने हेतूकरोति । **तस्माद्–भवति ।** यस्मादुक्तक्रमेण दाक्षायणयज्ञः 4. २७
सोमयागरूप एव तस्मात् कारणात् अत्रादीक्षितोऽपि सन् यजमानो दीक्षितस्य यानि सत्यवदनादीनि व्रतानि तैः **संयुक्तो** भवेत् ॥

इति चतुर्थः खण्डः

दाक्षायणयज्ञः प्रतिपादितः । अथ पञ्चमे खण्डे इळादधसार्वसेनियज्ञ-
शौनकयज्ञा विधीयन्ते । तत्र इळादधं विधित्सुः प्रतिजानीते—**अथ–इळादधस्य ।** 5. १

a. TS. 2. 5. 3. 7.
b. KB. XVI. 10. १.
c. KB. XVI. 10. ५-६.

1. T. V. आग्नेयादनन्तरम्
2. T.V. संगच्छेत
3. TV. omit

विधिरुच्यत इति शेषः। दाक्षायणयज्ञीयमेवारम्भकान्तम् अत्रापि[1] दर्शयति—
5. २ **इळादधेन–ब्राह्मणम्।** 'मुखं वा एतत् संवत्सरस्य'[a] इत्यादिकं ब्राह्मणमति-
5. ३,४ दिशति—तस्योक्तं ब्राह्मणमिति। अधिकारिविशेषं दर्शयति—**स–यजेत।** यानि
'न सौहित्यं प्राप्नुयाद्'[b] इत्यादीनि दाक्षायणयज्ञोक्तानि व्रतानि तानि
5. ५,६ सर्वाण्यपि इहेळादधेऽपि कर्तव्यानीत्याह–**तत्र–समासः।**

5. ७,८ अथ सार्वसेनियज्ञं प्रस्तौति—**अथ–ब्राह्मणम्।** अधिकारिणं दर्शयति—
5. ९-११ **स–ह।** तुस्तूर्षमाणः शत्रून् हिंसितुकामः। हशब्दोऽवधारणे। शत्रून् हिनस्त्ये-
5. १२-१५ वेत्यर्थः। शौनकयज्ञं विधत्ते—**अथ–यजेत।** प्रजातिः वंशसमृद्धिः। स्तौति—
5. १६ **तद्–रूपम्।** तत् तत्राध्वर्युः हवींषि प्रकर्षेण जनयति निष्पादयति इति
यदस्ति तत् प्रजात्याः समृद्धे रूपमनुरूपं निष्पन्नत्वसाम्यात्॥

इति पञ्चमः खण्डः

पञ्चमे खण्डे इळादधादीनि त्रीण्यदीक्षितायनानि विहितानि। अथ
6. १,२ षष्ठे वसिष्ठयज्ञसाकंप्रस्थाय्यौ विधीयेते। वसिष्ठयज्ञं प्रस्तौति—**अथ–प्रयुङ्क्ते।**
तथा च सूत्रम्—'वसिष्ठयज्ञस्यामावास्यायां साकंप्रस्थाय्यस्य च'[c] इति। अस्य
6. ३-६ अमावास्यायां योग्यत्वं दर्शयन् स्तौति—**ब्रह्म–इति।** या पौर्णमासी सा ब्रह्म
ब्राह्मणजातिरेव भवति, प्रथमत्वात्। या [2]-त्वमावास्या सा-[2] क्षत्रियजाति-
र्भवति, उत्तरभावित्वात्। अयं च वसिष्ठयज्ञाख्यो यज्ञः क्षत्रमिव भवति।
यथा क्षत्रजातीयः शत्रुहिंसास्वभावः एवमयं यज्ञः शत्रुनिग्रहहेतुरिति
क्षत्रसादृश्यम्। अतः क्षत्रवद् वर्तमानेनानेन शत्रूनभिभवेयमिति अभिप्रायेण
अमावास्यायां वसिष्ठयज्ञमारभेत। अथ वसिष्ठयज्ञशब्दनिर्वचनरूपया
6. ७-११ आख्यायिकया अधिकारिविधिमुन्नयति—**वसिष्ठो–भवति।** पुरा किल

a. KB. IV. 4. ३.
b. ŚS. 3. 8. 14.
c. ŚS. 3. 8. 2.

1. T. V. इहापि
2–2 T. V. gap.

पापिष्ठैः सुदासपुत्रैः[1] निहतपुत्रः सन् वसिष्ठ इत्थं **कामयांबभूव** । अहं प्रजया पुत्रपौत्रादिलक्षणया प्रजायेय प्रवृद्धो भूयासम् । किं च मत्पुत्रहन्तॄन् सुदासपुत्रानभिभवेयमिति । इत्थं च कामयमानः तदुपायविशेष-मन्विच्छन् ईश्वरानुग्रहवशात् कांक्षितफलसाधनभूतं कञ्चिद् वसिष्ठयज्ञसंज्ञकं यज्ञविशेषमपरोक्षीकृतवान् । अत एव च वसिष्ठयज्ञ इत्याख्यामवाप । वसिष्ठेन प्रथमतो दृष्ट्वा अनुष्ठितत्वात् । दृष्टयज्ञश्च वसिष्ठः तदनुष्ठानेन यथाभिलषितं फलं प्राप्तवान् । यथा वसिष्ठ इष्टं फलमनेन यज्ञेन पुरा लब्ध-वान् तथैवेदानीमपि यजमानो यदि वसिष्ठयज्ञेन यजेत तदा प्रजया पुत्रादि-रूपया प्रजायेत प्रवर्धेत शत्रूंश्चाभिभवति ।

इदानीं साकंप्रस्थाय्यनामकं यागं विधित्सुः प्रस्तौति—**अथ-साकं-**
**प्रस्थाय्यस्य ।** दधिक्षीरपूर्णाभिः चतसृभिः कुम्भीभिः ब्राह्मणधृताभिः साकं- 6. १२
मध्वर्योः होमं प्रति प्रस्थानं साकंप्रस्थाय्यः । स यस्मिन् यागे विद्यते सोऽयं
साकंप्रस्थाय्यः । तन्नामकस्य यागस्य विधिरुच्यते इति शेषः । अत्र वसिष्ठ-
यज्ञोक्तमेवारम्भकालमुपादिशति—**साकंप्रस्थाय्येन-ब्राह्मणम् ।** अत्र कालविधौ 6. १३
'ब्रह्म वै पौर्णमासी'[a] इत्यादिकमत्र ब्राह्मणमतिदिशति । अधिकारिणं
दर्शयति—**स-यजेत ।** श्रैष्ठ्यं विद्यातपःप्रभृतिभिः सर्वोत्कृष्टत्वम् । पुरुषस्य 6. १४,१५
भावः पौरुषम् अपराधीनत्वरूपम् ।

ननु 'साकंप्रस्थायीयेन यजेत पशुकामः'[b] इत्यन्यत्र पशुफलत्वमस्यैव श्रूयते । इह तु श्रैष्ठ्यपौरुषफलत्वम् । अतो विरोध इति चेत्, फलवचनस्यो-पलक्षणार्थत्वात् । किंच यत्र यस्य कश्चिदेव फलविशेषः श्रूयते तत्र न फलान्तरव्यावृत्तिः प्रतिपत्तव्या । व्यावर्तकशब्दाभावात् । 'योऽर्थादर्थो न स चोदनार्थः'[c] इति न्यायात् । तर्हि अनियतफलत्वं स्यादिति चेन्न, प्रमाणवशेन नियमसंभवात् । यत्र यस्य कश्चित् फलविशेषः श्रूयते तस्यैव चेद् वाक्यान्तरेण फलान्तरमाविद्यते भवतु तदपि तत्फलम् । 'नास्ति वचनस्यातिभारः किं हि वचनं

a. KB. IV. 6. ३.
b. TS. 2. 5. 4. 3.
c. *Bṛhatī* on JS. 1. 1. 25

1. T. V. सुदासस्य for सुदास

न कुर्यात्'[a] इति हि तीर्थदिशां डिण्डिमः । असति तु प्रमाणान्तरे न फलान्तर-
सद्भावः तार्किकशिरोमणिभिरप्याश्रयितुं शक्यः । यथा 'दाक्षायणयज्ञेन स्वर्ग-
कामो यजेत'[b] इति स्वर्गफलत्वे वाक्यान्तरसिद्धेऽपि 'व्यावृत्काम एतेन यज्ञेन
यजेत'[c] इति व्यावृत्तिफलत्वेनापि स एव वाक्यान्तरेण समर्प्यते । एवं तत्र तत्र
प्रदेशे परश्शतमुपलभामहे । तस्मादनाविलैषा फलोक्तिरिति ।

6. १६-१९ साकंप्रस्थाय्यशब्दं निर्ब्रूते—**तद्-साकंप्रस्थाय्यः** । तत् तत्र यज्ञे यस्मात्
सहैवाध्वर्युप्रभृतयः होमार्थमभिक्रमणं कुर्वन्ति । तथा चाम्नायते—'सह कुम्भी-
भिरभिक्रामति'[d] इति । तस्मात् साकंप्रस्थाय्यनामायं यागः संपन्नः ॥

इति षष्ठः खण्डः

अथ 'आग्नेयाग्नावैष्णवौ । पौर्णमासीविकारः । सदा यजते'[e] इत्युक्त-
7. १-४ स्वरूपं मुन्ययनाख्यं यागविशेषं विधत्ते—**अथ-यजेत** । यथा सर्वे ब्राह्मणा
भोजयितव्या इत्यादौ न जगदुदरवर्तिविप्रविषयः सर्वशब्दः अपि तु निमन्त्रित-
कतिपयब्राह्मणविषय एव; एवमिहापि सर्वशब्दो न कृत्स्नवाची भवितुमर्हति ।
किंतु ऐहिकामुष्मिकभेदभिन्नपुत्रपशुस्वर्गादिकामनाविषयवस्तुविषय एव ।
अतः पशुकामपुत्रकामस्वर्गकामादीनाम् अत्राधिकार इति सिध्यति । इतरथा
एकस्य कदाचिदपि सर्वविषयकामनानुत्पत्तेः अधिकारे कथितेऽपि निरधिकार-
कल्पत्वं प्रसज्येत । 'व्याख्यानतो विशेषप्रतिपत्तिः'[f] इति हि स्थितिः ।

अथ 'आग्नेय ऐन्द्रो वैश्वदेवोऽमावास्याविकारः । सदा यजतेऽदीक्षितः ।
कृष्णाजिनं प्रतिमुञ्चते । तुरायणमित्याचक्षते'[g] इति सूत्रकृतोक्तस्वरूपं
कावषेयेण तुराख्येन महर्षिणा दृष्टत्वात् तुरायणसंज्ञितं यागविशेषं विधत्ते—
7. ५-८ **अथ-यजेत** । यदुक्तं सूत्रकृता 'अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते'[h] इति
7. ९-११ तस्यैष विधिः—**अथ-समर्धयति** । प्रतिपूर्वो मुचिः बन्धनार्थः । कृष्णाजिन-

a. Śabara on JS. 3. 5. 18; 10. 5. 11.
b. TS. 2. 5. 5. 4.
c. TS. 2. 5. 5. 6.
d. APŚ. 3. 16. 17.
e. ŚŚ. 3. 11. 7–9.
f. MB. on लण् *sutra*.
g. ŚŚ. 3. 11. 11–15.
h. ŚŚ. 3. 11. 14.

मात्मन्याबध्नाति । तत्र यत् कृष्णाजिनं तद् ब्रह्मैव ब्राह्मणजातिरेव भवति । तथा च कृष्णाजिनधारणेन ब्रह्मणात्मानं समृद्धियुक्तं करोति । अथ हविषां संख्यां प्रशंसति—**तानि-आप्नोति** । व्याख्यातम् ॥ 7. १२-१४

इति सप्तमः खण्डः

अथातो दाक्षायणयज्ञस्येत्यादिभिः एतदन्तैः चतुर्भिः खण्डैः दर्शपूर्णमासयोः गुणविकृतिभूताः अदीक्षितायनसंज्ञा यागविशेषाः प्रदर्शिताः । इदानीम् 'अथात आग्रयणस्य' इत्यादिभिः त्रिभिः खण्डैः आग्रयणेष्टयो विधास्यन्ते ।
तत्र तावत् प्रतिजानीते—**अथ-आग्रयणस्य** । अनन्तरमाग्रयणेष्टेर्विधिर्वक्ष्यत 8. १
इति शेषः । तत्र प्रथममधिकारिणं दर्शयति—**आग्रयणेन-आह** । अत्तुं योग्यं 8. २,३
व्रीह्याद्यन्नमन्नाद्यम् तत्कामोऽत्र कर्मण्यधिक्रियत इति । नवान्नाद्योपयोगकामनावतश्चात्राधिकारो विवक्षितः । तथा चाश्वलायनः—'व्रीहिश्यामाकयवानां सस्यं नाश्नीयादग्निहोत्रमहुत्वा'[a] इति । अनिष्टाग्रयणस्य नवान्नोपयोगे वैश्वानरीयेष्टेः प्रायश्चित्तत्वेन विधानश्रवणाच्च[b] । अतोऽन्नाद्यकामस्य नवान्नोपयोगकाम इत्यर्थो ग्राह्यः । प्रथमं तावद् वर्षासु कर्तव्यां श्यामाकद्रव्यकां सोमदेवत्यामाग्रयणेष्टिं विधित्सुराह—वर्षास्वागते । वर्षर्तौ प्रवृत्ते । अथवा अन्नाद्योत्पत्तिकामनावत इहाधिकारोऽभिधीयते । अयमेव च साधीयान् व्याख्यानप्रकारः । 'अन्नाद्यमाग्रयणेन'[c] इति षष्ठाध्यायान्तपठिष्यमाणवाक्यसामञ्जस्यसंभवात् । वर्षासंज्ञित ऋतौ प्रवृत्ते सति यदा श्यामाकाः परिणता भवेयुः तदा यजमानः परिणतफलान् श्यामकानुद्धर्तवे उद्धर्तुम् । 'तुमर्थे सेसेन्'[d] इति तवेन् प्रत्ययः । स्वकीयान् प्रेष्यान् ब्रूयात् श्यामाकानानयतेति । ते च तत्प्रेषिताः श्यामाकानुद्धृत्य संपादयेयुः ।

अथास्या इष्टेः प्रयोगकालमाह—**सा-यजेत** । तस्मिन् काले परिणत- 8. ४-६
श्यामाकफले वर्षर्तौ प्रवृत्ते सति या सा आमावास्येष्टिरुपसंपन्ना प्राप्ता भवेत्

a. AŚ. 2. 9. 1-2. b. cf. AB. 7. 9. 1.
c. KB. VI. 10. १४. d. Pā. 3. 4. 9.

तामिष्टिं प्रथममनुष्ठायानन्तरमेव तस्मिन् दिन एवाग्रयणेष्टिं कुर्यात्। यदि पुनस्तस्मिन् काले पौर्णमासीष्टिरुपसंपद्येत तर्ह्यस्ति कश्चिद् विशेषः। एतामाग्रयणेष्टिं प्रथमं कृत्वानन्तरं पौर्णमासीमिष्टिं कुर्यात्। अन्यथा आग्रयणस्य अपरपक्षकालप्रयोगप्रसङ्गात्। अतः पौर्णमास्याममावास्यायां चाग्रयणं कर्तव्यमिति सिद्धम्।

यदि त्वाग्रयणानुष्ठानार्थं कंचिन्नक्षत्रविशेषमुपाप्तुमिच्छेत् तदा पूर्वपक्षे शुक्लपक्षे नक्षत्रविशेषं पर्यालोच्य यत् किंचित् कल्याणनक्षत्रमस्ति, तस्मिन् कस्मिंश्चिदेव कामनानुसारेणाग्रयणं कुर्यादिति कालमुपदिश्य इतिकर्तव्यतां
8. १० विधत्ते—**तस्यै-ब्राह्मणम्।** 'सप्तदशसामिधेनीका वै'[a] इत्यादि साप्तदश्यस्य 'असानीति वै'[b] इत्यादि सद्वत्तायाः 'श्रीर्विराळन्नाद्यम्'[c] इत्यादि विराट्छन्दस्त्वविधेः ब्राह्मणमुक्तमेव द्रष्टव्यम्।

8. ११-१३ इदानीं हविर्विधत्ते—**सौम्यः-प्रीणाति।** सोमदेवत्यः श्यामाकफलनिष्पन्नश्चरुः अस्यामिष्टौ भवेत्। ओषधीनां फलपाकावसानानां व्रीहिश्यामाकादीनां यस्मात् सोमो राजा भवति। 'सोमो वा ओषधीनां राजा'[d] इति श्रुत्यन्तरेषु श्रवणात्। अत एव सोमस्यौषधीश इति संज्ञा प्रतीयते। तत्र श्यामाकद्रव्यैः सोमदेवत्यस्य चरोर्निष्पादने सति एनं सोमं राजानं स्वसंबन्धिन्या विशा सेनया प्रीणयति। ओषधीनां सोमसंबन्धिविड्रूपत्वं श्रुत्यन्तरे पठ्यते 'ओषधयो वै सोमस्य राज्ञो विशः'[e] इति।

8. १४, १५ अथ दक्षिणां विधत्ते—**अथ-रसः।** दधि घृतमिश्रं मधुपर्कः। तं दक्षिणात्वेन दद्यात्। तच्चैतत् सोमदेवत्येऽस्मिन् कर्मणि घटते। यस्मादेष मधुपर्क आरण्यानामोषधीनां रसो भवति। 'आरण्यमन्नं मधु'[f] इति श्रुत्यन्तरात्। अतो मधुपर्कस्यापि ओषधिरसत्वाद् अत्र दक्षिणात्वमनुरूपमित्यर्थः॥

इत्यष्टमः खण्डः

a. KB. I. 2. ९.
b. KB. I. 2. १२.
c. KB. II. 4. ९.
d. TS. 6. 1. 9. 1.
e. TS. 3. 1. 8. 2.
f. cf. TS. 5. 4. 5. 2.

अथ वसन्ते कर्तव्यां वेणुयवद्रव्यकां कांचिद् आग्रयणेष्टिं विधित्सुराह—
**अथ–आह**। पक्वेषु पाकं परिणामं प्राप्तेषु वेणुयवेषु वंशफलेषु वेणुफलान्युद्धर्तुं 9. १, २
कर्मकरान् ब्रूयात्। अस्यां वेणुयव्यामिष्टौ श्यामाकेष्टिविहितानेव कालेति-
कर्तव्यतादेवतादक्षिणाः तदर्थवादं चातिदिशति—**तस्या–ब्राह्मणम्**। पर्व 9. ३
कालः। 'सा या तस्मिन् काले'[a] इत्यादिनोक्तः। एषा देवता सोमः। तस्यामेव
शाखान्तरीयमतानुसारेण देवताविकल्पान् प्रदर्शयति—**तां–एतद्ब्राह्मणाम्**। तां 9. ४
वैणुयवीमिष्टिमेके शाखिनः आग्नेयीमग्निदेवत्यां कुर्वन्ति। वारुणीं वरुणदेवत्यां
वा। प्रजापतिदेवत्यां वा। एतेषु सर्वेष्वपि पक्षेषु नेतिकर्तव्यत्वस्य कश्चिद्
भेद इत्याह—एतत्तन्त्रामेवेति। एतदेव तन्त्रमितिकर्तव्यता यस्याः सा
तथोक्ता। एतदेव ब्राह्मणं यस्याः सा तथोक्ता।

अथ व्रीह्याग्रयणेष्टिं विधत्ते—**अथ–आह**। यवसस्य इति तत्रैव द्रव्य- 9. ५, ६
विकल्पः। आग्रयणीयान् व्रीहीन् यवान् वा। अस्यामपीष्टौ कालेतिकर्तव्यते
श्यामाकेष्टया तुल्ये इत्याह—**तस्या–तन्त्रम्**। देवतायां तु विशेषं दर्शयन् प्रथम- 9. ७
मिन्द्राग्निदेवत्यं हविर्विधत्ते—**अथ–प्रीणाति**। इन्द्राग्न्योर्मुखत्वं प्राधान्यात्। 9. ८-१०
'इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ सहिष्ठौ सत्तमौ पारयिष्णुतमौ'[b] इति
तयोः प्राधान्यश्रवणात्। विश्वेदेवदेवत्यं द्वितीयं चरुलक्षणं हविर्विधत्ते—
**अथ–प्रीत्यै**। विश्वेदेवानां सर्वदेवात्मकत्वाद् विश्वेदेवानां यागः सर्वदेवप्रीत्यै 9. ११-१३
संपद्यते।

अथ तृतीयं द्यावापृथिवीदेवताकं हविर्विधत्ते—**अथ–अनुवेद**। सस्यस्य 9. १४-१६
व्रीह्यादिलक्षणस्य द्यावापृथिव्यौ साधयित्र्यौ भवतः इत्येतत् तावत् प्रसिद्धम्।
कथम्? तत्र द्यावापृथिव्योर्मध्ये येयं पृथिवी सा सस्यस्य प्रतिष्ठा आधारो
भवति। तस्यामुत्पत्तिदर्शनात्। पृथिव्यां हि सस्यमुत्पद्यमानं[1] दृश्यते। असौ
द्युलोकस्तु वृष्ट्युदकसेचनेन सस्यमनुवेद अनुजानाति, वर्धयति। अत
उभयोरपि सस्यसंपादनहेतुत्वमविशिष्टम्। इत्थं प्रत्येकं यागान् प्रशस्य तानेव

a. KB. IV. 8. ४.    b. AB. 2. 36. 4.

1. T. V. उत्पाद्यमानं

9. १७,१८ समुदितान् प्रशंसति—**तद्-इति**। तत् तत्राग्रयणे एता इन्द्राग्न्यादिका देवता यजतीति यदस्ति तदेताभिर्देवताभिः शान्तं सुखहेतुत्वेन संपन्नमन्नमत्स्यामि उपयोक्ष्यामि इत्यभिप्रायेण कुर्यात्। इतरथा अशान्तमुपयुज्यमानं सत् उपयोक्तुर्महते अनर्थाय कल्पेत ॥

इति नवमः खण्डः

10.१,२ अथ दक्षिणां विधत्ते–**अथ-एतत्**। प्रथमजः प्रथमगर्भोत्पन्नः। यस्मादेतदाग्रयणं नवैरन्नैः क्रियमाणत्वात् प्रथमकर्म भवति। तस्मात् प्रथमजस्य दक्षिणात्वम् अनुरूपमित्यर्थः। एवमाग्रयणेष्टिं विधाय 'विधिरधिकारसामर्थ्यमनुरुन्धान एव विधत्ते'[a] इति न्यायमाश्रित्य अस्यामिष्टावसमर्थं प्रति अनु-
10.३-८ कल्पान् विधत्ते–**यदि-आप्त्यै**। यदि खलु यजमान एतामाग्रयणेष्टिं कर्तुं कस्माच्चित् कारणादसमर्थो भवेत् तस्याग्रयणस्यावश्यकर्तव्यत्वादेवं कुर्यात्। नवान् व्रीह्यादीन् संपाद्य तैरेव नित्यमेव पौर्णमासमामावास्यं वा हविः कुर्यात्। नवैर्व्रीह्यादिभिः दार्शं वा पौर्णमासं वा कर्म कुर्यात्। एष च प्रयोगः उभयस्य दर्शपूर्णमासयोराग्रयणस्य चाप्त्यै संपद्यते। न पृथग् आग्रयणफलप्राप्त्यर्थमाग्रयणमनुष्ठेयम्। सूत्र्यते हि–'दर्शपूर्णमासौ वा नवानाम्'[b] इति। अपिवेत्येष निपातद्वयसमुदायो विकल्पार्थः। हवींष्याग्रयणहवींषि ऐन्द्राग्रादीनि। तानि पौर्णमासे वा दार्शे वा कर्मण्यनु पश्चात् संयोजयेत्। पूर्वमाग्नेयादीनि हवींषि अनन्तरम् ऐन्द्राग्रादीनि कुर्यात्। दर्शपूर्णमासयोर्यान्यङ्गानि तान्येवैन्द्राग्रादीनामपि भवेयुः। न पृथक् प्रयोगः। तथा च सूत्रम्–'समानतन्त्रा वा दर्शपूर्णमासाभ्याम्'[c] इति। एवं चानुष्ठानं देवतानामिन्द्राग्न्यादीनामपरित्यागाय संपद्यते[1]। तेषामपि यागः सेत्स्यतीत्यर्थः। अथाग्निहोत्रकर्मण्येव आग्रयणफलप्राप्त्युपाय उच्यते। नवैः व्रीह्यादितण्डुलैर्निष्पादितया यवाग्वा

a. cf. Js. 6. 2. 4-5.
b. ŚS. 3. 12. 14.
c. ŚS. 3. 12. 13.

1. A. M. संपत्स्यते

सायंप्रातःकालीनमग्निहोत्रं कुर्यात् । इत्थं प्रयोग उभयप्राप्तिहेतुर्भवति । सूत्र्यते हि–'अग्निहोत्रं यवाग्वा सायंप्रातः'[a] इति ।

अथवा नवैर्व्रीह्यादितण्डुलैः प्रतिश्रुतहोमविधाने गार्हपत्ये चरुं निष्पाद्य आग्रयणदेवता इन्द्राग्न्यादीः तिस्रः स्विष्टकृद्देवतां चोद्दिश्य[1] आहवनीये अमुष्यै स्वाहेति देवतानाम चतुर्थीविभक्त्यन्तं निर्दिश्य जुहुयात् । एवं तदाग्रयणदेवता अपरित्यक्ता भवन्ति । सूत्र्यते हि–'स्थालीपाकं वा गार्हपत्ये श्रपयित्वाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्वाहाकारेणाहवनीये'[b] इति ।

अथवाग्निहोत्रीं धेनुं नवान् व्रीह्यादीन् उपयोज्य तदुपयुक्तव्रीह्यादिपरिणामभूतेन पयसाग्निहोत्रहोमं कुर्यात् । तथा च सूत्रम्–'अग्निहोत्रीं वा नवानादयित्वा पयसाग्निहोत्रम्'[c] इति । आग्रयणानुकल्पानुपदिश्य उपसंहरति—**एत–**
**यजेत** । एते 'यद्येतस्यै ग्लायाद्'[d] इत्यादिनोक्ताः । एतत्परिणामाः पाताः आग्र- 10.६,१०
यणेष्टिस्थाने पतन्ति प्राप्नुवन्तीति पाताः अनुकल्पाः । एतेषां[2] मध्ये येन पातेन यष्टुं कामयेद् इच्छेत् तेन पातेन यजेत । ऐच्छिक एवानुकल्पविशेषाङ्गीकारः ।
तर्हीष्टिरपि इच्छानुसारेणैवानुष्ठेयेति चेत्, नेत्याह—**त्रिहविस्–स्थिता** । 10.११
यथा अनुकल्पेष्वैच्छिक एव नियमः न तथा त्रिहविष्कायामिष्टौ प्रत्येतव्यम् । सति सामर्थ्ये तावत् सैवेष्टिरनुष्ठेया । तदभावे पक्षान्तराङ्गीकारः । त्रीणि हवींष्यैन्द्राग्रादीनि यस्यां सा त्रिहविः । तुरेवार्थः । स्थितेत्युत्सर्गतः प्राप्तेत्यर्थः ।
त्रिहविष्ट्वं प्रशंसति—**त्रयो–आप्नोति** । उक्तार्थम् । अभ्यासः अध्यायसमाप्तौ ॥ 10.१२,१३

इति दशमः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
... ... ... ...
... ... अध्याय आसीद् गतः ॥

## इति कौषीतकिब्राह्मणव्याख्याने प्रथमदशके चतुर्थोऽध्यायः

a. ŚŚ. 3. 12. 15.
b. ŚŚ. 3. 12. 17. ( Pr. edn. varies )
c. ŚŚ. 3. 12. 16.
d. KB. IV. 10. ३.

1, T. V. चोपदिश्य
2, T. V. add च

अथ

## पञ्चमोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः॥
इत्थं चतुर्थे विहिता विविधा विकृतीष्टयः।
कथ्यन्तेऽथ क्रमेणात्र चातुर्मास्यानि पञ्चमे॥

1. १ तत्र तावत् प्रतिजानीते—**अथ-चातुर्मास्यानाम्** । अथातःशब्दावानन्तर्यार्थौ । चातुर्मास्यानां कर्मणां विधिर्वक्ष्यत इति शेषः । चातुर्मास्यशब्देन वैश्वदेववरुणप्रघाससाकमेधशुनासीर्याणि चत्वारि पर्वाण्युच्यन्ते।

1. २ प्रथममारम्भकालमुपदिशति—**चातुर्मास्यानि-प्रयुङ्क्ते** । प्रयोग आरम्भः ।

1. ३-६ स्तौति—**मुखं-प्रीणाति**। फाल्गुनी पौर्णमासीति यदस्ति तदेतत् संवत्सरस्य द्वादशात्मकस्य मुखमारम्भकालो भवति। तत् कथमिति चेद् उच्यते। फाल्गुने तावन्मासि पूर्वोत्तरफल्गुनीशब्दाभिधाने द्वे नक्षत्रे स्तः। तयोर्मध्ये यदुत्तरफल्गुन्याख्यं नक्षत्रमस्ति तत् संवत्सरस्य मुखं भवति। 'एषा वै प्रथमा रात्रिः संवत्सरस्य। यदुत्तरे फल्गुनी'[a] इति तैत्तिरीयश्रवणात्। पूर्वफल्गुन्याख्यं पुच्छमवसानं भवति। 'एषा वै जघन्या रात्रिः संवत्सरस्य। यत् पूर्वे फल्गुनी'[a] इति श्रवणात्। तत्रैवं सति यथा लोके प्रवृत्तस्य विश्लिष्टस्य रज्वादेरन्तौ समेतौ संधातुं संगतौ सन्तौ यथा यादृग्रूपौ स्यातां तद्वदेवैतावपि नक्षत्रद्वयात्मकौ संवत्सरस्यान्तौ संयुक्तौ तिष्ठतः। तथा च तादृशनक्षत्रान्यतरसंयुक्ता पौर्णमासी संवत्सरस्य मुखं भवति। तस्यां च पौर्णमास्यां वैश्वदेवकर्मानुष्ठानेन मुखत आरम्भ एव संवत्सरात्मप्रजापतिप्रीतिः संपाद्यते।

1. १०-१२ अथोत्तरेषामपि चातुर्मास्यपर्वणां प्रयोगकालं प्रकटयन्नाह—**अथो-जायते**। चातुर्मास्यानीति यदस्ति एते भैषज्यरूपा व्याधीनां चिकित्सात्मका यज्ञा भवन्ति। यस्मादेवं तस्माद्धेतोरेतान्यृतूनां वसन्तादीनां संधिषु अन्तरालप्रदेशेषु

a. TB. 1. 1. 2. 8

प्रयुज्यन्ते अनुष्ठीयन्ते । लोके धातुवैषम्यजनितानां व्याधीनां ऋतुसंधिषु जायमानत्वात् । हिशब्दः आयुर्वेदलोकप्रसिद्धिद्योतकः ।

अथ वैश्वदेवहविर्यागसंख्यां स्तौति—**तानि-समासः** । तानि वैश्वदेव- 1. १३-१५
संबन्धीनि हवींषि आग्नेयादीन्यष्टसंख्याकानि भवन्ति । सूत्रितं हि—'आग्नेयः । सौम्यसावित्रौ । सारस्वतपौष्णौ । मरुद्भ्यः स्वतवद्भ्यः । वैश्वदेवी पयस्या । द्यावापृथिवीयश्च'[a] इति । तदेतदुपपन्नम् । यस्माच्चतुःसंख्याकानां पौर्णमासीनामिष्टीनां पुरोळाशलक्षणानि हवींष्यष्टसंख्याकानि भवन्ति । एकस्यामिष्टौ हविर्द्वयसद्भावाच्चतुःसंख्यायोगे तासामष्टहविष्टायाः संभवात् । न च हेतोर्वैयधिकरण्यमाशङ्कनीयम्; यस्मादेतद् वैश्वदेवकर्म चतुःसंख्यान्वितानां पौर्णमासीष्टीनां समासः समाहारो भवति । तत्फलोत्पत्तिहेतुत्वाच्च तद्रूपत्वोक्तिः । हविरासादनानन्तरम् अग्निमन्थने क्रियमाणे सत्यग्निमन्थनीया ऋचो होत्रा पठनीयाः । सूत्रितं हि—'अग्निमन्थनीयाश्चासन्नेषु हविःषु'[b] इति ।
तदेतदभिप्रेत्याग्निमन्थनं स्तौति—**अथ-प्रजनयन्ति** । यदेतद् वैश्वदेवं नाम 1. १६-१८
कर्मास्ति तत् प्रजातिः प्रजोत्पत्तिहेतुर्भवति । पठिष्यति हि—'वैश्वदेवेन वै प्रजापतिः प्रजा असृजत'[c] इति । यस्मादेनमग्निं देवसम्बन्धिनं गर्भं गर्भवद् दारूदरकुहरे वर्तमानमग्निं प्रकर्षेण जनयन्ति ऋत्विज उत्पादयन्ति । अग्नेश्च गर्भत्वं मन्त्रवर्णे कस्मिंश्चिद् दृश्यते—'गर्भो अस्योषधीनां गर्भो वनस्पतीनां । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि'[d] इति । अतोऽस्मिन् प्रजातिभूते
कर्मण्यग्निमन्थनं संगच्छत एव । **अथ-ब्राह्मणम्** । उक्तार्थम् । 1. १९

अथ प्रयाजानुयाजप्रधानहविर्वाजिनयागानां समुदितानां संख्यां विराट्-
छन्दःसंपादनेन स्तौति—**अथ-आप्नोति** । प्रकृतौ हि पञ्च प्रयाजाः । 1. २०,२१
इह तु चतुर्थस्य पञ्चमस्य च मध्ये 'दुरो अग्न आज्यस्य व्यन्तु' 'उषासानक्ता अग्न आज्यस्य वीताम्' 'दैव्या होतारा अग्न आज्यस्य वीताम्' 'तिस्रो देवीरग्न आज्यस्य व्यन्तु'[e] इति चत्वारोऽन्येऽपि कार्याः । तेन मिलित्वा नव

a. ŚŚ. 3. 13. 6–11.
b. ŚŚ. 3. 13. 15.
c. KB. V. 3. १.
d. TS. 4. 2. 3. 3.
e. ŚŚ. 3. 13. 20; cf. MS. 4. 10. 3.

प्रयाजा भवन्ति। तथा त्रिषु प्राकृतेष्वनुयाजेषु प्रथमद्वितीययोर्मध्ये 'देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु' 'देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्' 'देवी जोष्ट्री वसुवने वसुधेयस्य वीताम्' 'देवी ऊर्जाहुती वसुवने वसुधेयस्य वीताम्' 'देवा दैव्या होतारा वसुवने वसुधेयस्य वीताम्' 'देवीस्तिस्रस्तिस्रो देवीर्वसुवने वसुधेयस्य व्यन्तु'[a] इति षडनुयाजान् कुर्यात्। ततश्च ते मिलिता नव भवन्ति। अष्टौ च हवींषि निर्दिष्टानि[1]। वाजिनं हविर्नवसंख्यापूरकम्। तत् तेन नक्षत्रसंख्यान्विताक्षरयुक्तां सप्तविंशत्यक्षराम्। नक्षत्राणां सप्तविंशतिसंख्यत्वात्॥

इति प्रथमः खण्डः

इदानीं क्रमेण आग्नेयादीन् द्यावापृथिवीयागान्तान् अष्टसंख्याकान् यागान् प्रशंसति। तत्र तावत् प्रथममाग्नेययागं द्वितीयं सौम्ययागं चैकप्रयत्नेन स्तौति–

2. १-३ **अथ–यजति**। देवतानां वैश्वदेवदेवतानां मध्ये अग्नीषोमौ सवित्रादीतरदेवताभ्यः[2] प्रथमौ[3] यजतीति यदस्ति तदुपपद्यते। यस्माद्धेतोरेते अग्नीषोमदेवते दार्शपौर्णमासिके भवतः। दर्शपूर्णमासयोः सकलकर्मभ्यः प्राथम्यात् तद्देवतयोः प्रथमं याग इत्युपपद्यते।

2. ४-६ सवितृदेवत्यं तृतीयं यागं स्तौति—**अथ–प्रसूततायै**। सविता देवः प्रसवानामनुज्ञानामीशे ईष्टे। तथा च मन्त्रः—'उतेशिषे प्रसवस्य त्वमेक इत्'[b] इति। 'देवस्य त्वा सवितुः प्रसवे'[c] इति च तत्र तत्र दर्शनात्। अतः सवितुः सकलकर्मानुष्ठानाभ्यनुज्ञानकर्तृत्वात् सवितृयागोऽस्य कर्मणः सवित्रा प्रसूतत्वाय अनुज्ञातत्वाय संपद्यते। पठिष्यति हि—'सवितृप्रसूतस्य ह वै न काचन रिष्टिर्भवति'[d] इति।

a. ŚS. 3. 13. 27; cf. MS. 4. 10. 3.
b. RV. 5. 81. 5.
c. TS. 1. 3. 1. 1.
d. KB. VIII. 1. १२.

1. T. V. add तेन
2. T. V. सोमसवित्रदी°
3. T. V. add कृत्वा

चतुर्थं सरस्वतीदेवत्यं यागं स्तौति—**अथ-प्रीणाति**। येयं वाक् शब्दाभिमा- २. ७-९
निनी[1] देवता सा सरस्वतीशब्देनोच्यते। तथा च तेन सारस्वतयागेन वागभि-
मानिनीं[2] देवतामेव प्रीणयति। पूषदेवत्यं पञ्चमयागं स्तौति—**अथ-प्रीणाति**। 2. १०-१२
योऽसौ दिवि दृश्यमान आदित्यः सर्वं जगत् प्रकाशयति स एव पूषा भवति।
वृष्टयुत्सर्जनादिना सर्वं जगत् पोषयतीति व्युत्पत्तेः। स्वतवस्त्वगुणकमरुद्देवत्यं
षष्ठं यागं स्तौति—**अथ-कुरुते**। मरुतां घोरत्वं रुद्रसूनुत्वात् तत्र तत्र मारुतेषु 2. १३-१५
सूक्तेषु प्रसिद्धम्। अतो घोरत्वप्रयुक्तानर्थनिवृत्त्यर्थं तेन षष्ठेन यागेन भैषज्यं
शान्तिकर्मैव करोति। विश्वेदेवदेवत्यं सप्तमं यागं स्तौति—**अथ-प्रीत्यै**। 2.१६-१८
**अथ-एव**। उक्तार्थम्। 2.१९,२०

अथ वाजियागं प्रशंसति—**अथ-भवन्ति**। 'तच्छंयोरावृणीमहे'[a] इत्ययं 2.२१-२६
मन्त्रः शंयोर्वाकसंज्ञः। तत्पाठात् पूर्वमुत्तरकालं वा वाजिनामकान् देवान्
यजेत्। तेषां यष्टव्यत्वे सत्यावाहनमपि प्रसज्येत। अनावाहितस्य यजना-
संभवादित्यतः उक्तमनावाहितानिति। तत्र च ये वाजिनो नाम सन्ति ते
देवानामग्न्यादीनां संबन्धिनो देवयजनभूमिप्राप्तिहेतुभूता अश्वा एव। तथा
सति तेन वाजियागेन तान् देवाश्वानेव प्रीतान् करोति। एवं सति चात्र
वैश्वदेवकर्मण्यश्वसहिता देवाः प्रीता भवन्ति। प्रधानयागैर्देवानां प्रीतिः
संपाद्यते। वाजियागेन तदीयानामश्वानामिति साश्वदेवप्रीतिहेतुरिदं वैश्व-
देवकर्म। प्रकारान्तरेण स्तौति—**अथो-प्रीणाति**। ऋतवो वसन्ताद्यभिमानि- 2.२७,२८
देवता एव वाजिशब्देनाभिधीयन्ते। तत् तेन वाजियागेन ऋतूनेव प्रीतान्
करोति। अथ वैश्वदेविक्यामिष्टौ समाप्तायां नित्यं पौर्णमासकर्म कर्तव्यम्।
सूत्रितं हि—'संस्थितायां पौर्णमासम्'[b] इति। तदेतत् स्तौति—**अथ-
भवति**। 2. २९,३०

परस्ताद् वैश्वदेवकर्मानुष्ठानोत्तरकालं पौर्णमासयागे कृते सत्यस्य
यजमानस्य वैश्वदेवयागः पूर्वपक्ष एव कृतो भवेत्। पौर्णमासकर्मणो वैश्वदेवात्

a. RVkh. 10. 191. 5. b. ŚS. 3. 13. 29.

1. T. V. वाचक for वाक् 2. T. V. वागभिमानि

पूर्वमनुष्ठाने वैश्वदेवमपरपक्षेऽनुष्ठितं स्यात् । तच्चायुक्तम् । तस्य यज्ञयोग्यत्वविरहात् । तस्माद् वैश्वदेवोत्तरकालमेव पौर्णमासकर्म ॥

इति द्वितीयः खण्डः

एवं गतेन खण्डद्वयेन वैश्वदेवाख्यमाद्यं चातुर्मास्यपर्व प्रपञ्चितम् । संप्रति वरुणप्रघासाख्यं द्वितीयं पर्व विधित्सुः आदौ कांचिदाख्यायिकामुपक्षिपति—

3. १-१० **वैश्वदेवेन-वेद**। पुरा किल प्रजापतिरीश्वरो जगत्कर्ता प्रजा नानाविधान् सुरनरतिर्यगादिभेदभिन्नान् प्राणभृत एतेन वैश्वदेवकर्मणा[1] सृष्टवान् । सृष्टाश्च ताः प्रजाः अप्रसूता वरुणेनाननुज्ञाता एव तदीयान् यवानोषधिविशेषान् क्षुदभिभूताः प्रमथ्य भक्षयामासुः । अथ ताः स्वकीययवभक्षिणीः प्रजा वरुणः स्वपाशैः प्रतिमुक्ता बद्धा अकरोत् । बद्धाश्च ताः प्रजापतिं स्वपितरं संप्राप्याभिहितवत्यः । हे पितः प्रजापते वयं क्षुधा परिपीडिताः तदसहनतया बलादेव वरुणस्य स्वभूतान् यवानभक्षयाम । ततो वरुणपाशैर्बद्धकर्मणः संप्रमुक्ता भवेमेति । अथ प्रजापतिः तत्प्रार्थनया एनं वरुणप्रघासाख्यं यज्ञक्रतुमीश्वरानुग्रहाद् दृष्ट्वा संभृत्य तदनुष्ठानेन वरुणस्य प्रीतिं संपादितवान् । स च प्रीतो वरुणस्ताः प्रजा वरुणपाशेभ्यः तन्निमित्ताच्च कृत्स्नात् पापकर्मणः सम्यक् प्रमोचयामास । आख्यायिकावेदितुः फलं प्र ह वा अस्येत्यादि । अस्य आख्यायिकावेदितुः प्रजा पुत्रपौत्रादिलक्षणा वरुणपाशबन्धाच्च महोदराद्युत्पत्तिरूपात् सर्वस्मात्[2] तन्निमित्ताच्च पापात् सम्यक् प्रमुक्ता भवति ॥

इति तृतीयः खण्डः

एवं तावत् कर्मस्वरूपप्रशंसनेन कर्मणः स्वरूपबोधक उत्पत्तिविधिरुन्नीतः। संप्रति वरुणप्रघासे यदाहवनीयादग्निप्रणयनमस्ति तत्र 'प्र देवं देव्या धिया'[a]

a. RV. 10. 176. 2.

1. T. V. वैश्वदेवेन कर्मणा 2. T. V. omit

इत्याद्याः अग्निप्रणयिनीयाख्या ऋचो होत्रा पठनीया इत्यभिप्रेत्याग्निप्रणयनं
प्रशंसति—**अथ-प्रणयन्ति** । वरुणप्रघासेषु यदाहवनीयैकदेशप्रणयनरूपमग्नि- 4. १-३
प्रणयनकर्मास्ति तेन वैश्वदेवकर्मणि यममुमग्निं मन्थन्ति तं मथनेनोत्पादित-
मग्निमेव प्रणयन्ति । सर्वत्र मथितस्याग्नेः प्रणयनदर्शनात् वैश्वदेवे चाग्निप्रणयना-
भावात् । इहापि हविरासादनादनन्तरमग्निमन्थनकर्म कर्तव्यम् । तत्र 'अभि
त्वा देव सवितः'[a] इत्याद्या अग्निमन्थनीया ऋचः पठनीया इत्यभिप्रेत्य वैश्व-
देवप्रकरणपठितमेव 'प्रजातिर्वै'[b] इत्यादिकमग्निमन्थनब्राह्मणम् अतिदिशति—
**अथ-आप्नोति** । उक्तार्थमेतत् । इदानीं नवसंख्याकानि हवींषि विदधानो 4. ४-७
वैश्वदेवविहितान्यादितः पञ्चहवींषि तद्धर्मकानीहापि कर्तव्यानीत्याह—**समा-
नानि-वैश्वदेविकानि** । पौष्णान्तान्याग्नेयसौम्यसावित्रसारस्वतपौष्णानि पञ्च 4. ८
हवींषि इहापि समानानि तुल्यानि भवन्ति । अनुष्ठेयानीत्यर्थः । तानि
विशिनष्टि—संचराणीति । न केवलमिहैवैतानि समानानि, अपि तु उत्तरयोः
साकमेधशुनासीर्यपर्वणोरपि चतुर्षु चातुर्मास्यपर्वसु साम्येन चरन्ति अनुष्ठेय-
तया वर्तन्त इति संचराणि । तेषु 'अथ यदग्नीषोमौ'[c] इत्यादिकं वैश्वदेवपठित-
मेव ब्राह्मणमतिदिशति—**तेषाम्-ब्राह्मणम्** । षष्ठमैन्द्राग्नं यागं विधत्ते— 4. ९
**अथ-एव** । गतम् ॥ 4.१०,११

इति चतुर्थः खण्डः

ऐन्द्राग्ने षष्ठे यागे योऽयमिन्द्रसंबन्धो यागोऽशस्त विशेषतः प्रशंसति—
**अथो-यजति** । अग्न्यादीनां द्यावापृथिवीपर्यन्तानां देवतानां मध्ये इन्द्रस्य यागः 5. १, २
क्रियत इत्येतदुपपन्नमेव । यस्मादयमिन्द्रः सर्वेषां देवानां लोकानां च मध्ये
स्थितो भवति स्वर्गस्य मध्यपातित्वात् । सप्तमं वारुणं यागं प्रशंसति—
**अथ-पयस्या** । पयसि प्रभवामिक्षा पयस्या । वरुणदेवत्या पयस्येति यदस्ति 5. ३-६
तत्र वरुणस्य पयस्यासंबन्ध उचित एव । तथा हि योऽयं वरुणो नाम स इन्द्र

a. RV. 1. 24. 3.
b. KB. V. 1. १०.
c. KB. V. 2. 9.

एव भवति। वरुणस्येन्द्रोपजीवित्वात्। स चेन्द्रः पयोभाजन एव। पयस ऐन्द्रत्वात्। पयस्यायाश्च पयोविकारत्वात् पयस्यया वरुणस्य याग उपपन्न
5. ७-१० एव। अथाष्टमं मरुद्देवत्यं यागं स्तौति—**अथ-पयः**। यस्मान्मरुतोऽप्सु श्रिताः मरुतां वृष्ट्युदकप्रेरकत्वात्। तथा च मन्त्रः—'उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः'[a] इत्यादि। तस्मादेनान् मरुतः पयसा यजेत्। न चैवं सति हेतोर्वैयधिकरण्यं शङ्क्यम्। यस्मादेतत् पयो नामास्ति तदाप एव भवन्ति। गोभिरुपयुक्ततृणादिसमवेतानामपां परिणामरूपत्वात्। इतश्च पयसा
5. ११-१३ मरुतां याग इत्युपपन्नमेतदित्याह—**अथो-पयस्या**। अथो अपि च। ये मरुतः सन्ति त इन्द्रस्य संबन्धिनः स्युः। किमनितरदेवसाधारणमिन्द्रस्य मरुत्संबन्धित्वमिति चेत्। श्रूयतां तर्हि ऐतरेयब्राह्मणगता काचिदाख्यायिका[b]। पुरा किलेन्द्रो वृत्रं त्रैलोक्यावरणाद् वृत्रशब्दाभिहितं त्वष्टुः पुत्रं हन्तुकामः सर्वा अग्न्यादिका देवताः समाहूयाब्रवीत्। अस्मिन्नतिदुष्करे वृत्रहननाख्ये कर्मणि साहाय्यकाचरणं भवद्भिरवहितमतिभिरनुष्ठेयम्। ततोऽहं वृत्रं हन्मीति। देवाश्च तदिन्द्रोदितं तथैवास्तु इत्यङ्गीकृतवन्तः। इत्थमखिलदेवगणपरिवृते समरसंरम्भिणि जंभभिदि सति स किल वृत्रः इमे सेन्द्रा देवगणाः मां निजिघृक्षव आव्रजन्ति अतो मयामी भीषयितव्या इति निश्चित्य तानभिलक्ष्य कमपि महान्तं श्वासं मुक्तवान्। अथ तदीयनिःश्वासमातरिश्वनो बिभ्यतः सुरगणाः स्वामिनमिन्द्रमपि परित्यज्य प्राद्रवन्। मरुतो देवगणविशेषाः पुनरिन्द्रसमीप एव स्थिताः सन्तः तत्प्रोत्साहनानि 'हे भगवन्निन्द्र! किमिदानीमौदासीन्यमालम्ब्यते? कियानयं भवतः? प्रहरैनम्। निरमित्रः सन् सुखी भव' इत्यादीनि वचनानि ब्रुवन्तो नेतरदेववत् पलायनपरा बभूवुः। एतदर्थः[1] कश्चिन्मन्त्रो दाशतय्यां दृश्यते—'वृत्रस्य त्वा श्वसथादीषमाणाः'[c] इत्यादिः। कथं पुनर्वृत्रनिश्वासमातरिश्वन ईदृशं[2] सामर्थ्यमिति चेद् उच्यते। प्रतिक्षणं प्रवर्धमानेन वर्ष्मणा समन्तात् लोकानावृणोतीति व्युत्पत्त्या त्वष्टृपुत्रो

a. RV. 5. 55. 5.
b. Cf. AB. 3. 20.
c. RV. 8. 96. 7.

1. T. V. एतदर्थविषयः
2. T. V. एतादृशं

वृत्रशब्दवाच्यतामवाप। तथा च कश्चिदर्थवादः—'स इषुमात्रमिषुमात्रं विष्वगवर्धत। स इमाँल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्'[a] इति। तस्माद् ब्रह्माण्डोदरव्यापिशरीरस्य वृत्रस्य निःश्वासोऽखिलान्यश्वासविलक्षणः समस्तदेवभयहेतुरिति नानुपपत्तिः। अथेन्द्रो देवानखिलान् भयवशात् प्रद्रुतान्[1] मरुतश्च स्वसमीपस्थितान्[2] साहाय्यकर्मणि सुस्थिरानवलोक्य प्रसन्नचित्तः सन् अनितरसाधारणं तेषु सख्यं चकार। अत एव तत्र तत्र 'मरुतामिन्द्रः'[b] इति मरुद्भिरिन्द्रस्य विशेषणं श्रूयते। तस्माद् 'इन्द्रस्य मरुत' इत्यसाधारणसंबन्धाभिधानं समञ्जसम्।

अस्तु नामेन्द्रसंबन्धित्वं मरुताम्; ततः किमित्यत्राह—ऐन्द्रं पय इति।
पयस ऐन्द्रत्वं प्रसिद्धम्। नवमं कदेवत्यं यागं स्तौति—**अथ-प्रीणाति**। प्रजापतेः 5.१४-१६
कशब्दाभिधेयत्वमैतरेये प्रतिपादितम्[c]—

पुरा किलेन्द्रो विनिहत्य वृत्रं सर्वाश्च सेनाः स्ववशे विधाय।
प्रजापतेर्विश्वसृजो निकेतं समेत्य हर्षेण तमाबभाषे॥
महत्त्वयुक्तो हि भवांस्त्रिलोक्यां ब्रह्मेतिशब्दस्य यतोऽसि वाच्यः।
अद्य प्रभृत्यम्बुजसंभवाहं महान् भवेयं महनीयकीर्ते॥
समस्तलोकावरणप्रवीणवर्ष्माणमेनं प्रथितप्रभावम्।
त्वष्टुः सुतं वृत्रमधित्रिलोकि शक्नोति हन्तुं क इवाखिलेश॥
उत्पादितं मत्प्रतिघातबुद्ध्या त्वष्टा भृशं रुष्टधिया पुराग्नेः।
हत्वा तमद्यास्म्यकुतोभयोऽहं महांश्च जातस्त्वमिवाब्जयोने॥
वृत्रद्विषस्तत्तु निशम्य वाक्यं प्रत्याह तं विश्वसृजामधीशः।
त्वं चेन्महानद्य भवेरथाहं को वा भवेयं विबुधाधिनाथ॥
एवं ब्रुवाणेन च वृत्रहन्तुर्महत्त्वमस्यानुमतं विधात्रा।
कोऽस्मीति पप्रच्छ यतस्ततश्च हेतोः क इत्येवमगादभिख्याम्॥

a. TS. 2. 4. 12. 2. b.
c. Cf AB. 3. 21.

1. T. V. भयविद्रुतान् for भयवशात्° 2. A. omits स्व

महत्त्वमासाद्य सहस्रनेत्रो बभूव यज्ञेषु च मुख्यभागी।
कशब्दवाच्यत्वविबोधिनीति कथा विधातुः कथितैतरेये॥

5.१७,१८ पुनः प्रकारान्तरेण स्तौति—**अथो-धत्ते**। क इत्येतत् पदं सुखस्य विषयसंप्रयोगजायाः प्रीत्यपरपर्यायायाश्चित्तवृत्तेरभिधानं लोके भवति। तथा च नाकशब्दनिर्वचनं कुर्वाण आह भगवान् यास्कः—'कमिति सुखनाम। तत् प्रतिषिद्धं प्रतिषिध्येत। न वा अमुं लोकं जग्मुषे किं च नाकम्। न ह वा अमुं लोकं गतवते किंचनासुखम्, पुण्यकृतो ह्येव तत्र गच्छन्ति'[a] इति। अतः सुखाभिधायकशब्दवाच्यदेवताकेन यागेनायं यजमानः सुखमेव सर्वसाधनफलभूतमात्मनि स्थापयति। सुखस्य च लक्षणमित्थं विचक्षणा आचक्षते—'सर्वं[1] यच्च स्वरूपसत्तयैवानन्यशेषं तत् सुखम्'[b] इति।

5. १९,२० अथास्या इष्टेः दक्षिणाविधिमभिप्रेत्य स्तौति—**अथ-रूपम्**। गर्भग्रहणसमर्थां गां सेचनसमर्थं चानड्वाहं दक्षिणां दद्यात्। एतच्च प्रजोत्पत्तियोग्यम्। सति स्त्रीपुंसयोर्योगे प्रजोत्पत्तिः। इहापि वाजियागः कर्तव्य इत्यभिप्रेत्य
5. २१,२२ वैश्वदेवोक्तमेव 'देवाश्वा'[c] इत्यादिकं ब्राह्मणमतिदिशति—**अथ-ब्राह्मणम्**। वरुणप्रघासेष्ववभृथो विद्यते। तथा च सूत्रम्—'वारुण्या निष्काषेणावभृथमभ्यवैति'[d] इति। आश्वलायनश्चाह—'संस्थितायामवभृथं व्रजन्ति'[e] इति।
5. २३,२४ तत्र वरुणदेवत्यामिष्टिं स्तौति—**अथ-प्रीणाति**। नात्राग्नौ यागः क्रियते। किं तु अप्स्वेव। एवं च यागेन वरुणं स्वकीय एव स्थानेऽवस्थितं प्रीणयति। यथा लोके कंचिदर्चनीयतमं स्वगृह एव स्थितं तत्रैव गत्वा तदभिलषितार्थदानेन संतोषयति; स चाप्रयत्नसिद्धत्वादतीव बहुमानपूर्वं प्रतिगृह्य प्रीतो भवति तथेदमपि भवतीति। वरुणस्याबायतनत्वं श्रूयते—

a. N. 2. 14. 3.
b.
c. KB. V. 2. २४.
d. ŚŚ. 3. 14. 19. ( Pr. edn. varies )
e. AŚ. 2. 17. 16.

1. T. C. यच्छेषं सर्वं

'समुद्रे ते हृदयमप्स्वन्तः'[a] इति । 'समुद्रे ह्यन्तर्वरुणः'[b] इत्यादि । **अथ–भवति** । 5. २५, २६
उक्तार्थमेतत् ॥

इति पञ्चमः खण्डः

अथ साकमेधाख्यं तृतीयं पर्व विधित्सुरादावुत्पत्तिविध्युन्नयनार्थं कर्म-
स्वरूपं प्रशंसति—**ऐन्द्रो–यजति** । इन्द्रो हि देवानांराजेति प्रसिद्धम् । 6. १-३
तद्देवत्यत्वादयं साकमेधाख्यो यज्ञः सर्वेषां यज्ञानां मध्ये प्रधानभूतः । तत्
तत्र लोके यथा कश्चिन्महाराजः सार्वभौमः क्वचिद्[1] गच्छन् स्वानि सेनाग्राणि
पुरस्तात् पुरोभागे संनिवेशविशेषवत्तया निवेश्य तत एव भयरहितं मार्गं
पश्चात् स्वयं गच्छति, तथैवेदं भवति । यदुत साकमेधदिनात् पूर्वेद्युरनीकव-
त्त्वादिगुणकाग्न्यादिदेवतास्तिस्रो यजति । अनेन च पूर्वेद्युर्यागानामपरेद्युर्यागा-
ङ्गत्वम्[2] अवगम्यते । राजतत्परिवारभावाभिधानात् लौकिकदृष्टान्तेनाभिष्टूय
वैदिकेनाभिष्टौति—**तद्–महाव्रतम्** । विश्वास्यमानतया बुद्धिस्थस्याद इति 6. ४,५
निर्देशः । तत् तत्र यज्ञविषये अदो महाव्रताख्यं सोमयागविशेषरूपं कर्म
सोमस्य सोमयागानां मध्ये प्रधानं भवति । तस्य च प्राधान्यं फलतः
स्वरूपतोऽधिकारतश्चावसेयम् । तथा चैतस्य महिमानं चतुर्थदशकारम्भे
प्रपञ्चयिष्यति । यथा महाव्रतं संवत्सरसत्रस्योपान्त्याहनि क्रियमाणं कर्म सोम-
यागेभ्योऽन्येभ्यः प्रधानभूतं भवति एवमेवैतत् साकमेधाख्यं कर्मेष्टीरन्या
अपेक्ष्य महाव्रतं महाव्रतवत् प्रधानभूतं भवति ।

अथ पूर्वेद्युरनुसवनमनुष्ठेयास्तिस्र इष्टीः प्रशंसन् प्रथमम् अनीकवद्गुण-
काग्निदेवत्यां प्रातरनुष्ठेयामिष्टिं प्रशंसति—**अथ–प्रीणाति** । अस्त्यग्निरनीक- 6. ६-८
वान् नाम । तद्याज्यानुवाक्ययोरनीकशब्दश्रवणात् । तादृशस्याग्नेः प्रथमं
प्रातःकाले यागः कर्तव्यः । 'अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति

a. TS. 1. 4. 45. 2. b. TS. 6. 6. 3. 4.

1. T. C. क्वापि 2. T. C. कर्माङ्गत्वम् for यागाङ्गत्वम्

साकं सूर्येणोद्यता'[a] इति श्रवणात् । यदा सूर्यस्योदयाद्रेरुद्गतिः तस्मिन्
कालेऽनुष्ठेयेयमिष्टिरित्यर्थः । अग्निर्वै देवानां मुखमित्याद्युक्तार्थम् । **अथ–**
6. ९-११ **यजति** ।

नभसो मध्यमध्यास्ते यदा हि भगवान् रविः ।
तदा सांतपनाख्यानां मरुतामिष्टिरिष्यते ॥

एतच्चोपपद्यते । यस्मान्मध्यंदिने कालेऽसौ सहस्ररश्मिः सर्वं जगत् तपति ।
अतः सांतपनधर्मसादृश्यसंभवात् तस्मिन् काले सांतपनमरुद्याग उपपन्नः ।
6. १२-१४ इतश्चैतदुपपन्नमित्याह--**अथो–यजति** । इन्द्रस्य मरुत्संबन्धः पूर्वमाख्यायिको-
पक्षेपेणोपपादितः । मध्यंदिनस्यैन्द्रत्वं माध्यंदिनसवनद्वारकं वा स्वतो वा[1]
द्रष्टव्यम् ।

6.१५-१७ **अथ–पोषः** । गृहमेधा मरुतो यस्य देवता भवति सोऽयं यागो गृहमेधीयः ।
तेन सायं रात्रौ यजेत् । ननु कथं सायंशब्देन रात्र्यभिधानं दिनावसानवाचितया
प्रसिद्धत्वात् ? उच्यते । सायंपोष इत्यर्थवाददर्शनात् । 'अतः सायं हुतेऽग्निहोत्रे
सर्वासां दुग्धे गार्हपत्ये गृहमेधीयं चरुं श्रपयित्वा'[b] इति कल्पकारवचनाद्
अग्निहोत्रानन्तरकर्तव्यत्वावगमाच्च रात्रावेव गृहमेधीययागः । अस्य च साय-
मनुष्ठानमुपपन्नम् । यस्मादेष गृहमेधीययागः पुष्टिकर्म । यजमानपशुपुत्रधन-
धान्यादिपरिपोषनिमित्तं कर्म । रात्रौ च पोषः सर्वत्र प्रसिद्धः । उक्तमर्थ-
6. १८ वादमुपजीव्य अस्यामिष्टावाज्यभागौ विधत्ते—**तस्मात्–भवतः** । यस्मादयं
गृहमेधीयः पुष्टिकर्म भवति तस्माद् 'अग्निना रयिमश्नवत्'[c] 'गयस्फानो
अमीवहा'[d] इत्येते आज्यभागयोः पुरोनुवाक्ये कुर्यात् । अनेन चोदकप्राप्तयो-
वार्त्रघ्नयोः बाधोऽवगन्तव्यः । पोषमेव पुष्टिवर्धनः इति पोषधातुदर्शनात् ।
6. १९ आज्यभागयोः पोषवत्त्वं स्तौति—**यजमानम्–पोषयति** । तत् तेन पोषशब्द-
युक्ताज्यभागपठनेन यजमानं पोषयति पुष्टियुक्तं करोत्येव । अथ यस्यां रात्रौ

a. TS. 1. 8. 4. 1.
b. BŚ. 5. 10. 8.
c. RV. 1. 1. 3.
d. RV. 1. 91. 12.

1. T. C. omit

गृहमेधीययागः तस्या रात्रेर्विवासकाले पौर्णदर्वनामधेयं कर्म कर्तव्यमिति
तद्विधिमनूद्य[a] स्तौति—**अथ-उपसंतनोति**। 'पूर्णा दर्वि परापत'[b] इति 6. २०,२१
तदीयमन्त्रे पूर्णादर्विशब्दयोः श्रवणात् तत्कर्मणस्तेन शब्देन व्यपदेशः। तेन
पूर्णदर्वाख्येन पूर्वेद्युरपरेद्युर्मध्यकाले चरन्तीति यत्, तेन यत् पूर्वेद्युः साक-
मेधाङ्गभूतं[1] कर्मानुष्ठितं यच्चापरेद्युः करिष्यमाणं साकमेधाख्यं कर्म तयोः
संधानमेव क्रियते। तन्मध्यपतितत्वादस्य कर्मणः। तयोश्च कर्मणोर्दिनद्वय-
निवेशित्वाद् व्यवधानप्राप्तेः। तेनेदमपि कर्म पूर्वेद्युःकर्मवत् साकमेधाङ्गभूत-
मेवेत्यवधृतं भवति ॥

इति षष्ठः खण्डः

अथ यस्मिन् दिने माहेन्द्रीष्टिरनुष्ठेया तस्मिन् दिने प्रातरनुष्ठेयां कांचित्
तदङ्गभूतामिष्टिं विधत्ते—**अथ-यजति**। तथा च तैत्तिरीयवचनम्—'मरुद्भ्यः 7. १-३
क्रीडिभ्यः पुरोडाशं सप्तकपालं निर्वपति साकं सूर्येणोद्यता'[c] इति। उद्यता
उदयाचलादूर्ध्वं गच्छता सूर्येण सह निर्वापः कर्तव्यः। अनेन निर्वापकाल
उपदिष्टः। तेनेयमिष्टिः प्रातरनुष्ठेयेति सिद्धम्। क्रीळित्वगुणकान् मरुतः
प्रातर्यजतीति यदस्ति तदुपपन्नमेव। यस्मादिमे मरुत इन्द्रस्य स्वस्वामिभावेन
संबन्धिनो भवन्ति। मरुतामिन्द्रसंबन्धित्वमुपपादितमधस्तात्। तस्मादेनान्
मरुत इन्द्रेण सहितान् यजेत्। ऐन्द्रे साकमेधाख्ये कर्मणि इन्द्रेण सह मरुतामपि
यागः कर्तव्य इत्यर्थः। यथा लोके राजसमाराधनादिषु तत्सचिवादीनामपि
समाराधनं क्रियते तद्वदैन्द्रे यागकर्मणीन्द्रसचिवानां मरुतामपि यागः कर्तव्यः।
तेन चेन्द्रस्यैव प्रीतिः संपादिता भवति। अनेनाङ्गत्वमपि सूचितं भवति।

इयता वाक्यसंदर्भेण साकमेधेष्ट्यङ्गभूता इष्टय उपदिष्टाः। अनन्तर-
मङ्गीभूता माहेन्द्रेष्टिर्विधास्यते। ननु 'ऐन्द्रो वा एष यज्ञक्रतुर्यत् साकमेधाः'[d]

a. Cf. AŚ. 2. 18. 9. b. AŚ. 2. 18. 13.
c. TS. 1. 8. 4. 2. d. KB. V. 6. १.

1. T. C. साकमेधकर्माङ्गभूतं

इति हि प्रागुक्तम् । वक्ष्यति चान्ते 'ऐन्द्रो हि यज्ञक्रतुः'[a] इति । माहेन्द्रीति
याज्ञिकव्यपदेशश्च । अतोऽस्यामिष्टौ महेन्द्र एव देवता । तदन्यास्त्वग्न्याद्या
गुणभूता एव । अत एव हि वैश्वदेव्यादिवत् माहेन्द्रीत्यस्या इष्टेर्व्यपदेशः । तथा
च माहेन्द्रयागः प्रथमं प्रयोक्तव्यः, तस्य प्राधान्यात् । अतः कथमस्यावसाने
7. ४-६ याग इत्याशङ्कां परिहरन्नाह—**अथ–यजति ।** अन्ततः अन्ते अवसाने महेन्द्रयाग
इत्येतदुचितमेव । यस्मादिह लोके यः प्रधानभूतः स्वामी सर्वत्रान्तमवसानं
भजते । यथा राजा स्वसैन्यानि पुरोभागेऽवस्थाप्य स्वयं तेषां पृष्ठभागे
7. ७-१२ तदवष्टम्भतया तिष्ठति तद्वत् । **अथ–ब्राह्मणम् ।** अथ यदग्निं प्रणयन्तीत्यादिकं
तेषामुक्तं ब्राह्मणमित्यन्तं व्याख्यातम् । स्विष्टकृदिति स्विष्टकृद्यागः । स इह
नवमो भवतीत्येव विशेषः । अत्रैन्द्राग्नादनन्तरं माहेन्द्रयागः कर्तव्यः । तस्य च
7. १३ 'अन्तं वै श्रेष्ठी भजते'[b] इत्येतद् ब्राह्मणमतिदेष्टव्यमित्याह—**अथ–ब्राह्मणम् ।**

माहेन्द्रयागादनन्तरं विश्वकर्मदेवत्यो यागः कर्तव्य इत्याह—**अथ–**
7. १४-१६ **प्रीणाति ।** विश्वकर्मा अस्य देवतेति वैश्वकर्मणः । सोऽसावेककपाल इति यदेत-
दस्ति तत्र योऽयं विश्वकर्मा नामास्ति सोऽसौ दिवि दृश्यमान आदित्य एव
भवति । योऽसौ दिवि प्रकाशते । तथा च तेन यागेन तमादित्यमेव प्रीणयति ।
कथं विश्वकर्मशब्देन आदित्याभिधानमिति चेत्, विश्वं जगदस्य कर्म कार्यमिति
वा विश्वस्य जगतः कर्म व्यापारो येनेति वा व्युत्पत्तेरिति ब्रूमः । अस्य दक्षिणा-
7. १७,१८ मुपदिशति—**अथ–यज्ञक्रतुः ।** ऋषभोऽनड्वान् । तमत्र दक्षिणां दद्यात् । तच्चो-
पपन्नमेव । यस्मादेष साकमेधाख्यो यज्ञक्रतुरिन्द्रदैवत्यः । ऋषभश्चैन्द्रः । 'अथो
एतदेव पशुष्वैन्द्रं रूपं यदृषभः'[c] इति महाव्रतश्रवणात् । तत ऋषभस्यास्मिन्
कर्मणि दक्षिणात्वं युक्तमित्यर्थः ॥

इति सप्तमः खण्डः

अथ तस्मिन्नेवाहन्यपराह्णे पित्र्या त्रिहविष्केष्टिः कर्तव्येति विधिमभिप्रेत्य
8. १-३ तं कालं स्तौति—**अथ–चरन्ति ।** अथेत्यपराह्णे इत्यस्य विशेषणम् । अनन्तरं

a. KB. V. 7. १८. XXVIII 3. २८.   b. KB. V. 7. ५.
c. KA. 1. 1. 22.

तस्मिन्नेवाहनि योऽपराह्णो अह्नोऽपरभागः तस्मिन् पितृदेवत्यं कंचिद् यागं कुर्यात्। तदेतदुचितमेव; यस्मात् पितरोऽपक्षयभाजः। अपक्षयो नाम दिनापचयकालः। तं भजन्ते सेवन्त इति तथोक्ताः। तत्कालानुष्ठितकर्मप्रतिग्रहीतार इत्यर्थः। तथा च बालका नाम सांख्यानां ग्रन्थे (?) श्रूयते—'वसन्तो ग्रीष्मो वर्षा अभिपूर्यमाणः पूर्वपक्षः पूर्वाह्णोऽह्रेते ह वै देवा ऋतवः। शरद्धेमन्तः शिशिरो वारणपरपक्षोऽपराह्णो रात्रिरेत उ ह पितर ऋतवः'[a] इति। यस्मादेवं तस्मादपराह्णे पितृयज्ञप्रयोगः।

अथास्य पूर्वपक्षेऽनुष्ठेयतां प्रदर्शयितुमाक्षिपति—**तद्–इति** । यत् 8. ४
यस्मात् । अथ तथा सति । एनान् पितॄन् । अपरपक्षे यष्टुं योग्यानां
पितॄणां पूर्वपक्षे यागे हेतुर्वचनीय इत्यर्थः। हेतुं दर्शयन्नाक्षेपं प्रतिक्षिपति—
**दैवा–यजन्ति**। यस्मादेते पितरो दैवा देवजातीया एव । तस्माद्दैवत्वादेव 8. ५,६
इन्द्रादिवत् पूर्वपक्षे यागयोग्या एव । अथ चोदकप्राप्तानां सामिधेनीनाम्
अपवादेन 'उशन्तस्त्वा'[b] इत्येतस्याः सामिधेनीपाठं विधत्ते—**अथ–अन्वाह**। 8. ७-९
नात्र प्रकृताविव सामिधेन्य ऋचः एकादश स्युः। अपि तु 'उशन्तस्त्वा'[c]
इत्येकैव। तच्चैतदत्र युज्यत एव। यस्मात् पितरः पितृदेवत्यानि कर्माणि
सकृदेकवारं कर्तव्यानीति प्रसिद्धम्। अतः पित्र्ये कर्मण्येकसंख्यत्वस्य युक्तत्वात्
सामिधेन्या अप्येकत्वं युक्तमेव। अस्याश्च त्रिवारं पाठः कर्तव्यः। सूत्रितं हि—
'उशन्तस्त्वेत्येकां सामिधेनीं त्रिरनूच्य'[d] इति। छन्दोद्वारेण तदेव स्तौति—
**सा–गमयति**। अष्टाक्षरविशिष्टा पादचतुष्टयवत्यनुष्टुप् नाम छन्दोविशेषः। 8.१०-१३
सा ऋगनुष्टुप्छन्दस्का भवति। एतत्प्रसिद्धिद्योतको वैशब्दः। तत्र येयमनुष्टुप्
सा वागेव, चतुष्पात्त्वसाम्यात्। 'चत्वारि वाक्परिमिता पदानि'[e] इति वाचः
पादचतुष्टयत्वश्रवणात्। यत् खलु परापश्यन्तीमध्यमावैखरीशब्दाभिधेयतया
प्रसिद्धम्। अनुष्टुभस्तु पादचतुष्टयत्वं प्रसिद्धतरमेव। तेन तस्या वाग्रूपत्वम्।
पितरश्चास्यां दशायां पराञ्चोऽमुं यज्ञदेशं प्रति अनभिमुखाः सन्तो वर्तन्ते।
अतः सामिधेन्यृचा अनुष्टुभा वाग्रूपया तान् पितॄनिह प्रापयत्येव। यथा

a.
b. RV. 10. 16. 12.
c. RV. 10. 16. 12.
d. ŚŚ. 3. 16. 23.
e. RV. 1. 164. 45.

दूरस्थितं कंचिद् 'भो देवदत्त इहागच्छ' इति वाक्येन स्वसमीपदेशं प्रापयति तद्वत् ।

'अग्ने महाँ असि ब्राह्मण भारत'[a] इत्यस्यानन्तरं प्रकृतितः प्राप्तमार्षेय-
8.१४,१५ निगदपाठं प्रतिषेधति—**अथ–इति**। प्रवृञ्जनं विनाशः। तं करवाणीति
परिभयेन यजमानस्यार्षेयाणि न ब्रूयात्। आर्षेयपाठे यजमानस्य विनाशः
प्रसज्येत। तस्मात् तन्न कुर्यात्। सूत्रितं हि—'नार्षेयमाह'[b] इति। 'अग्ने महाँ'[c]
इत्यस्यानन्तरं प्राप्त आर्षेयपाठो निषिद्धः। अथैतदनन्तरं 'देवेद्ध'[d] इत्यादि-
8. १६ निगदपाठं विधत्ते—**अथ–ब्राह्मणम्**। अथेति 'अग्ने महाँ असि'[c] इत्यस्या-
नन्तरमित्यर्थः। एवं प्रकृतिदृष्टं 'देवेद्ध'[d] इत्यादिकम्। अत्र 'एषा ह वै'[e]
इत्यादिकं प्रागुक्तमेव ब्राह्मणमतिदिशति तस्योक्तं ब्राह्मणमिति।

आवाहननिगदाज्यभागदेवतावाहनादनन्तरं प्राकृतप्रधानदेवतावाहना-
8.१७-१९ पवादेन प्रधानदेवतान्तरावाहनं विधत्ते—**अथ–आवाहयति**। पितॄन् वा सोमवत
इति पूर्वदेवतया सह विकल्पः। अतः प्रथमस्य हविषः पितृमत्त्वगुणकः सोमः
सोमवत्त्वगुणकाः पितरो वा देवतेति द्रष्टव्यम्। 'देवाँ आज्यपाँ आवह'[f]
इत्यस्यानन्तरम् 'अग्निं कव्यवाहनं होत्रायावह'[g] इति पठेदित्याह—**अथ–**
8.२०-२२ **आवाहयति**। एष कव्यवाहनोऽग्निः स्विष्टकृद् येषां ते तथोक्ताः। वैशब्दः
प्रसिद्धौ। तथा च ब्राह्मणान्तरम्—'त्रयो वा अग्नयो हव्यवाहनो देवानां कव्य-
वाहनः पितॄणां सहरक्षा असुराणाम्'[h] इति।

अथ स्वस्य महिम्न आवाह्यतां समर्थयितुं पूर्वपक्षमुपन्यस्यति—**न–**
8. २३ **वदन्तः**। एके शाखिन इह पितृयज्ञे स्वस्य महिम्न आवाहनं न कार्यमिति प्रति-
जानते। हेतुं चाहुरित्याह—यजमानस्यैष महिमेति वदन्तः। स्वशब्दो
ह्यात्मीयवचनः। तत्र कस्यात्मीय इत्याकाङ्क्षायां सामर्थ्याद् यजमानस्येति
संबध्यते। तथा च स्वमहिम्नः स्वस्मादन्यत्वेन निरूपयितुमशक्यत्वाद् यजमान

a. TB. 3. 5. 3. 1. b. ŚS. 3. 16. 23.
c. TB. 3. 5. 3. 1. d. T B. 3. 5. 3. 1.
e. KB. III. 3. ८. f. TB. 3. 5. 3. 2.
g. C. ŚS. 1. 5. 5, MŚ. 5. 1. 4. 14. h. TS. 2. 5. 8. 6.

एवात्र कीर्तित इति स्यात् । तथा च यथार्षेयपाठो यजमाननाशभयादनादृतः, तथा स्वमहिम्न आवाहनमपि यजमानो विनङ्क्ष्यतीति परिभयेनोपेक्षणीय-मिति केचिच्छाखिनो वदन्तीत्यर्थः । सिद्धान्तमाह—**आवाहयेद्–स्थितम्** । स्वं 8. २४
महिमानं प्रकृताविवात्र पितृयज्ञेऽपि आवाहयेदित्येव पक्षो विनिश्चितः[1] । ननु
उक्तोऽनावाहने हेतुरित्यत्राह—**अग्नेर्–महिमा** । नायं यजमानस्य स्वभूतो 8. २५
महिमेति भवितुमर्हति । तस्यादेवतात्वेन अनावाह्यत्वप्रसंगात् । तस्मात् प्रकृतत्वेन बुद्धिस्थस्याग्नेरेवायं स्वो महिमेत्यास्थेयम् । स च वायुरेवेत्युक्तं तृतीयेऽध्याये 'वायुर्वा अग्नेः स्वो महिमा'[a] इत्यादौ । तस्मात् प्रकृताविवेहापि स्वस्य महिम्न आवाहनं कर्तव्यमिति स्थितम् ।

प्रयाजेषु चतुर्थस्य प्रयाजस्य अनुयाजेषु प्रथमस्य चाननुष्ठेयतां दर्शयति—
**अथ–इति** । प्रयाजा अनुयाजाश्च प्रयाजानुयाजाः । तेभ्यः सकाशात् । बर्हिश्शब्देन 8. २६-२८
तद्वन्तौ बर्हिष्मन्तौ । तौ प्रयाजानुयाजावुत्सृजेद् उद्धरेत् । न तौ कुर्यात् । यस्मा-दसौ बर्हिर्यागः प्रजा पुत्रपौत्रादिरूपा[2] तद्धेतुत्वात् । तद्धेतुत्वं श्रूयते—'बर्हिषा वै प्रजापतिः प्रजा असृजत'[b] इति । 'बर्हिर्यजति प्रजामेवाव रुन्धे'[c] इति । तस्मात् प्रजां पुत्रपौत्रादिरूपां विनाशयेयमिति परिभयं द्योतयन् बर्हिर्यागं न
कुर्यात् । प्रयाजानुयाजानां समुच्चितानां संख्यां स्तौति—**ते–प्रीणाति** । चत्वारः 8. २९-३२
प्रयाजा द्वावनुयाजौ । ते संभूय षट्संख्या भवन्ति । ऋतूनां पितृदेवत्यत्वात् पितृत्वम् ।

आज्यभागयोः पुरोनुवाक्ये लक्षणकथनेनोपदिशति—**अथ–जीवयति** । 8. ३३,३४
जीवनशब्दवन्तौ 'आ नो अग्ने सुचेतुना'[d] 'त्वं सोम महे भगम्'[e] इत्येते आज्यभागयोः पुरोनुवाक्ये भवतः । तेन यजमानं जीवयति दीर्घायुषं करोति । सूत्रितं हि—'अपबर्हिषः प्रयाजानिष्ट्वाग्ने अग्ने सुचेतुना त्वं सोम महे भगमिति जीवनवन्तावाज्यभागौ'[f] इति । प्रधानयागानां याज्यापुरोनुवाक्यासु

a. KB. III. 3. ३४.
b. TS. 1. 7. 4. 1.
c. TS. 2. 6. 1. 2.
d. RV. 1. 79. 9.
e. RV. 1. 91. 7.
f. ŚŚ. 3. 16. 24.

1. T. C. निश्चितः
2. T. C. omit पौत्र

8. ३५-३८ कंचिद् विशेषं दर्शयति—**अथ-भवन्ति** । हविषो यागस्येत्यर्थः । त्रयो हि प्रधानयागाः । तेष्वेकैकस्मिन् यागे त्रिसंख्याका याज्यापुरोनुवाक्याः पठनीयाः । तत्र च द्वे द्वे पुरोनुवाक्ये स्याताम् । तथा च सूत्रम्—'एकैका याज्या । द्वे द्वे पूर्वे पुरोनुवाक्ये'[a] इति । ताश्चर्चः सूत्रत एव द्रष्टव्याः । तच्चैतत् त्रिसंख्यत्वं युक्तमेव । यस्मादिह पितृयज्ञे त्रीणि हवींषि विद्यन्ते पुरोडाशो धानाः सक्तव इति । तथा च विधिः श्रूयते—'सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपति । पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम्'[b] इति । कल्पश्च 'अथ प्राचीनावीतं कृत्वा उत्तरेण गार्हपत्यमुपविश्य पवित्र-वत्याग्निहोत्रहवण्या निर्वपति । देवस्य त्वा पूष्णो हस्ताभ्यां सोमाय पितृमते जुष्टं निर्वपामीति चतुरो मुष्टीन् व्रीहीणां निर्वपति । एतामेव प्रतिपदं कृत्वा पितृभ्यो बर्हिषद्भ्यो जुष्टं निर्वपामीति चतुरो धानानाम्[1] । एतामेव प्रतिपदं कृत्वा पितृभ्योऽग्निष्वात्तेभ्यो जुष्टं निर्वपामीति चतुर एव यवानाम्'[c] इति । एवं त्रीणि हवींषि । तिसृणां हविषां समवद्यति सभय पृथक् पृथगवदान-मध्वर्युणा क्रियते । एतच्च—'अथोपस्तीर्य पूर्वार्धात् पुरोडाशस्यावद्यन्नाह'[d] इत्यादिबौधायनकल्पे द्रष्टव्यम् । एकैकस्मिन् यागे च तिसृणां पुरोडाशादि-हविषामवदाने त्रयाणामपि यागानां त्रिहविष्ट्वं संपद्यते । तस्मादत्र याज्या-पुरोनुवाक्यानामपि त्रित्वमनुरूपमेव ।

8. ३९ इतश्च त्रिसंख्यान्वय उपपन्न इत्याह—**अथो-व्यावर्तयति** । अथो अपि च । एतदेतेन । ऋचां त्रित्वेन पितृदेवत्यं कर्म देवदेवत्येन कर्मणा व्यावृत्तं व्यवच्छिन्नं करोति । व्यावृत्तिरतिशयः । देवकर्मण्यृचामनेकसंख्यत्वात् । ततोऽ स्यातिशयसिद्धिः ऋचां त्रिसंख्यत्वे फलमित्यर्थः । इतश्चैतत् प्रशस्तमित्याह—
8. ४०-४३ **अथो-यच्छति** । परावच्छब्दो विदूरवचनः । परशब्दोऽतिशयार्थः । अतिशयेन दूरदेशस्थिता ह्येते पितरः । 'परावत आ जगन्था परस्याः'[e] इत्यादिदर्शनात् ।

a. SS. 3. 16. 8.
b. TS. 1. 8. 5. 1.
c. BS. 5. 11. 4-7. ( यज्ञोपवीतं for प्राचीना-वीतं; यवानां for धानानां, Pr. edn. )
d. BS. 5. 13. 27.
e. RV. 10. 180. 2.

1. T. C. यवानां

अतो दूरतरदेशवर्तिन एनान् पितॄन् प्रथमयर्चा आह्वयत्येव । आह्वानं करोत्येव । यथा दूरदेशस्थितं कंचित् पुरुषं 'हे देवदत्त इहागच्छ' इत्याह्वानं करोति लोकस्तथैतत् प्रथमाया ऋचः पठनं द्रष्टव्यम् । या पुनः द्वितीया ऋक् तया तानाहूतान् पितॄन् यागदेशं प्रापयति । या तु तृतीया याज्यारूपा तया प्राप्तेभ्यस्तेभ्यः पितृभ्यो हविः प्रयच्छति ददात्येव । एवं तिसृणामृचां पृथक् पृथक् प्रयोजनसंभवात् प्रशस्तमिदं त्रिसंख्यत्वम् । तैत्तिरीये तु वषट्कारं तृतीयं कृत्वैतदेव याज्यापुरोनुवाक्ययोः कार्यमाम्नातम्—'प्रैवैनं पुरोनुवाक्यया ह प्र णयति याज्यया गमयति वषट्कारेण'[a] इति ॥

इत्यष्टमः खण्डः

**अथ-यजति** । अन्ततः प्रधानयागानामवसाने । तत्र हेतुः स्विष्टकृत्स्था- 9. १-३
नीयत्वमित्याह—एतत्स्विष्टकृत इति । पितरो ह्येतत्स्विष्टकृतः । एष कव्य-
वाहनः स्विष्टकृत्स्थानीयो भवति । तस्मात् तद्वदस्यावसाने याग उपपद्यत
इत्यर्थः । **अथ-ब्राह्मणम्** । 'शान्तिर्वै भेषजम्'[b] इत्यादिकम् । इळाह्वाने कंचिद् 9. ४
विशेषं दर्शयति—**अथ-इति** । इळाह्वानानन्तरमवघ्राणं कुर्यान्न तु प्राश्नीयात् । 9. ५-७
प्राकृतस्य प्राशनस्य प्रतिषेधोऽयम् । प्राशनाकरणे हेतुः पशव इति । इळायाः पशुत्वात् तद्भक्षणे पशूनां विनाशः प्रादुःष्यात् । अतो होता यजमानसंबन्धिनः पशूनिळाभक्षणेन विनाशयानीति परिभयं द्योतयन् भक्षणं न कुर्यात् ।

प्रसंगादाध्वर्यवं कर्म विवक्ते—**अथ-प्रीणाति** । उदकानि पिण्डान् वा । 9. ८-९
तथा च बौधायनः—'अथ प्राचीनावीतं कृत्वा पुरोडाशं धानां करम्भमिति पात्र्यां संप्रयौति तिसृषु स्रक्तिषु पर्णसेवेषु त्रीन् पिण्डान् ददात्येतत्ते ततासौ[1] ये च त्वामनु'[c] इत्यादि । तत् तेन पिण्डदानेन पितॄन् प्रीतान् करोति । **अथ-**

a. TS. 2. 6. 2. 5.

b. KB. III. 8. १७.

c. BŚ. 5. 15. 3-5. ( प्राचीनावीतानि for °वीतं; Pr. edn. )

1. T. C. omit तत

9. १० **ब्राह्मणम्।** 'शान्तिर्वै'[a] इत्यादिकम्। अन्वाहार्यदक्षिणानन्तरं 'अया विष्ठा
9. ११-१३ जनयन्'[b] इत्येतामृचं जपधर्मेण पठेदित्यभिप्रायेण[1] स्तौति—**अथ-वदन्ते।**
उदञ्च उदङ्मुखाः। परेत्य गत्वा। गार्हपत्याहवनीयावित्यत्र क्रमविपर्यासो[2]
द्रष्टव्यः। प्रथममाहवनीयमुपतिष्ठन्ते पश्चाद् गार्हपत्यमिति। अस्य पूर्वग्रहण-
मल्पाच्तरत्वात्। दर्शपूर्णमासाविति वत्। प्रीत्वैव तदित्युक्तार्थम्। विधान्त-
9. १४,१५ रेण स्तौति—**अथो-कुर्वन्ति।** योऽयं पितृदेवत्यो यज्ञः स सर्वोऽपि दक्षिणासंस्थ
इति प्रसिद्धम्। दक्षिणाशाभिमुख्येन संस्था समाप्तिर्यस्य स तथा। तथा च
सूत्रम्—'दक्षिणान्यायानि पित्र्याणि'[c] इति। तं पितृयज्ञमनेनोपस्थानकर्मणा
देवयज्ञवदुदक्संस्थं कुर्वन्ति। उदक्संस्थतायां कृतायां देवयज्ञे यत् फलं तदप्य-
त्रैव संपत्स्यत इत्यर्थः।

9. १६-१९ **अथ-अभ्युत्क्रामन्ति।** अनन्तरं पूर्ववत्। अनन्तरं प्राङ्मुखाः सन्तोऽग्नि-
होत्रशालाया निष्क्रम्य 'तच्चक्षुः'[d] इत्यनया आदित्यमुपतिष्ठेरन्। तत्र य
आदित्यः स देवलोक एव; तदधिपतित्वात्। 'सूर्यो दिवोऽधिपतिः'[e] इति
श्रवणात्। ये पितरः स पितृलोकः। तदधिपतित्वादेव। तथा च तत् तेना-
दित्योपस्थानकर्मणा पितृलोकाद् देवलोकमभिलक्ष्यागच्छन्ति। पितृदेवत्यकर्मा-
नुष्ठानेन पितृलोक एतावन्तं समयमवस्थिताः सन्तः इदानीमादित्योपस्थाने
देवदेवत्येन कर्मणा देवलोकपदविक्षेपं कुर्वन्तीत्यर्थः।

प्रकृतितः प्राप्तं यजमाननामोच्चारणं पत्नीसंयाजांश्च निषेधति[3]—
9. २०-२३ **अथ-इति।** पत्न्यः इति प्रथमा द्वितीयार्थे।

9. २४-२७ **अथ-कुर्वन्ति।** अस्या इष्टेरनन्तरमुदङ्मुखा बहिर्गत्वा त्र्यम्बकसंज्ञकैः
कर्मभिश्चरन्त्यध्वर्यवः। तेन च कर्मणा रुद्रमेव स्वकीयायामुदीच्यां दिशि
स्थितं प्रीणयति। अथो दक्षिणासंस्थ इत्युक्तार्थम्। त्र्यम्बकसंज्ञितकर्मानन्तरं

a. KB. III. 8. १७. b. TS. 1. 7. 12. 2.
c. SS. 1. 1. 4. d. RV. 7. 66. 16.
e. TS. 3. 4. 5. 1.

1. T. C. अभिप्रेत्य for अभिप्रायेण 2. T. C. क्रमविपर्ययः
3. T. C. प्रतिषेधति

काञ्चिदिष्टिं विधत्ते—**अथ-यजते** । पितृदेवत्यया शंय्वन्तयेष्ट्या इष्ट्वानन्तर- 9. २८-३०
मन्ततोऽवसाने कयाचिददितिदेवत्ययेष्ट्या यजेत । तथा च बौधायनः—
'एतेनैव यथेतमेत्यादित्यं चरुं पुनरेत्य निर्वपति'[a] इति । तच्चैतद् युक्तम् ।
यस्मात् साकमेधा एतत्संस्थाः । एषा अदितिदेवत्येष्टिः संस्था समाप्तिर्येषां ते
तथोक्ताः । तस्मात् साकमेधाख्यस्य चातुर्मास्यपर्वणोऽवसाने एषेष्टिर्भवितु-
मर्हति । **अथ-भवति** । अथ यत्परस्तादित्याद्युक्तार्थम् ॥ 9. ३१,३२

इति नवमः खण्डः

एवं तावदतीतैः खण्डैः वैश्वदेवादीनि साकमेधान्तानि चातुर्मास्यपर्वाणि
क्रमेण कथितानि । इदानीं क्रमप्राप्तं चतुर्थं शुनासीरीयसंज्ञं पर्व विधित्सुः
तदुत्पत्तिविध्युन्नयनाय कर्मस्वरूपं प्रशंसति—**त्रयोदशं-यजते** । इह शुना- 10. १
सीरयोः प्रधानदेवतात्वात् तन्नाम्नैव व्यपदेशः । वाय्वादीनां तु देवतात्वेऽपि न
प्राधान्यम् । यथान्येषु पर्वसु बह्वीष्वपि सतीषु देवतासु विश्वेदेवादिभिरेव
वैश्वदेवीत्यादिव्यपदेशस्तद्वत् । अतः शुनासीरयोरत्र प्रधानदेवतात्वात् तत्संज्ञ-
यैव व्यपदिश्यते । शुनासीर्यसंज्ञं चतुर्थं चातुर्मास्यपर्व प्रयुङ्क्ते इति यदस्ति एतत्
एतेन त्रयोदशमधिकमासमेवाप्नोति प्रतिपद्यत इति ज्ञातव्यम् । त्रयोदशमासा-
वाप्तिरस्य फलमित्यर्थः । त्रयोदशमासमात्रावाप्तेरफलत्वात् तस्य फल-
वत्संवत्सरावाप्तिहेतुतां वक्तुं 'द्वादश मासाः संवत्सरः'[b] इति श्रुतेः प्रसिद्धेश्च
त्रयोदशमासस्य संवत्सरानन्तर्भावशङ्कां शमयन्नाह—**एतावान्-मासः** । योऽयं 10. २
त्रयोदशसंख्यापूरको मासोऽस्ति एतत्परिमाण एव संवत्सरो भवति । संवत्सर-
स्त्रयोदशमासान्तः न द्वादशमासान्त एव । 'त्रयोदश मासाः संवत्सरः'[c] इत्यपि
श्रवणादित्यर्थः । अस्तु त्रयोदशमासान्तः संवत्सरः, तावता किं सिध्येदित्यत
आह—**तद्-भवति** । यस्मादत्र त्रयोदशमासः संवत्सरान्त्यावयवभूतः तत् 10. ३
तस्मादत्र त्रयोदशमास उपाप्ते सत्येव कात्स्न्येन संवत्सरावाप्तिर्भवति ।

a. BŚ. 5. 17. 7. b. TS. 1. 5. 7. 3.
c. ŚB. 6. 6. 3. 16.

द्वादशमासावाप्तौ[1] संवत्सरैकदेशावाप्तिरेव[1] भवेत् । अतस्त्रयोदशमासावाप्ति-
द्वारा संवत्सरावाप्तिहेतुत्वात् प्रशस्तमिदं कर्मेत्यर्थः । अथ पौष्णयागादनन्तरं
विधातव्यमपि शुनासीर्ययागमस्मिन् कर्मणि शुनासीरा एव प्रधानदेवता इतरा
10. ४-६ तु गुणभूता इति द्योतयितुं प्रशंसति—**अथ-क्रियते** । व्याख्यातमेतत् ।

इदानीमितिकर्तव्यतां विधित्सुः शुनासीर्ये अग्निमन्थनामन्थनयोरैच्छिकं
विकल्पमभिप्रेत्य मन्थनपक्षे[2] वैश्वदेविकीतिकर्तव्यता आदर्तव्येत्याह—**स-**
10. ७ **तन्त्रम्** । यदीह शुनासीर्ये अग्निमन्थनकर्म क्रियेत तर्हि वैश्वदेवसंबन्धि यत् तन्त्रं
भवति तदिहापि तन्त्रं कर्तव्यम् । अग्निमन्थनाकरणपक्षे विध्यन्तविशेषमाह—
10. ८ **यद्यु-भवति** । यदि पुनरग्निमन्थनं न क्रियेत तदा न वैश्वदेविकं तन्त्रम्, किंतु
10. ९ पौर्णमासमेव भवति । स्तौति—**प्रतिष्ठा-एव** । पौर्णमासस्य प्रतिष्ठाहेतुत्वात्
10.१०-१४ तदनुष्ठानं प्रतिष्ठाफलाय संपद्यते । **अथ-ब्राह्मणम्** । अथ यत् सप्तदशेत्यादीनि
तेषामुक्तं ब्राह्मणमित्यन्तान्युक्तार्थानि । पूर्वमस्यार्थतया विधिरनूदित एव ।
10.१५,१६ इदानीं शुनासीरदेवत्यं षष्ठं यागं विधत्ते—**अथ-ब्राह्मणम्** । तत्र पूर्वोक्तं
'शान्तिर्वै'[a] इत्यादिकं ब्राह्मणमतिदिशति तयोरुक्तं ब्राह्मणमिति । वायुदेवत्यं
10.१७-१९ सप्तमं विधत्ते—**अथ-धत्ते** । अध्यात्ममवस्थितो वायुः प्राण इत्युच्यते । तथा
च तेन वायुयागेन प्राणमात्मनि धारयत्येव । सूर्यदेवत्यमष्टमं विधत्ते—**अथ-**
10.२०-२२ **प्रीणाति** ।

10.२३-२५ अथ दक्षिणां दर्शयति—**अथ-क्रियते** । श्वेतवर्णा गौरस्यामिष्टौ दक्षिणा
भवति । तेन चादित्यमेव प्रीणयति । कुतः ? यस्मात् तदेतस्यादित्यस्यैव रूपं
दक्षिणात्वेन विधीयते । श्वेतवर्णत्वेनादित्यसदृशत्वाद् गोरादित्यरूपत्वं
द्रष्टव्यम् । तस्मादनेन कर्मणा आदित्यप्रीतिरुपपन्ना ।

एवं तावद् 'अथातश्चातुर्मास्यानाम्' इत्यादिना 'एतस्यैव तद् रूपं क्रियते' इत्यन्तेन वाक्यसन्दर्भेण वैश्वदेववरुणप्रघाससाकमेधशुनासीर्यसंज्ञितानि चातुर्मास्यानि कर्माणि क्रमेणैव प्रकटीकृतानि । इदानीं कर्तृगतप्रमादालस्यादिनिब-

a. KB. III. 8. १७.

1. T. C. आप्ति for अवाप्ति

2. T. C. मथनपक्षे

न्धनविहिताकरणान्यथाकरणादिलक्षणकर्मवैकल्यापत्तौ सत्यां तत्प्रयुक्तदोष-निर्हरणार्थं[1] प्रायश्चित्तरूपकर्मानुष्ठानं यथाचोदितकर्तृद्रव्याद्यर्थलोपे प्रतिनिध्यु-
पादानं च विधत्ते—**अथ-भिषज्यायै**। अथशब्दोऽधिकारार्थः। प्रकृतादर्थादर्था- 10.२६-२९
न्तरार्थो वा। अयं विधिर्न कर्मविशेषविषयः, किंतु वेदविहितसर्वकर्मगोचर एव। प्रायश्चित्तानि प्रतिनिधयश्च प्रायश्चित्तप्रतिनिधयः। प्रायः कर्मणो भ्रेषः अकरणान्यथाकरणादिरूपः, तस्य चित्तं संधानम्। भ्रेषनिमित्तदोषनिबर्हक-त्वाच्च तत्संधानरूपत्वम्। तथा च सूत्रम्—'विध्यपराधे प्रायश्चित्तम्'[a] इति। अनन्तरं दोषात् प्रायश्चित्तं न ह्यनिर्हृते दोषे प्रवृत्तिरुत्तरस्यास्ति'[b] इति च। 'श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते'[c] इति चापस्तम्बः। प्रायश्चित्त-विषयेऽन्यत्र वा यत्र श्रुतस्य कर्तृद्रव्यादेर्लोपोऽपचारो भवेत् तत्र प्रकृतिरनुकल्पो ग्राह्यः। तदुक्तं सूत्रकृता—'अर्थलोपे प्रतिनिधिः'[d] इति। आश्वलायनश्चाह—'शिष्टाभावे प्रतिनिधिः'[e] इति। तस्योदाहरणं अग्निहोत्रहविषः स्कन्दे शेषे चाविद्यमाने तज्जातीयग्रहणम्, तज्जातीयाभावे रूपरसाद्यन्यतमसदृशकार्यक्षम-द्रव्यग्रहणम्, प्रायश्चित्तेष्टिस्थान आहुतिग्रहणमित्यादि द्रष्टव्यम्। न च द्रव्या-दिनियमानुरोधेन प्रधानकर्मप्रहाणिर्युक्ता, प्रधानविधिविरोधात्। यागचोदनयैव हि द्रव्यमात्रलाभः। तस्यैव नियममात्रं व्रीह्यादिश्रुतिरिति स्थितिः। तस्मात् प्रतिनिधिनापि प्रक्रान्तं कर्म समापयितव्यम्। तदेतत् सर्वं सूत्रत एवानु-संधेयम्। दिङ्मात्रं तु प्रदर्शितम्। अक्षरार्थस्तु प्रायश्चित्तप्रतिनिधीन् कुर्वन्तीति यदस्ति तत्राहुतीः प्रायश्चित्तरूपाः प्रायश्चित्तेष्टिप्रतिनिधिरूपाश्च जुह्वतीति यत् तेन स्वस्त्ययनमेव कुर्वते। तच्च स्वस्त्ययनं यज्ञस्य शान्त्यै असमृद्धि-परिहाराय यजमानस्य भिषज्यायै व्याधिपरिहाराय च संपद्यते। प्रायश्चित्ता-ननुष्ठाने यज्ञासमृद्ध्यादिदोषः प्रसज्येत। तन्निवृत्त्यर्थं प्रायश्चित्तानुष्ठान-मित्यर्थः। प्रायश्चित्तविशेषस्वरूपं तु शाखान्तराद् द्रष्टव्यम्। शाखान्तरीयाश्च

a. ŚŚ. 3. 19. 1.
b. ŚŚ. 3. 19. 7.
c. APŚ. 9. 1. 1.
d. ŚŚ. 3. 19. 2.
e. AŚ. 3. 10. 2.

1. A. M. °निबर्हणार्थं

प्रायश्चित्तविधयः इदमेव ब्राह्मणमवष्टभ्य सूत्रकारेण 'विध्यपराधे प्रायश्चित्तम्'[a] इत्यादिना प्रपञ्चिताः ।

इदानीं मृतस्य यजमानस्याग्निहोत्रादिभिः संस्कर्तव्यतां विधत्ते—**अथ-**
10.३०-३४ **लोकः** । स्वैः स्वकीयैरग्निहोत्रादिभिः मृतं यजमानं पुत्रादयः संस्कृतं कुर्युः । तच्चैतत् प्रशस्तम् । यस्मादेतेऽग्नयो नाम देवरथ एव । देवसंबन्धी रथो देवरथः । तत्संबन्धित्वं च तत्प्राप्तिहेतुत्वम् । तस्मादेनं यजमानमनेनाग्निहोत्राग्निसंस्कारेण अग्निरूपे देवरथ एव सम्यक् सुखेनारोपयन्ति । स चारोपितो यजमान एतेनाग्निरूपेण देवरथेन स्वर्गं लोकं प्राप्नोति । स्वर्गलोकस्य विशेषणं सुकृतां यत्र लोक इति । शोभनं श्रुत्यादिविहितं नित्यनैमित्तिकादिकर्म कुर्वन्तीति सुकृतः । यत्र यस्मिन् स्वर्गलोके सुकृतां पुण्यकर्मणां लोको निवासस्थानानि भवन्ति । एकवचनमविवक्षितम् । तं स्वर्गं लोकमेतीति पूर्वेण संबन्धः । अभ्यासोऽध्यायसमाप्तिसूचनार्थः ॥

इति दशमः खण्डः

इत्याम्नायसरोरुह[ावलि]विकासोद्यत्सहस्रद्युते-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
चातुर्मास्यविधिक्रमप्रकटनः कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय ऐत् पञ्चमः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## प्रथमदशके पञ्चमोऽध्यायः

a. ŚŚ. 3. 19. 1.

अथ

## षष्ठोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
अथ शूलगवाह्वयस्य शाखा-
पशुतन्त्रस्य विधानमुन्निनीषुः ।
कथयत्यदसीयदेवतायाः
स्तुतये कंचन संप्रतीतिहासम् ॥

**प्रजापतिः–अतप्यत** । पुरा किल प्रजापतिरखिलजगत्कारणभूत ईश्वरः 1. १
**प्रजाति** प्रजोत्पत्तिं कामयमानः सन् तपस्तप्तवान् । तपिरनुष्ठानार्थः ।
**तस्मात्–अजायन्त** । अथ प्रजासृष्टयर्थं तपोऽनुतिष्ठतः तस्मात् प्रजापतेः 1. २
पञ्च पञ्चसंख्याका देवा अजायन्त आसन् । के ते पञ्चेत्यत्रोक्तम्—
**अग्निर्–पञ्चमी** । पञ्चमी पञ्चसंख्यापूरणी । पृथङ्निर्देशो मिथुनत्वसंपत्त्या 1. ३
प्रजोत्पत्तिघटनावद्योतनार्थः ।

अथ प्रजापतेरुत्पन्नेभ्यस्तेभ्योऽग्न्यादिभ्यो रुद्रस्योत्पत्तिं प्रतिपादयितुमाह—
**तान्–इति** । अनन्तरमुत्पन्नेषु तेष्वग्न्यादिषु तानग्न्यादीन् प्रजापतिरुक्तवान् । 1. ४
किमित्यत्राह—हे मत्पुत्रा अग्न्यादयः यथाहं युष्मांस्तपसा सृष्टवानस्मि तथा
यूयमपि पुत्रोत्पत्त्यर्थं तपोऽनुतिष्ठतेति । **ते–प्रत्युदैत्** । एवं प्रजापतिनोक्ते तथेति 1. ५, ६
नियोगं परिगृह्य दीक्षां कृत्वा तपोऽनुतिष्ठतस्तांश्चतुरोऽग्न्यादीन् देवानभि-
मुखीकृत्य प्रजापतेः तनयोषा अत एव स्वकीयेन रूपेण गन्तुमक्षमा कस्याश्चि-
दप्सरसो रूपं बिभ्राणा पुरोभागे स्थितासीत् । तत्कामितयेत्यर्थात् । **तस्याम्–**
**असिञ्चन्त** । अथ तस्यामप्सरोरूपं दधानायाम् अज्ञातस्वसृभावानामेषामग्न्या- 1. ७, ८
दीनां मनो हृदयं सम्यगपतत् पतितमभूत् । तामुषसमकामयन्तेत्यर्थः । पतित-
मनस्काश्च तेऽग्न्यादयो रेतः शुक्लं सिक्तवन्तः ।

**ते–इति** । रेतःसेकादनन्तरं तेऽग्न्यादयः स्वपितरं प्रजापतिमुपगम्य तमुक्त- 1. ९,१०
वन्तः । हे पितः प्रजापते वयं तपोऽनुतिष्ठन्तः सन्तो रेतः शुक्लं सिक्तवन्तः ।

तस्मात् तत् सिक्तं नोऽस्माकं संबन्धि रेतः शुक्लं अमुया अनया स्वस्रा संगतं
मा भूत् न भवेत्। तस्य स्वसृसंगतिं विना फलवत्त्वं येन संपद्येत तादृशं कंचिदु-
1.११,१२ पायं चिन्तयेत्युक्तवन्तः। **स-समसिञ्चत्।** अथ तद्वचनमाकर्ण्य स प्रजापतिः
तस्यामोघत्वसंपत्त्यर्थं कंचिद्धिरण्मयं सुवर्णविकारवदतिशयेन भास्वरं चमसं
पात्रविशेषं तस्य रेतसो निधानार्थमकरोत् संपादितवान्। कीदृशम् ? आया-
मतः परिणाहतश्चेषुपरिमाणम्। तादृशं कंचिच्चमसं निष्पाद्य तस्मिंश्चमसे
1.१३,१४ एनद्रेतः प्रक्षिप्तवान्। **तत-प्रतिहिताभिः।** अथ ततस्तस्माच्चमसात् कश्चित्
पुरुषविशेष उत्थितोऽभूत्। स कीदृशः ? सहस्राक्षः सहस्रमक्षीणि लोचनानि
यस्य स तथा। सहस्रं पादः पादाः यस्य स तथा। एतच्च शेषाङ्गोपलक्षणार्थम्।
पुनः कीदृशः ? सहस्रेण सहस्रसंख्याभिः धनुषि प्रतिहिताभिः संहिताभिरिषु-
भिरुपलक्षितः। 'सहस्राणि सहस्रधा बाह्वोस्तव हेतयः'[a] 'यास्ते सहस्रं हेतयः'[b]
इत्यादिदर्शनात्।

इत्थं रुद्राख्याया देवताया उत्पत्तिं प्रदर्श्य तस्या भवाद्यष्टनाम-
1. १५-१८ वाच्यमूर्त्यष्टकवैशिष्ट्यं प्रकटीचिकीर्षुराह—**स-इति।** स इत्थमुत्पन्नो देवः
स्वस्य पितरं प्रजापतिमभिलक्ष्य केनचिदभिप्रायेण हन्तुमिव धनुः सज्यमा-
कर्णपूर्णम् आकृष्टवान्। वेद्धुमिति शेषः। अथ तं प्रजापतिरब्रवीत्—हे पुत्र
कथा कथं मामभिलक्ष्य धनुराकर्षसि। किं वधार्थमेव, आहोस्वित् कस्मैचित्
प्रयोजनान्तरायेति प्रश्नः। अथ तं रुद्रोऽब्रवीत्। नायं त्वद्वधार्थमारम्भः। किंतु
अस्ति किंचिन्ममाभिलषितम्। यदि तन्न साधयिष्यसि तर्हि हनिष्यामीति।
अयं च ममाभिलषितोऽर्थः। जातस्य मम तावन्न नाम त्वया कृतम्। न चाकृत-
नाम्ना अन्नमत्तुं शक्यम्। नामकरणानन्तरमेवान्नप्राशनविधिः। तस्मान्मम
किंचिन्नाम कुर्विति॥

इति प्रथमः खण्डः

a. TS. 4. 5. 10. 5. b. VS. 16. 52.

**स–इति ।** इत्थं रुद्रेणोक्तः स प्रजापतिः विचिन्त्याब्रवीत्[1] । हे पुत्र त्वं 2. १-८
भवशब्दवाच्यो भवसीति । तव भव इति नामास्त्वित्यब्रवीदित्यर्थः । भव-
शब्दार्थं स्वयं व्याचष्टे—यद् भव आपस्तेनेति । यद् भव इति नामास्ति तेन
नाम्नाप एवोक्ता इति द्रष्टव्यमित्यर्थः । अनेनाबधिष्ठाता रुद्रस्य कश्चिन्मूर्ति-
विशेषः प्रदर्शितः । तदुपाधौ च रुद्रस्य भवशब्दाभिधेयत्वम् । तथा च लैङ्गे—

'वाय्वात्मा सर्वभूतेशः सर्वेषामेव जीवनम्[2] ।
भव इत्युच्यते देवो भगवान् वेदवादिभिः ॥'[a]

इति । एतन्नामवेदितुः फलमाह—न ह वा इति । य एवं भवशब्दवाच्य-
रूपेण रुद्रं वेद जानाति एनं वेदितारं भवशब्दवाच्यो रुद्रो न हिनस्ति । रुद्रस्य
क्रूरदेवतात्वात् हिंसाप्रसक्तौ निषेधः । न केवलमेनमेव न हिनस्ति; अस्य वेदितुः
प्रजां पुत्रपौत्रादिरूपां संततिमपि । किंच अस्य वेदितुः स्वभूतान् पशूनपि ।
चनशब्दोऽप्यर्थे । अस्य ब्रुवाणमुपदेष्टारं च न हिनस्ति । अथेति प्रकृतादर्था-
दर्थान्तरे । यः कश्चिदेनं वेदितारं द्वेष्टि स द्वेष्टैव पापीयान् दरिद्रः स्यात् ।
स वेदिता तु न । प्रत्युत वर्धत एव । एतन्नामवेदनस्य महाफलत्वाद् रुद्रस्य
भवनामत्वं वेदितव्यमित्युक्तम् । अथ वेदितुः कंचिद् व्रतविशेषमुपदिशति—
तस्य व्रतमिति । तस्य वेदितुर्व्रतं भवतीति शेषः । किं तदित्यत्राह—आर्द्रमिति ।
अद्भिः क्लिन्नं वस्त्रमेव परिधानत्वेन कुर्यात् । अथवा एवकारः क्रमं भित्त्वा
परिदधीतेत्यस्योपरि घटनीयः । परिदधीतैव, न त्वार्द्रमिति कृत्वानादर-
णीयम् । किं च अपः न परिचक्षीत निराकुर्यात् । इतिशब्दः आद्यनामब्राह्मण-
समाप्त्यर्थः ।

अथ शर्वादिनाम्नामुत्पत्तिं दर्शयति—**तं-इति ।** 'स एषोऽष्टनामा' इत्यतः 2. ९-२०
प्राक्तनानि वाक्यानि व्याख्यातप्रायाणि । कानिचित् पदानि तु व्याख्यायन्ते ।
द्वितीयम् । भवनामापेक्षया किमिति द्वितीयनामचिकीर्षा जाता; एकेनैव नाम्ना
चरितार्थत्वादित्यत्राह—न वा इदमिति ।एकस्मिन् नाम्नि कृतेऽपि न मनःपरितोष

a. *Liṅgapurāṇa*, XIII. 5. only *uttarārdha*.

1. A. M. विचार्याब्रवीत्  2. A. M. जीविनाम्

इति भावः। शृणाति हिनस्ति सर्वं जगदन्तकाल इति व्युत्पत्त्या शर्वशब्देनाग्निरभिधीयत इत्यर्थः। सर्वमेवान्नं नाश्नीयाद् अपि तु अष्टग्रासादिनियमसहित-
2. २१-३२ मेवेत्यर्थः। **तं-इति**। भवशर्वनामद्वयापेक्षया तृतीयं पशुपतिनाम। पशुपतिनाम्ना वायुरभिधीयते पशूनां वायुदेवत्यत्वात्। अत एव मन्त्रः 'वायवः स्थ'[a] इति। ब्राह्मणमेवेत्यत्र एवकारः क्रियापदेन संबन्धनीयः। न परिवदेदेवेति। परिवादो
2. ३३-४४ निन्दावादः। **तं-इति**। भवशर्वपशुपतिनामत्रयापेक्षया उग्र इति नाम चतुर्थं भवति। उग्रशब्देनोद्गूर्णत्ववाचिना भूमेरुद्गता ओषधयो वनस्पतयश्चोच्यन्ते। ओषधयो व्रीह्यादयः। 'ओषान्तं फलपाकान्तं धीयन्ते' इति तन्निर्वचनात्। अत एवाहुः 'ओषध्यः फलपाकान्ताः'[b] इति। वनस्पतयः पनससहकारादयः। तेषां वनत्वसंपादनेन वनपालकत्वात्। स्त्रिया एवेति। स्त्रिया असाधारणं विवरं छिद्रं योनिच्छिद्रं नेक्षेत न निर्वर्णयेदित्यर्थः॥

इति द्वितीयः खण्डः

3. १-१२ **तं-इति**। भवशर्वपशुपत्युग्रनामचतुष्टयापेक्षया महान् देव इति नाम पञ्चमं भवति। अनेन च नाम्ना आदित्यमण्डलस्थो देवोऽभिधीयते। 'एक एव महानात्मा देवता। स सूर्य इत्याचक्षते। स हि सर्वभूतात्मा'[c] इति वचनात्। मन्त्रश्च—'सूर्य आत्मा जगतस्तस्थुषश्च'[d] इति। उद्यन्तं उदयाद्रेरूर्ध्वं गच्छन्तम्
3. १३-२४ अस्तमस्ताचलं यन्तं गच्छन्तं चैनमादित्यं नेक्षेतैवेति। **तं-इति**। रुद्रनाम्ना चन्द्रमा अभिधीयते। प्राणिनां रुजं द्रावयति नाशयतीति व्युत्पत्तेः। विमूर्त-
3. २५-३६ मकठिनं द्रवात्मकं वस्तु। मज्जानं मांसं नाश्नीयात्। **तं-इति**। ईशाननाम्ना अन्नमुच्यते। अन्नमिच्छमानमिच्छन्तं याचमानं न प्रत्याचक्षीत निराकुर्यात्।

3.३७-४८ **तम्-इति**। अशनेरिन्द्रप्रवर्त्यत्वेनाशनिशब्देनेन्द्र उच्यते। तथा च वाजसनेयके—'कतम इन्द्रः कतमः प्रजापतिरिति। स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति। कतमः स्तनयित्नुः कतमो यज्ञ इति। अशनिरेव स्तनयित्नुर्यज्ञः

a. TS. 1. 1. 1. 1.
b. AK. 2 *Vanavarga*, v. 6.
c. SA. 2. 14-16.
d. RV. 1. 115. 1.

पशव इति'[a] इति । सत्यं यथार्थवचनं बिभृयाद् धारयेत् । उपसंहरति—
**स–वेद ।** तस्मात् त्वं मम किंचिन्नाम कुरु इत्यष्टधा विहितो महान् देव इति । 3. ४६-५२
स इति श्रुतिस्मृतीतिहासपुराणलोकप्रसिद्धिरुक्ता । एष इत्युपपादितरूपो रुद्रः । देवः क्रीडाविजिगीषादिगुणोपेतः । महान् देशतः कालतो वस्तुतश्चापरिच्छिन्न-सर्वजगदात्मकः । अष्टनामा अष्टौ नामानि भवादीनि यस्य स तथोक्तः । तथा अष्टधा विहितः अष्टभिर्मूर्तिभिरुपेतः । मूर्त्यष्टकसाहित्याभिधानात्[1] परिच्छेदशङ्कां शमयितुं महानित्युक्तम् । एतास्वष्टमूर्तिषु सर्वस्य जगतोऽन्त-र्भावान्न परिच्छेदः शङ्कनीय इत्यर्थः ।

स एष महान् देवो रुद्रोऽष्टनामा अष्टधा विहितश्च भवतीति योजना । अथैतद्वेदितुः फलमाह—आ ह वा इति । य एवमष्टनामाष्टधा विहितश्च रुद्र इति विजानाति अस्य वेदितुः प्रजा पुत्रपौत्रादिरूपा अन्नमत्ति दीप्ताग्नि-र्भवति । आरोग्यादिगुणयुक्ता सकलभोग्यवस्तूपभोगसमर्था च भवति । किम-विशेषेण सर्वापीत्यत्रोक्तम्—आष्टमात् पुरुषादिति । एनं वेदितारमारभ्य योऽष्टमः पुरुषो भवति तमभिव्याप्य या प्रजास्ति सान्नमत्ति । ह वा इत्यवधार-णार्थं निपातद्वयं क्रियापदेन संबध्यते । अपि चास्य वेदितुः प्रजायां संततौ यो यो जायते स स वसीयान् वसीयानेव जायते । स्वयं वेदिता च लोके वसीयान् वस्तृतम आच्छादयितृतमः स्वगुणैरन्येषां वसुमत्तमो वा श्रेष्ठो भवति । तस्मादपि तत्पुत्रः श्रेष्ठः स्यात् तस्मादपि तत्पुत्र इत्येवमुत्तरोत्तरमतिशयालु-महिमानो जायन्त इत्यर्थः ।

इत्थं शूलगवाख्यस्य रौद्रस्य पशुकर्मणः ।
देवताभिष्टुतिद्वारा समुन्नीतः स्फुटं विधिः ॥
रुद्रं गवा यजेतेति सूत्रकार इमां श्रुतिम् ।
अवलम्ब्य प्रववृते ब्रह्मकर्मविधेः परम् ॥

इति तृतीयः खण्डः

a. ŚB. 14. 6. 9. 7 ( varies ).

1. A. M. °साहित्यात्

अथ विहितानां हविर्यज्ञानां विधास्यमानानां च सोमयागानां साधारण्येन
ब्रह्मगोचरविधिं प्रकटीचिकीर्षुः प्रथमं ब्रह्मणः ऋत्विगन्तरेभ्योऽभ्यर्हितत्वप्रति-
4. १. पादिकां कांचिदाख्यायिकामुपक्षिपति—**प्रजापतिः-अतप्यत**। चातुर्होत्रं यज्ञं
स्रष्टुकाम इति शेषः। तपो ध्यानलक्षणं कृतवान्। तच्च तदुपायविषयं
4. २-४ द्रष्टव्यम्। स पुनः किमकार्षीदित्यपेक्षायामाह—**स-लोकम्**। स प्रजापतिः।
इमं पृथिवीलोकम्। स्वस्य प्राणादेव प्रावृहदुदयच्छत् निष्कृष्टवान्। प्रलयकाले
प्रकृतौ प्राणे प्रलीनं सन् सृष्टिकाले पृथक्कृतवानित्यर्थः। प्रावृहदित्युत्तरयोरपि
वाक्ययोरनुषञ्जनीयम्।

एवं प्राणापानव्यानेभ्यो भूर्भुवःस्वर्लक्षणलोकत्रयसृष्टिमुक्त्वा तेभ्यो
4. ५-७ लोकेभ्यः क्रमादग्निवाय्वादित्यसृष्टिमाचष्टे—**स-दिवः**। अभ्यतप्यत अभिलक्ष्य
तपस्तप्तवान्। अभितापश्च तत्सारोपादानार्थः। यथा सुवर्णकारः तद्गतं
सारमुपादित्सुः सुवर्णं ध्मापयति, तद्वदचिन्त्यशक्तिरीश्वरोऽपि लोकांस्तपसा
योजयामास। अभितप्य च सोऽग्निमेव। एवकारोऽग्नेः पृथिवीस्थानत्वप्रसिद्धि-
द्योतनार्थः। असृजतेत्युत्तरयोरप्यनुषज्यते। अथैवं सृष्टेभ्योऽग्न्यादिभ्यः
4. ८-१० क्रमादृग्यजुःसाम्नां सृष्टिं दर्शयति—**स-सामानि**। असृजत असृजत्। अथैतेभ्यो
4. ११,१२ वेदेभ्यो यज्ञस्य निष्पत्तिमाह—**स-अतनुत**। त्रयाणां समाहारस्त्रयी विद्या।
तत्साधनत्वात्। कथं पुनर्वेदैर्यज्ञस्य निष्पत्तिः प्रजापतिना कल्पितेत्यपेक्षाया-
4. १३,१४ मुक्तम्—**स-उदगायत्**। स प्रजापतिः। ऋचा ऋग्बहुलेन वेदेनाशंसत् शंसनं
होतृवर्गानुष्ठेयं कृतवान्। यजुषा यदुर्वेदेन प्राचरत्। अध्वर्युवर्गकृत्यं प्रचरणं
यज्ञशरीरनिष्पादनलक्षणं कृतवान्। साम्ना सामवेदेनोदगायत्। उद्गातृवर्ग-
4. १५-१८ कृत्यमुद्गानं कृतवान्। **अथ-साम्नाम्**। अथ होत्रादिसृष्टयनन्तरं ब्रह्मकर्म
कर्तुकामः प्रजापतिरेतेषां प्रकृतानां त्रयाणां वेदानां तत्साध्यकर्मणां पुरुषप्रमाद-
निबन्धनापराधसंभवे तत्परिहारार्थमेतस्या एव त्रय्या विद्यायाः संबन्धि तेजो-
भूतं रसं सारं[1] व्याहृतित्रयरूपं निष्कृष्य गृहीतवान्। तदेव विविच्य दर्शयति–
स भूरित्यृचामिति। पञ्चम्यर्थे षष्ठी। संबन्धसामान्यार्था वा।

1. A. M. omit

**तेन-संतस्थे** । एवं वेदत्रयाद् व्याहृतित्रयात्मकं सारं संगृह्य तेन 4. १९,२० दक्षिणतः आहवनीयाग्नेः दक्षिणभागे स्थितः सन् ब्रह्मनामक ऋत्विगासीत् । ब्रह्मणा कर्तव्यं कर्मानुष्ठितवानित्यर्थः । उक्तहोत्राद्यृत्विक्कर्मविनियोगाभिधायी मन्त्रो दाशतय्यामाम्नायते—'ऋचां त्वः'[a] इत्यादिः । अस्य तात्पर्यार्थमाह भगवान् यास्कः—'ऋत्विक्कर्मणां विनियोगमाचष्टे'[b] इति । अस्य मन्त्रस्य यास्कवचनानुसारेणार्थोऽभिधीयते । त्वशब्दः एकशब्दपर्यायः । 'त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्'[c] इति यास्कवचनात् । एको होतृनामक ऋत्विग् ऋचामर्थवशेन पादव्यवस्थायुक्तानां मन्त्राणामितस्ततो विप्रकीर्णानां पोषमेकत्रैव संघातं सामिधेनीमरुत्वतीयादिसंज्ञं पुपुष्वान् कुर्वाण आस्ते । पोषमित्येकत्वमविवक्षितम् । एक उद्गातृनामकः गायत्रं साम गीयते स्तूयत इति व्युत्पत्तेः शक्वरीषु ऋक्षु गायति करोति । गीतेरेव सामत्वात् । एको ब्रह्मा जाते जाते अप्प्रणयनादिकर्मणि विद्यामनुज्ञां 'ओं प्रणय'[d] इत्यादिरूपां वदति । यद्वा जाते जाते वेदत्रयोक्तकर्मापराधे विद्याम् इदमत्र प्रतिसंधानरूपं प्रायश्चित्तमित्येतत्प्रतिपादकं वाक्यं वदति । एकोऽध्वर्युर्यज्ञस्य मात्राम् । मीयत इति मात्रा स्वरूपम्[1] । विमिमीते सम्यङ् निष्पादयतीति । तदेतत् सर्वं तत्रभवता यास्केनाभिहितम् 'ऋचामेकः पोषमास्ते पुपुष्वान्[2]'[e] इत्यादिना । तस्मात् होत्रध्वर्यूद्गातारः क्रमाद् ऋग्यजुःसामनिर्वर्त्यकर्मानुष्ठातारः । ब्रह्मा तु वेदत्रयसारभूतभूर्भुवःस्वर्लक्षणव्याहृतित्रयसाध्येन कर्मणा वेदत्रयनिर्वर्त्यकर्मापचारपरिहारेण यज्ञसमृद्धिसंपादक इतीतरेभ्यः ऋत्विग्भ्यस्तस्य प्राधान्यं सिद्धम् । तस्य चाहवनीयाग्नेर्दक्षिणभागे अवस्थानमिति सिद्धम् । एवं यज्ञमनुतिष्ठतस्तस्य प्रजापतेर्यज्ञ एवं संतस्थे समाप्तिं प्राप्तवान् । कथमित्याकाङ्क्षायामुक्तम्—दक्षिणभागे वर्षीयानतिशयेन वृद्धः गौरवयुक्तः । अत एव हेतोः उदीचीनप्रवणः उत्तरार्धेन प्रवणः अवनतः । दक्षिणतो वर्षीयस्त्वं कुत इति

a. RV. 10. 71. 11.
b. N. 1. 8. 1.
c. N. 1. 7. 4.
d. AŚ. 1. 12. 12.
e. N. 1. 8. 1.

1. A. M. add तत्
2. A. M. add होता

चेत्, प्रधानभूतब्रह्माधिष्ठितत्वात् । उदीचीनप्रवणत्वं च दक्षिणमार्गप्रतिपत्ति-हेतुत्वं विनोत्तरमार्गप्रतिपत्तिहेतुत्वात् ।

आख्यायिकामुपसंहृत्य एतदाख्यायिकाविदा ब्रह्मणा भवितव्यमित्य-
4.२१,5.१ भिप्रायेण वेदनं प्रशंसति—**तस्य-भवति**। यस्य यजमानस्य यथोक्ताख्यायिकार्थवेदनवान् ब्रह्मा स्यात् तस्य यज्ञः समृद्धिमान् समाप्तो भवति । अत एवंवित्ता ब्रह्मणा कर्तव्येत्याशयः ॥

इति चतुर्थः खण्डः

वेदत्रयसारभूतेन व्याहृतित्रयेण ब्रह्मा करोतीति ह्युक्तम् । तदेव
5. २ प्रश्नोत्तराभ्यां स्फुटीकर्तुं चोद्यं करोति—**तद्-इति** । तत्र ब्रह्मविषये केचित् जिज्ञासवः प्रश्नवाक्यमुक्तवन्तः । यत् यस्मात् होतृनामक ऋत्विग् ऋचा ऋग्वेदेन होता भवति होतृकर्म करोति । तथा अध्वर्युनामक ऋत्विग् यजुषा यजुर्वेदेन अध्वर्युराध्वर्यवकर्मकर्ता भवति । उद्गातृनामक ऋत्विक् साम्ना सामवेदेन उद्गातृकर्मानुष्ठाता भवति । यस्मादेवं वेदत्रयमस्मिन् ऋत्विक्त्रये विनियुक्तं तस्माद् ब्रह्मा अयं ब्रह्मनामक ऋत्विक् केन वेदेन ब्रह्मा भवति ब्रह्मकर्मकर्ता भवति । वेदत्रयनिर्वर्त्यो हि यज्ञः । तच्च वेदत्रयं होत्रादि-कर्मसु विनियुक्तम् । न चावैदिकं कर्म यज्ञाङ्गं भवितुमर्हति । अतो वयं
5. ३,४ पृच्छाम इति । अत्राभिज्ञानामुत्तरं दर्शयति—**यम्-भवति**। ऐतरेये चैत एव प्राश्नोत्तरे दृश्येते—'तदाहुर्महावदा३ः यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति । अथ केन ब्रह्मत्वं क्रियत इति । त्रय्या विद्ययेति ब्रूयात्'[a] इति ।

5. ५ पुनरपि ब्रह्मविषयं प्रश्नान्तरमुपक्षिपति—**तद्-इति** । ब्रह्मणो वरणे[1] कर्तव्ये सति कीदृशं ब्रह्मत्वेन परिगृह्णीयात् ? किमत्र न ज्ञायत इति । तदाह—

a. AB. 5. 33. 1.

1. A. M. ब्रह्मत्वे

किंविदं किंछन्दसमिति । किं वेत्ति जानातीति किंवित् किं छन्दो वेदोऽस्येति
किंछन्दाः तम् । अत्र पूर्वपक्षतया पक्षद्वयं दर्शयति—**अध्वर्युम्-इति** । एके 5. ६-९
ब्रह्मवादिनो यजुर्वेदिनं ब्रह्मत्वेन स्वीकुर्यादित्याहुः । अत्र हेतुः स परिक्रमा-
णामिति । स यजुर्वेदी सन्नेव यज्ञे ये परिक्रमाः कर्मणां प्रचारा अनुष्ठानानि
तेषां क्षेत्रज्ञो विज्ञाने कुशलो भवति । अध्वर्योर्यज्ञशरीरनिष्पादकत्वात् । छन्दो-
गबह्वृचयोस्तु स्तोत्रशस्त्रादिमात्रव्यापृतमनस्कयोः नेदानीमिदं कर्मेत्थमनुष्ठेय-
मिति विज्ञप्तिसौकर्यमिति विशेषः । छन्दोगं सामवेदिनमिति केचिदाहुः ।
तत्रापि हेतुसद्भाव उक्तः—तथा ह्यस्येति । छन्दोगे ब्रह्मत्वेन वृते सत्यस्य
यजमानस्य ये हविर्यज्ञास्तेऽपि न केवलं सोमयागा[1] एव त्रिभिर्वेदैः ऋग्यजुः-
सामभिः संस्कृताः संपादितातिशयविशेषाः क्रियन्त इत्यतो हेतोश्छन्दोगं ब्रह्माणं
वृणीत ।

इदानीं सिद्धान्तमाह—**बह्वृचम्-स्थितम्** । बह्वृचः ऋग्वेदी । तं ब्रह्माणं 5. १०
वृणीतेत्येव निश्चितः पक्षः । कुत इत्यत उक्तम्—**एतत्-वेदौ** । इतरौ वेदौ 5. ११
यजुर्वेदसामवेदौ एतमृग्वेदं परितः सरतो गच्छतः इत्येतत्परिसरणौ । एतदनु-
गामिनाविति यावत् । ऋग्वेदस्य सर्वत्र ब्रह्मयज्ञादिषु प्राथम्येन तस्यैव प्राधा-
न्यात् । इतरयोश्च तदनन्तरपातित्वेनाप्राधान्यात् । प्रधानाप्रधानयोः प्रधान-
परिग्रहो न्याय्य इति बह्वृच एव ब्रह्मा स्यात् ।

हेत्वन्तरमाह—**अत्र-स्यात्** । अत्र ऋग्वेदे भूयिष्ठा बहुतरा होत्रा 5. १२-१५
ऋत्विज आयत्ताः प्रवृत्ता भवन्ति । षोडशसंख्येष्वृत्विक्षु मध्ये ऋग्वेदविहित-
कर्मानुष्ठातार ऋत्विजोऽतिरिच्यन्ते । तथा हि—होतृमैत्रावरुणाच्छावाक-
ग्रावस्तुतां तावद् ऋग्वेदित्वं प्रसिद्धमेव । तथा ब्राह्मणाच्छंसिनोऽपि शस्त्रि-
त्वात् । 'प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इति शस्त्रिणो होत्रकाः'[a] इत्युक्त-
त्वात् । आग्नीध्रनेष्टृपोतॄणामशस्त्रित्वेऽपि ऋग्वेदविहितकर्मानुष्ठायित्वादेव
बह्वृचत्वम् । अतोऽध्वर्युप्रतिप्रस्थातृच्छन्दोगा एव इतरवेदद्वयावलम्बितया

a. AŚ. 5. 10. 10.

1. A. M. सोमयाग

परिशिष्यन्ते । अतः ऋग्वेदस्य यज्ञेऽपि प्राधान्यसद्भावाद् ऋग्वेद्येव ब्रह्मा स्यात् । अपि चाध्वर्युच्छन्दोगानामपि ऋग्वेदापेक्षत्वात् तस्य प्राधान्यमित्याह—ऋग्भिरिति । 'आ वायो भूष शुचिपा उप नः'[a] इत्याद्याभिः ऋग्भिरेव अध्वर्युर्णैन्द्रवायवादिग्रहा गृह्यन्ते न यजुषा । 'उपरिष्टादुपयामा ऋचा'[b] इत्याध्वर्यवाम्नाय एव श्रूयमाणत्वात् । यद्यपि 'पुरस्तादुपयामा यजुषा गृह्यन्ते'[c] इति वचनादुक्थ्यादयो ग्रहा यजुषा गृह्यन्ते तथापि तेषामल्पत्वमभिप्रेत्य ऋग्भिर्ग्रहा गृह्यन्त इति वचनम् । ऋगपेक्षास्तित्वमात्रस्येह सिसाधयिषितत्वात् । सामानि रथन्तराद्याख्यानि ऋक्षु 'अभि त्वा शूर'[d] इत्याद्यासु गीयन्त इति सुप्रसिद्धम् । यस्मादेवमृग्वेद एवाभ्यर्हितः तस्मादृत्विक्प्रधानभूत ऋग्वेद्येव स्यादित्युपसंहरति—तस्माद् बह्वृच एव स्यादिति ।

5. १६ पुनरपि ब्रह्मविषयं प्रश्नान्तरमुपन्यस्यति **तद्-इति** । भवतु नाम बह्वृचो ब्रह्मा । स च प्रधानभूतः । स पुनर्ब्रह्मा यज्ञस्यावयविनः संबन्ध्यवयवभूतं कियत् किंप्रमाणं कर्म संस्करोति शोधयति । ब्रह्मव्यतिरिक्ताः पञ्चदशर्त्विजः कियत् संस्कुर्वन्तीति केचिच्चोदकाः पृच्छन्ति । तत्रोत्तरम्—
5. १७ **अर्धम्-ब्रूयात्** । तांश्चोदकान् प्रति इति इत्थं ब्रूयादुत्तरं व्यक्तं कथयेत् । कथमित्याह—अर्धमिति । अखण्डस्य यज्ञावयविनो यत् साम्येन द्वेधा विभक्तस्य एकमर्धं समोंऽशोऽस्ति तद् ब्रह्मा संस्करोति । अर्धान्तरं त्वन्य ऋत्विजः संभूय
5. १८-२३ संस्कुर्वन्तीति । एतदेव विभज्य दर्शयति—**द्वे-ब्रह्मा** । यज्ञस्य तावद् द्वे द्विसंख्याके वर्तनी वर्तन्यौ पन्थानौ स्तः । वर्तते प्रवर्तते यज्ञस्तायमान आभ्यामिति वर्तन्यौ । यथैकस्य पतत्रिणो द्वौ पक्षौ, यथा रथस्य द्वे चक्रे, यथा पुरुषस्य द्वौ पादौ तद्वत् । तयोर्यज्ञस्य वर्तन्योर्मध्ये अन्या एका वर्तनिः वाचा मन्त्रोच्चारणव्यापृतया वागिन्द्रियेण संस्क्रियते । परिशोधनेन सुखगमनयोग्या क्रियते । अन्या वर्तनिः मनसा संस्क्रियते कर्मयाथात्म्यविज्ञानव्यापृतेन । तथापि किमिति चेद् उच्यते । तत्र या सा यज्ञस्य वर्तनी वाचा संस्क्रियते तां वर्तनिं ब्रह्मव्यतिरिक्ता ऋत्विजः संस्कुर्वन्ति । अथ या वर्तनिः मनसा संस्क्रियते

a. RV. 7. 92. 1.
b. TS. 6. 5. 10. 4.
c. TS. 6. 5. 10. 4.
d. RV. 7. 32. 22.

संस्कर्तव्यां तां वर्तनिं ब्रह्मा संस्करोति । तस्माद् यज्ञस्यार्धं ब्रह्मा स्वयमेक एव संस्करोति । एकमर्धमन्ये संभूय सर्व ऋत्विज इति सिद्धम् । तदेतत् सर्वमैतरेयेऽप्याम्नातम्—'अयं वै यज्ञो योऽयं पवते । तस्य वाक् मनश्च वर्तन्यौ । वाचा च हि मनसा च यज्ञो वर्तते । इयं वै वागदो मनः । तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति मनसैव ब्रह्मा संस्करोति'[a] इति ।

उक्तमेव यज्ञार्धसंस्कारत्वं हेतूकृत्य ब्रह्मणो वाग्यमं विधत्ते—**तस्माद्–**
**संस्करोति** । यस्माद् ब्रह्मा मनसैव यज्ञार्धसंस्कर्ता इतरे सर्वेऽपि संभूय वाचा 5. २४-२६
यज्ञार्धसंस्कर्तारः, तस्मादन्य ऋत्विजः ऋग्यजुःसामरूपया वाचा यस्मिन् काले कर्म कुर्वन्ति तस्मिन् काले ब्रह्मा तूष्णीमेव निवृत्तवाग्व्यापारः तदनुष्ठेयं कर्मजातं सावधानेन मनसाऽनुसंदधान आसीत । यस्मात् तत् तेन तूष्णीमासनेन ब्रह्मा यज्ञस्यार्धं संस्करोत्येव तस्मात् तूष्णीमासनं कुर्यात् । तथा च सूत्रम्—'साक्ष्यं च सर्वकर्मणाम् । मन्त्रवत्सु वाग्यमनम्'[b] इति । सर्वत्रैव ब्रह्मणा
तूष्णीमेवासितव्यमिति ? नेत्याह—**अथ–प्रसुयात्** । अथेति प्रकृतादर्था- 5. २७-२९
दर्थान्तरे । यत्र यस्मिन् प्रचरणादिकर्मणि कर्तव्ये सति । तदा ब्रह्मा ओमित्येतावत्परिमाणेनाक्षरेण तत् कर्मानुजानीयात् । 'कर्मप्रसवायामन्त्रित ओमित्यु-
क्त्वा यथाकर्म प्रसौति'[c] इति सूत्रम् । स्तौति—**एतद्–भवति** । एतदोमित्ये- 5. ३०,6.१
कमक्षरम् । त्रयीं विद्यां त्रीन् ऋग्यजुःसामलक्षणान् वेदानेकैकशः प्रति गतं भवति । त्रयोसारभूतव्याहृतित्रयोत्पन्नाकारोकारमकाररूपत्वात् । तथा चैतरेये वेदत्रयाद् व्याहृतित्रयोत्पत्त्यनन्तरमेवमाम्नायते[1]—'तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति । तानेकधा समभरत् । तदेतदोमिति'[d] इति ॥

इति पञ्चमः खण्डः

a. AB. 5. 33. 2.
b. ŚS. 4. 6. 10–11.
c. ŚS. 4. 6. 17.
d. AB. 5. 32. 2.

1. A. M. omit एवम्

इत्थमनेन प्रणवेनानुज्ञाते सत्यस्यानेन ब्रह्मणा त्रय्या विद्यया प्रसूतं[1]
भवति । वेदत्रयस्य प्रणवेऽन्तर्भावात् । किमिति ब्रह्मण्येवानुज्ञा प्रार्थ्यत
6. २ इत्यत्राह—**ब्रह्मणि-प्रतिष्ठितः** । ब्रह्मा यज्ञस्य प्रतिष्ठाहेतुर्भवति तद्वैकल्यप्रति-
संधानेन । 'यज्ञ उ ह वा एष प्रत्यक्षं यद् ब्रह्मा । ब्रह्मणि हि सर्वो यज्ञः प्रति-
6. ३-५ ष्ठितः'[a] इति श्रुत्यन्तरात् । **यद्-भिषज्यति** । यस्माच्च ब्रह्मा यज्ञप्रतिष्ठाहेतुः
तस्मादेव यद्वै यज्ञस्य स्खलितं न्यूनमुल्बणमतिरिक्तं वा किंचिद् ऋत्विगपराधात्
स्यात् तद् ब्रह्मणे निवेदनीयम् । यथा धातुवैषम्यजनितं शारीरं रोगविशेषं
भिषजे निवेदयति लोकस्तद्वत् । तन्निवेदितं स्खलितादि स ब्रह्मा त्रय्या विद्यया
त्रयीसारेण व्याहृतित्रयेण प्रायश्चित्तानुष्ठानेन भिषज्यति विषमं समीकरोति ।

वेदत्रयविहितकर्मापराधे ब्रह्मा व्याहृतिभिः प्रायश्चित्तिं कुर्यादित्युक्तमेव
6. ६-१९ विभागेन प्रदर्शयति—**अथ-इति** । ऋचि ऋग्वेदविहिते[2] कर्मणि यदि
किंचिदुल्बणं तीव्रगुणविशिष्टं दूषणमन्यथाकरणमकरणं वा भवेदुल्बणमधिकं
वा, तर्हि होत्रादिभिर्निवेदितः स्वयं विदितवृत्तान्तो वा स्रुचि चतुर्वारं गृहीत-
माज्यं गृहीत्वा 'भूः स्वाहा'[b] इति मन्त्रेण गार्हपत्याग्नौ प्रायश्चित्तरूपामाहुतिं
जुहुयात् । तत् तेन होमकर्मणा अयम्[3] ऋक्सारभूतं भूरित्यक्षरं ऋचि ऋग्वेदे
दधाति स्थापयति । अन्योन्यं संयोजयति । निधाय च तया ऋचा ऋचे ऋग्वेद-
विहितस्य कर्मणः प्रायश्चित्तिं प्रतिसंधानमेव ब्रह्मा करोति । यथा भिषक्
किंचित् सिद्धौषधं संपाद्य क्षतमुखे निक्षिप्य तेन व्रणविरोपणं करोति तद्वत् ।
'यज्ञस्य हैष भिषग् यद् ब्रह्मा'[c] इति श्रुत्यन्तरात् । अथ यदि यजुषीत्यादिक-
मेवमेव योज्यम् । अस्ति हविर्यज्ञसोमयागयोरत्र विशेषः—हविर्यज्ञे चेदेतत्
क्रियते[4] तर्हि अन्वाहार्यपचन एष होमः । यदि तु सोमयागे तर्ह्याग्नीध्रियाग्ना-
विति । अविज्ञातमिति । किंविषयमिदमित्यनिर्धारितविषयविशेषम् ॥

इति षष्ठः खण्डः

a. AB. 7. 26. 5.
b. TB. 2. 1. 9. 3.
c. AB. 5. 34. 2.

1. T. C. अनुज्ञातं
2. A. M. °विहित
3. A. M. च
4. T.C. क्रियेत

इदानीं व्याहृतीः प्रशंसति—**एष-करोति**। यो ब्रह्मा एताभिर्भूरित्यादि- 7. १
भिर्व्याहृतिभिः प्रायश्चित्तिं[1] करोति, एष ब्रह्मा यज्ञस्य व्यृद्धिं वैकल्यं समर्ध-
यति परिहरति। व्याहृतय एव यज्ञसमृद्धिहेतवः न तु प्रायश्चित्तान्तरमिति
प्रशस्ता एता व्याहृतय इत्यर्थः। **न-वेद**। किं च एता व्याहृतीः व्याहृतीनां 7. २, ३
महिमानं जानन् ब्रह्मा केनचित् प्रायश्चित्तजिज्ञासुना किमत्र विषये प्रायश्चित्तं
कर्तव्यमित्युपसृतः पृष्टः सन् अहं नैतत् त्वया पृष्टं प्रायश्चित्तं जानामीति न
ब्रूयात्। कुत इत्यत उक्तं—सर्वं ह वा इति। य एता व्याहृतीरेतासां महिमानं
जानाति स सर्वं प्रायश्चित्तजातं जानात्येव। व्याहृतीनामेव सर्वस्मिन् विषये
प्रायश्चित्तत्वात्। 'सैषा सर्वप्रायश्चित्तिः यदेता व्याहृतयः। तस्मादेषैव यज्ञे
प्रायश्चित्तिः कर्तव्या'[a] इति श्रुत्यन्तरात्। व्याहृतीनां सर्वप्रायश्चित्तत्वमेव[2]
दृष्टान्तप्रदर्शनेनोपपादयति—**तद्-संश्लेषिण्यः**। तत् तत्र लोके यथा दारुणः 7. ४, ५
वृक्षस्य श्लेष्म आर्द्रं मांसं परिगतं चर्मण्यं चर्मणि साधु अयःशङ्क्वादिसंश्लेषणं
संधानहेतुर्भवति, तथैवैता व्याहृतयो भूराद्याः सर्वस्यै त्रय्यै विद्यायै वेदत्रय-
विहितस्य यज्ञस्य संश्लेषिण्यः संधानकारिण्यो भवन्ति। तस्मादेताभिः
व्याहृतिभिरेव प्रायश्चित्तिं कुर्यात्।

इदानीं ब्रह्मणा कर्तव्यानि कर्माणि विधास्यन् प्रथमं स्वायतनसंस्कारार्थं
तद्गतमेकं तृणमुभयतश्छित्त्वा अवान्तरदेशे निरस्येदिति विधिं स्तौति—**अथ-
तत्**। ब्रह्मा सीदति निषीदत्युपविशत्यस्मिन्निति आहवनीयस्य दक्षिणभागसंबन्धि 7. ६, ७
स्थानं ब्रह्मसदनम्। तत्र बहूनि तृणानि सन्ति। तस्मादेकं तृणमादाय आद्यन्त-
भागयोश्छित्त्वा 'निरस्तः परावसुः'[b] इति मन्त्रेणावान्तरदिशि क्षिपेदिति
यदस्ति तेन एनत् स्थानं शोधयति। दुष्टांशनिरासेन शुद्धं करोत्येव। तस्मिन्
स्थाने ब्रह्मण आसिकां विधत्ते—**अथो-इति**। निरसनानन्तरम् 'इदमहम्'[c] 7. ८
इत्यादिना मन्त्रेण तस्मिन् स्थाने उपविशेत्। स्तौति—**अर्वावसुर्-इति**। 7. ९, १०
पुरा देवानां यज्ञमनुतिष्ठताम् अर्वावसुनामर्षिः ब्रह्मा बभूव। तं पूर्वतनं

a. AB. 5. 32. 6.
b. ŚB. 1. 5. 1. 23; ŚŚ. 1. 6. 6.
c. ŚŚ. 1. 6. 9.

1. T. C. omit
2. T. C. सर्वयज्ञ°

ब्रह्माणं अर्वावसुमेतदेतेन 'अर्वावसोः सदने' इति मन्त्रांशपठनेन स्वोपवेशनात्
पूर्वमुपवेशयति । अर्वावसुमेव प्रथममुपवेशयामीति प्रतिपत्त्या 'अर्वावसोः
सदने' इति मन्त्रं[1] पठेत् । किमिति तस्य प्रथममुपवेशनप्रतिपत्तिः क्रियत इत्यत
उक्तम्—अरिष्टमिति । अमुं यज्ञमसावर्वावसुररिष्टं विनाशरहितं करोतु इत्य-
7. ११ भिप्रायेणोपवेशयेत् । उपवेशनानन्तरं[2] कंचिज्जपं विधत्ते—**अथो-इति** ।
7. १२ स्तौति—**बृहस्पतिर्-ब्रह्मा** । देवानां यज्ञे बृहस्पतिर्ब्रह्मासीत् ॥

इति सप्तमः खण्डः

8. १ **तस्मिन्-इच्छते** । तस्मात् तस्मिन् ब्रह्मणि बृहस्पतौ[3] प्रत्यनुज्ञां त्वमिदानीं
ब्रह्मकर्म कुरु इत्येवंरूपां प्रार्थयते । प्रणीताप्प्रणयनादि हविष्कृदुद्वासनपर्यन्तं
8. २ वाग्यमनं विधत्ते—**प्रणीतासु-उद्वादनात्** । प्रणीताख्यास्वप्सु प्रणीयमानासु
आहवनीयाग्नेरुत्तरतः प्राप्यमाणासु सतीषु वाग्यमनं कर्तव्यम् । तच्च
8. ३,४ हविष्कृदाह्वानपर्यन्तं कर्तव्यम् । स्तौति—**एतत्-करोति** । एतत् प्रणीताप्प्रणय-
नादि हविष्कृदुद्वासनान्तं यत् कर्म तत् यज्ञस्य द्वारं प्रवेशस्थानं भवति । तेन
द्वारेण रक्षांसि प्रविशेयुर्यज्ञविघातार्थम् । एतद् एतेन वाग्यमनकर्मणा तद्
द्वारमशून्यं द्वारपालसहितं करोति । प्रसिद्धं हि लोके राजगृहादिषु द्वारपालेन
सर्वदा द्वारप्रदेशे सन्निहितेन भवितव्यम् । इतरथा कदाचिच्छिद्रान्वेषिणः
शत्रुपक्षीयाः प्रविशेयुरिति । तस्मादत्र यज्ञरक्षार्थं वाग्यमः कर्तव्यः । तथा च
सूत्रम्—'प्रणीताकाले वाग्यमनम् । हविष्कृता विसर्गः'[a] इति । वाग्यमन-
8. ५ विषयान्तरं दर्शयति—**इष्टे-प्रसवात्** । स्विष्टकृद्यागेऽतीते तदनन्तरमेवारभ्या-
नुयाजप्रसवपर्यन्तं वाग्यमः कर्तव्यः । [अनुयाजप्रसवो नाम 'ओं प्रतिष्ठ'[b] इति
समिदाधानाभ्यनुज्ञा । सूत्रितं च—'इष्टे च स्विष्टकृत्यनुयाजप्रसवेन विसर्गः'[c]
8. ६,७ इति । **एतद्-करोति** । गतम् ।

a. ŚŚ. 4. 7. 1–2.
b. VS. 2. 13; ŚŚ. 4. 7. 17.
c. ŚŚ. 4. 7. 3.

1. T.C पदं
2. T. C. उपवेशानन्तरं
3. T. C. add तं

इदानीं प्राशित्राख्यस्य पुरोळाशशकलस्य प्राशनं विधित्सुः प्रस्तौति—
**अथ–इति ।** अथेत्यर्थान्तराभिधाने । यत्र यस्मिन् काले तत् तदा प्राशित्राख्यं 8. ८-१८
पुरोळाशशकलं सवित्रे परिहृतवन्तः समर्पितवन्तः । परिहृतं तत् प्राशित्रं
तस्य सवितुः पाणी हस्तौ स्पृष्टमात्रं सत् प्रच्छिन्नाग्रौ द्विधाभूतावकरोत् ।
अथ देवाश्छिन्नपाणिं सवितारं दृष्ट्वा तस्य सवितुः अङ्गवैकल्यपरिहारार्थं
हिरण्यनिर्मितौ पूर्वाधिकशोभाशालिनौ कौचित् पाणी संपाद्य प्रकोष्ठभागाभ्यां
प्रतिसंहितौ कृतवन्तः । यस्मादेवं कृतवन्तः तस्माद्धेतोः तत्र तत्र वेदविषये
सविता हिरण्यपाणिरिति स्तूयते—'हिरण्यपाणिमूतये'[a] 'हिरण्यपाणिः सविता
विचर्षणिः'[b] इत्यादौ । अनन्तरं तत् प्राशित्रं भगाय परिहृतवन्तः । तदा तत्
प्रेक्ष्यमाणं तस्य भगस्याक्षिणी लोचने निर्जघान नितरां हिंसितवत् । तस्मा-
द्धेतोः भगोऽन्ध इति प्रसिद्धिर्जाता । तत् पूष्णे परिजह्रुः । तदा तस्य पूष्णो
दन्तान् प्राश्यमानं सद् अपातयत् । यस्मादेवं तस्माद्धेतोः दन्तरहितः अत
एव करम्भभागः प्रपिष्टभागः पूषेति प्रसिद्धिरासीत् । **ते–ऊचुः ।** एवं प्राशित्र- 8. १९
धारणासमर्थतया बहुषु देवेषु भग्नेषु ते देवा उक्तवन्तः ॥

इत्यष्टमः खण्डः

न खल्वविमृश्य यस्मै कस्मैचिदेतत् परिहरणीयम् । येनायं महाननर्थः
प्रादुरभूत् । किंतु य एव समर्थः तस्मै प्राशित्रं परिहर्तव्यम् । स च नान्यो
भवितुमर्हति, किंतु—**इन्द्रो–इति ।** इन्द्र एवायं हि देवानां मध्येऽतिशयेन 9. १-४
ओजसा बलेन च युक्तः, तस्य प्राशित्रधारणसमर्थत्वात् । तस्मा इन्द्राय एनत्
परिहरत इत्यूचुः । इत्थं देवैरुक्ते ऋत्विजस्तत् प्राशित्रं तस्मा इन्द्रायाहृत-
वन्तः । आहृतं च तत् स इन्द्रो ब्रह्मणा 'मित्रस्य त्वा चक्षुषा'[c] इत्यादिना
मन्त्रेण शान्तमकरोत् । यस्मादेवमिन्द्रो ब्रह्मणा शमयांचकार तस्मान्मन्त्र-
सामर्थ्यवित्त्वेन बृहत्त्वाद् वेद आह—इन्द्रो ब्रह्मेति । तथा चाह यास्कः—'ब्रह्मा

a. RV. 1. 22. 5.  b. RV. 1. 35. 9.
c. VSK. 2. 34; ŚŚ. 4. 7. 4.

परिवृढः श्रुतः ब्रह्म परिवृढं सर्वतः'[a] इति । 'तस्माद् ब्रह्माणं ब्रह्मिष्ठं कुर्वीत'[b]
इति च बृहदारण्यके पठ्यते । तस्माद् ब्रह्मणे प्राशित्रं परिहर्तव्यम् ।

9. ५ अथाहृतस्य प्राशित्रस्येक्षणं विधत्ते—**तत्-इति** । तत् प्राशित्रं 'मित्रस्य त्वा'[c]
9. ६ इति मन्त्रेण पश्येत् । स्तौति—**मित्रस्य-शमयति** । तत् तेन मन्त्रपाठयुक्तेने-
क्षणेन एतत् प्राशित्रं मित्रस्य देवानां मध्ये शिवस्य देवताविशेषस्य चक्षुषा
सर्वानुग्राहकेण शान्तं करोति । तैत्तिरीये चैतस्यामेव प्राशित्रहरणविषयायां
कथायामाम्नायते—तत्र पूषदन्तपातानन्तरं बृहस्पतये प्राशित्रपरिहार-
माम्नाय 'सोऽबिभेद् बृहस्पतिरित्थं वाव स्य आर्तिमारिष्यतीति । स एतं
मन्त्रमपश्यत् सूर्यस्य त्वा चक्षुषा प्रति पश्यामीत्यब्रवीत् न हि सूर्यस्य चक्षुः
9. ७ किं चन हिनस्ति'[d] इति । प्रतिग्रहं विधत्ते—**अथ-इति** । स्तौति—**एताभिः-**
9. ८ **शमयति** । सवित्रश्विपूषाख्याभिर्देवताभिरेतत् प्राशित्रं शान्तं करोति ।
9. ९ वेद्यन्तर्विधानं विधत्ते—**तद्-इति** । प्रतिग्रहानन्तरं तत् प्राशित्रं वेद्यां स्तीर्णं
बर्हिः किंचिदुत्सार्य भूमौ दण्डभागं प्राञ्चं कृत्वा स्थापयेत् । स्तौति—
9. १०,११ **पृथिवी-तत्** । यस्मात् पृथिवी अन्नानां व्रीहियवादिभेदभिन्नानां शमयित्री
प्राणिनामुपयोग्यतासंपादयित्री, तस्माद्धेतोः । तत् तेन वेद्यन्तरवस्थापनेन
पृथिवीसंबन्धसंपादनेन एतत् प्राशित्रं शान्तं करोत्येव । अथ प्राशनं विधत्ते—
9. १२ **तत-इति** । ततो वेद्यन्तःप्रदेशात् प्राशित्रमादाय 'अग्नेष्ट्वास्येन'[e] इति मन्त्रेण
9. १३,१४ भक्षयेद् दन्तैरचूर्णयन् । **अग्निर्-तत्** । अन्नानामग्निसंबन्ध एवोपयोगयोग्यतेति
प्रसिद्धम् । 'अग्निरेना स्वदयति इदमाहरतेदमाहरतेदमाहरत'[f] इति श्रुत्यन्त-
9. १५-१७ राच्च । भक्षणानन्तरमपामाचामः कर्तव्य इत्याह—**अथ-क्रियते** । गतम् ॥

इति नवमः खण्डः

10. १ आचमनानन्तरं नासिकादिप्राणसंमर्शनं विधत्ते—**अथ-संमृशते** । स्तौति—
10. २ **तद्-भिषज्यति** । अत्र प्राशित्रप्राशनकर्मणि । प्राणानामिन्द्रियाभिमानि-

a. N. 1. 8. 1.
b. AA. 3. 2. 3.
c. VSK. 2. 34; ŚŚ. 4. 7. 4.
d. TS. 2. 6. 8. 5-6.
e. VS. 2. 11; ŚŚ. 4. 7. 8.
f. AA. 2. 1. 7.

देवतानाम् । क्रूरीकरणं स्वायतनतः क्षोभजननम् । विलिष्टत्वं शक्तिप्रघातम् । तच्च प्राशित्रस्य क्रूरत्वेनासह्यशक्तित्वात् । तथा च ब्राह्मणान्तरम्—'अप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं प्राश्नाति'[a] इति । तत् क्रूरीकरणादिकम् । एतद् एतेन प्राणसंमर्शनकर्मणा आप्याययति । अस्यैव व्याख्या भिषज्यतीति । स्वस्थानप्रतिष्ठापनेन स्वशक्तिसामग्र्यसंपादनेन च क्रूरीभावादिनिमित्तं ब्रह्मणोऽनिष्टापत्तिं निवर्तयतीत्यर्थः । प्राणसंमर्शनानन्तरं नाभिसंमर्शनं विधत्ते—**इन्द्रस्य-अभिमृशते** । स्तौति—**इन्द्रो-शमयांचकार** । 10.३10.४

'अथ यत्र ह तद् देवा' इत्यादिकेनैतदन्तेन वाक्यसंदर्भेण प्राशित्रप्राशनं विहितम् । इदानीं 'ब्रह्मन् प्रस्थास्यामः'[b] इत्यध्वर्युणोक्ते 'देव सवितः'[c] इत्यादिकमन्त्रस्य पाठं विधत्ते—**अथ-प्रसवाय** । प्रसौति अनुजानाति समिध- 10. ५,६
मिति शेषः । 'ओं प्रतिष्ठ'[d] इति समिधमनुजानीयाद् इत्युक्तत्वात् । प्रसविता अनुज्ञाता । तथा च मन्त्रः—'उतेशिषे प्रसवस्य त्वमेक इत्'[e] इति । इदित्येवकारार्थः । कर्मणः समिदाधानाख्यस्य प्रसवायानुज्ञार्थं सवितृदेवत्यमन्त्रजपः संपद्यते ।

एवं तावत् 'प्रजापतिस्तपोऽतप्यत' इत्यारभ्य 'कर्मण एव प्रसवाय' इत्यन्तेन प्रबन्धेन ब्रह्मणानुष्ठेयं कर्मजातं कार्त्स्न्येन प्रतिपादितम् । इदानीं पूर्वं विहितान् हविर्यज्ञान् ऊर्ध्वं विधास्यमानांश्च सोमयागान् अधिकारिणोऽभिरुचि-
संपादनार्थम् अभिष्टोतुमारभते—**प्रजापतिः-ससृजे** । पुरा जगत्कारणभूत 10. ७
ईश्वरः प्रजाः स्रष्टुकामः प्रथमं यज्ञं सृष्टवान् किल । 'यज्ञेन वै प्रजापतिः प्रजा
असृजत'[f] इति श्रुत्यन्तरात् । **सो-असृजत** । अथैतेन प्रजाः सिसृक्षुः अग्न्याधेयं 10. ८
रेतस्त्वेन कल्पितवान् । रेतःसिक्त्या हि प्रजोत्पत्तिः संभवति । अग्न्याधेयस्य
च सकलयज्ञप्रवृत्तिहेतुत्वेन प्राथम्यात् रेतःसादृश्यम् । **देवान्-अग्निहोत्रेण** । 10. ९
रेतःसेकादनन्तरं आधानानन्तरानुष्ठेयेनाग्निहोत्रकर्मणा देवमनुष्यासुरान्
सृष्टवान् । **दर्शपूर्णमासाभ्याम्-असृजत** । अनन्तरम् अग्निहोत्रानन्तरमनुष्ठे- 10. १०

a. TS. 2. 6. 8. 7.
b. APŚ. 3. 4. 5.
c. TS. 1. 7. 7. 1.
d. VS. 2. 13; ŚŚ. 4. 7. 17.
e. RV. 5. 81. 5.
f. TS. 5. 3. 5. 13.

याभ्यां दर्शपूर्णमासकर्मभ्याम् अखिलजगदीश्वरमिन्द्रं सृष्टवान् । देवमनुष्यासुर-सृष्ट्यभिधानं सकलेतरप्रजासृष्ट्युपलक्षणार्थम् । ईशितव्यसृष्ट्यनन्तर-
10.११,१२ मेवेश्वरसृष्ट्यभिधानौचित्यात् । **तेभ्यः–इति** । एवं देवादीन् सृष्ट्वा तेषां जीवनार्थमेतद् वक्ष्यमाणमन्नपानत्वेन सृष्टवान् । अद्यते भक्ष्यत इत्यन्नम् । पीयत इति पानम् । उभाभ्यां ह्यन्नपानाभ्यां लोकयात्रा सिध्यति । किं तदन्नपा-नमित्यत्राह—एतानुक्तस्वरूपान् दाक्षायणयज्ञादीन्, सौम्यं सोमलतारसगुण-कमध्वरं सोमयागांश्च । हविर्यज्ञानन्नत्वेन सृष्टवान्, पानत्वेन सोमयागमिति विभागो द्रष्टव्यः । तस्मात् सकलजगत्प्रभवस्थितिहेतुत्वात् प्रशस्तोऽयं यज्ञः ।

10.१३,१४ इदानीं विशेषतो हविर्यज्ञान् प्रशंसति—**अथो–आग्रयणेन** । काम्यन्तेऽभि-लष्यन्त इति कामाः पुत्रपशुस्वर्गादयः । देवादयो यं यमविशिष्टमेव कामं पश्वादिकमिच्छया गोचरीकृतवन्तः तं तमेव काममेतैः दाक्षायणयज्ञप्रभृतिभिरयनैः प्राप्तवन्तः । आग्रयणेन अन्नाद्यमाप्तवन्तः । उक्तं हि प्राक्—'आग्रयणेनान्नाद्य-कामो यजेत'[a] इति । इदानीमयनशब्दनिर्वचनेनापि तानेव हविर्यज्ञान् स्तौति—
10.१५,१६ **तद्–लोकस्य** । कस्मादेते दाक्षायणयज्ञादयोऽयनशब्दाभिधेयाः संपन्ना इति केचिज्जिज्ञासवः पृच्छन्ति । तत्रोत्तरं ब्रूयात् । किमत्र दुर्ज्ञानम् ? अय वय गतौ इति हि धातुः[b] । अतः सर्वेषां कामानां फलानां गमनानि गमयन्ति प्रापयि-तॄणीति सकलप्राप्तिहेतूनीति व्युत्पत्त्या अयनशब्दवाच्यानि संपन्नानि । कामान्तर्भावेऽपि स्वर्गस्य लोकस्य प्राधान्यात् पृथग् ग्रहणम् ॥

इति दशमः खण्डः

11. १. इदानीं चातुर्मास्यकर्माणि विशेषतः प्रशंसति—**चातुर्मास्यैः–अमृतत्वम्** । पुरा देवादयः चातुर्मास्यैः वैश्वदेववरुणप्रघाससाकमेधशुनासीर्याख्यैः कर्मभिः स्वर्गलोकादीनाप्तवन्तः । सर्वा अष्टीः सर्वकामोपभोगान् । सर्वमाभूतसंप्लव-मवस्थानलक्षणममृतत्वं च । अथ प्रजापतित्वसंपादनेन तान्येव स्तौति—
11. २ **स–चातुर्मास्यानि** । संवत्सरः संवत्सराभिमानी । अत एव चतुर्विंशः अर्धमास-

a. KB. IV. 6. २. b. *Dhātupāṭha*. 508.

रूपचतुर्विंशतिसंख्यावयवोपेतः । चातुर्मास्यावयविनि प्रजापतित्वं संपाद्य तद-
वयवमुखादिरूपत्वं संपादयति—**तस्य-शुनासीर्यम्**। तस्य चातुर्मास्यात्मकस्य 11. ३-१०
प्रजापतेः यद् वैश्वदेवाख्यं पर्वास्ति तन्मुखत्वेन जानीयात् । आद्यत्वसादृश्यात् ।
यौ दर्शपूर्णमासौ तौ पर्वाणि । आन्तरालिकदर्शपूर्णमासेष्टयः सर्वाणि संधय
इति ज्ञातव्यम् । यान्यहोरात्राणि सन्ति तानि क्रमेणास्थीनि मज्जाश्चेति द्रष्ट-
व्यम् । चातुर्मास्यात्मकस्य प्रजापतेः बाहुस्थानीयान् वरुणप्रघासान् विद्यात् ।
तत्र च कर्मद्वित्वं हेतुर्द्रष्टव्यः । साकमेधदिनात् पूर्वेद्युर्यास्तिस्र इष्टयः सन्ति
ताः क्रमेण प्राणापानव्यानत्वेन ज्ञेयाः । त्रित्वसादृश्यादानन्तर्याच्च । यत् साक-
मेधे महाहविस्तदात्मा जीव इति ज्ञेयम् । मध्यस्थितत्वसादृश्यात् । या इमा
अस्मिन् देहे दृश्यमानाश्चक्षुराद्यधिष्ठात्र्यो देवतास्ताः चातुर्मास्यप्रजापतिशरीरे
महाहविष ऊर्ध्वमनुष्ठेयाः पित्र्याद्या इष्टय इति जानीयात् । आत्मसन्निहित-
त्वादिसादृश्यात् । यत्त्वन्त्यं शुनासीर्याख्यं कर्म तत् प्रजापतेः प्रतिष्ठा पादाविति
ज्ञेयम् । अन्त्यावयवत्वादिसादृश्यात् ।

इत्थं चातुर्मास्यानां प्रजापतिरूपत्वं संपादितम् । तदेतदुपसंहरति—
**स-चातुर्मास्यानि**। चातुर्मास्यानीति यदस्ति, तच्चतुर्विंशः संवत्सराभिमानी 11. ११
प्रजापतिरेवेति द्रष्टव्यम् । प्रकारान्तरेण प्रशंसति—**सर्वं-वेद** । योऽयं चतुर्विंशः 11.१२-१४
संवत्सररूपः प्रजापतिः स एवेदं सर्वं जगत् तत्प्रसूतत्वात् तत्प्रतिष्ठत्वात् तदप्य-
यत्वात् । चातुर्मास्यान्यपि सर्वं सर्वफलसाधनत्वात् । तच्चोक्तं प्राक्—
'चातुर्मास्यैराप्नुवन्त्स्वर्गाँल्लोकान्'[a] इत्यादि । यस्मादेवं तस्मात् सादृश्य-
सद्भावात् साध्यसाधनभावयोग्यत्वात् सर्वरूपेण चातुर्मास्यकर्मणा सर्वरूपं
प्रजापतिमाप्नोति यजमानः । यश्चायजमानोऽप्येवमुक्तप्रकारेणानयोः साध्य-
साधनभावं वेद जानाति सोऽपि यथोक्तं फलमाप्नोति । अभ्यासोऽध्यायपरि-
समाप्त्यर्थः ॥

इत्येकादशः खण्डः

a. KB. VI. 11. १.

यो यष्टृत्वं प्रपन्नो यजति चरुपुरोळाशसोमादिभावं
बिभ्रद्यो हूयतेऽग्नौ वहति तदखिलं योऽग्निरूपेण भूयः ।
संप्रीतो देवतात्मा वितरति विविधं वाञ्छितं यश्च यष्ट्रे
सोऽयं पूर्णान् पुमर्थान् प्रदिशतु भगवान् पुण्डरीकेक्षणो नः ॥

इत्येकादशसंख्यखण्डखचितो रुद्राष्टमूर्तिस्तुति-
प्रोद्यच्छूलगवाख्यपाशुकविधिब्रह्मक्रियावल्प्तिकृत् ।
अध्यायो विहिताखिलक्रतुमुतिः कौषीतकिब्राह्मण-
व्याख्याने सुखदे समस्तसुधियां षष्ठः प्रतिष्ठां गतः ॥

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
षष्ठोऽध्याय इह प्रतिष्ठितिमगात् कौषीतकिब्राह्मण-
व्याख्याने विशदोक्तशूलगवकब्रह्मक्रियेज्यास्तवः[1] ॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**प्रथमदशके षष्ठोऽध्यायः**

1. T. C. omit this verse

अथ

## सप्तमोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
तुहिनाद्रिसुतास्तनार्द्रशीतद्रवमुद्राङ्कितमुग्धबाहुमध्या ।
द्रुहिणालयवासिनी चिरं मे करुणा कापि चकास्तु चित्तरङ्गे ॥
भूमा सोमाध्वराणामिह विततिरशेषापि नानाविशेषा
सैषा यस्यैव भूषा समुचितरचना कुण्डलाद्येव हेम्नः ।
अध्यायैरुत्तरैर्द्वादशभिरवसरायातमाम्नातुमादा-
वग्निष्टोमं तमग्र्यं क्रतुमथ तु विधातुं प्रतुष्टूषति स्म ॥

तत्र तावद् विधित्स्यमानसोमयागाङ्गभूतां दीक्षणीयानामधेयां कांचिदिष्टिं विधित्सुः दीक्षातत्कर्तृस्वरूपप्रदर्शनतत्प्रशंसामुखेन तदुत्पत्तिविधिं तदिति-कर्तव्यताविधिं च प्रदर्शयितुं प्रस्तौति—**वाग्-धत्ते**। इह संकल्पनार्थाद् दीक्षते- 1. १-५
र्धातोः करणेऽनीयर्प्रत्ययोत्पत्तेः दीक्षतेऽनेनेति दीक्षणीयपदोत्पत्तिः । तत्र येयं दीक्षा नाम सा वागेव । वाक्छब्दोऽत्र सामान्यवचनोऽपि सत्यवचन-रूपे तद्विशेषे वर्तते । अतः सत्यवदनरूपा वागेव दीक्षेत्युक्तं भवति । ननु विहितानेकनियमजन्यः कर्तृगतः संस्कारविशेष एव दीक्षा नाम । तदाहुः— 'दद्याच्च दिव्यभावं क्षिणुयाद् दुरितान्यतो भवेद् दीक्षा'[a] इति । कथं तस्या वागात्मकत्वावधारणम् ? न हि गोरश्वत्वमुच्यमानमनुन्मत्तो जनः श्रद्दध्या-दित्याशङ्क्य कारणे कार्याभेदोपचारादयमदोष इत्युक्तम्—वाचा हि दीक्षत इति । तथा च वाजसनेयके—'कस्मिन्नु दीक्षा प्रतिष्ठितेति । सत्य इति । तस्मादपि दीक्षितमाहुः सत्यं वदेति'[b] । अस्यार्थः—येयं सोमस्य प्रतिष्ठात्मिका दीक्षा सा कस्मिन् प्रतिष्ठिता । कार्यवस्तुनो हि कारणवस्तुन्येव प्रतिष्ठा संभवति । तेन दीक्षाप्रतिष्ठानभूतं वस्तु वक्तव्यमिति प्रश्नः । उत्तरं सत्य इतीति । सत्सु भवं सत्यम् । तद्भवत्वं च वाचः स्वरूपतोऽर्थतश्च । स्वरूपतो

a. Cf. *Viśvasāratantra*, Paṭala II. b. ŚB. 14. 6. 9. 24.

विशिष्टसंस्कारशालित्वम् । यदाहुः—'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवति'[a] इति । अर्थतस्तु विशिष्टार्थव्यभिचारविरहरूपः । तदेतदुभयरूपं वाचः सत्यत्वम् । तथाभूता वागेव दीक्षाप्रतिष्ठा कारणमिति यावत् । यस्मात् सत्ये दीक्षा प्रतिष्ठिता तस्मादेव हेतोर्याज्ञिका दीक्षितं प्रति वदन्त्यनुशासन्ति सत्यमेव वदेदिति । सत्यवदनं हि दीक्षासंपत्तौ पुष्कलं कारणम् । अतः कारणविनाशे सति कार्यविनाशोऽवश्यंभावीति दीक्षानिष्पत्त्युपयोगितया सत्यवदनं कर्तव्यमिति तेषामभिप्राय इति । तथान्यत्रापि श्रुतम्—'ऋतं वाव दीक्षा। सत्यं दीक्षा। तस्माद् दीक्षितेन सत्यमेव वदितव्यम्'[b] इति । इहाप्युपरिष्टाद् विशिष्टाया वाचो दीक्षासंपत्तिनिबन्धनत्वाभिप्राया देवानां वाचं प्रति वचनरूपा काचिदाख्यायिका श्रूयते—'देवा वै दीक्षिष्यमाणा वाचमपासादयन्त । बहु त्वमुच्चावचं निगच्छसि । सत्यमया उ वयं दममया बुभूषामः'[c] इत्यादि । एषा च स्वावसर एव व्याख्यास्यत इति नेह व्याख्यायते। अतः सत्यरूपाया वाचो दीक्षायाश्च कार्यकारणभावसंभवात् तदभेदव्यपदेशस्य च 'आयुर्घृतम्'[d] इत्यादौ वेदे 'लाङ्गलं जीवनम्'[e] इत्यादौ लोके च बहुलमुपलब्धचरत्वादिह वाग् दीक्षेति सामानाधिकरण्यव्यपदेशो निरपवाद इत्यर्थः । अथवा वाक्च्छब्दोऽत्र[1] चक्षुरादिसकलेन्द्रियान्तरोपलक्षणार्थो द्रष्टव्यः । प्राधान्यात्तु तयेतरोपलक्षणम् । प्राधान्यं च 'तस्मात् प्राणानां वागुत्तमा'[f] इति ब्राह्मणात् । 'वाचं देवीं मनोनेत्रां विराजमुग्रां जैत्रीमुत्तममेह भक्षाम् । वागग्रे गा अग्र एतु'[g] इत्यादिमन्त्राच्च । तेन वागादिसकलेन्द्रियाणां स्वाभाविकप्रवृत्तिप्रतिरोधनेन शास्त्रीयप्रवृत्तिसंमुखीकरणसाध्यत्वाद् दीक्षायास्ताद्रूप्योपचारः । तथा च कैशिनीदीक्षायां वागादीनां सर्वेषां दीक्षासाधनत्वं समनन्तरमेव समाम्नायते । केवलमत्र प्राणस्य दीक्षितत्वमुक्तम् । तत्र तु वागाद्यधिष्ठातृदेवतानामिति विशेषः । तत्र च प्राणस्याध्यात्मावच्छिन्नस्य सर्वदेवतात्मकत्वाद्

a. MB. on Pā. 6. 1. 84.
b. AB. 1. 6. 6.
c. KB. IX. 1. १२-१४.
d. TS. 2. 3. 2. 2.
e. **Bṛh U. Bhā. Vārttika,** ***Sambandha*** **8.**
f. TB. 1. 3. 4. 5.
g. ASS. 4. 13. 2. ( The ordr is reverse )

1. T. असौ for अत्र

अभेदसंभवाद् अविकारिपुरुषभेदापेक्षया विरोधसमाधिरनुसंधेयः। तथा चात्रैव पठिष्यति—'सर्वेण ह वा एष आत्मना सर्वेण मनसा यज्ञं संभरते यो यजते'[a] इति। इह खलु द्विविधानि दीक्षितत्वसाधनानि श्रुतिदर्शितानि। कानिचिदाग्नावैष्णव्यादीष्टिप्रधानानि नानाविधविहितकर्मकलापरूपाणि। अन्यानि कानिचिदाभ्यन्तराणि वागादीन्द्रियाणां स्वाभाविकप्रवृत्तिनिरोधनेन[1] शास्त्रीयविशिष्टव्यापाराभिमुखीकरणेन च तत्तदुचितसंकल्पविशेषरूपमानसव्यापाररूपाणि। साधनवर्गद्वयसाध्यः कर्तृगतमलापकर्षगुणविशेषाधानलक्षणः कश्चिदतीन्द्रियः शास्त्रैकावसेयो यजमानात्मसत्तामात्रानुबन्धितया अनुवर्तमानस्वभावः सकलोत्तरकर्मचित्रकर्मभित्तिस्थानीयः संस्कारविशेषो दीक्षा नाम। अत एवाभियुक्तानां दीक्षाशब्दनिर्वचनम्—'दद्याच्च दिव्यभावं क्षिणुयाच्च मलान्यतो भवेद्दीक्षा'[b] इति। एतच्च सर्वत्र तत्तद्ब्राह्मणवाक्येषु पर्यालोचितेषु व्यक्तं च स्वयमेव। अत एव तैत्तिरीये प्रथमं देहतोऽपि बहिर्भूतानां प्राचीनवंशकरणादीनामपि यजमानस्य देवत्वसंपत्तिहेतुत्वेन देहवर्तिदीक्षासाधनतुल्ययोगक्षेमत्वं 'प्राचीनवंशं करोति'[c] इत्यादिना दर्शितम्। तत्र बाह्यदीक्षासाधनेभ्यो वागादीन्द्रियसंयमरूपसाधनानाम् अभ्यर्हितत्वमभिप्रेत्य भगवत्कौषीतकिमहामुनिवदनारविन्दनिष्यन्दिता[2] भगवती श्रुतिः वाग् दीक्षेति प्रथमं वागादिदेवतासमष्ट्यात्मकमुख्यप्राणदीक्षां वागादीन्द्रियसंयमसाधनसाध्यां दर्शयित्वा वर्गद्वयसाध्याया दीक्षाया वस्तुत एकत्वात् तत्प्रशंसामुखेन प्रस्तुतकर्मरूपदीक्षासाधनविधानम् आग्नावैष्णवमित्यादिना समनन्तरमुपचिक्षेप। अन्ते तु स्वाभिमततयोपक्षिप्तमेव आभ्यन्तरदीक्षासाधनाभ्यर्हितत्वम् 'अथातः कैशिनी दीक्षा'[d] इत्यादिना बाह्यसाधनसमुच्चयेन आभ्यन्तरसाधनानुष्ठानं विदधत्युपसंहरिष्यति। भवतु वाचो दीक्षारूपत्वम्, कस्य पुनरिह कार्यकारणसंघातमध्ये कथितस्वरूपा दीक्षेति जिज्ञासायामुक्तम्—प्राणो दीक्षित इति। योऽयं देशकालकर्मद्रव्यदेवताद्यात्मकः सर्वजगत्कारणभूतः सर्वव्यापी

a. KB. X. 6. १७.
b. Cf. *Viśvasāratantra*, Paṭala II.
c. TS. 6. 1. 1. 1.
d. KB. VII. 5. १.

1. T. प्रतिरोधनेन for निरोधनेन
2. T. विनिष्यन्दिता for निष्यन्दिता

प्राणदेवः स देहमध्येऽवस्थितिमनुभवन् चक्षुराद्यभिमानिदेवतासमष्ट्यात्मकः स्वकर्मसमुपार्जितानादिशुभाशुभव्यामिश्रकर्मवशाद् इहलोकपरलोकसंचारी पञ्चवृत्तिर्मुख्यः प्राणः स एव दीक्षितो वस्तुतः, नेतरे चक्षुरादिदेवा अग्न्यादयस्तदंशभूताः। तेषां तदनपेक्षवृत्तित्वविरहात्। अत एतन्नाम्नैव प्राण इति तेषां व्यपदेशः। एवं दीक्षादीक्षितयोः स्वरूपं प्रदर्श्य तत्प्रशंसां सर्वकामावाप्तिहेतुना करोति—वाचा वै इति। उभयतः उभयोः पार्श्वयोः संदंशन्यायेन गृहीत्वेत्यर्थः। ग्रह एव हि बहुद्रव्यसमुदायात्मकस्य गरीयसः सौकर्येण परिग्रहसंभवः। सर्वान् कामान् ऐहिकानामुष्मिकांश्च। पठिष्यति हि—'एष वा उ कामाय कामायाह्रियते'[a] इति।

1. ६-९ इदानीं दीक्षणीयेष्टिं तावद् विधत्ते—**आग्नावैष्णवम्–आप्नोति।** अग्निर्विष्णुश्चाग्नाविष्णू। तौ देवता अस्येति तथा। एकादशसंख्येषु कपालेषु श्रप्यत इति तथा। अवरे प्रथमे अर्धे स्थाने भवतीति तथा। आद्य इत्येतत्। तथा च परस्मिन्नुपरि अर्धे स्थाने भवतीति परार्ध्यः। उत्तम इत्येतत्। तथा च मन्त्रः—'अग्निर्मुखं प्रथमो देवतानाम् संगतानामुत्तमो विष्णुरासीद्'[b] इति। 'अग्नाविष्णू वै देवानामन्तभाजौ'[c] इति च। वैशब्दोऽयं प्रसिद्धिद्योतनार्थः। तथा च ब्राह्मणान्तरम्—'अग्निर्वै देवानामवमो विष्णुः परमः तदन्तरेण सर्वा अन्या देवताः'[d] इति। तत् तेन[1] दीक्षणीये कर्मणि योऽयमग्निः प्रथमः यश्चायमन्तवर्ती विष्णुस्ताभ्यामुभाभ्यां तन्मध्यवर्तिनीः सर्वा इन्द्रादिदेवता उभयोः पार्श्वयोः सुदृढं संदंशेनेव गृहीत्वा तासां सर्वासां समानभोगस्थानतामयं यजमानः प्राप्नोति। इह देवताः सौमिक्य एव सर्वशब्देन गृह्यन्ते। तासां चाग्नाविष्णुभ्यामन्तभाग्भ्यां परिग्रहणमुपपन्नमेव। आज्याग्निमारुतशस्त्रयोः 'अग्निर्ज्योतिर्ज्योतिः'[e] 'विष्णोर्नु कम्'[f] इति तयोः प्रथमतश्चान्ततश्च शस्यमानत्वात्।

a. KB. XVI. 9. ११. b. KS. 4. 16.
c. KB. XVI. 8. ३७. d. AB. 1. 1. 1.
e. VS. 3. 9. f. RV. 1. 164. 1.

1. T. ततेस्मिन् for तत् तेन

उक्तमेव सर्वदेवतापरिग्रहं हेतूकृत्य क्वचित् प्रसंगात् संसवदोषपरिहारोपायमुपक्षिपति—**तस्मात्–भवन्ति** । विमतयोर्यजमानयोः सोमयागसंनिपातः 1. १०,११
संसवः । स तावन्न न्याय्यः । यदि कदाचित् प्रसज्येत तर्हि तयोरन्यतरः पूर्वः सन् दीक्षां कुर्यात् । प्रथमं दीक्षणीयेष्टिं कुर्यात् । हि यस्मात् पूर्वस्य पूर्वं दीक्षां कृतवतः सौमिक्यो देवता उक्तप्रकारेण परिगृहीता एव भवन्ति । देवताभिरपरिगृहीतहविष्ट्वलक्षणो हि संभूय सोमयागकरणे दोषः । देवतानामुभयपरिग्रहतौल्ये सति साधारण्यादन्यतरहविर्ग्रहणविनिगमनकारणविरहेण डोलायमानमानसतया उभयोर्यागदेशगमनासंभवापत्तेः । सत्येवं च तासामेकेनैव प्रथमं दीक्षितेन पूर्वं परिग्रहादुक्तो दोषो नाविःष्यादिति प्रशस्तोऽयमखिलदेवतापरिग्रह इत्यर्थः । इदानीं प्रयाजानुयाजप्रधानयागान् विधत्ते—**अशरीराभिः–दीक्षते** ॥ 1. १२.

इति प्रथमः खण्डः

**प्राणा–सायुज्यम्** । यजमानस्यामृतत्वसंपत्तिहेतुत्वाद् दीक्षाणामशरीर- 2. १-६
त्वम् । कास्ताः प्राणदीक्षा इत्यपेक्षायां प्रयाजानुयाजहविर्यागा इत्युक्तम्—प्राणा वा इत्यादि । तत्र ये प्रयाजास्ते यजमानस्य प्राणा एव प्राथम्यसाम्यात् । वृत्तिबहुत्वापेक्षं च बहुवचनम् । एवमपाना अनुयाजा इत्यत्रापि । तत् तेन प्रयाजानुयाजचरणकर्मणा प्राणापानानां दीक्षैव संपाद्यते । हविषा प्रचरन्तीति यदस्ति तत् तेन यजमानस्य शरीरं सूक्ष्मरूपं दीक्षत इत्यनुषंगः । सोऽयं यजमानः शरीरदीक्षामात्रेणैव सर्वान् कामानाप्नोति[1] । शरीरस्यैव ऐहिकामुष्मिककामोपभोगस्थानत्वात् । या तु प्रयाजानुयाजयागसाधना प्राणापानदीक्षा तया सर्वान् कामान् भुक्त्वा सर्वासामग्न्यादिदेवतानां समानलोकतां क्रमेण सायुज्यं च प्राप्नोति । पञ्चवृत्तेः प्राणस्यैव सर्वदेवतात्मकत्वाद् अध्यात्मपरिच्छेदपरित्यागेन अनवच्छिन्नप्राणदेवतात्मकत्वं प्राप्नोतीत्यर्थः ।

इदानीं प्रकृतितः प्राप्तं सामिधेनीपाञ्चदश्यम् आज्यभागयोर्वार्त्रघ्नत्वम् अप्राप्तं हविर्याज्यापुरोनुवाक्ययोर्विधास्यमानयोः त्रिष्टुप्छन्दस्कत्वं च वज्र-

1. T. प्राप्नोति for आप्नोति

2. ७-१५ संबन्धित्रिःसमृद्धत्वसंपादकत्वेनैकीकृत्य स्तौति—**पञ्चदश-नुदते** । वज्रस्य पञ्चदशत्वं पञ्चदशसंख्यावयवोपेतत्वात् । आज्यभागयोर्वार्त्रघ्नत्वं वज्रत्वे हेतुः । वृत्रकर्मकहननार्थधातुमत्त्वाद् वार्त्रघ्नत्वम् । वज्रस्य च वृत्रहननहेतुत्वं सुप्रसिद्धम् । त्रिष्टुभो वज्रत्वं बलवीर्यरूपत्वात् । एतेन पाञ्चदश्यवार्त्रघ्नत्व-त्रिष्टुप्छन्दस्कत्वमेलनरूपेण, अत एव त्रिवारमाप्यायितेन समग्रवीर्यमहिमशालिना वज्रेण । पाञ्चदश्यस्य प्रागुक्तं ब्राह्मणमपि विषयभेदादिह पुनरुक्तमेवेति

2. १६ वार्त्रघ्नत्वस्य प्रातिस्विकं ब्राह्मणं प्रागुक्तमेवातिदिशति—**वज्रो-उक्तौ** । यौ वज्रतया स्तुतौ वार्त्रघ्नावाज्यभागौ स्तः तावुक्तौ । उक्तब्राह्मणाविति यावत् । 'अथ यत् पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवतः'[a] इत्यादिकं दर्शपूर्णमासप्रकरणपठितम् इहातिदेष्टव्यमित्यर्थः ।

2. १७-२१ इदानीं हविर्यागे याज्यापुरोनुवाक्ये[1] दर्शयति—**अथ-याज्यारूपम्** । अनन्तरं हविर्यागस्य याज्यापुरोनुवाक्ये वक्ष्येते इति शेषः । उक्तं हि प्राक्— 'आवत्यो हूतवत्यः पुरोनुवाक्याः'[b] इति । देवताया आङुपसर्गबलादागमनार्थप्रतीतेः हविरादानार्थप्रतीतेर्वा आवत्त्वमभिरूपम् । याज्याया उच्चरण्यदित्यत्र उच्छब्दश्रवणाद्धविषो देवतार्थमुद्यतत्वावभासादाभिरूप्यम् । तैत्तिरीये तु पुरोनुवाक्यायाज्यावषट्काराणां पृथक् पृथग् विनियोगो दर्शितः—'प्रैवैनं पुरोनुवाक्ययाऽऽह प्रणयति । याज्यया गमयति । वषट्कारेणैवैनं पुरोनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति वषट्कारेण स्थापयति'[c] इति । अथ प्राकृत्या-

2. २२-२४ वेव स्विष्टकृतो याज्यापुरोनुवाक्ये दर्शयति—**त्रिष्टुभौ-दधाति** । 'पिप्रीहि'[d] 'अग्ने यदद्य'[e] इत्येतौ त्रिष्टुभौ । अन्यद् गतम् । सर्वं चैतत् सूत्रकृता दर्शितम्— 'दीक्षणीयाग्नावैष्णवी पौर्णमासीविकारः । पञ्चदशसामिधेनीकोपांशुहविर्विराजौ स्विष्टकृतो नित्ये वा'[f] इति ॥

इति द्वितीयः खण्डः

a. KB. III. 5. १५.
b. KB. III. 6. १२.
c. TS. 2. 6. 2. 5-6
d. RV. 10. 2. 1.
e. RV. 6. 15. 14.
f. ŚS. 5. 3. 1-6 ( varies slightly from printed edn ).

1. T. याज्यानुवाक्ये

अथेळासूक्तवाकनिगदयोः प्रकृतितः प्राप्तयोः कस्यचिन्निगदखण्डस्याप-
वादेन[1] खण्डान्तरप्रक्षेपं विधत्ते—**आगुर-आह** । सूत्रितं हि—'उपहूतोऽयं 3. १
यजमानोऽस्य यज्ञस्यागुर उदृचमशीयेत्याशास्तेऽयं यजमानोऽस्य यज्ञस्यागुर
उदृचमशीयेत्याशास्त इत्याशिषां स्थान इळायां सूक्तवाके च प्राक् तार्तीय-
सवनिक्याः पुरोळाशेळायाः'[a] इति । कुतो हेतोर्यथाप्रकृतिनिगदपाठनिषेध
इत्यत्राह—**यदा-दीक्षितः** । आग्नावैष्णवयागसमनन्तरमेव दीक्षितत्वसंपत्तेः 3. २-६
प्रायणीयादिष्विव दीक्षणीयायामपि आगुर उदृचमित्येवमेव निगदखण्डः
पठनीयः । अनेन च यथैवेति सिद्धवदुपदेशेन तत्रापि विधिरुन्नेयः । प्रमाणान्त-
रानवगाह्यत्वेनास्या एव श्रुतेस्तद्विधायकत्वस्यावश्याभ्युपेयत्वात् । इति ह
स्माहेत्यत्र कौषीतकिरिति शेषोऽवगन्तव्यः । दीक्षणीयेष्टेरेव दीक्षितत्वसाध-
नत्वं मीमांसायां पञ्चमेऽध्याये तृतीयपाद एकादशाधिकरणे स्थापितम्—
'परेणावेदनाद् दीक्षितः स्यात् सर्वैर्दीक्षाभिसंबन्धात्'[b] । ज्योतिष्टोम एवाग्ना-
वैष्णवमेकादशकपालं निर्वपेद् दीक्षिष्यमाणः । दण्डेन दीक्षयति मेखलया
दीक्षयति कृष्णाजिनेन दीक्षयतीत्यादि श्रुतम् । तत्र किं सर्वेषां दीक्षासाधन-
त्वमुतेष्टेरेवेति संशये, दण्डादीनां सर्वेषामपि दीक्षाक्रियासंबन्धश्रवणाविशेषाद्
दीक्षितावेदनानन्तरमेव दीक्षितत्वसंपत्तिः, नेष्टेरनन्तरमेवेति पूर्वः पक्षः ।
राद्धान्तस्तु—'इष्ट्यन्ते वा तदर्था ह्यविशेषाच्चार्थसंयोगात्'[c] । इष्ट्यनन्तर-
मेव दीक्षितत्वम् । इष्टेः क्रियारूपत्वेन संस्कारहेतुत्वोपपत्तेः । दण्डादीनां तु
द्रव्यात्मकानां न तत्साधनत्वसंभवः । दीक्षितत्वाभिव्यक्तिहेतव एवैते । तस्मा-
दिष्ट्यनन्तरमेव दीक्षितत्वसंपत्तिः इति ।

प्रकृतितः प्राप्तं सूक्तवाके यजमाननामग्रहणं प्रतिषेधति—**न-गृह्णाति** । 3. ७,८
दीक्षित इति यदस्ति स एष देवसंबन्धी गर्भ एव भवति । तच्च 'पुनर्वा
एतम्'[d] इत्यादिनैतरेये श्रुतम् । यज्ञस्य च यजमानजन्महेतुत्वाद् दीक्षितस्य
गर्भरूपत्वम् । तच्च तलवकारशाखायाम्—'द्विर्ह वै यजमानो जायते । मिथुना-

a. ŚS. 5. 3. 7. b. JS. 5. 3. 29.
c. JS. 5. 3. 30. d. AB. 1. 3. 1.

1. T. खण्डलकस्य for खण्डस्य

दन्यद् यज्ञादन्यत् । तद्यन्मिथुनाज्जायते [1]-तदस्मै लोकाय । अथ यद्‌यज्ञाज्जायते-[1] तदमुष्मै लोकाय'[a] इत्यादिना श्रावितम् । इह चाधस्ताद् 'एष ह वै दैव आत्मा यजमानस्य यमृत्विजः संस्कुर्वन्ति'[b] इति । देवसंबन्धित्वं च देवभावापत्ति-हेतुत्वात् । लोके चाजातस्य गर्भावस्थामापन्नस्य नामकरणं शिष्टाः अपामर-प्रायाः प्राणिनः न कुर्वन्ति । तस्मादिह नामग्रहणं न कर्तव्यम् । सूत्रितं हि— 'न सूक्तवाके यजमानस्य नाम गृह्णाति प्राक् सवनीयात्'[c] इति ।

3. ९ अन्यदपि चोदकप्राप्तमपवदति—**न-स्तृणाति** । एनं वेदम् । अत्र
3. १०, ११ हेतुमाह—**असंस्थित-इति** । अत्र दीक्षणीयायामिष्टौ असंस्थित एवायं सौम्योऽध्वररूपो यज्ञ इति तावदविवादम् । अतः संस्थापनकालात् पूर्वमेव सौम्यमध्वरं समापयानीति परिभयं द्योतयन् संस्थापनरूपं पत्नीवाचनं वेदस्तरणं च न कुर्यात् । अनेन शेषानुज्ञान्यायेन पत्नीसंयाजान्तत्वमस्या दर्शितम् । सूत्र्यते हि—'पत्नीसंयाजान्ता च'[d] इति ।

एवं दीक्षणीयायां होत्रा कर्तव्यमितिकर्तव्यजातं विधाय संप्रति यजमान-नामग्रहणप्रतिषेधप्रसंगाद् दीक्षितान्नाशनप्रतिषेधं[2] चोद्यमुखेन करोति—
3. १२-१६ **तद्-तत्** । अश्यत इत्यशनमन्नादिकम् । तद् दीक्षितस्य स्वभूतं शिष्टा नाश्नन्तीत्युपलब्धचरमदः । तत् कस्माद्धेतोः ? न ह्यनिबन्धनोऽयं शिष्टाना-माचार इति प्रश्नः । अत्र दीक्षितस्य हविष्ट्वसंपत्तिरेव हेतुः । तच्च 'अग्नी-षोमयोर्वा एष आस्यमापद्यते'[e] इत्यादिना परस्तात् प्रदर्शयिष्यति । तत् तत्र लोके यथा हविश्चर्वादिकमनवत्तं देवताभ्योऽवद्यादत्तं निष्पादितमात्रावस्थं सत् कश्चित् बालिशबुद्धिराक्रम्य भक्षयेत् तद्वदेतत् स्यात् । तत् किं सर्वथैव तदीयमशनं नाशितव्यमिति ? नेत्युच्यते । कामं स्वच्छन्दमेव । प्रसुते सोमेऽभिषुते सत्येवाश्नीयात् । तच्चैतद् देवेभ्यो दत्तशिष्टस्य पुरोळशादे-

a. JB. 1. 259.
b. KB. III. 10. १९.
c. ŚS. 5. 3. 8.
d. ŚS 5. 3. 9.
e. KB. X. 5. १.

1-1. T. V. omit
2. T. प्रतिषेधनं for प्रतिषेधं

रुपयोगेन समानम् । अतो दीक्षोपसदुपवसथदिवसेषु दीक्षितान्नाशनानादरः कर्तव्य इति । सुत्ये पुनरहनि यजमानान्नाशनं कर्तव्यमिति सिद्धम् भवति ।

इदानीं दीक्षितनामग्रहणं चोद्यमुखेन प्रतिषेधति—**तद्-इति** । अत्र 3. १७-२०
हेतुप्रश्नव्याजेन नामग्रहणविधिरनुसंधेयः, प्रमाणान्तराविषयत्वात् । एवमुत्तरत्रापि द्रष्टव्यम् । दीक्षमाणो हि यजमानोऽग्निमेवात्मानम् आत्मत्वेनाभिगम्य दीक्षां करोति । 'अग्निर्वै दीक्षितस्य देवता'[a] इति श्रुत्यन्तरात् । तत् तत्रैवं सति अस्य यजमानस्य अन्ये जना नाम न गृह्णन्तीति यदस्ति, तद् वयमस्य नाम गृह्णन्तः सन्तो अग्निमेवासन्ना अत एव भस्मीभूता भवेमेति परिभयं द्योतयन्तो नाम न गृह्णन्ति । नामनामिनोरभेदात् । अथ यज-
मानस्यान्यनामग्रहणमपि प्रतिषेधति—**यद्-इति** । स यजमानोऽप्यन्यस्य 3. २१,२२
नाम न गृह्णीयात् । यच्चैतदन्यनामग्रहणमिति तदेतन्नामिनमन्यम् अग्निभावमनुभवन्नहं प्रदग्धं भस्मीभूतं करवाणीति परिभयं द्योतयन् न कुर्यात् ।

उक्तमेव भस्मीकरणकर्तृत्वमुपजीव्य क्वचिद् विषये नामग्रहणं प्रति-
प्रसूते—**यम्-प्रदहति** । यमन्यं पुरुषमयं द्विष्यादेव सर्वदा सर्वथैव द्वेषविषयं 3. २३-२५
करोति, तस्यात्यन्तशत्रोर्यन्नाम तदयं दीक्षितः सन् ग्रसेतैव व्यक्तं गृह्णीयादेव । तेनैनमयं यजमानः स्वयमग्निभूतो भस्मीकरोत्येव । नन्वेवं नामग्रहणस्याशक्यत्वे कथं व्यवहारनिर्वाहः । नहि नामग्रहणमन्तरेण परोऽवबोधयितुं पार्यते । न चावबोधनमन्तरेण परो जनः प्रवर्तयितुं शक्यते । नामग्रहणे कथितदोषापत्तिरनिवार्येति महदिदं संकटमापतितमित्याशङ्क्याह—**अथ-**
**इच्छेत्** । इच्छेद् आकारयितुमिति शेषः ॥ 3. २६

इति तृतीयः खण्डः

**विचक्षणवत्या-प्रायश्चित्तिः** । हे देवदत्त विचक्षणेति विचक्षणवत्या वाचा 4. १, २
नामग्रहणं कार्यम् । सा विचक्षणवती वागेव तस्मिन् विषये प्रायश्चित्तिः अनर्थापत्तिपरिहारोपाय इति यावत् । विचक्षणवतीं वाचं स्तौति—**चक्षुर्-**

a. TS. 3. 1. 1. 3.

4. ३, ४ **विपश्यति ।** यदेतद् विचक्षणमिति तच्चक्षुरेव भवति । यस्माच्चक्षुषैव सर्वो जनः विशेषेण सम्यग् यथाभूतस्वरूपेण वस्तुतत्त्वं पश्यति, नेन्द्रियान्तरेण । तस्माच्चक्षुः प्रियं तथाभूतार्थप्रकाशनसामर्थ्यात् सत्वरूपतया । तद्युक्तवागुदीरणेनैव नामग्रहणनिबन्धनो दोषो नाविर्भवेत्, किंतु दीक्षाप्रतिष्ठारूपमस्य सत्यवदनमेव निर्वृत्तं भवेदित्यर्थः । ऐतरेयेऽपि 'विचक्षणवतीं वाचं वदेद्'[a] इति विधायैवमेव 'चक्षुर्वै विचक्षणं वि ह्येनेन पश्यतीति । एतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुः'[b] इत्यादिनोपपादितम् ।

इदानीं दीक्षितत्वसंपत्तावन्तरङ्गसाधनतया सत्यवदनं प्रशंसति—

4. ५-७ **एका–स्माह ।** एका सर्वत्रैकरूपा, न तु बहुरूपा अपभ्रंशवत् । अथवा प्रधानरूपा । व्याहृतिर्व्याहरणं वागिति यावत् । दीक्षितवादः तस्यैवासाधारणतया तादृश्या वाचा संबन्धात् । असाधारणसंबन्धकृतो हि व्यपदेशो लोके दृष्टः । क्षितिसलिलदहनादिसहकारिकारणसमवधानसाम्ये सत्यपि शाल्यङ्कुर इति शालीत्येवाङ्कुरस्य व्यपदेशदर्शनात् । तस्य तदसाधारण्यसंबन्धात् । इतरेषां सर्वत्र साधारण्यात् । किं तत् ? सत्यमेव । सत्सु भवं सत्यम् । तच्चोपपादितं प्राक् । यस्मात् सत्यस्य दीक्षितवादनामत्वं प्रसिद्धं तस्माद् यो यजमानः सत्यमेव वदति स एव दीक्षितो भवति । सत्यमेव दीक्षितत्वसंपत्तौ पुष्कलं कारणमिति यावत् । आहेति कौषीतकिरिति शेषः ।

अथ दैक्षेष्वहस्सु व्रतप्रदानम् अग्निहोत्रहोमरूपत्वसंपादनेन स्तोतुमाह—

4. ८ **तद्–इति ।** यावज्जीवश्रुतिव्याकोप एवं सति प्रसज्येतेत्यर्थः । उत्तरमाह

4. ९-१४ आख्यायिकोपन्यासमुखेन—**असुरा–दीक्षासु ।** पुरा किलासुरा देवैः सह स्पर्धमाना हवींष्यनग्नौ अग्नेरन्यत्र उद्गाते विगतज्योतिःकाष्ठलोष्टादिसमे आत्मन् आत्मन्येव स्वकीयमुख एवेति यावत् । अजुहवुरहौषुः । तथा च वाजसनेयिनामाम्नानम्—'देवाश्च ह वा असुराश्चास्पर्धन्त । ते हासुरा अतिमानेन कस्मै च न जुहुम इति स्वेष्वेवास्येषु जुह्वतश्चेरुः । ते[1] पराबभूवुः'[c] इति ।

a. AB. 1. 6. 8.
b. AB. 1. 6. 9-10.
c. ŚB. 5. 1. 1. 1; 11. 1. 8. 1. ( varies with the printed edition ).

1. T. तेन

तेऽसुरा अनग्नौ होमं कुर्वाणास्तत एव हेतोः पराजयं प्राप्तवन्तः किल। ते प्रसिद्धा देवा इममेव मुख्यं प्राणमग्निरूपम् अन्तर्देहस्य मध्येऽवस्थापितवन्तः। प्राणस्याग्निरूपत्वं 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति'[a] इत्यादिषु प्रसिद्धम्। अन्तराहिते च तस्मिन् देवा जुह्वतो भूतिं प्राप्ता इत्याख्यायिकाशेषोऽवसेयः। तत् तत्रैवं सति सायं प्रातश्च दीक्षिताय व्रतप्रदानं क्रियत इति यदस्ति, एतत् एतेनास्य दीक्षितस्यास्मिन्नन्तःस्थे प्राणरूपेऽग्नौ संततं यथा भवति तथाग्निहोत्रमेव हुतं भवति। संततमित्यस्य विवरणम् अव्यवच्छिन्नमिति। निगमयति—एषेति। एषा प्राणेऽग्निहोत्रहोमरूपा। दीक्षादिवसेषु अग्निहोत्रस्य संततिः संतानमविच्छेदः। अनेन कर्मणाग्निहोत्रकर्मणोऽनुसंधानं भवतीत्यर्थः।

इत्थं दीक्षासु व्रतनकर्मणोऽग्निहोत्रहोमरूपत्वमुक्तम्। इदानीमुपसद्दिनेषु प्रवर्ग्यप्रवृञ्जनकर्मणा अग्निहोत्रकर्मसंपत्तिमाह—**प्र-चरन्ति**। उपसत्सु पुनः 4. १५
प्रवर्ग्यप्रवृञ्जनकर्म क्रियत एव। तेषु तेनैवाग्निहोत्रकर्माविच्छेदो व्यक्त एव। सुत्यादिने तु सवनत्रययज्ञपुच्छकर्मनिबिडितेऽपि तदन्त उदवसानीयानन्तरं मुख्यस्यैवाग्निहोत्रस्य क्रियमाणत्वान्न तद्दिने तद्विच्छेदचिन्तया मनः खेदनीयमित्याह—**का-सुत्यायाम्**॥ 4. १६

इति चतुर्थः खण्डः

एवं दीक्षणीयेष्टिं समग्रेतिकर्तव्यकलापां विधायाधुना वाग्दीक्षेत्यध्यायादावुपक्षिप्तां प्राणदीक्षामेव भङ्ग्यन्तरेण प्रपञ्चयितुं प्रसंगाद् दीक्षितस्य श्रद्धादेवतां च प्रतिपादयितुं कांचिदाख्यायिकां प्रस्तौति—'अथातः कैशिनी दीक्षा' इत्यादिना 'अपराह्णे दीक्षते' इत्यतः प्राक्तनेन ग्रन्थेन। **अथ-संप्रोचाते**। 5. १-८
अनन्तरं केशिनाम्नो राजर्षेः संबन्धिनी दीक्षा। तद्विषया काचिदाख्यायिका वक्ष्यत इति शेषः। तामेवाह—केशी नाम दर्भस्यापत्यं दार्भ्यः दीक्षितः संजातदीक्षः सन् निषसाद निषण्णोऽभूत्। तं केशिनं दीक्षां कृत्वा निषण्णं कश्चिद्धिरण्मयः हिरण्यविकारभूतचञ्चुचरणाद्यङ्गसकलावयवसंपन्नः शकुनः पक्षी तत्समीपदेश आपत्य संप्राप्य वक्ष्यमाणं वाक्यमुक्तवान्। किमिति चेत्, हे

a. PraśU. 4. 3.

केशिन् त्वं दीक्षितमात्मानं मन्यस एव। वस्तुतस्त्वमदीक्षित एव भवसि। ननु मया दीक्षणीयेष्टिरघुनैवानुष्ठिता; कथमदीक्षितत्वं सावधारणमभिहितं भवता? न हि घटो न घटोऽयमित्युच्यमानमनुन्मादी जनः श्रद्धातुमर्हति इत्यत उक्तं दीक्षामहं वस्तुतो वेद जानामि। इष्टिमात्रेण न दीक्षितत्वसिद्धिः। अतो मुख्या काचिदन्या दीक्षा। इयं त्वमुख्यैवेत्यर्थः। कीदृशी पुनः सा दीक्षेत्याकाङ्क्षायामुक्तम्—तां दीक्षां ते तुभ्यं ब्रवाणि उपदिशामि। तर्ह्युपदिश्यतामिति चेत्, अस्ति ममापि त्वत्तोऽवाप्यमुपदेशान्तरम्। किं तदिति चेत्, अहं सकृदेकवारमेव यागं कृतवानस्मि। तस्यैकवारमेव कृतस्य यागस्य क्षयाद् झटित्यपक्षयाद् बिभेमि भीतिं करोमि। हे केशिन् सकृदिष्टस्य एकवारमेव[1] कृतस्य यागस्याक्षितिमक्षयत्वकारणं त्वमेव वेत्थ जानासि। ततो हेतोः तामक्षितिमपि त्वं मह्यं ब्रूयाः इति शकुनस्योक्तिः। एवं तौ केशिशकुनौ संप्रोचाते। अन्योन्यसंवादपूर्वकमुभावपि दीक्षाक्षिती परस्परस्मै परस्परं प्रोक्तवन्तौ किलेति श्रुतेर्वचनमिदम्। तदेतत् तलवकारब्राह्मणे प्रपञ्चेन श्रावितम्—'केशी ह दार्भ्यो भूपर्णयोर्दिदीक्षे। अथ ह सुत्वा याज्ञसेनो हंसो भूत्वा हिरण्मयो भूत्वा यूप उपविवेश। तं ह केशि३न्निति नाम्नाभ्युवाद। स ह चुक्रोध। स्थविरोऽस्मि पञ्चालानां राजा। स उ वै दीक्षितोऽस्मि। को नु मा ह रेऽयं नाम्नैवाभिभवितुमर्हति। स होवाच। मा क्रुधः। अभिवदिता ते तेनास्मि यदहमेतस्यै विशस्त्वत्पूर्वो राजासम्। अभिवदितो वाव ते तेनास्मि यददीक्षितोऽसि। इष्टापूर्तस्य त्वमक्षितिं वेत्थ। दीक्षामहं वेद। संप्रब्रवावहै'[a] इत्यादिना। केवलमग्न्यादेस्तत्र दीक्षारूपत्वं पृथिव्यादेर्दीक्षितत्वम्। इह तु वागादीनामिति विशेषः।

ननु पक्षिजातीयस्य तस्य श्येनादिप्रसिद्धपक्षिवद् दीक्षास्वरूपवेत्तृत्वयागक्षयिष्णुत्वशङ्काभीतिमत्त्वादीनि उच्यमानानि कथं नाम संगच्छेरन्नित्याशङ्क्य श्रुतिः स्वयमेव तत्स्वरूपप्रदर्शनेन परिहरति—**स-आस**। योऽसौ

५. ९-११

a. JB. 2. 53. ( varies from the printed text )

1. T. अपि for एव

हिरण्मयः शकुनः प्रागुक्तः सोऽयं स वक्ष्यमाण उलादिरेवास बभूव। न तु जात्यैव कश्चित् पक्षी। उल इति नामतः। वृष्णवृद्धेरपत्यं वार्ष्णवृद्धः। शब्दा इमे विकल्पे वर्तन्ते। एतद्विषयासु शाखान्तरगताख्यायिकासु बहुधा स्थिति-दर्शनात्। इटन्निति नामतः। कवेरपत्यं काव्यः। शिखण्डीति नामतः। यज्ञ-सेनस्यापत्यं याज्ञसेनः। कथमत्राविनिगमने वस्तुनि रूपं वैकल्पिकं घटता-मित्याशङ्क्य अविनिगमने न काचित् क्षतिः, त्रयाणामनवधारणेनान्यतमत्वेऽपि दीक्षावेत्तृत्वादिघटनाया अस्मदभिमतायाः संभवादित्याह—यो वा स आस स स आसेति। स शकुनो वस्तुतो यः यद्रूपः उल इटन् वा शिखण्डी वा आस बभूव। स शकुन आस तद्रूप एव बभूव। नास्माकमत्र भर इत्यर्थः। एवं श्रुतिस्वरूपेणाभिधाय प्रकृताख्यायिकाशेषमनुवर्तयति—**स-स्माह**। स हिरण्मयः 5. १२-१६
शकुनो दीक्षामुवाचाभिहितवान्। किमिति चेत् एतयाग्नावैष्णवेष्टचा शरीराण्येव दीक्षन्ते। शरीरशब्देन वागाद्यभिमानिन्योऽग्न्याद्या देवता गृह्यन्ते। या इमाः प्रसिद्धा वागाद्यभिमानिन्यो देवताः यस्य यजमानस्यैता देवता दीक्षां कुर्वन्ति स यजमानो दीक्षितशब्दवाच्यो भवतीति कौषीतकिराह स्म इत्यन्वयः॥

इति पञ्चमः खण्डः

उक्ताया एव वागादिदेवतादीक्षाया उपपादनार्थं प्रसंगाद् याजमानं कर्मावधिप्रदर्शनेन विधत्ते—**स-पञ्चमीम्**। यत्र यस्मिन् काले सोऽध्वर्युरौद्ग्र- 6. १-६
भणहोमान् करोति। ते च 'आकूत्यै प्रयुजेऽग्नये स्वाहा'[a] इत्यादयः। तत्काले यजमान उप तेषां समीपे तदनन्तरमेव पञ्चसंख्याका आहुतीर्जुहुयात्। ताश्च 'मनो मे' इत्यादिमन्त्रकारिकाः। मे मम मन एतदभिमानिनी देवता 'मनसश्चन्द्रमाः'[b] इत्यादिश्रुतिसिद्धा चन्द्रमस्संज्ञा। मनसा संकल्पविकल्परूपया मनसो वृत्त्या विशिष्टरूपया दीक्षिता भवतु। हे अग्ने तुभ्यमिदं हविर्हुत-मस्त्वित्यर्थः। एवमन्यदपि व्याख्येयम्। प्राणदीक्षाहोमस्य तृतीयत्वे हेतुमाह—मध्य इति। पञ्चस्वाहुतिषु तृतीयाहुतेः मध्यस्थत्वस्य प्रसिद्धत्वात्। यस्मादयं मुख्यः प्राणो मध्ये भवति देहमध्ये तस्यावस्थितत्वात्। एताभिः पञ्चाहुतिभिः

a. TS. 1. 2. 2. 1. b. AA. 2. 4. 1.

याः पुरुषस्य शरीरे [स्थिता देवतास्ता एता दीक्षयत्येव। आभिराहुतिभिस्तासां दीक्षितत्वं संपाद्यत इत्यर्थः।

इदानीमाहुतिपक्षमवक्षिप्य स्वाहाकाररहितैरेभिरेव मन्त्रैरनुमन्त्रणमेव
6. १०-२२ कर्तव्यमिति पक्षान्तरमाह—**तदु-इति।** तत् ततः तस्मिन् प्राणदीक्षाविषये कौषीतकिर्मुनिः पुनराह किल। न किल यजमानेनाहुतिहोमः कार्यः। कुत इति चेत्, यद्याहुतिहोमः क्रियेत तदा आहुतयोऽतिरिक्ता अधिका भवेयुः। अध्वर्युकृताभिरेवाहुतिभिः दीक्षितत्वस्य संपन्नत्वात् पुनस्तत्करणस्य विफलप्रायत्वात्। 'निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य साधनन्यायातिपातः'[a] इति न्यायात्। न च कर्तृभेदादतिरिक्तत्वदोषपरिहारः शङ्कनीयः। अध्वर्युकर्तृकास्वाहुतिषु परमार्थतो यजमानस्य कर्तृत्वात्। अन्यथा कर्तृत्वफलभोक्तृत्वयोः वैयधिकरण्यप्रसंगात्। किं तर्हि कर्तव्यमिति चेत्, औद्ग्रभणहोमान् कुर्वाणमध्वर्युमन्वारभ्य संस्पृश्य यजमानः प्रतीकैः स्वाहाकाररहितैः उक्तमन्त्रखण्डैः अनुमन्त्रणमेव कुर्यात्। गतमन्यत्। सूत्रितं हि—'अध्वर्युमन्वारभ्यौद्ग्रभणानि जुह्वतं याजमानं मनो मे मनसा दीक्षतां वाङ् मे वाचा दीक्षतां चक्षुर्मे चक्षुषा दीक्षतां श्रोत्रं मे श्रोत्रेण दीक्षतामित्याहुतीर्वा जुहुयात्। एकदीक्षे चोपस्थानम्। वाचं दीक्षामुपैमीति गार्हपत्यम्। मनो दीक्षामुपैमीति व्रतश्रपणम्। प्राणं दीक्षामुपैमीत्याहवनीयम्'[b] इति। तलवकारब्राह्मणे च—'तमध्वर्युरभ्यज्य प्रपद्यौद्ग्रहणानि जुहोति। यदौद्ग्रहणानि जुहोति यदास्मा औदुम्बरं दण्डं प्रयच्छति। अथैतमाहवनीयमुपतिष्ठेत'[c] इत्यादि।

एवं हिरण्मयशकुनवक्तृकां दीक्षास्वरूपविषयां वाचमभिधायाधुना
6. २३-३० केशिवक्तृकां सकृद्यागाक्षयिष्णुत्वप्रतिपादिकां वाचमुपक्रमते—**अथ-प्रोवाच।** अथेति प्रकृतादर्थादर्थान्तरे। खल्विति प्रसिद्धौ। सकृदेकवारमनुष्ठितस्येष्टस्य यागस्य श्रद्धा आदित्सुत्वास्तिक्यबुद्धिकलक्षणा एव नान्यत् किंचिदक्षितिरक्षयत्वहेतुः। स यः कश्चिद् यजमानः श्रद्दधानः श्रद्धावितो भूत्वा यागं करोति

a. Quoted by Ānandabodha in the *Nyāyamakaranda*, p. 259.

b. ŚŚ. 5. 4. 1-4 ( varies from printed edn. ).

c. JB. 2. 65.

तस्य यजमानस्येष्टं यागो न क्षीयते क्षयं प्राप्नोति। तथा च तलवकार-ब्राह्मणे—'अहीनसं हाश्वत्थि पुत्रा उपसमेत्योचुः'[a] इत्यारभ्याहीनसा पित्रा पुत्रेभ्यः प्रथमं संक्षेपेण प्रदर्शितानां सप्तदशसंख्यानामनुशासनानां विस्तरेण स्वरूपजिज्ञासायां पुत्रैरुद्भावितायां क्रमेण प्रतिपादने प्रबन्धेनाष्टखण्ड्या प्रस्तूयमाने सप्तदशममनुशासनम्—'अथ यद्वोऽवोचं यज्ञात् स्म मेतेति'[b] इत्यनुभाष्य 'श्रद्धा स्म वो मा व्यैदित्येव वस्तदवोचम्'[b] इति यज्ञस्य श्रद्धात्मकत्वकथनानन्तरं श्रद्धाप्रशंसारूपं वचनं पठ्यते—'एषा ह वै देवानां राज्ञी यच्छ्रद्धा। सा प्रातरुत्क्रम्य तिष्ठति। तां देवा उपतिष्ठन्ते। यद् रिच्येष्यति तद्यच्च एष्याम इति। तस्यै सर्वदेवा अनुवर्त्मानः सायं जुषन्ते। तमाविशति। स जुहोति। स यजते। तद् देवा उपजीवन्ति'[b] इति। 'आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे'[c] इति, 'श्रद्धा वा आपः'[d] इत्यादिश्रवणात् श्रद्धाकारणभूतानामपामेव यज्ञरूपत्वमिति वेदनस्य यज्ञाक्षितित्वं दर्शयति—आपोऽक्षितिरित्यादिना। एषु पृथिव्यादिषु लोकेषु नदनदीतटाकादिगता आन्तरिक्ष्याश्चापः सन्ति, याश्चेमा दृश्यमाना लोहितादिरूपपरिणता अध्यात्मं शरीरे च सन्ति, ताः सर्वा आप एवाक्षितिः। स यः कश्चिद् यजमान उक्तलक्षणा आप एव यज्ञरूपत्वादस्य यज्ञस्याक्षितिरपामक्षयत्वात् सर्वकारणत्वादित्येवं वेदनं बाह्याङ्गं करोति तस्य यागः सकृत् कृतोऽपि न क्षीयते। एतामित्युपसंहारः।

अथ दीक्षाकालमुपदिशति—**अपराह्णे दीक्षते**। अह्नः परो भागोऽपराह्णः। 6. ३१
स्तौति—**अपराह्णे-आप्त्यै**। यस्मादेष आदित्योऽपराह्णे सर्वाणि भूतानि 6. ३२-३७
प्राणिजातानि संवृङ्क्ते समुपसंहृतव्यापाराणि करोति। ह वा इति प्रसिद्धिद्योतनार्थः। किंच एनमादित्यं पूर्वं निरङ्कुशप्रसृमरप्रकाशप्रकर्षमपि सन्तं रजना रञ्जनसमर्था दिवसावसानसमयाविर्भाविनो रश्मयोऽतियन्ति अतिक्रामन्ति। उपसंहृतप्रकाशं कुर्वन्ति। तस्मादेव हेतोरयमादित्यो लोहितायमानमण्डलः सन्नस्तमेति। न तु यथापूर्वावस्थ एव। एवं च सत्ययं यजमानोऽपराह्णे दीक्षमाण एव तमादित्यमेवात्मानमभिलक्ष्य आदित्यात्मभावमनुभवन्नेव

a. JB. 2. 419. b. JB. 2. 426.
c. AA. 2. 1. 7. d. TB. 3. 2. 4. 1.

दीक्षां करोति। यस्मादपराह्णे दीक्षमाण आदित्यात्मतामभिगच्छन्नेव दीक्षते, तस्मात् तस्मिन् काले दीक्षणकर्म सर्वकामावाप्तिहेतुः। आदित्यस्य सर्वकामनिध्यात्मकत्वात्। 'स इन्द्रः स प्रजापतिस्तद् ब्रह्म। तदत्रैव यजमानः सर्वान् कामानाप्नोति'[a] इति पठिष्यमाणत्वात्। एवं कालविशेषो दर्शितः॥

इति षष्ठः खण्डः

इत्थं षड्भिः खण्डैरिष्टिं व्याख्याय दीक्षणीयाख्याम्।
अथ तदनन्तरकार्यामाचष्टे प्रायणीयेष्टिम्॥

प्रथमं तावदुत्पत्तिविध्युन्नयनार्थं कर्मस्वरूपं स्तौति—**प्रायणीयेन-**
7. १, २ **उदानम्।** यद्यपीहावसरप्राप्त्यनुरोधेन प्रायणीयेष्टिरेव विधातुमुचिता दीक्षाहान्ते तत्प्रयोगविधानात्। तथा च सूत्रम्—'अपरिमिता दीक्षास्तासामपवर्गे प्रायणीयेष्टिः। पथ्यां स्वस्तिमग्निं सोमं सवितारं चाज्येनादितिं चरुणा'[b] इति। तथापि प्रायणीयासमानविध्यन्तत्वात् पृथग्विधानप्रयत्नगौरवपरिहारार्थमुदयनीयापीह सह विधीयते। ब्राह्मणान्तरेष्वप्यनयोः साहित्येनैव विधानं दृश्यते। प्रयन्ति यज्ञं प्रारभन्तेऽनेनेति प्रायणीयम्। नपुंसकलिङ्गत्वात् कर्मेति विशेष्यपदं कर्तव्यम्। तथा उद्यन्ति यज्ञं समापयन्त्यनेनेत्युदयनीयम्। ब्राह्मणान्तरेषु पुँल्लिङ्गान्तावपि प्रायणीयोदयनीयशब्दौ दृश्येते[c]। तत्र तु यागशब्दो विशेष्यपदम्। नन्विहापि पुँल्लिङ्गान्तावेवैतौ किं न स्याताम्? वा नाम। पुरा देवा अग्न्यादयः प्रायणीयोदयनीयाभ्यां यथाक्रमं प्राणोदानौ प्राप्तवन्तः। प्रायणीयं कर्मानुष्ठाय प्राणस्थितिं प्राप्तवन्तः। उदयनीयाख्यं कर्मानुष्ठाय उदानस्थितिमपि। अतोऽनयोः कर्मणोः प्राणोदानप्राप्तिहेतुत्वाद् यजमानोऽपि ताभ्यामनुष्ठिताभ्यां प्राणोदानौ प्राप्नोति।

अथवा प्रायणीयोदयनीययोस्तुल्यकर्तृकतां वक्तुं तयोः प्राणोदानरूपत्वं
7. ३-५ संपादयति—**तौ-प्राणोदानौ।** प्रशब्दोच्छब्दवत्त्वात् प्राणोदानरूपत्वम्। तद्धेतु-

a. KB. VIII. 4. १५–१६. ( varies ) b. ŚŚ. 5. 4. 7–5. 1.
c. Cf. AB. 1. 7. 1–2.

त्वाद् वा। तच्चोक्तं प्राक्। प्रायणीयोदयनीयौ नाम यागाविति यत् तावेतौ प्राणोदानावेव भवतः। यस्मादेवं तस्माद्धेतोः प्रायणीयस्य ये होत्रादय ऋत्विजो भवेयुस्त एवोदयनीयस्यापि भवेयुः। नान्ये। यस्मादेतौ प्रसिद्धौ प्राणोदानौ समानौ तुल्यकर्तृकौ भवतः। एकशरीरवर्तित्वाद् वा प्राणोदानयोः समानत्वम्। आध्यात्मिकवायुव्यापाररूपत्वाद् वा। तस्मादनयो रूपात्तुल्य-कर्तृकत्वम्। अथास्यामिष्टौ पथ्यास्वस्त्यादिदेवतापञ्चकप्रदर्शनार्थं कांचि-दाख्यायिकामाह—प्रायणीयेन इत्यारभ्य ते समे स्याताम् इत्यतः प्राक्तनेन।

**प्रायणीयेन-प्रज्ञाता**। पुरा देवाः प्रायणीयेन कर्मणा स्वर्गं लोकमभिलक्ष्य गन्तुं 7. ६-१४
प्रारब्धवन्तः। प्रारब्धवतां च तेषाम् इयं प्राची दिगियं दक्षिणा दिगित्यादि परस्परव्यावृत्ततया दिशां स्वरूपपरिज्ञानं नाभूत्। यथा लोके कामपि गम्य-भूमिमुद्दिश्य प्रस्थिताः पथिका दिङ्मोहेन व्याकुलीभवेयुस्तथा तेषामपि दिङ्मोहोऽभूत्। स्वर्गगमनारम्भरूपत्वं च तत्साधनयागारम्भरूपत्वात्, न तु साक्षादेव; प्रत्यक्षविरोधात्। अथ तान् दिङ्मोहेन गन्तुमशक्नुवतो देवा-नग्निरुक्तवान्—हे देवा यूयमेकामाज्यद्रव्यकामाहुतिं मह्यमुत्कोचत्वेन जुहुत। ततोऽहमेकां दिशं युष्मान् बोधयिष्यामि। तस्मा इत्थमुक्तवतेऽग्नये देवा होमं कृतवन्तः। अथ सोऽग्निरेकां प्राचीं दिशं प्रज्ञातवान्। विज्ञाय च देवान् विज्ञापयामास—इयं प्राची दिगिति। यस्मादेवं प्राच्या दिशोऽग्नेश्चासाधारणः संबन्धः, तस्मादाग्नेयी प्राची दिगिति कृत्वाद्यापि यत्र क्वचित् कर्मण्यग्निप्रणयने कर्तव्ये सत्यृत्विजोऽग्निं प्राञ्चमेव प्रणयन्ति, न तु दक्षिणादिदिगाभिमुख्येन नयन्ति। तथा च श्रूयते—'प्राञ्चमग्निं प्रहरन्ति'[a] इति। यज्ञश्चाग्निहोत्रादिः सहस्रसंवत्सरसत्रपर्यन्तः सर्वः प्रागाभिमुख्येनानुष्ठीयते। तच्च यज्ञस्याग्नि-साध्यत्वात्। किं चास्मिन्नग्नौ तत्तच्चरुपुरोडाशसोमाज्यादिकं यदा होतव्यं तदा प्राङ्मुख्येन स्थिता एव होमं कुर्वन्ति। अत्र सर्वत्र को हेतुरिति चेत्, यस्मादेषा प्राची दिक् तेनाग्निना प्रज्ञाता। प्राचीदिग्व्यवहारस्याग्निना प्रवर्तित-त्वाद् अग्निसंबद्धं यत् किंचिदस्ति तत् सर्वं प्रागाभिमुख्येन कर्तव्यम्।

**अथ-प्रज्ञाता**। अथाब्रवीत् सोमः इत्यादि पूर्ववद् व्याख्येयम्। यस्मात् 7. १५-२३
सोमेन दक्षिणा दिक् पुरा प्रज्ञाता तस्माद्धेतोः क्रीतं सोमं शकटे स्थितं दक्षिणा

a. TS. 3. 1. 3. 1.

दक्षिणस्यां दिशि परिवहन्ति प्रापयन्ति । तथा च बौधायनः—'प्रदक्षिणं राजानं परिवहन्ति'[a] इति । किंच एनं सोममध्वर्युप्रभृतयो दक्षिणाभिमुख्येनासीना एव सन्तोऽभिषुतं कुर्वन्ति । ग्रावस्तुत्संज्ञितश्चर्त्विक् सोमाभिषवदशायां दक्षिणामुख एव सन्नभिष्टवनीयाः पठति । होता च क्रीते सोम आसन्द्यामासादित आहवनीयस्योत्तरतो दक्षिणामुखस्तिष्ठन् परिधानीयाख्यामन्त्यामृचं पठति । अत्र सर्वत्र[1] दक्षिणादिशः-सोमप्रज्ञातत्वं हेतुः ।

7. २४-३० **अथ-प्रज्ञाता ।** अथाब्रवीत् सवितेत्यादि पूर्ववत् । सविता नाम आदित्य एव । यस्मात् स आदित्यात्मकः सविता प्रतीचीं दिशं ज्ञातवान्, तस्मात् कारणादेतमादित्यं प्रतीचीं दिशं प्रत्यञ्चन्तं गच्छन्तमेव जनाः प्रतिदिनं पश्यन्ति । न पुनः प्राचीं दिशं गच्छन्तम् आदित्यं जनाः पश्यन्ति । सत्यपि ह्यादित्यस्य प्राचीदिग्गमने न तत् कश्चिदपि पश्यति । प्रातरुत्थायाद्रेरुद्गच्छत एवादित्यस्योपलभ्यमानत्वात् । तथा च शुक्रामन्थिब्राह्मणे श्रूयते—'असौ वा आदित्यः शुक्रश्चन्द्रमा मन्थी । अविगृह्य प्राञ्चौ निष्क्रामतः । तस्मात् प्राञ्चौ यन्तौ न पश्यन्ति । प्रत्यञ्चावावृत्य जुहुतः । तस्मात् प्रत्यञ्चौ यन्तौ पश्यन्ति'[b] इति ।

7. ३१-४० **अथ-प्रज्ञाता ।** अथाब्रवीत् पथ्या स्वस्तिरिति स्त्रीलिङ्गनिर्देशादियं स्त्रीदेवतेत्यवगम्यते । सा च पथ्या स्वस्तिर्वागेव भवति । वाङ्नामसु पठितत्वात् । यस्मादियमुदीची दिग् वाचः स्वभूता, तस्माद्धेतोरुदीच्यां दिशि विन्ध्याद्रेरुत्तरतो हिमाद्रेर्दक्षिणतश्च या दिक् तस्यां प्रज्ञाततरा अतिशयेन प्रज्ञाता संस्कारवत्तया विदितैव वाग् वाचकशब्दरूपा जनैर्व्यक्तमभिधीयते हि । श्रूयते हि—'एकः शब्दः सुज्ञातः सम्यक् प्रयुक्तः स्वर्गे लोके कामधुग् भवति'[c] इति । तदेतद् वाचः सम्यक् संस्कारवत्तया वेदनं समीचीनप्रयोगश्चोदीच्यामेव दिशि प्रतायते । इतरासु पुनर्दिक्षु क्वचिदेव संस्कृतवाक्प्रयोगः । तत्रापि न कार्त्स्न्येन वाग्रूपावगतिः । किंतु किंचिदेव । सोऽयमतिशयस्तरबर्थः । किंच

a. BŚ. 6. 16. 4.
b. TS. 6. 4. 10. 2-3
c. MB. on Pā. 6. 1. 84

1. T. adds च

ये वाक्स्वरूपजिज्ञासवः ते वाचं शिक्षितुं परिशीलयितुमुदञ्च एव गच्छन्ति । उदीच्यां दिश्येव शिक्षयितृसौलभ्यसद्भावात् । अपि च यः कश्चिद् विपश्चित् तत उदीच्या दिश आगच्छति, तस्य वाचं श्रोतुकामा इतरदिग्वास्तव्या जिज्ञासवो भवन्ति—अयं विद्वानुदीच्यां दिशि विहितवसतिरतोऽनेन संस्कृत-वाचा भवितव्यम्, अस्य वाचं श्रोष्याम इति तदीयां वाचं शुश्रूषते । इति ह स्माहेति कौषीतकिरिति । यस्मादेषोदीची दिग् वाग्रूपया पथ्यास्वस्ति-देवतया प्रज्ञाता तस्मादेतत् सर्वमुपपद्यते ॥

इति सप्तमः खण्डः

**अथ-प्रज्ञाता** । अथाब्रवीददितिरित्यादि पूर्ववत् । अत्रान्नाहुतिमिति विशेषः । अग्न्याद्या देवता आज्यद्रव्यकाहुतिभाजः । अदितिस्त्वन्नाहुतिभाक् । तथा च ब्राह्मणान्तरम्—'आदित्यश्चरुः प्रायणीयः'[a] इति । आपस्तम्बश्च—'मध्येऽदितिं हविषा'[b] इति । सा चादितिदेवतेयं पृथिव्येव । स्थावरजंगमात्मकं जगद्धारयन्त्यपि न दीना श्रान्तेति तस्या अदितिशब्दाभिधेयत्वात् । तथा च यास्कः—'अदितिरदीना'[c] इति । 'अदित्यास्त्वोपस्थे सादयामि'[d] इति मन्त्राच्च । हे हविः अहं त्वामदित्या अदीनायाः पृथिव्या उपस्थे उत्संगदेशे सादयामीति हि तस्यार्थः । तस्यामदितिशब्दाभिधेयायामस्यां पृथिव्यां व्रीह्याद्या ओषधयः । फलपाकान्तं वीयन्त इति । 'ओषध्यः फलपाकान्ताः'[e] इति वचनात् । ऊर्ध्वमुखास्तिष्ठन्ति । तथा च वनस्पतयः आम्रपनसादयोऽप्यूर्ध्वमुखा वर्तन्ते । तथा पृथिवीवर्तिनो मनुष्या अप्यूर्ध्वमुखास्तिष्ठन्ति । पृथिवीस्थानश्चाग्निरूर्ध्वज्वालतयोद्दीप्यते । किं बहुना ? यत् किंचिद् वस्तु-जातमस्यां पृथिव्यामस्ति तत् सर्वमप्यूर्ध्वतयैवावस्थितम् । अत्र सर्वत्र च हेतुरूर्ध्वाया दिशोऽदित्या प्रज्ञातत्वमेव । तस्यं तया । आख्यायिकामुप-

ऋ. १-६

a. AB. 1. 7. 3.
b. APS. 10. 21. 11.
c. N. 4. 22.
d. TS. 1. 1. 4. 2.
e. AK. 2, *vanavarga*, 6.

8. १०,११ संहरति—**एवं-प्रजानाति** । एवमुक्तेन प्रकारेण पञ्चभिर्देवताभिः पञ्चदिशां प्रज्ञातत्वेन दिङ्मोहापनयने सति देवाः स्वर्गं लोकं सम्यग् ज्ञातवन्तः । तद्वद् यजमानोऽपि प्रायणीयेन कर्मणा स्वर्गं लोकं प्रजानाति ।

अथ प्रायणीयोदयनीययोः समानेतिकर्तव्यत्वं दर्शयति—**ते-प्रायणीयो-**
8. १२ **दयनीये** । साम्यमुपपादयितुं यज्ञस्य रथत्वं प्रायणीयोदयनीययोश्चक्रत्वं च
8. १३,१४ संपादयति—**देवरथो-प्रायणीयोदयनीये** । पक्षसी पार्श्वद्वयवर्तिनी चक्रे । अभिमतदेशप्राप्तिहेतुत्वं रथसादृश्यम् । यज्ञान्तद्वयवर्तित्वं चक्रसादृश्यम् । अस्त्वेवं यज्ञस्य रथत्वं प्रायणीयोदयनीययोश्चक्रत्वम् , ततः किमित्यत्राह—
8. १५-१७ **ते-समश्नुते** । ते प्रायणीयोदयनीये यः समे समानेतिकर्तव्यताके अनुतिष्ठति, स एवाविनाशेन स्वर्गं प्राप्नोति । कथमित्याह—यथा लोके कश्चिद् गन्ता उभयतःपक्षसा द्वयोः पार्श्वयोश्चक्राभ्यां युक्तेन उग्रवाहणेन उग्दूर्णैरश्वैरुपेतेन रथेनाध्वानमतिवाहयन् अभिमतां प्राप्यभूमिं प्राप्नोति तथैव स स्वर्गं प्राप्नोति ।
8. १८-२० साम्यानादरणे अनिष्टप्राप्तिं दर्शयति—**अथ-समश्नुते** । उपसंहरति—**तस्मात्-**
8. २१ **प्रायणीयोदयनीये** ॥

इत्यष्टमः खण्डः

अथ प्रायणीयोदयनीययोः शंयुवाकानन्तरकर्तव्यस्य पत्नीसंयाजादि-
9. १ कस्य अङ्गजातस्य प्रकृतितः प्राप्तस्यापवादमाह—**शंय्वन्तं-उदयनीयम्** । शंयुर्नाम कश्चिदृषिर्बृहस्पतेः पुत्रः । तेन दृष्टत्वात् 'तच्छंयोरावृणीमहे'[a] इत्ययं मन्त्रोऽपि शंयुशब्दाभिधेयः । शंयुवाकपाठावसानावेव प्रायणीयोदयनीयौ कर्तव्यौ । नोत्तरं पत्नीसंयाजादिकं कर्तव्यम् । तथा च ब्राह्मणान्तरम्—'पत्नीर्न संयाजयेत् । संस्थितयजुर्न जुहुयाद्'[b] इति ।

इत्थमविशेषं प्रदर्श्य संप्रति प्रधानकर्मणि देवतास्थानभेदकृतं कंचिद्
9. २-६ विशेषं प्रदर्शयति—**पथ्यां-समष्ट्यै** । प्रायणीये कर्मणि तावत् प्रथमं पथ्यां

a. RVkh. 10. 191. 15. b. AB. 1. 11. 5.

स्वस्ति यजेत् । अथ क्रमेणाग्निसोमसवितॄणां यागाः कर्तव्याः । अत्र यः पथ्यायाः स्वस्तेः प्रथमतो यागः स समञ्जस एव । कस्मात् ? यदेतत् प्रायणीयं नाम कर्मास्ति तत् तावत् स्वर्गलोकगमनारम्भरूपम् । तथा चैतरेये—'स्वर्गं वा एतेन लोकमुत्प्रयन्ति यत् प्रायणीयः । तत् प्रायणीयस्य प्रायणीयत्वम्'[a] इति । एवं सति तत् तत्र प्रायणीये पुरस्तात् प्रथमं पथ्यां स्वस्तिं यजतीति यदस्ति, तत् तेन स्वस्त्ययनं क्षेमप्राप्तिमेव करोति । तच्च स्वस्त्ययनं स्वर्गलोकप्राप्त्यै संपद्यते । स्वस्तिदेवताकत्वात् कर्मणः स्वस्त्ययनरूपत्वम् । यथा लोके कस्माच्चित् प्रदेशान्तरात् प्रदेशान्तरं जिगमिषतां जनानामन्तरा तस्करादि-प्रतिघातपरिहारेण गम्यभूमिप्राप्तिसिद्ध्यर्थं स्वस्त्ययनं क्रियते, तद्वत् स्वर्गलोक-प्राप्तिफलगमनारम्भे स्वस्त्ययनकर्मरूपोऽयं पथ्यायाः स्वस्तेः प्रथमतो यागः । स्वस्त्ययनं हि प्रथमं कर्तव्यमिति प्रसिद्धम् । अतः प्रायणीये स्वस्तियागः प्रथमं कर्तव्य इत्युपपन्नम् । उदयनीये तु नैवं यागक्रमः किंत्वन्यादृश इत्याह—
**अग्नि-समष्ट्यै ।** अग्निसोमसवितृपथ्यास्वस्त्यदितीनाम् उदयनीये क्रमेण यागाः 9. ७-११
कर्तव्याः । तत्र चोदयनीयेन कर्मणा स्वर्गलोकं प्राप्य पुनर्यथापूर्वं पृथिवीलोक-प्राप्तिः क्रियते । ततश्च यः पथ्यायाः स्वस्तेः परस्ताद् यागः सोऽस्य पृथिवी-लोकस्य प्राप्त्यर्थं स्वस्त्ययनकर्मरूपः । अथ देवतानां संख्यां स्तौति—**ता-**
**आप्नोति ।** गतम् । 9. १२,१३

अथ पञ्चानां यागानां याज्यापुरोनुवाक्या दर्शयितुं प्रतिजानीते—
**तासां याज्यापुरोनुवाक्याः ।** तासां देवतानां याज्याः पुरोनुवाक्याश्च लक्ष्यन्त 9. १४
इति शेषः । कास्ता इत्याकाङ्क्षायां लक्षणेन प्रदर्शयति—**ता-भवन्ति ।** 'स्वस्ति 9. १५
नः पथ्यासु धन्वसु'[b] 'स्वस्तिरिद्धि प्रपथे श्रेष्ठा'[c] 'अग्ने नय सुपथा राये अस्मान्'[d] 'आ देवानामपि पन्थामगन्म'[e] 'त्वं सोम प्र चिकितो मनीषा'[f] 'या ते धामानि दिवि या पृथिव्याम्'[g] 'आ विश्वदेवं सत्पतिम्'[h] 'तत् सवितुर्व-

a. AB. 1. 7. 1.
b. RV. 10. 63. 15.
c. RV. 10. 63. 16.
d. RV. 1. 189. 1.
e. RV. 10. 2. 3.
f. RV. 1. 91. 1.
g. RV. 1. 91. 4.
h. RV. 5. 82. 7.

रेण्यम्[1][a] 'य इमा विश्वा जातानि'[b] 'सुत्रामाणं पृथिवीं द्यामनेहसम्'[c] 'महीमू षु मातरं सुव्रतानाम्'[d] इत्येकादशसंख्या ऋचोऽत्र लक्षिता द्रष्टव्याः। सूत्रकृता तथा दर्शितत्वात्। आसां स्वस्तिमतीत्वादिलक्षणं यथासंभवं स्वयमेव
9. १६-१९ द्रष्टव्यम्। स्तौति—**मरुतो-समश्नुते**। सन्ति हि मरुतो नाम देवगणविशेषाः।
ये रुद्रस्य पुत्राः पृश्नेः पुत्राः इन्द्रस्य सुहृद इति च प्रसिद्धाः। 'सप्तगणा वै मरुतः'[e] इति च। कथं रुद्रपुत्रत्वं पृश्निपुत्रत्वमिन्द्रसुहृत्त्वं चेति चेत्, श्रूयताम्—

अदितिर्दितिश्च पत्न्यौ बभूवतुः काश्यपस्योभे।
आसुस्तयोरदित्यास्तनया इन्द्रादयो विबुधाः॥
तेषामिन्द्रः श्रेष्ठो गुणैरभूदीश्वरो जगताम्।
स तु दितितनयानखिलानधर्मनिष्ठानजैषीच्च॥
स्पर्धादूषितहृदया लब्धुमनाः पुत्रमिन्द्रहन्तारम्।
दितिराराधनमनिशं दयानिधेः काश्यपस्य चक्रे सा॥
लेभे तस्माद् गर्भं बभार चैनं समाहिता जठरे।
अथ समधिगतोदन्तः पुरन्दरः किं मया विधेयमिति॥
विमृशन् कपटपटीयान् व्यलोकयद् विप्रकीर्णकचाम्।
सुप्तां कदाचिदेनां सपदि विवेशाथ मायया जठरम्॥
भूयो भूयोऽपि वदन् मा रोदेत्येव देवेन्द्रः।
गर्भं शकलीकृत्य त्वरितमसौ निर्जगाम कृती॥
दितिरथ विदितोदन्ता समुदितशोका रुरोद भृशम्।
तस्मिन्नन्तर एव त्रीक्षणसहिता तुषारगिरिकन्या॥
सकलसुरासुरविनमन्मुकुटीकटमृष्टपदपीठा ।
यन्ती गगनपथेन क्रन्दितमाकर्ण्य पूर्णकारुण्या॥

a. RV. 3. 62. 10.
b. RV. 5. 82. 9.
c. RV. 10. 63. 10.
d. VS. 21. 5; TS. 1. 5. 11. 5.
e. TB. 1. 6. 2. 3.

1. T. omits this *mantra*

तदवस्थां पश्यन्ती दितिमिदमाह[थ] मन्मथारातिम् ।
सुरपतिना कपटभृता गर्भोऽस्याः खण्डितः प्रसुप्तायाः ॥
रोदिति बत तेनैषा प्राणभृतस्तत् कुरुष्व खण्डांस्तान् ।
ते च त्वत्पुत्राः स्युर्मरुतश्चैते मृतेर्योगात् ॥
नित्ययुवानो रुचिराः सुसदृशवपुषः सहैव संजाताः ।
सख्यममीषां च स्यादिन्द्रेण स्थानमन्तरिक्षे च ॥
जलधरपरिगतसलिलप्रदानपा( ल )नप्रभवितारः ।
इत्युक्ते पार्वत्या तथास्त्विति प्राह करुणाब्धिः ॥
मरुतामित्थं जातं रुद्रतनूजत्वमिन्द्रसख्यं च ।
पृश्निसुतत्वं तु पुरा गोरूपां पृश्निमीश्वरोऽरमयत् ॥
वृषरूपस्तत्र भवा मरुतः पृश्नेः सुता इति ख्याताः ॥

रुद्रतनूजत्वम् 'आ नो रुद्रस्य सूनवः'[a] इत्यादिमन्त्रेषु प्रसिद्धम् । 'मरुद्भिरिन्द्र सख्यं ते अस्तु'[b] इत्यादौ सख्यमिन्द्रेण मरुतां प्रसिद्धम् । 'पृश्नियै वै पयसो मरुतो जाताः'[c] इत्यत्र पृश्निपुत्रत्वं च । एते च मरुतो देवेषु तृतीयवर्णरूपाः । तथा च श्रूयते—'मरुतो वै देवानां विशः'[d] इति । वाजसनेयके च मनुष्येष्विव देवेष्वपि चातुर्वर्ण्यविभागप्रतिपादनप्रकरणे मरुतां देववैश्यत्वमाम्नायते—'स नैव व्यभवत् । स विशमसृजत । यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति'[e] इति । अन्तरिक्षभाजना अन्तरिक्षं स्थानं येषां ते तथोक्ताः । त एते मरुतोऽस्माल्लोकात् स्वर्गं लोकं गच्छतो यजमानस्य यज्ञविनाशं कर्तुमीश्वराः समर्थाः स्युः । यज्ञविनाशो नाम यज्ञफलप्राप्तिप्रतिघातः । एवं सति यदेतल्लक्षणयाज्यापुरोनुवाक्यापठनमस्ति तेन हेतुना मरुतो नैनं यजमानं हिंसन्ति फलप्राप्तिं प्रतिबध्नन्ति । 'स्वस्ति राये मरुतो दधातन'[f] इति मरुतः प्रत्यविनाशस्य प्रार्थितत्वात् । ततश्च तेषामानुकूल्ये संपादिते सति यजमानो विनाशराहित्येन स्वर्गं लोकं प्राप्नोति ॥

इति नवमः खण्डः

a. RV. 6. 50. 4.
b. RV. 8. 96. 7.
c. TS. 2. 2. 11. 4.
d. AB. 1. 9. 5.
e. ŚB. 14. 4. 2. 24.
f. RV. 10. 63. 15.

इदानीं प्रायणीयागतानामेव याज्यापुरोनुवाक्यानां व्यत्यासेनोदयनीया-
10. १ [या]मपि याज्यापुरोनुवाक्या दर्शयति—**ता-विपर्यस्यति**। उदयनीयाया-
10. २,३ मिति शेषः। विपर्यासो व्यत्यासः। तदेव स्पष्टयति—**याः-पुरोनुवाक्याः**।
प्रायणीये हि पथ्यास्वस्तियागे 'स्वस्ति नः पथ्यासु धन्वसु'[a] इति पुरोनुवाक्या पठ्यते। 'स्वस्तिरिद्धि'[b] इति च याज्या। उदयनीयायां तु यद्यप्येते एवर्चौ तथापि नैवं क्रमः। किं तु 'स्वस्तिरिद्धि'[b] इति पुरोनुवाक्या कर्तव्या। 'स्वस्ति नः पथ्यासु'[a] इति च याज्या। एवं पथ्यास्वस्तियागे विपर्यासप्रकारः। एवमन्ये-ष्वपि चतुर्षु यागेषु द्रष्टव्यम्।

10. ४-७ व्यत्यासं स्तौति—**प्रेव-अप्रच्युत्याम्**। यो यजमानः प्रायणीयेन कर्मणा स्वर्गं गन्तुं प्रारभते स एषोऽस्मात् पृथिवीलोकात् प्रच्युतो वियुक्तो भवेत्। तत्र योऽयं विपर्यासेनर्चां पाठः तेनास्मिन् पृथिवीलोके प्रतिष्ठां प्राप्नोति। पृथिवीलोकस्य विशेषणं प्रतिष्ठायामिति। प्रतितिष्ठन्त्यस्मिन् भूतानीति प्रतिष्ठा पृथिवीलोकः। न प्रच्युतिर्विनाशोऽस्या इति प्रतिष्ठाया अप्रच्युतित्वं विशेषणम्। यद्वा प्रासादे पर्यङ्के शेते इत्यादिवद् अस्मिन् लोके प्रतिष्ठायां गृह-क्षेत्रादौ। कीदृश्याम्? अप्रच्युत्यां प्रच्युतिरहितायाम्। यजमानः प्रतितिष्ठतीति योज्यम्। यद्वा प्रतिष्ठायामिति चतुर्थ्यर्थे सप्तमी। प्रतिष्ठार्थम्। प्रतिष्ठाया-मित्यस्य व्याख्या अप्रच्युत्यामिति। पृथिवीलोकादप्रच्युतिः ऋचां विपर्यासेन पाठस्य फलमित्यर्थः।

10.८-१० विधान्तरेण स्तौति—**अथो-निर्वान्ति**। यान्येतानि 'स्वस्ति नः पथ्यासु'[a] इत्यादीनि छन्दांसि ते प्राणा इति द्रष्टव्यम्। तथा च तत् तेन विपर्यासपाठे-नात्मनि यजमानस्य स्वस्य वा प्राणान् प्राणापानादीन् व्यतिषक्तान् अन्योन्य-संश्लिष्टान् करोति। तच्च व्यतिषञ्जनं प्राणानामविवर्हाय विश्लिष्य गमन-परिहाराय संपद्यते। यस्मादेवमन्योन्यसंश्लेषः क्रियते तस्मादेव हेतोरस्मिन् शरीरे स्थिताः प्राणा वायवो विष्वग्वृत्तितया चरन्तोऽपि न कदाचिन्नि-र्गच्छन्ति। व्यतिषङ्गाभावे हि कदाचिन्निर्गच्छेयुरपि।

a. RV. 10. 63. 15. b. RV. 10. 63. 16.

अथ स्विष्टकृद्यागे याज्यापुरोनुवाक्ये दर्शयति—**त्वां-तायते** । सूत्रितं 10.११-१४
हि—'त्वां चित्रश्रवस्तम यद्वाहिष्ठमिति स्विष्टकृतः'[a] इति । अनुष्टुप्छन्दस्त्वं
स्तौति—ततिरिति । प्रायणीयाख्यं कर्म यज्ञस्य ततिर्विस्तारहेतुरारम्भरूप-
त्वात् । अनुष्टुप् च वाग्रूपा । तद्रूपत्वं चोपपादितं प्राक् । यज्ञश्च वाचा वेदत्रय-
रूपया तायते विस्तारं गच्छति । तच्च 'द्वे वै यज्ञस्य वर्तनी'[b] इत्यत्रोक्तम् ।
प्रायणीयेष्टावनुष्टुभोऽस्त्याभिरूप्यम् । याज्यापुरोनुवाक्यारूपत्वात् ।

संयाज्ययोरपि प्रसक्तं विपर्यासं प्रतिषेधति—**न-इति** । तत्र हेतुः— 10.१५-१७
प्रतिष्ठे । संयाज्ये यज्ञस्य प्रतिष्ठाहेतुर्भवतः । स्विष्टकृतः प्रतिष्ठारूप-
त्वात् । तयोश्च व्यत्यासे क्रियमाणे व्यत्यासस्य स्वस्थानप्रच्यावनरूपत्वात्
प्रतिष्ठयोः प्रच्युतेरवश्यंभावित्वात् यज्ञस्याप्रतिष्ठितत्वं प्रसज्येत । यथाध्वनि
गच्छतः कदाचिद् दैवगत्या चरणस्खलनप्रसक्तौ झटिति पतनादिसंभवस्तद्वत् ।
अतः प्रतिष्ठारूपे संयाज्ये व्यतिषक्ते स्वस्वस्थानतः प्रच्याव्य अन्यान्यस्थान-
निवेशिनी करवाणि, अत एव यज्ञस्याप्रतिष्ठितत्वं प्रसञ्जयानीति परिभयेन
व्यत्यासं न कुर्यात् ॥

इति दशमः खण्डः

इदानीं शंयुवाकान्ततां स्तौति—**शंय्वन्तं-तत्** । अभिक्रान्तिर्गम्यभूमि- 11.१-३
प्राप्तिः । षष्ठ्यर्थे चतुर्थी । प्रायणीयं हि स्वर्गलोकगमनारम्भरूपम् । तस्य
शंयुवाकपाठेनावसानकरणम् अस्माल्लोकाद् गत्वा स्वर्गलोकसमीपं प्राप्य
तस्य अत्यन्तसन्निकृष्टदेशनिवासकरणरूपमिति द्रष्टव्यम् । यथा लोके स्रुघ्नात्
पाटलिपुत्रं गत्वा तस्यातिनिकटभूते प्रदेशे वसति तद्वत् । शंय्वन्तत्वानादरणपक्षे
दोषप्रदर्शनेन स्तोतुं पुनर्विधिमनुवदति—**यद्-असमराय** । इतोऽपि हेतोः 11.४-१२
शंय्वन्तत्वमादरणीयम् । अत्र सोमयाग इज्यमानाः सर्वा अपि देवताः प्रायणीये
कर्मणि संगताः समवेता भवन्ति । एवं स्थिते सति यः शंय्वन्तमनादृत्य दर्शपूर्ण-
मासादाविव पत्नीसंयाजं कुर्यात् , तस्य तत् कर्म तथा स्यात् । यथा एकत्र

a. ŚŚ. 5. 5. 6. b. KB. VI. 5. १८.

स्थितं देवानां संघमभिलक्ष्यान्तःपुरात् पत्नीर्निष्क्रमय्य प्रापयति। न ह्येतत् समञ्जसं यदन्तरेव वर्तितुं योग्यानां कुलवधूनामनिमित्तमेव जनसमाज-प्रापणम्। तथा च भारते दुःशासनपरिभूयमानयाज्ञसेनीपरिदेवितरूपं वचनम्—'धर्म्यां स्त्रियं सभां पूर्वं नानयन्तीति विश्रुतम्'[a] इत्यादि। प्रापणे का क्षति-रित्यत्रोक्तम्—यस्तम्। तत्र प्रायपत्नी कर्मणि पत्नीसंयाजान्तत्वं यः कश्चिद् विद्वानित्थं ब्रूयात्। कथमिति चेत्, अयं होता सर्वेषां देवानां समक्षं पत्नीः प्रापितवान्। यस्मादेवं तस्मादस्यापि पत्नी स्वयमेव निर्लज्जतया लङ्घित-कुलवधूजनमर्यादा जनसमाजं प्राप्स्यतीति। इत्थं यो विद्वान् वक्ति तस्य तद् वचनं तथैव स्यात्। यथार्थमेव भवेत्। यस्मात् प्रायणीये पत्नीसंयाजकरणे कथितो दोषः प्रादुःष्यात्, तस्मात् देवतानां पत्नीभिः सहासमराय असंगम-नाय शंय्वन्तमेव कुर्यात् न तु पत्नीसंयाजान्तमिति।

एवं तावत् प्रायणीयेष्टिर्विहिता। इदानीमवसरागतं सोमयागं विधि-
11.१३-१६ त्सुः प्रस्तौति—**असुरा-नुदते।** अस्यामिति साभिनयो निर्देशः। अस्यामि-त्यस्य विवरणं येयं प्राच्युदीचीति। समरुन्धन् सम्यङ् निवारितवन्तः। ते देवा अस्यां प्रागुदग्दिशि तैरसुरैर्निरुद्धाः सन्तः अस्मानराजतया असुरा जयन्ति अतोऽस्माभिः कश्चिद् राजाभिषेक्तव्यः स च सोम एवेति निश्चित्य सोमं राजत्वायाभिषिक्तवन्तः। अथाभिषिक्ते तेन सोमेन राज्ञा सनाथीकृता असुरैर्दुष्परिभवा भूत्वा एभ्यः पृथिव्यादिलोकेभ्योऽसुरान् निष्कासितवन्तः। यथैवं प्राक् तथेदानीमपि यजमान एतेन सोमेन राज्ञा रक्षितः शत्रुं जेतुं समर्थो भवति॥

इत्येकादशः खण्डः

12. १, २ अथ क्रयसाधनसंख्यां स्तौति—**तं-प्रजात्यै।** चतुर्भिर्द्रव्यैः। तानि
12. ३-६ दर्शयति—गवा। अन्यद् गतम्। अथ सोमक्रयकर्म स्तौति—**तद्-इति।**
असौ दिवि सर्वैरुपलभ्यमानो विचक्षणः। कृत्स्नं जगद् विचष्टे पश्यतीति

a. MBh. *Sabhā-dyūta*, 69. 9. नः for वि

विचक्षणः । चन्द्रमाः सकललोकाह्लादकरश्मियुक्तः । एवंभूतो यः सोमः स इमं लतारूपं क्रीतं गवादिद्रव्यचतुष्टयसमर्पणेन स्वीकृतं सोमं प्रविशति । तदात्मतयाभिमन्यते । लतारूपस्य सोमस्य देवतात्मकसोमभावः संपत्स्यते । अत एव हि लतायां सोमादिशब्दः । यस्मादयं लतात्मकः सोमो देवतात्मकसोम एव तस्मात् सोमं क्रीणातीति यदस्ति तद् देवानां जीवनसाधनभूतो देवतात्मा सोम एव परमार्थतः, न नु लतारूप एवाभिषुतः स्यादित्यभिप्रायेण कुर्यात् । देवतात्मकस्यैव सोमस्य देवोपयोगयोग्यत्वात् ।

अथ 'सोमाय क्रीताय प्रोह्यमाणायानुब्रू३हि'[a] इत्यध्वर्युणा[1] प्रेषितस्य
'भद्रादभि श्रेयः प्रेहि'[b] इत्याद्यानां नवसंख्यानामृचां पाठं विधत्ते—**तस्मै-**
**अन्वाह** । तादर्थ्ये चतुर्थीद्वयं सोममभिधातुम् । संख्यां स्तौति—**नव-** 12. ७.
**अमुष्मिन्** । देहगतनवच्छिद्रवर्तित्वात् प्राणानां नवत्वम् । दधाति स्थापयति । 12. ८-११
तच्च स्थापनमस्मिन्निह लोके सर्वायुत्वाय शतसंवत्सरपरिमितायुर्युक्तत्वाय
संपद्यते । अमुष्मिन् स्वर्गलोके अमृतत्वाय आभूतसंप्लवमवस्थानाय च
संपद्यते । अथादौ पठनीयामृचं प्रदर्शयति—**भद्राद्-अवरुद्ध्यै** । प्रेहीति 12.१२-१५
प्रोपसर्गवती । सोमस्य प्रवर्त्यमानस्याभिधेयत्वात् प्रशब्दवत्त्वमभिरूपमित्युक्तं प्रवर्त्यमानायेति । अस्यामृचि 'बृहस्पतिः पुरएता ते अस्तु'[c] इति द्वितीयपादे बृहस्पतिशब्दं व्याचष्टे—ब्रह्म वै । बृहच्छब्दो वेदवचनः । तस्य शब्दतोऽर्थतश्च बृहत्त्वात् । बृहतः परिवृढस्य परस्य ब्रह्मणः प्रतिपादकत्वाच्च । तस्य पतिः पालयिता बृहस्पतिः । तथा च वाजसनेयके बृहस्पतिशब्दनिर्वचनं दृश्यते—'वाग् वै बृहती तस्या एष पतिः तस्माद् बृहस्पतिः'[d] इति । वाचश्च वेदरूपायाः पालयिता ब्राह्मणजातिरेव । 'एकत्र मन्त्रास्तिष्ठन्ति'[e] इति ब्राह्मणस्य वेदाधिष्ठानत्वस्मरणात् । 'विद्या ह वै ब्राह्मणमाजगाम'[f] इति श्रुतेश्च । अतो बृहस्पतिशब्देन ब्रह्मैवोच्यते । यस्मादेवं तस्मादस्य पादस्य पाठः ब्रह्मयशसस्य ब्रह्मजातिसंबन्धिनो यशसः स्वीकरणाय संपद्यते ।

a. AB. 1. 13. 1. b. TS. 1. 2. 3. 3.
c. TS. 1. 2. 3. 3. d. ŚB. 14. ६. 1. 22.
e. MBh. XIII. 318. 2. f. N. 2. 4. 1.

1. T. इत्याद्यध्वर्युणा

12.१६-१९ अथ द्वयोर्ऋचोः पाठं विधत्ते—**इमां-अवरुद्ध्यै**। एते ऋचौ त्रिष्टुप्छन्दस्के; एकादशाक्षरपादत्वात्। वरुणदेवत्ये च। तथा चानुक्रमण्याम्—'अस्तभ्नात् षळर्चं नाना वा त्रैष्टुभमन्त्यं वा तृचमाश्विनमानुष्टुभमपश्यत्'[a] इति। 'अस्मा ऊ षु दश वारुणं तु'[b] इति पूर्ववाक्ये तुशब्दवचनात् तुह्यादिपरिभाषया अस्तभ्नादिति सूक्तस्य वरुणदेवत्यत्वसिद्धिः। अन्त्यं तृचमाश्विनमानुष्टुभमित्युक्तत्वात् त्रैष्टुभत्वस्य प्रथमतृचे निवेशात् तृतीयस्या 'इमां धियम्'[c] इत्यस्यास्त्रिष्टुप्छन्दस्त्वसिद्धिः। तथा 'प्र सम्राजेऽष्टौ वारुणम्'[d] इत्यत्रानादेशन्यायात् त्रिष्टुप्छन्दस्त्वस्य वारुणमिति वचनाद् वरुणदेवत्यत्वस्य च सिद्धत्वाद् 'वनेषु व्यन्तरिक्षम्'[e] इत्यस्या अपि यथोक्तरूपत्वसिद्धिः। तत्र येयं त्रिष्टुप् तत् क्षत्रमेव। क्षत्रेण सहैकस्मात् कारणादुत्पन्नत्वात्। 'तच्छ्रेयोरूपमत्यसृजत क्षत्रम्। यान्येतानि देवता क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति'[f] इति वाजसनेयके देवक्षत्रमध्यपठितत्वाद् वरुणस्य क्षत्रत्वम्। तथा चैतयोर्ऋचोः पाठः क्षत्रसंबन्धिनो यशसः प्राप्त्यै संपद्यते।

12.२०-२३ अनन्तरं चतसृणामृचां पाठं विधत्ते—**सोम-अवरुद्ध्यै**। अत्रानुक्रमणिका—'त्वं सोम त्र्यधिका सौम्यं पञ्चम्यादिगायत्र्यो द्वादशोष्णिक् च'[g] इति। अस्यार्थः—'त्वं सोम प्र चिकितो मनीषा'[h] इत्येतत् सूक्तं त्रयोविंशत्यृचं सोमदेवत्यं च। तत्रानादेशन्यायेन आद्याश्चतस्रोऽन्त्याः षळृचश्च त्रिष्टुप्छन्दस्काः। 'त्वं सोमासि सत्पतिः'[i] इत्यारभ्य 'आ प्यायस्व'[j] इत्यन्ता द्वादशर्चो गायत्र्यः। 'आ प्यायस्व मदिन्तम'[k] इत्येषा तूष्णिगिति। तत्र गायत्रीछन्दस्कासु द्वादशसंख्यास्वृक्षु मध्ये पठितत्वात् 'सोम यास्ते'[l] इत्याद्यानां चतसृणां गायत्रीत्वम्। सूक्तस्यैव सौम्यत्वात् सोमदेवत्यत्वसिद्धिः। एकयोनिप्रभवत्वाद् गायत्र्या ब्रह्मत्वम्। देवक्षत्रमध्यपठितत्वादेव सोमस्य क्षत्रत्वम्। ब्रह्मयशसस्येत्यादि

a. SA. VIII. 42.
b. SA. VIII. 41.
c. RV. 8. 42. 3.
d. SA. V. 85.
e. RV. 5. 85. 2.
f. ŚB. 14. 4. 2. 23.
g. SA. I. 91.
h. RV. 1. 91. 1.
i. RV. 1. 91. 5.
j. RV. 1. 91. 16.
k. RV. 1. 91. 17.
l. RV. 1. 91. 9.

गतम् । इत्थं सप्तसंख्या ऋचो विनियुक्ताः । अथ 'गयस्फान'[a] इत्यस्या
ऋचोऽर्धर्चे पठिते सति विरामं विधत्ते—**तासाम्-प्रविशति**। येयमृक् सा अमृ- 12.२४-२६
तत्वमेव अमृतत्वहेतुत्वात् । 'आयुर्घृतम्'[b] इत्यादिवत् साध्यसाधनयोरभेदात् ।
एवं सति योऽयमर्धर्चे विरामः सोऽयमृङ्मयेऽमृते प्रवेशरूप इत्यनुसंधेयम् ।
ऋङ्मध्ये विरामे सत्यमृतमध्यावस्थानलाभात् । अविरामेण पठने सति तस्य
गमनरूपत्वात् प्रवेशरूपानुत्पत्तेः । प्रवेशस्य प्राप्तिरूपत्वेन गमननिवृत्तिरूपत्वात् ।
प्रकारान्तरेण स्तौति **अथो-कुरुते**। ऋक् परिवृढरूपा अपरिछिन्नशक्तिशालि- 12.२७,२८
त्वात् । तत्रार्धर्चोपरमेण अर्धर्चद्वयरूपं ब्रह्मैव होता स्वरक्षणार्थम्[1] उभयतः द्वयोः
पार्श्वयोः वर्म कवचस्थानीयं करोत्येव । यथा बद्धवर्माणं न कश्चिदपि परि-
पन्थी परिभवितुं प्रभवति, तद्वदर्धर्चरूपब्रह्मवर्मितस्य होतुर्न कुतश्चिद् भय-
प्रसंगः । अर्धर्चद्वयमध्यस्थितस्याभितोऽर्धर्चद्वयस्य संदंशन्यायेनावस्थानात् ।

'अमृतं वा ऋग्'[c] इत्यादिकं ब्राह्मणं स्थलान्तरेऽतिदिशति **तद्-तत्**। यत्र 12.२९,३०
क्वचिदग्निमन्थनीयादौ 'गयस्फान'[a] इत्यस्य ऋचोऽनन्तरं 'या ते धामानि'[d]
इत्यस्याः पाठं विधत्ते—**या-अन्वाह**। शालां प्रपाद्यमानायानीयमानाय । तं 12. ३१
सोममभिधातुम् । तत्रास्या आभिरूप्यं दर्शितं प्रवतीमिति । प्रचरेति प्रशब्द-
वती । नवसंख्यापूरण्याः कस्याश्चिदृचः पाठं विधत्ते—**आगन्-परिदधाति**। 12. ३२
परिधानं समाप्तिः । तामनयर्चा करोति । अस्यामृचि सोमस्याभिधेयता
पूर्वास्विव स्फुटं न प्रतीयते । ऋतूनां सहागमनकथनात् । तद्धि संवत्सरा-
गमनकथन एवोपपद्यत इति स्वयमेव व्याचष्टे—**संवत्सरो-इति**। सोमस्यैव 12.३३,३४
संवत्सरात्मकत्वात् सोमस्यागमने संवत्सरावयवभूतानामृतूनामपि सहागमन-
मुपपद्यत इत्यतो हेतोः 'आगन् देव ऋतुभिः'[e] इति सोमाभिधायिन्यामस्यामृचि
युज्यत एव । **अभिरूपा-संयन्ते**। गतम् । अत्र द्वादशसंख्यामवयुत्य स्तौति— 12.३५-३९
**द्वादश-आप्त्यै**। 12.४०,४१

a. RV. 1. 91. 12.
b. TS. 2. 3. 2. 2.
c. KB. VII. 12. २५.
d. RV. 1. 91. 4.
e. RV. 4. 53. 7.

1. T. स्वरक्षार्थं

12.४२,४३ त्रयोदशसंख्यां स्तौति—**अस्ति–आप्त्यै** । द्वादशसंख्यानां मासानां वा संवत्सरस्य वा समीपे चरतीति उपचर इति त्रयोदशमासस्य नाम । योऽधिमास इति ज्योतिःशास्त्रे प्रसिद्धः । स च अविज्ञातश्चैत्रादिमासवन्न सर्वजनप्रसिद्धः । इवशब्दः शास्त्रीयप्रसिद्धिसत्तासूचकः । तस्योपचरमासस्याप्त्यै त्रयोदशसंख्या संपद्यते । अभ्यासोऽध्यायसमाप्तिसूचनार्थः ।।

इति द्वादशः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
सौम्यं कर्म वदन् क्रयान्तमखिलं कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय ऐद् सप्तमः ।।

**इति कौषीतकिब्राह्मणव्याख्याने**
**प्रथमदशके सप्तमोऽध्यायः**

अथ

# अष्टमोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
त्रयपर्यन्तानीत्थं कर्माण्युक्तानि सप्तमाध्याये ।
कथ्यन्तेऽथातिथ्याघर्मोपसदोऽष्टमे क्रमशः ॥

इदानीमवसरप्राप्तामातिथ्येष्टिं विधित्सुः कर्मस्वरूपं प्रशंसति—
**आतिथ्येन-आप्नोति** । द्विविधाः खलु पशवः पादद्वययुक्ता मनुष्यरूपाः पाद- 1. १, २
चतुष्टयोपेता गवाश्वादिलक्षणाश्च । न तु प्रकारान्तरमस्ति । तथा च ब्राह्मणा-
न्तरम्—'एतावन्तो वै पशवो द्विपादश्चतुष्पादश्च'[a] इति । तानुभयविधानपि
पशून् पुरा देवा आतिथ्यसंज्ञेन कर्मणा प्राप्तवन्तः । तद्वद्यजमानोऽपीदानीं
अनेनातिथ्यकर्मणा तानुभयविधान् पशून् प्राप्नोति । प्रथमं तावदातिथ्याङ्गत्वे-
नाग्निमन्थनं विधत्ते—**आसन्ने-मन्थन्ति** । आतिथ्ये कर्मणि हविरासादनानन्तरम् 1. ३
अभिमर्शने कृते सत्यग्निमन्थनकर्म कर्तव्यम् । तथा च बौधायनः—'अथ
निर्मन्थ्यस्यावृता निर्मन्थ्येन चरन्ति'[b] इति । सूत्रकारश्च—'अग्निमन्थनीयाश्चा-
सन्ने हविषि'[c] इति । स्तौति—**शिरो-दधाति** । आतिथ्यकर्म यज्ञस्य शरीरिण 1. ४-६
उत्तमाङ्गस्थानीयं भवति । यथोत्तमाङ्गं करचरणाद्यङ्गानां मध्ये प्रधानं तद्वत्
प्रधानभूतमेतदातिथ्यकर्म । अग्निः प्राणरूपः । तच्च—'अथ देवा इममेव
प्राणमग्निमन्तरादधत'[d] इत्यत्रोक्तम् । तेन आतिथ्ये कर्मण्यग्निमन्थनेन शिरसि
प्राणं स्थापयति ।

अग्निमन्थनीयानामृचां संख्यां स्तौति—**द्वादश-आप्त्यै** । अथ संप्रैषाद- 1. ७-९
नन्तरं पठनीयामृचं प्रदर्शयति—**अभि-अरिष्ट्यै** । सविता देवतास्या इति 1. १०-१२
सावित्री । तथा चानुक्रमण्याम्—'कस्य पञ्चोनाजीगर्तिः शुनःशेपः स कृत्रिमो
वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमादौ काव्याग्नेय्यौ सावित्रस्तृचो गायत्रो-

a. TS. 5. 2. 5. 3.

b. BŚ. 5. 2. 25. ( Printed edn. चरति )

c. ŚŚ. 5. 7. 5.

d. KB. VII. 4. ११.

ऽस्यान्त्या भागी वा'[a] इति। तत्र सावित्रे तृचे प्रथमेयम् 'अभि त्वा देव सवितः'[b] इत्येषा। अतः सावित्री। तस्या ऋचः पाठः सवित्रा कर्मणः प्रसूतत्वाय भवति। यस्मात् सवित्रा इदमिदानीं कर्मानुष्ठीयतामित्यनुज्ञातस्य कर्मणो रिष्टिर्नाशः कश्चिदपि न भवति। अतः कर्मणोऽविनाशाय सावित्र्या ऋचः पाठः। कर्मसमृद्धिहेतुत्वात् प्रशस्तमिदमित्यर्थः। पुनरेकामृचं

1. १३,१४ विनियुङ्क्ते—**मही-एव।** 'प्रातर्युजा वि बोधय'[c] इत्येतस्मिन् एकविंशत्यृचे सूक्ते द्यावापृथिवीदेवत्ययोः त्रयोदशीचतुर्दश्योर्मध्ये त्रयोदश्येषा। तथा चानुक्रमणी—'प्रातर्युजा सैका चतस्र आश्विन्यस्तथा सावित्र्य आग्नेय्यौ द्वे दैवीनामेकैकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्ये पार्थिवी षड् वैष्णव्योऽतो देवा दैवी वा'[d] इति।

1. १५ अथ मथनकर्मणि तिस्र ऋचो विनियुङ्क्ते—**त्वाम्-अन्वाह।** मथितवन्तमित्याभिरूप्यं दर्शितम्। 'अथर्वा निरमन्थत'[e] इति यद्यप्याद्यायामेव मथितवत्त्वं तथापि सृष्टिन्यायेन छत्रिन्यायेन च तृचस्य मथितवत्त्वं द्रष्टव्यम्। मथ्यमानाय मथ्यमानमग्निमभिधातुम्। अथ मथनोत्पन्नाग्न्यभिधायिनीमेकाम्

1. १६ ऋचं विनियुङ्क्ते—**उत-जाताय।** अजनीति जनिधातुमतीम्। आहवनीये

1. १७ प्रहर्तुमध्वर्युणा हस्ते गृहीतमग्निमभिधातुमेकामृचं प्रदर्शयति—**आ-धार्यमाणाय।** 'हस्ते न खादिनम्'[f] इति हस्तशब्दवतीम्। आहवनीये प्रक्षिप्यमाणाग्न्यभि-

1. १८ धायिनीमेकामृचं प्रदर्शयति—**प्र-प्रह्रियमाणाय।** अग्निप्रहरणानन्तरम् 'अग्नावग्निश्चरति'[g] इति मन्त्रेण होमः कर्तव्यः। तथा च ब्राह्मणम्—'प्रहृत्य जुहोति। जातायैवास्मा अन्नमपि दधाति'[h] इति। कल्पश्च—'प्रहृत्याभिजुहोत्यग्नावग्निरिति'[i] इति। तत्र होमेन विषयीक्रियमाणमग्निमभिदधतीमेका-

1. १९ मृचं विनियुङ्क्ते—**आ-आहूयमानाय।** अथ द्वे ऋचौ विनियुङ्क्ते—**अग्निना-**

1. २० **समिध्यमानाय।** समिध्यमानाय सम्यग् दीप्यमानाय। अनुवचनसमाप्त्यर्था-

a. SA. I. 24.
b. RV. 1. 24. 3.
c. RV. 1. 22. 1.
d. SA. I. 22.
e. RV. 6. 16. 13.
f. RV. 6. 16. 40.
g. TS. 1. 3. 7. 2.
h. TS. 6. 3. 5. 4-5.
i.

मृचं विधत्ते—**तं-दधाति**। 'स्वेषु क्षयेषु वाजिनम्' इति पादस्य विद्यमानत्वा- 1. २१-२४
दन्तवत्या 'तं मर्जयन्त'[a] इत्यनयर्चा परिधानं समाप्तिं कुर्यात्। यस्मात् क्षयो **नामान्त एव**। क्षयस्यान्तहेतुत्वात्। परिधानीया च शस्त्रावसानरूपा। तथा चाश्वलायनः—'सर्वत्रोत्तमां परिधानीयेति विद्याद्'[b] इति। अतोऽन्ते अनुवचनावसाने क्षयशब्दाभिधेयमन्तमवसानं स्थापयति। परिधानीयात्वमस्या अभिरूपमित्येतत्॥

इति प्रथमः खण्डः

अथाग्निमन्थनकर्मणि सर्वत्राप्यस्या एव परिधानीयात्वे प्राप्ते तस्य
कुत्रचिदपवादं दर्शयितुं तद्विषयं दर्शयति—**एतया-च**। अत्र आतिथ्यागताग्नि- 2. १
**मन्थनकर्मणि** चातुर्मास्याद्यपर्वस्थे च 'तं मर्जयन्त'[a] इत्यनयर्चा परिधानं कुर्यात्। आद्यन्तयोः ऋचोस्त्रिरावृत्तिविधिमभिप्रेत्य तत्सहितां संख्यां स्तौति—
**त्रिः-आप्त्यै**। यदिदं जगदस्ति तत् सर्वं षोळशकलं भवति। ज्ञानेन्द्रियकर्मेन्द्रिय- 2. २-४
पञ्चकमनःस्थूलभूतपञ्चकात्मकतया षोळशसंख्यावयवोपेतम्। अतः षोळशर्चां पाठोऽस्य कृत्स्नस्य जगतः प्राप्त्यै संपद्यते। अथ पश्वालम्भनाङ्गभूते अग्निमन्थनकर्मणि 'तं मर्जयन्त'[a] इत्यस्याः परिधानीयात्वापवादपुरःसरं परिधानीयान्तरं
दर्शयति—**अथ-आप्त्यै**। यत्र यस्मिन् पश्वालम्भनं क्रियते तत्र तदङ्गतयाग्नि- 2. ५-७
मन्थने क्रियमाणे सत्येतां 'तं मर्जयन्त'[a] इत्यृचं ऋगन्तरवत् पराचीमावृत्तिरहितां पठित्वा 'यज्ञेन यज्ञमयजन्त'[c] इत्येतयर्चा त्रिष्टुप्छन्दस्कया परिदध्यात्। तच्च परिधानं पशूनां प्राप्त्यै संपद्यते। पशूनां त्रैष्टुभत्वात् त्रिष्टुभो वीर्यरूपत्वात् पशूनां च वीर्यवत्पुरुषानुविधेयत्वात्। अतः त्रिष्टुभा परिधानं पशूनां
प्राप्तिहेतुः। अत्राप्यावृत्तिसहितां संख्यां स्तौति—**त्रिः-प्रजापतिसंमितम्**। 2. ८-१०
प्रजापतिशब्देन संवत्सर उच्यते। 'संवत्सरः प्रजापतिः'[d] इति श्रुत्यन्तरात्। स च सप्तदशः। सप्तदशसंख्यैर्मासर्तुभिरुपेतत्वात्। तच्च प्रजापतिना संमितं तुल्यं

a. RV. 8. 84. 8.
b. AŚ. 2. 16. 8.
c. RV. 1. 164. 50.
d. AB. 1. 16. 44.

2.११-१५ कर्म । तदार्धुकं समृद्धिशीलं भवति । अतः सप्तदशत्वं प्रशस्तम् । **सप्तदश-**
**भवति** । गतम् ।

आज्यभागयोः पुरोनुवाक्ये विषयीकृत्य शाखान्तरीयं मतं दर्शयति—
2. १६ **अतिथिमन्तौ-कुर्वन्ति ।** तथा चैतरेये श्रूयते—'समिधाग्निं दुवस्यताप्यायस्व
समेतु त इत्याज्यभागयोः पुरोनुवाक्ये भवत **आतिथ्यवत्यौ**'[a] इति । स्वमतं
2. १७ दर्शयति—**वार्त्रघ्नौ-स्थितौ ।** सूत्रितं च—'पौर्णमासीविकारः'[b] इति । आज्य-
2. १८ भागयोश्चोदकप्राप्ते एव याज्ये व्यवस्थापयितुं पूर्वपक्षयति—**ऋग्याज्यौ-आहुः ।**
एतावाज्यभागावृग्याज्यावेव स्यातां न तु जुषाणयाज्यौ । 'उत ब्रुवन्तु जन्तवः'[c]
'गयस्फानः'[d] इत्येते आज्यभागयोर्याज्ये कुर्यात् । अत्र हेतुं चाहुरित्याह—
2. १९ **ऋग्याज्या-वदन्तः** । अत्र हि तिस्रो देवताः सन्ति अग्निः सोमो विष्णुश्च ।
एता एव देवता उपसद्यागेष्विज्यन्ते । तत्र चर्ग्याज्यात्वमेवेत्यविवादम् । अतो
देवतासामान्यादिहापि ऋग्याज्यात्वमेव युक्तम् । एवं देवतासामान्यं हेतुं वदन्त
आज्यभागयोः ऋग्याज्यात्वं केचिच्छाखिनो मन्यन्ते । सिद्धान्तमाह—**जुषाण-**
2. २० **यज्यौ-स्थितौ** । सूत्रकारश्चाह—'उत ब्रुवन्तु जन्तवो गयस्फान इत्याज्यभागा-
वृग्भ्यां यजेयुर्जुषाणेन वा'[e] इति । अथ प्रधानयागयाज्यापाठे सोमस्य विष्णु-
2. २१ शब्देनादेशं विधत्ते—**सोमं-यजति** । कथं वस्तुतः सोमस्य सोमशब्देनादेशं हित्वा
विष्णुशब्देनादेशः ? न हि देवतान्तरवाचिना शब्देन देवतान्तरमादेष्टुं
2.२२,२३ शक्यमित्याशङ्क्य सोमस्यैव विष्णुशब्दाभिधेयतामुपपादयति—**तद्-रूपम्** ।
क्रीतः सन् सोमो यज्ञं विशति प्रविशति यज्ञयोग्यतां गच्छतीति यदिदमस्ति
तदेवास्य वैष्णवं विष्णुशब्दवाच्यं रूपं भवति । तेन रूपेणायं सोमो विष्णुरेव ।
प्रविशतीति विष्णुः । देवतान्तरमपि ह्यनया व्युत्पत्त्यैव विष्णुशब्दवाच्यत्वेन
प्रसिद्धम् । अतोऽस्य विष्णुशब्देन याग उपपद्यत एव । अस्त्वेवं विष्णुशब्देना-
देशस्तथापि सोमशब्देनापि विकल्पेनादेशः किं न स्यादित्याशङ्क्य प्रकारान्तरेण
2.२४-२७ साधयति—**यद्वेव-भक्षयन्ति** । यथाग्नेः कालीकराल्यादिज्वालासप्तकविशिष्टेन
सकललोकप्रत्यक्षेण बाह्येन रूपेण यज्ञनिष्पादकत्वम्, 'सा वा असौ'[f] इत्याद्युक्त-

a. AB. 1. 17. 1.
b. ŚS. 5. 7. 2.
c. RV. 1. 74. 3.
d. RV. 1. 91. 12.
e. ŚS. 3. 13. 17.
f. K. B. III. 3. २५.

रूपेण शास्त्रैकसमधिगम्येन देवतात्मकरूपेण[1] यजनीयत्वम्, तद्वत् सोमस्यापि रूपद्वयेन यजनीयत्वं यागनिष्पादकत्वं च। तत्र यद् देवतात्मकं यजनीयं रूपं तद् विष्णुशब्दाभिधेयम्। यत् पुनर्द्रव्यात्मकं लतादिरूपं यागनिष्पादकं तत् सोमशब्दाभिधेयम्। तत्रेह यजनीयत्वाद् विष्णुशब्देनैवादेशो युक्तः। यत्र पुनर्द्रव्यत्वप्रयुक्तहोमभक्षणादिकर्म तत्र सोमशब्देनाभिधेयत्वम्। तस्मादिह देवतारूपत्वेन यजनीयतया सोमस्य स्थितत्वात् विष्णुशब्देनैवाभिलापः न सोमशब्देनेति। अथ हविषो याज्यापुरोनुवाक्ये विधत्ते—**त्रिष्टुभौ-दधाति।** 2.२८-३०
ते च 'विष्णोर्नु कम्'[a] 'प्र तद्विष्णुः'[b] इत्येते। 'विष्णोर्नु कं प्र तद्विष्णुः'[c] इति सूत्रात्। तयोस्त्रिष्टुप्छन्दस्त्वात्। बलं वै वीर्यमित्यादि गतम्॥

इति द्वितीयः खण्डः

स्विष्टकृतो याज्यापुरोनुवाक्ये विधत्ते—**होतारम्-आग्नेय्यौ।** ते चाति- 3. १
थिमत्यौ। 'अग्निमतिथिं जनानाम्'[d] 'यस्त आतिथ्यम्'[e] इति चातिथिशब्द-
श्रवणात्। रथवत्यौ 'चित्ररथम्'[d] 'वसुमता रथेन'[e] इति रथशब्दवत्त्वात्।
त्रिष्टुप्छन्दस्के च। एकादशाक्षरपादयुक्तत्वात्। अग्निदेवत्ये च। अग्नेरभिधे
यत्वात्। 'या तेनोच्यते सा देवता'[f] इति स्थितेः। उक्तरूपचतुष्टयत्वं स्तौति—
**तद्-तत्।** यथा लोके चतुर्भिरवयवैः समृद्धं संपूर्णं रथादि भवति, एवमेत- 3. २
दुक्तरूपचतुष्टयविशिष्टयाज्यापुरोनुवाक्यापठनं भवति। **उपनामुक-कुरुते।** 3. ३
किंच एनं होतारं यजमानं वा रथः देवरथो मनुष्यरथो वा उपनामुकः उपनम-
नशील एव भवति। यो होता रूपचतुष्टययुक्ते एते याज्यापुरोनुवाक्ये करोति।
इळाह्वानोत्तरकालीनस्य चोदकप्राप्तस्याङ्गजातस्यानुष्ठानं प्रतिषेधति—
**इळान्तं-तत्।** आतिथ्यमिति शेषः। अभिक्रान्त्यै तद्रूपमित्यादि गतम्। 3. ४-६

a. RV. 1. 154. 1. b. RV. 1. 154. 2.
c. ŚŚ. 5. 7. 3. d. RV. 10. 1. 5.
e. RV. 4. 4. 10. f. SA. 2. 5.

1. T. देवतात्मकेन रूपेण

एवमातिथ्येष्टिं विधाय संप्रति दीक्षणीयादीनामातिथ्यान्तानां कर्मणा-
3. ७–९ मुपांशुप्रयोज्यतां विधत्ते—**उपांशुहविष-सिच्यते**। उपांशुहविषः उपांशु कर्तव्याः प्रधानयागा यासां तास्तथोक्ताः। गतमन्यत्। अत्रोपसत्सु सतन्त्रस्यैव प्रधानयागस्योपांशुत्वं द्रष्टव्यम्। यथा सौमिकीष्विष्टिषु उपांशुहविष्ट्वलक्षणो[1]
3.१०–१६ विशेषो दर्शितस्तथैवापरं विशेषं दर्शयति—**उत्सृजन्तः-एति**। एतासु चतसृष्विष्टिषु यान्यङ्गभूतानि कर्माणि तानि किंचित् किंचिदुत्सृजन्तः परित्यजन्त एवर्त्विजो गच्छेयुः। तत्र तावद्दीक्षणीयेष्टिः पत्नीसंयाजावसाना स्यात्। तत्र वेदवाचनादीनां प्राकृतानामुत्सर्गः। प्रायणीया तु शंयुवाकान्ता। अत्र पत्नीसंयाजान्तानामप्युत्सर्गः। आतिथ्येष्टिरिळान्ता। अत्रानुयाजादेरुत्सर्गः। उपसत्सु देवतानां याग एव, न स्विष्टकृदादि। कथमेवं क्रियत इति चेत्, पुरा प्रजापतिर्वेदवाचनादीनुत्सृज्योत्सृज्यैव दीक्षणीयादिभिरेतैः कर्मभिः स्वर्गं लोकं गतवान्। तद्वदिदानीमपि यजमानः किंचित् किंचित् कर्म परित्यज्यैवैतैः कर्मभिः स्वर्गं लोकं प्राप्नोति ॥

इति तृतीयः खण्डः

आतिथ्येष्टिरिति स्पष्टमुद्दिष्टाथ क्रमागते।
प्रवर्ग्ये होतृकर्तव्यं विवित्सुः स्तौति कर्म तत् ॥

4. १ **शिरो-महावीरः**। महावीरशब्दः प्रवर्ग्यकर्मवचनः। महावीर इति यदस्ति तदेतद् यज्ञस्यावयविनः शिर उत्तमाङ्गमेव। यथा पुरुषसंबन्धिनामङ्गानां मध्ये शिरः प्रधानं तद्वद् यज्ञाङ्गानां मध्ये प्रवर्ग्याख्यमङ्गं प्रधानं भवति।

अथ दीक्षणीयादिवत् सर्वयज्ञप्रयोगेषु प्रवर्ग्यानुष्ठेयत्वप्रसक्तौ सत्यां
4. २ प्रथमप्रयोगेऽनुष्ठेयतां प्रतिषेधति—**तत्-प्रवृञ्ज्यात्**। किमिति प्रथमयज्ञे
4. ३ प्रवर्ग्यस्याननुष्ठेयत्वमित्यत्राह—**उपनामुक-प्रवृणक्ति**। यो यजमानः प्रथमयज्ञे प्रथमप्रयोगे प्रवर्ग्यं न करोति तं प्रत्युत्तरो यज्ञ उपनामुक उपनमनशील एव भवेत्। अत एवानुष्ठाने तदभावोऽप्युक्तो भवति। उत्तरयज्ञानुपनतिप्रसंगान्न

1. T. °हविष्टालक्षणो

प्रथमयज्ञे प्रवर्ग्यस्यानुष्ठेयत्वमित्यर्थः । तथा च सूत्रम्—'अप्रवर्ग्यः प्रथमयज्ञः'[a] इति ।

अथ यजमानविशेषमधिकृत्य विकल्पेन तस्यानुष्ठानमनुजानीते—
**कामं–प्रवृञ्ज्यात् ।** यस्तु यजमानोऽनूचानः साङ्गवेदाध्ययनसंपन्नः श्रोत्रियः 4. ४
श्रुतार्थज्ञानवांश्च स्यात् तस्य काममिच्छया प्रवर्ग्यं कुर्यात् । कुर्याद् वा न वा
कुर्यात् । तस्य तु यजमानस्य प्रथमयज्ञे नावश्यमनुष्ठेयत्वम् । तथा च सूत्र्यते—
'विकल्पः श्रोत्रियस्य'[b] इति । तस्यानुष्ठेयत्वे को विशेषहेतुरित्यत्राह—
**आत्मा–समर्धयति ।** सोऽनूचानत्वश्रोत्रियत्वविशिष्टो यजमानो यज्ञस्यात्मैव 4. ५,६
स्वरूपमेव भवति । तस्माद्धेतोः स यजमानः यज्ञस्य स्वभूतेन स्वेनात्मनैव यज्ञं
व्यृद्धमपि समृद्धं करोति । तथा च पठिष्यति—'नन्दति ह वै यज्ञो विदुषा-
गच्छता । यन्मेऽसमृद्धम् भविष्यत्ययं मे तत् समर्धयिष्यतीति'[c] इति । यज-
मानस्य विदुषः सतो यज्ञात्मकत्वान्न यज्ञवैकल्यापत्तिः । विद्ययैव वैकल्य-
परिहारात् । न खलु साकल्यहेतौ समग्रे सति वैकल्यमाविर्भवितुं प्रभवेत् ।
अथादित्यरूपसंपादनेन स्तौति—**तद्–प्रीणाति ।** योऽसौ दिवि स्थित 4. ७,८
आदित्यस्तपति दीप्यते असावेव महावीरो नान्यः । ततश्च तेन प्रवर्ग्यकर्मणा-
दित्यमेव प्रीणयति । इत्थं प्रवर्ग्यकर्मस्वरूपमेवाभिष्टूय संप्रति 'होतर्घर्मम-
भिष्टुहि'[d] इत्यध्वर्युणा प्रेषितस्य होतुः 'ब्रह्म जज्ञानम्'[e] इत्याद्यानामेकविंशति-
संख्यानामृचां पाठं विधत्ते—**तम्–अभिष्टुयात् ।** तमादित्यात्मकं महावीरम् 4. ९
ऋचामेकशतेनाभिष्टुयात् । तत्र शतसंख्यां स्तौति—**शतयोजने–आप्नोति ।** 4.१०-१६
अस्माद् भूलोकादारभ्य शतयोजनपरिमितमार्गगम्ये स्थाने स्थितः सन्नेष
आदित्यस्तपति । ततश्च यदृचां शतमस्ति तेन तं शतयोजनपरिमितं मार्गं
प्राप्नोति अतिवाहयति । या पुनरेकशततमी ऋगस्ति सा यजमानलोकः
यजमानस्य गम्यस्थानम्[1] । तत्प्राप्तिहेतुरिति यावत् । यथा लोके ग्रामादिप्राप्तौ

a. ŚŚ. 5. 9. 1.
b. ŚŚ. 5. 9. 2.
c. KB. XXVII. 1. १०-११.
d. MS. 4. 9. 2.
e. VS. 13. 3.

1. T. गम्यं for गम्य

**मार्गगमनं** गम्यग्रामादिप्राप्तिश्च एवं शतेन मार्गगमनं क्रियते । एकशततम्या ऋचः पाठस्तु गम्यभूमिप्राप्तिरूपः । एवमासामेकशतसंख्यानामृचां पठनेन तं श्रुतिस्मृत्यादिप्रसिद्धमेतं प्रत्यागात्मतया सर्वजनप्रत्यक्षसिद्धम् अपहतपाप्मत्वादिगुणकं[1] स्वात्मानमेव यजमानः प्राप्नोति । यमेतमादित्यमादित्यमण्डले स्थितं पुरुषं वेदयन्ते ब्रह्मविदः । आदित्यमण्डलस्थ एव हि पुरुषो जीवरूपेण शरीरेषु प्रविश्य स्थितः । तथा च श्रुतिः—'एष इमं लोकमभ्यार्चत् पुरुषरूपेण य एष तपति'[a] इति । अत एव हि 'आदित्यः प्राणः'[b] इति श्रूयते । न खल्वादित्यप्राणयोः कश्चिद् भेदोऽस्ति । अध्यात्ममधिदैवं चेत्येत्रं स्थानभेदमात्रम् । 'आदित्यो ह वै बाह्यः प्राण उदेति । एष ह्येनं चाक्षुषं प्राणमनुगृह्णानः'[c] इति हि श्रुत्यन्तरम् । 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः'[d] इति च । 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्'[e] इति च । तस्यादित्यमण्डलस्थस्य पुरुषस्य सर्वात्मत्वमुक्तम्—स इन्द्रः । स आदित्यमण्डलस्थ एव पुरुष इन्द्रात्मकः सकलदेवतात्मकः । अत एव स प्रजापतिः सकलदेवतासमष्टिरूपहिरण्यगर्भात्मकः । तदेव ब्रह्म भवति परिवृढं वस्तु । तस्मात् परिवृढस्य वस्तुनोऽन्यस्याभावात् । यद्वा ब्रह्मशब्दो वेदवचनः सर्ववेदात्मकः । 'सोऽब्रवीदहमिदं सर्वमस्मानि यच्च क्षुद्रं यच्च महद्'[f] इति सर्वात्मकत्वस्य प्राणदेवतयोक्तत्वश्रवणात् । यस्मादयमादित्यपुरुषः सर्वदेवतामयः तस्माद्धेतोरत्रादित्यपुरुषप्राप्तावेव तदभिन्नात्मकानां सर्वासां देवतानां समानस्थानतां सायुज्यं तादात्म्यं च प्राप्नोति । न खलु तद्रूपत्वप्राप्तौ तदभिन्नरूपदेवतारूपत्वाभावः शङ्कितुमपि शक्यः । एवं विशिष्टफलहेतुत्वात् प्रशस्तमिदमभिष्टवनमित्यर्थः ॥

इति चतुर्थः खण्डः

अथ सामिधेन्यादिपाठवैलक्षण्येन अभिष्टवनीयानाम्[2] ऋचामेकैकस्या
5. १, २ ऋचोऽनुच्छ्वासेन पठनीयतां विधत्ते—**अनवानम्–प्राणाः** । अनुच्छ्वसनेनार्धर्चौ

a. AA. 2. 2. 1. Keith अभ्यार्चत्
b. JUB. 4. 22. 9.
c. PraśU. 3. 8.
d. TU. 3. 10. 4.
e. AA. 2. 2. 4.
f. AA. 2. 2. 2.

1. T. आत्मा न याचनादि
2. T. आभिष्टवनीनाम्

संधायर्चः पठेत् । तच्चानवानं प्राणानां प्राणापानादीनां संतत्यै अविच्छेदाय संपद्यते । यस्मादेते प्राणाः संतता अन्योन्यसंश्लिष्टा एवास्मिन् शरीरे वर्तन्ते । ऋचश्च प्राणरूपाः । तस्मात् तासां विच्छेदे क्रियमाणे सति प्राणानामपि विच्छेद आपद्येत । तत्परिहारायानवानं कर्तव्यम् । तथा च सूत्रम्—'एकैकां सप्रणवामभिष्टौति'[a] इति । अथोच्चैःप्रयोगतामभिष्टवस्याचष्टे—**उच्चैर्-एषः ।** 5. ३-६

उच्चैर्ध्वनियुक्ततया निष्कृष्य विस्पष्टं वचनं यथा तथाभिष्टवं कुर्यात् । तच्चोपपद्यते । यस्मान्महावीर आदित्य एव । स च निरुक्तः सर्वलोकप्रत्यक्षस्वरूपत्वात् । वाग्देवत्यश्च वागात्मकत्वात् । वाचश्च निरुक्तत्वात् ।

यदुक्तं प्राक् 'तमेकशतेनाभिष्टयाद्'[b] इति ता ऋचः क्रमेण विधातुकामः प्रथमं तावत् तिस्र ऋचो विधत्ते—**सावित्रीः-अरिष्ट्यै ।** सवितृदेवत्या 'ब्रह्म 5. ७-९

जज्ञानम्'[c] इत्यादिकाः शाखान्तरीयास्तिस्र ऋचः प्रथमं पठेत् । सवितृप्रसूततायै इत्यादि गतम् । तत्राद्याया ऋच आद्यपादं व्याचष्टे—**ब्रह्म-दधाति ।** 5. १०-१३

'ब्रह्म जज्ञानम्'[c] इत्यादिपदचतुष्टयेनादः प्रत्यक्षेण दृश्यमानं ज्योतिर्मयमादित्याधिष्ठितमण्डलमभिधीयते । तस्य परिवृढत्वेन ब्रह्मत्वात् । पूर्वस्यां दिशि प्रादुर्भूतत्वादविनाशित्वाच्च । यत्र यस्मिन् मण्डले स्थित आदित्यो दीप्यते, एवंभूतादित्यमण्डलाभिधायकाद्यर्कपाठेन होता यजमानं तदेव तस्मिन्नेव मण्डलस्थान एव स्थापयति । अतः प्रशस्तोऽयं प्रथमाया ऋचः पाठः । अथ द्वे ऋचौ विनियुङ्क्ते—**अञ्जन्ति-अभिष्टौति ।** अञ्जन्तीत्युक्तवती प्रथमा । प्रसीदस्वेति 5. १४

सन्नवती द्वितीया । आभिरूप्यं यथाक्रमं महावीराञ्जनखरसादनक्रियाविद्योतकत्वात्[1] । 'अञ्जन्ति यमिति बिलेऽज्यमाने स सीदस्वेति साद्यमाने'[d] इति सूत्रकृता अञ्जनसादनयोर्विनियोगस्य दर्शितत्वात् । अथ तिस्र ऋचो विधत्ते—**भवा-अभिष्टौति ।** तपस्वतीस्तपःशब्दवतीः । आसां तावत् क्रियाविद्योतकत्वादाभिरूप्यम् । यद्यप्यङ्गारापोहने एता ऋचो विनियुक्तास्तथापि तापार्थत्वात् 5. १५

तस्य तपनमात्रद्योतकत्वेऽप्युपपन्नमाभिरूप्यम् । **यद्-समृद्ध्यै ।** गतम् । 5. १६

a. SS. 5. 9. 4.
b. KP. VIII. 4. ९.
c. VS. 13. 3.
d. SS. 5. 9. 8-9.

1. T. M. omit खर

5. १७,१८ अनन्तरं पञ्चर्चः प्रदर्शयति—**कृणुष्व-अपहन्ता ।** रक्षोहा नामाग्निर्देवता यासां तास्तथोक्ताः । तासामभिष्टवनं च रक्षसां यज्ञविघातकारिणामपहृत्यै हिंसायै संपद्यते । कथमेतासामृचां रक्षोहननसामर्थ्यमिति चेद्, उच्यते । यतोऽग्निर्देवानां मध्ये रक्षसां हिंसाकारीति प्रसिद्धम् । मन्त्रेषु सर्वत्राग्नेरेव रक्षो-हन्तृत्वेन प्रतिपादनात् । अतस्तादृशाग्निप्रतिपादकत्वादृचां रक्षोहन्तृत्वम् । तासां
5. १९,२० संख्यां स्तौति— **ता-संनिर्हन्ति ।** यथा दिशः प्राग्दक्षिणाप्रत्यगुदगूर्ध्वभेदेन पञ्चसंख्याकाः प्रसिद्धाः तथैता ऋचोऽपि पञ्च इति दिग्रूपसंप्राप्तिः । तेन च दिग्भ्यः पञ्चभ्यः सकाशादेतानि रक्षांसि सम्यग् विनाशयति । पञ्चसंख्यायाः
5. २१ कर्मविषये आभिरूप्यान्तरं दर्शयति—**अथो-अनुवदति ।** अध्वर्युर्यान् पञ्च-संख्यान् प्रादेशान् महावीरस्याभितः पञ्चसु दिक्षु मिमीते मानं करोति तानेव प्रादेशानेताभिः पञ्चभिरभिवदति संख्यासाम्यात् । अथ द्वे ऋचौ विधत्ते—
5. २२ **परि-अभिग्रौति ।** एते द्वे ऋचाविन्द्रदेवत्ये । 'गायन्ति त्वा गायत्रिणः'[a] इति द्वादशर्चे सूक्ते द्वादशी 'परि त्वा गिर्वणः'[b] इत्येषा । 'गायन्ति द्वादशानुष्टुभं तु'[c] इत्यत्र देवतानादेशादनादेशपरिभाषया इन्द्रदेवत्यत्वसिद्धेः । 'अश्वावतिः प्रथमः'[d] इत्यस्मिन् षळृचे सूक्ते 'अधि द्वयोः'[e] इत्येषा तृतीया । 'अश्वावतिर्जा-गतम्'[f] इत्यनुक्रमण्यां देवतानादेशादिन्द्रदेवत्यत्वमस्याः सिध्यति । अनयोराभि-
5. २३ रूप्यं दर्शयति—**ऐन्द्रम्-अनुवदति ।** आसेचनानन्तरम्[1] आहवनीये करिष्य-माणमिन्द्रदेवत्यं यागमेवैताभ्यामृग्भ्यामभिधत्ते । तस्मादस्मिन् कर्मण्यनयो-राभिरूप्यसिद्धिः ॥

इति पञ्चमः खण्डः

6. १,२ इतश्चाभिरूप्यमित्याह—**अथो-उत्तरया ।** महावीरस्य परितोऽङ्गार-प्रक्षेपानन्तरमध्वर्युप्रस्थातृभ्यां त्रयोदश वैकङ्कताः परिधयो 'मा असि'[g]

a. RV. 1. 10. 1.
b. RV. 1. 10. 12.
c. SA. I. 10.
d. RV. 1. 83. 1.
e. RV. 1. 83. 3.
f. SA. I. 83.
g. TA. 4. 5. 5.

1. T. आसेचनादनन्तरम्

इत्यादिभिर्मन्त्रैर्निधातव्याः । तथा च बौधायनः—'अथैनं त्रयोदशभिर्वैकङ्कतैः परिधिभिः परिचिनुतोऽध्वर्युश्च प्रतिप्रस्थाता च । मा असीति प्राञ्चावध्वर्युः प्रमा असीत्युदञ्चौ प्रतिप्रस्थाता तावेवमेव व्यतिषंगं प्रति मा असि सं मा असि वि मा अस्युन्मा असीति । अथैतं त्रयोदशं परिधिं दक्षिणत ऊर्ध्वाग्रं निमिनो-त्यन्तरिक्षस्यान्तर्धीरसीति'[a] इति । एतान् महावीरस्य परितः स्थापितान् द्वादश कपालान् पूर्वया 'परि त्वा गिर्वणो गिरः'[b] इत्येतया स्तौति । परिशब्देन परितःक्रियमाणत्वस्य प्रतिभासात् । यः पुनरुत्तमोऽन्त्यः शकल ऊर्ध्वाग्रो निधीयते तम् 'अधि द्वयोः'[c] इत्यनया स्तौति । अधीत्यनेन ऊर्ध्वदेशसंबन्धा-भासात् ।

अथ द्वे ऋचौ विधत्ते—**शुक्रं-अनुवदति** । 'शुक्रं ते अन्यद्'[d] इत्येषा 6. ३,४
चतुर्ऋचस्य सूक्तस्याद्या पूषदेवत्या । 'शुक्रं चतुष्कम्'[e] इत्यनुक्रमणात् । 'वयं दश पौष्णं तद्'[f] इत्यत्र तच्छब्दग्रहणात् तुह्यादिपरिभाषानुसारेण शुक्रं ते अन्यदित्यन्तानां षट् सूक्तानां पूषदेवत्यत्वावगमात् । 'आ ते पितर्मरुताम्'[g] इत्यस्मिन् पञ्चदशर्चे सूक्ते दशम्येषा 'अर्हन् बिभर्षि'[h] इति । तच्च सूक्तं रुद्रदेवत्यम् । 'आ ते पञ्चोना रौद्रम्'[i] इत्यनुक्रान्तत्वात् । एताभ्यामृग्भ्या-माहवनीये करिष्यमाणं पूषदेवत्यं रुद्रदेवत्यं च यागं क्रमादभिधत्ते । आभि-
रूप्यान्तरं दर्शयति—**अथो-अनुवदति** । हिरण्यशकलयोर्विशेषणं सुवर्णरजता- 6. ५
विति । हिरण्यं द्विविधं सुवर्णं रजतं च । तावुभावपि हिरण्यशकलावध्वर्युः करोति । क्रियाया विषयीकरोति । रजतं हिरण्यशकलं प्रवृञ्जनीये खरे गूहति । सुवर्णरूपं हिरण्यशकलं महावीरस्योपर्यपिधानत्वेन स्थापयति । तावेतौ हिरण्यशकलावाभ्यामृग्भ्यां प्रतिपादयति । 'शुक्रं ते अन्यद्'[d] इति राजतहिरण्यशकलप्रतिभासात् । 'अर्हन्निष्कम्'[h] इत्यत्र सुवर्णप्रतीतेश्च ।

a. BŚ. 9. 7. 14–17.
b. RV. 1. 10. 12.
c. RV. 1. 83. 3.
d. RV. 6. 58. 1.
e. SA. VI. 58.
f. SA. VI. 53.
g. RV. 2. 33. 1.
h. RV. 2. 33. 10.
i. SA. II. 33.

6. ६–९ तिस्र ऋचो विधत्ते—**पतङ्गम्–अनुवदति**। सूक्तमभिष्टौतीति शेषः।
अत्र पतङ्गशब्देन प्राणोऽभिधीयते। उत्क्रान्तिकाले देहात् पतित्वा तत्स्थाने
देहान्तरं गच्छतीति। प्राणश्चाध्यात्ममवस्थितो वायुरेव, न तत्त्वान्तरम्।
अतो वायोरस्मिन् सूक्तेऽभिधेयत्वाद् वायव्यं करिष्यमाणं कर्मैव तिसृभिरेता-
भिर्ऋग्भिः स्तौति। अथोक्तसूक्तापवादेन प्रजोत्पत्तिफलाय सूक्तान्तरं विधत्ते—
6. १० **अपश्यं–अभिष्टुयात्**। अस्य 'पतङ्गम्'[a] इति सूक्तस्य स्थाने 'अपश्यं त्वा'[b]
इत्येतत् सूक्तं पठेत्, यदि यजमानः प्रजोत्पत्तिफलकामनावान् भवेत्।
एतन्नित्यतया पतङ्गमिति सूक्तं विहितम्; काम्यतया अपश्यं त्वेति। अथो-
6. ११ भयमपि नित्यतया विधत्ते—**अथो–असंपन्नकारी**। अभिष्टवनीनाम् एकशत-
संख्यासंपन्नतानङ्गीकरणेनाभिष्टवं कुर्वन् होता 'पतङ्गमक्तम्'[a] 'अपश्यं त्वा'[b]
इत्येतद् द्वयमपि सूक्तं पठेत्। संपन्नकारिणस्त्वेकमेव सूक्तं पठनीयम्। अन्यथा
6. १२–१६ संख्यातिरेकापातात्। अथ द्वादशर्चो विधत्ते—**स्रक्के–अनुवदति**। पावमान्यः
पवमानगुणकसोमदेवत्याः। कुत एवं व्याख्येति चेत्, पवमानत्वस्य गुणत्वा-
दिति वदामः। तथा चानुक्रमणी—'नवमं मण्डलं पावमानं सौम्यम्'[c] इति।
अस्यार्थः—नवमं 'स्वादिष्ठया'[d] इत्यादिकम् 'इन्दो परि स्रव'[e] इत्यन्तं
कृत्स्नमपि मण्डलं सोमदेवत्यम्। स च सोमः पवमानगुणकः। पृथक्करणं
त्वन्याभिप्रायम्। अग्नेरपि पवमानत्वगुणसिद्ध्यर्थम्। किमिति तर्हि पावमान्य
इति? वक्ष्यमाणशोधकत्वघटनाभिप्रायेणेति मन्यामहे। तस्मात् सोमदेवत्य-
त्वादासां सौम्यस्वाहाकाराभिधायकत्वमुपपद्यते। 'अयं वेनः'[f] इत्यष्टर्चं
6. १७ सूक्तं विधत्ते—**अयं–इति**। सूक्तमभिष्टुयादिति शेषः। अत्र वेनशब्दार्थमाह—
6. १८ **इन्द्रो–वेनः**। कान्तिकर्मणो वेनतेर्निष्पन्नो हि वेनशब्दः। कान्तेश्चेच्छा-
रूपत्वात् स इन्द्र इच्छया विषयीक्रियते प्रार्थ्यत इति कर्मव्युत्पत्त्येन्द्रो वेनशब्द-
6. १९ वाच्यः। किमतस्तत्राह—**ऐन्द्रम्–अनुवदति**। कृत्स्नस्य सूक्तस्य पठने प्रसक्ते
6. २० सति प्रतिषेधं करोति—**तस्य–इति**। अत्र वेनदेवत्ये सूक्ते आत्मदृष्टिः कर्तव्या।

a. RV. 10. 177. 1.
b. RV. 10. 183. 1.
c. SA. IX. 1.
d. RV. 9. 1. 1.
e. RV. 9. 114. 4.
f. RV. 10. 123. 1.

तत्रत्याया एकस्या ऋच उत्सर्गे च देहमध्यवर्त्याकाशदृष्टिश्च कर्तव्येत्याह—
**सो-अतीकाशः** । नन्वेवं सत्यृगन्तरायदोषाद् यजमानस्यानर्थप्राप्तिः 6. २१
स्यादित्यत्राह—**ताम्-भवति** । तां 'नाके सुपर्णम्'[a] इत्युत्सृष्टामृचमुत्तरासु 6.२२,२३
प्रवर्ग्योपरिभागपठितासु त्रयस्त्रिंशत्संख्याकासु निदध्यात् । तेनैव हेतुना सा ऋङ्
नान्तरिता परित्यक्ता स्यात् । यद्यप्याम्नायपाठक्रमो न स्वीकृतः तथाप्येककर्मप्र-
योगक्रममध्यनिवेशलाभात् नान्तरायदोषोदयः । अथाधिकारिविशेषावष्टम्भेन
'अयं वेनः'[b] इति सूक्तस्य पुरस्तादुपरिष्टाच्च पावमानीनां पठनं विधत्ते—
**उभयतो-तत्** । 'अयं वेनः'[b] इति सूक्तस्य पुरस्तादुपरिष्टाच्च पावमानीर्ऋचोऽ- 6.२४–२७
भिष्टुयात् । कस्य ? पापोक्तस्य । यो वस्तुतः पापहेतुना ब्रह्मवधादिरूपेण
कर्मणा रहितोऽपि जनैरपरमार्थज्ञैः पापकर्मवानसावित्यभिशस्तः स पापोक्तः ।
तस्य यजमानस्य वेनसूक्तमभितः पावमानीनां पाठः कर्तव्यः । तत्र योऽयं
वेनस्तद्देवत्यं सूक्तं तदात्मैवेति ध्यातव्यम् । सर्वात्मकस्येन्द्रस्य प्राणदेवताया-
स्तत्र प्रतिपाद्यमानत्वात् । पावमान्यश्च पवित्रं शुद्धिहेतुः । न ह्याभ्योऽधिक-
मन्यच्छुद्धिकरं[1] वस्तु जगति समस्ति । 'देवपवित्रं वै पावमान्यः'[c] इति हि
श्रुत्यन्तरम् । ततश्च तेन पावमानीनां पठनेन शोधयत्येव पापोक्तं यजमानम् ॥

इति षष्ठः खण्डः

सूक्तान्तरं विधत्ते—**गणानां-समर्धयति** । ब्रह्मणस्पतिर्देवता यासां तास्त- 7. १-४
थोक्ताः ।तथा चानुक्रमणी—'गणानामेकोना ब्राह्मणस्पत्यं ह'[d] इति । तत्र यदेतत्
प्रवर्ग्याख्यं कर्मास्ति तद् यज्ञस्य शिर इति ह्युक्तं प्राक् । ब्रह्मणस्पतिश्च ब्रह्म
वेद एव । तस्य ब्राह्मणजातिपालकत्वात् । ततश्च 'गणानां त्वा'[e] इति सूक्त-
पाठेन ब्रह्मणा वेदेन प्रवर्ग्याख्यं शिरः समृद्धं वीर्ययुक्तं करोति । अथ तस्मिन्
'बृहद् वदेम'[f] इति योऽयमन्त्यः पादस्तत्पठने फलविशेषाय किंचिद् ध्यानं
विधत्ते—**स-वीरम्** । स होता यत्रावधौ 'बृहद् वदेम'[f] इत्यमुं पादं पठनीयतया 7. ५-७

a. RV. 10. 123. 6.
b. RV. 10. 123. 1.
c. AB. 6. 36. 11.
d. SA. II. 23.
e. RV. 2. 23. 1.
f. RV. 2. 23. 19.

1. T. कारणं for करं

समीपप्राप्तं मन्येत, तदा पुत्रकामाया यजमानस्य पत्न्या अर्थे वीरं पुत्रमस्याः पुत्र उत्पद्यतामिति ध्यायेत् । एवं ध्याने सति यजमानस्य पत्नी पुत्रं प्राप्नोत्येव । सुवीराः शोभनपुत्रोपेताः सन्तो वयं विदथे बृहद् वदेमेति प्रार्थितत्वात् । अथ

7. 8 नवर्चो विधत्ते—**का-अकुध्रीच्यः** । अकुध्रीचीसंज्ञिताः 'का राधद्'[a] इत्याद्या नवसंख्याका ऋचः पठेत् । ता एता ऋचः गायत्रच्छन्दस इव भवन्ति । गायत्र्येव गायत्रं छन्दो यासां ता गायत्रच्छन्दसः । कथं पुनरासां गायत्रीच्छन्दस्त्वं यस्मादासां मध्ये नियमोक्तमेव[1] गायत्रीछन्दस्के । इतरास्तु पुरउष्णिगाद्या एव । तथा ह्यनुक्रम्यते—'काराधद् द्वादश । अन्त्या दुःस्वप्ननाशिनी द्वितीयाद्या पुरउष्णिक् काविराट् नष्टरूपी द्वे तनुशिखे । विष्टारबृहती कृतिर्विराळ् तिस्रो गायत्र्यः'[b] इति । अस्यार्थः—काराधदिति सूक्तं द्वादशर्चं भवति । अत्र चान्त्या अवसाने स्थिता 'अध स्वप्नस्य'[c] इत्येषा दुःस्वप्नविनाशहेतुः । तस्या ऋचो जपो दुःस्वप्नदर्शनसूचितफलोत्पत्तिप्रतिबन्धकः । आद्या 'का राधद्'[a] इत्येषा गायत्री । 'विद्वांसा विद्'[d] इति द्वितीया पुरउष्णिक् । 'आद्यश्चेत् पुरउष्णिक्'[e] इति लक्षणोपेतत्वात् । अत्र च विद्वानित्यन्त आद्यः पादः । द्वितीया भुरिग्गायत्रीति पाठान्तरम् । तथा च प्रातिशाख्यायां छन्दःपटले—'अष्टको दशकः सप्ती विद्वांसाविति सा भुरिक्'[f] इति । अत्र च पादविधानं संगच्छते । 'दुरः पृच्छेद्'[d] इति तत्र पादान्तविधानात् । 'द्वितीया ककुप्' इति वा पाठान्तरम् । तत्पक्षे मध्यमपादो द्वादशाक्षर इति ज्ञेयम् । 'मध्यमश्चेत् ककुप्'[g] इति तल्लक्षणात् । तृतीया 'ता विद्वांसा'[h] इत्येषा काविराळ् । 'नवकयोर्मध्ये जागतं काविराळ्'[i] इत्युक्तलक्षणत्वात् । चतुर्थी 'वि पृच्छामि'[j] इत्येषा नष्टरूपी । 'नवकवैराजत्रयोदशैर्नष्टरूपी'[k] इति लक्षणसत्त्वात् । 'प्र या घोषे'[l] 'श्रुतं गायत्रम्'[m] इत्येते

a. RV. 1. 120. 1.
b. SA. I. 120.
c. RV. 1. 120. 12.
d. RV. 1. 120. 2.
e. SA. 5. 2.
f. RPrā. 16. 17.
g. SA. 5. 2.
h. RV. 1. 120. 3.
i. SA. 6. 5.
j. RV. 1. 120. 4.
k. SA. 6. 6.
l. RV. 1. 120. 5.
m. RV. 1. 120. 6.

1. MSS. नियमेक्तमेव

पञ्चमीषष्ठ्यौ तनुशिखे । 'एकादशिनोः परः षळ्कस्तनुशिखा'[a] इति लक्षणलक्षितत्वात् । 'पञ्चमी तनुशिखा षष्ठ्युष्णिक्' इति पाठान्तरम् । तत्र षष्ठ्याः पादसंख्ययोष्णिक्त्वाभावेऽपि अक्षरसंख्ययोष्णिक्त्वं द्रष्टव्यम् । 'युवं हि'[b] इति सप्तमी विष्टारबृहती । 'अष्टिनोमध्ये दशको विष्टारबृहती'[c] इत्युक्तत्वात् । 'मा कस्मा'[d] इत्यष्टमी कृतिः । 'जागतावष्टकश्च कृतिः'[e] इति लक्षणात् । 'दुहीयन्'[f] इति नवमी विराट् । 'दशकास्त्रयो विराळेकादशका वा'[g] इत्यत्रैकादशका वेति उक्तलक्षणोपपन्नत्वात् । दशम्याद्यास्तिस्रो गायत्र्यः इति । एवं स्थिते कथं गायत्रच्छन्दस इति वचनं संगच्छत इति । उच्यते । सत्यमेवम् । अत एवात्र इवशब्दप्रयोगः । त्रिपदात्वं गायत्रीलक्षणमभिप्रेत्य गायत्रीच्छन्दस्त्वाभिधानम् । यथा च छत्रिष्वच्छत्रिष्वपि सह गच्छत्सु 'छत्रिणो गच्छन्ति' इति व्यपदेशो दृश्यते, तथैव गायत्रीच्छन्दसामितरच्छन्दसां च समुदितानां गायत्रीछन्दस्त्वव्यपदेशगोचरता न विरुध्यते। आसां गायत्रच्छन्दस्त्वमभिरूपम्। कथमिति चेत्—**गायत्रच्छन्दस-**
**अकृध्रोच्यः** । यस्मात् प्राणो गायत्रः गायत्र्या रक्षितत्वात् । तथा च प्राणोऽ 7. ९-११
कध्राच्यः । तथा च वाजसनेयिनः समामनन्ति—'अकध्रोच्यः प्रवर्ग्यस्य प्राणरूपाः'[h] इति । अतो गायत्रच्छन्दस्त्वमुपपन्नम् । अथ तृचं विधत्ते—**आ-वाक** । 7. १२
योऽयं तृचोऽस्ति स प्रवर्ग्याख्यशिरसि वागेव भवति । अनुष्टुभो वाग्रूपत्वात् ।
**विष्णुः-असंपन्नकारी** । गतम् । 7. १३,१४

कालद्वयोपाधौ सूक्तद्वयं विधत्ते—**प्रातः-चक्षुः** । पूर्वाह्णे 'प्रातर्यावाणा'[i] 7. १५-१७
इति सूक्तं पठेत् । अपराह्णे पुनः 'आ भात्यग्निः'[j] इति । ते एते सूक्ते त्रिष्टुप्छन्दस्के पञ्चर्चे च भवतः । अनुक्रम्यते हि—'प्रातर्यावाणेति आ भाति पञ्चात्रिः'[k] इति । पञ्चशब्दस्यानुवर्तनात् पञ्चर्चत्वम् । अनादेशन्यायेन च त्रैष्टुभत्वम् । एतच्च सूक्तद्वयं महावीरशिरसि चक्षुर्भवति । सूक्तान्तरं

a. SA. 5. 5.
b. RV. 1. 120. 7.
c. SA. 7. 5.
d. RV. 1. 120. 8.
e. SA. 6. 3.
f. RV. 1. 120. 9.
g. SA. 6. 7–8.
h.
i. RV. 5. 77. 1.
j. RV. 5. 76. 1.
k. SA. V. 76, 77.

7. १८ विधत्ते—**ईळे-तच्छ्रोत्रम्**। जागतं जगतीछन्दस्कम्। पञ्चविंशं पञ्चविंशति-
संख्याभिर्ऋग्भिरुपेतम्। तथा चानुक्रमणी—'ईळे पञ्चाधिकाश्विनमाद्यौ पादौ
लिङ्गोक्तदैवतावन्त्ये त्रिष्टुभौ'[a] इति। 'त्रिष्टुबन्तस्य सूक्तस्य शिष्टा जगत्यः'[b]
इति परिभाषया जागतत्वम्। पञ्चाधिकेति वचनाद् विंशत्यधिकपञ्चर्चत्वं
सिध्यति। 'अनिरुक्ता संख्या विंशतिः'[c] इति परिभाषायां वचनात्। एतच्च
सूक्तं श्रोत्रस्थानीयं भवति। अश्विनोः श्रोत्रदेवतात्वात्। अथ 'का राधद्'[d]
7. १९-२१ इत्यादीनां सूक्तानां प्राणादिरूपत्वसंपादनफलमाह—**शिरो-दधाति**। लोके हि
**यस्मिञ्छिरसि** प्राणादयः प्रतिस्वकार्यनिर्वर्तनसमर्थाः सन्तो निवर्तन्ते तदेव
शिरः समृद्धं संपूर्णं भवति। निगतप्राणादेः शिरसः काष्ठलोष्टसमान-
योगक्षेमत्वात्। यत एवमतो यज्ञस्योत्तमाङ्गभूते प्रवर्ग्ये समृद्धिसिद्ध्यर्थं
होतैतानि पठन् प्राणादि प्रतिष्ठापयति। ईळे द्यावीयसूक्तस्यान्त्या या
'द्युभिरक्तुभिः'[e] इत्येषा तस्या ऋचः पाठात् पूर्वं पठनीयां कांचिदृच-
7. २२ मत्रविप्रदर्शनपुरःसरं विधत्ते—**रुचितो-अभिग्रैति**। यदाध्वर्यवो 'रुचितो
घर्मः'[f] इति वदन्ति तदैताम् 'अरूरुचदुषसः'[g] इत्यादिकामृचं पठेत्। सा
चारूरुचदिति रुचितवत्त्वादभिरूपा। अग्निनिष्टापाद् घर्मस्यौज्वल्यविशेष-
वत्त्वोत्पत्तेः। अथ परिधानीयात्वेन 'द्युभिरक्तुभिः'[e] इत्येतामृचं विधत्ते—
7. २३ **द्युभिः-परिदधाति**। परिपातमिति पर्यपसर्गवती। अतः परिधानाभिरूपा।
7. २४,२५ **अभिरूपा-समृद्ध्यै**। गतम्। तमेकशतेनाभिष्टुयादित्युपक्रान्तस्य घर्माभिष्टव-
7. २६ विधेरुपसंहारः—**ता-ब्राह्मणम्**।

अभिष्टवनिविष्टानां मिलितानामृचामिह।
उक्तैकशतसंख्या या सा विभज्य प्रदर्श्यते॥
तिस्रः सवितृदेवत्या ब्रह्मजज्ञानमादिकाः।
अञ्जन्ति संसीदस्वेति द्वाभ्यां योगे हि पञ्च ताः॥
अष्टौ ता स्युर्भवा नोऽथ तपो यो नस्समागमे।
त्रयोदश कृणुष्वेति पञ्चभिर्मेलने सति॥

a. SA. I. 112.
b. SA. 12. 13.
c. SA. 12. 4.
d. RV. 1. 120. 1.
e. RV. 1. 112. 25.
f. MS. 4. 9. 4; ŚS. 5. 9. 24.
g. RV. 9. 83. 3.

परित्वाधिद्वयोः शुक्रमर्हस्ता दश सप्त च ।
पतङ्गं त्रक्त · इत्याभ्यां सूक्ताभ्यां सति मेलने ॥
एकोनत्रिंशदेताः स्युः पवित्रं ते तपोर्वियत् ।
इत्याभिस्तिसृभिर्योगे द्वात्रिंशत् संभवन्ति ताः ॥
अयं वेनः सप्तभिस्तु योगे त्रिंशस्तथा नव ।
गणानां त्वेत्यनेनाष्टपञ्चाशत्ता भवन्त्यृचः ॥
काराधन्नवभिर्युक्ता सप्तषष्टिर्भवन्ति ताः ।
आ नो विश्वाभिरित्याभिस्तिसृभिः सप्तभिस्त्वृचः ॥
प्रातरीळ इति द्वाभ्यां सूक्ताभ्यामप्यरूरुचत् ।
ऋचा समुदिता इत्थमृच एकोत्तरं शतम् ॥
आनवान्येन पठनं यासां प्रणयनावधि ।
प्रथमाया ऋचोऽन्त्याया अपि च त्रिरुदीरणम् ॥

इति सप्तमः खण्डः

अभिष्टवनामधेयस्य तावदृक्संघातस्य द्वौ भागौ विद्येते पूर्वश्चोत्तरश्च । यौ पूर्वोत्तरपटलशब्दाभ्यां ब्राह्मणान्तरेष्वभिलप्येते । तत्र पूर्वभागावस्थिता एकशतसंख्याका ऋचो विहिताः । इदानीमुत्तरभागे पठनीयास्त्रयस्त्रिंशत्संख्याका ऋचो दिदर्शयिषुः प्रथमं तत्संख्यामनूद्य स्तौति—**त्रयस्त्रिंशत्-समुन्नीतम्** । उत्तरभागेऽवस्थिता ऋचस्त्रयस्त्रिंशत्संख्या भवन्ति । सर्वाश्च 8. १-४
देवताः समुदिताः सत्यः त्रयस्त्रिंशत्संख्या इति प्रसिद्धम् । तथा च वाजसनेयकोपनिषदि शाकल्यब्राह्मणे श्रूयते—'अथ हैनं विदग्धः शाकल्यः पप्रच्छ' इत्युपक्रम्य 'कति देवा याज्ञवल्क्य' इति शाकल्येन प्रश्ने कृते, याज्ञवल्क्येन 'त्रयश्च त्री च शता' इत्यादिवैश्वदेवशस्त्रनिविदैव देवसंख्यायामुक्तायां देवसंख्याविषयप्रश्नोत्तरप्रबन्धान्ते 'कतमे त्रयश्च त्री च' इत्यादिजातिप्रश्नोत्तरं याज्ञवल्क्येनेत्थं नीयते—'स होवाच महिमान एवैतेषाम् । एते त्रयस्त्रिंशत्त्वेव देवा इति' । 'कतमे ते त्रयस्त्रिंशद्' इति पुनरपि पृष्टे 'अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशत् । इन्द्रश्च प्रजापतिश्च

त्रयस्त्रिंशाविति'[a] इति । तथैवान्यत्र श्रूयते—'अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च'[b] इति । 'विश्वेदेवास्त्रय एकादशासः'[c] इति च मन्त्रः । 'पत्नीवतस्त्रिंशतं त्रींश्च देवान्'[d] इति च । या एतास्त्रयस्त्रिंशद् देवताः सन्ति ता एवैतत् प्रवर्ग्याख्यं कर्मोद्यन्तुं निर्वोढुमर्हन्ति । ताभ्यस्त्रयस्त्रिंशत्संख्याभ्यो देवताभ्य एतत् कर्म समुन्नीतं कल्पितम् । अतस्त्रयस्त्रिंशत्संख्यदेवतादेवत्यत्वात् त्रयस्त्रिंशत्संख्याया आभिरूप्यम् । अथ महावीरस्थे निष्टप्ते सर्पिषि गोच्छागापयसोरासेचनं कर्तव्यम् । तदङ्गतयोपस्थानानन्तरं पयसोदोहनं क्रियते । 'अथ रशनामादत्ते'[e] इत्यादिना बौधायनेन दर्शितम् । तदभि-
8. ५ धायिनीरेकोनविंशतिसंख्याका ऋचो विधत्ते—**अभिरूपा-अभिष्टौति** । घर्मदुघाह्वानकर्माभिद्योतकत्वादाभिरूप्यम् । एताश्चर्चः सूत्रकारेण प्रदर्शितास्तत एव
8. ६ ज्ञातव्याः । **यद्-समृद्धयै** । गतम् ।

8. ७ अथासेचनसमये पठनीये ऋचौ विधत्ते—**आ-अभिष्टौति** । तत्र गव्ये पयस्यवनीयमाने सति 'आ सुते सिञ्चत श्रियम्'[f] इत्यृचं पठेत् । आजे तु पयस्यवनीयमाने 'आ नूनम्'[g] इत्येतां पठेत् । आसेचनानन्तरमाहवनीये यागार्थत्वेन गार्हपत्यादेतन्महावीरस्थं पय आहवनीयसमीपं नेतव्यम् । तत्र च शफाभ्यां महावीरपात्रमुभयतः परिगृह्योद्यम्यते । तथा च कल्पः—'अथैनदादायोपोत्तिष्ठति'[h] इति । तस्मिन् काले पठनायैकामृचं प्रदर्शयति—
8. ८ **उदु-अभिष्टौति** । 'उदयंस्त'[i] इत्युत्पूर्वकयमिधातुमत्त्वादुद्यतवतीम् । अत एवाभिरूप्यम् । उद्यमनस्याभिधायकत्वात् । अथान्यामृचं विधत्ते—**प्रैतु-**
8. ९ **अभिष्टौति** । ब्रह्मणस्पतिदेवताकत्वात् ब्राह्मणस्पत्या । तथा चानुक्रमणिका—'उत्तिष्ठाष्टौ ब्राह्मणस्पत्यम्'[j] इति । प्रैत्वित्यादौ प्रोपसर्गश्रवणात् प्रवतीत्वम् । एत्विति गमनार्थेण्धातुमत्त्वादाभिरूप्यम् ।

अथाहवनीयं प्रति यदा सर्वे गच्छन्ति तदानुगच्छता सता पठनीयामेकां
8. १० दर्शयति—**नाके-अभिष्टौति** । पतन्तमिति गमनार्थधातुश्रवणादाभिरूप्यम् ।

a. BṛhU. 3. 9. 1–2.
b. AB. 1. 10. 7.
c. RV. 9. 92. 4.
d. AV. 20. 13. 4.
e. BŚ. 10. 2. 6.
f. RV. 8. 72. 13.
g. RV. 8. 9. 1.
h. BŚ. 6. 15. 14.
i. RV. 6. 71. 1.
j. SA. I. 40.

सूत्रितं हि—'नाके सुपर्णमित्यनुसंयन्'[a] इति । 'घर्मस्य यज'[b] इत्यध्वर्युणोक्ते द्वे ऋचौ याज्ये विधत्ते—**द्वाभ्यां यजेत्।** द्वे याज्ये पठेत् । संख्यां स्तौति— 8. ११
**द्वन्द्वं-सवीर्यतायै ।** करचरणादिषु द्वन्द्वस्यैवादानादिकार्यनिर्वाहकत्वाद् द्वन्द्व- 8. १२
स्यैव वीर्यवत्त्वम् । नत्वेकस्यैवासहायस्य । 'एकपात् पुरुषो यन्नेकतश्चक्रो वा रथो वर्तमानो भ्रेषं न्येति'[c] इति श्रवणात् । 'असहायः समर्थोऽपि कार्यसिद्धिं न विन्दति'[d] इति च लोकप्रसिद्धिः । अतः सवीर्यतायै कर्मणो वीर्यसाहित्याय द्विसंख्या संपद्यते ।

अथ पूर्वाह्णिकघर्मयागस्थं याज्यायुगलं स्तौति—**त्रिष्टुब्वतीभ्यां-तिष्ठति ।** 8.१३-१५
पूर्वाह्णिके घर्मयागे त्रिष्टुप्छन्दोयुक्ताभ्यां यजेत् । तत्र 'उभा पिबतमश्विना'[e] इति पूर्वा गायत्री । 'तप्तो वां घर्मः'[f] इत्युत्तरा त्रिष्टुप् । छत्रिन्यायेन द्वयोरपि त्रिष्टुब्वतीत्वम् । तच्च पूर्वाह्णेऽभिरूपम् । यस्मादेष आदित्यः त्रिष्टुब्रूपसंपन्नः । तत् कथमिति चेत्, 'त्रीन् स्तभ्नोति'[g] इति हि त्रिष्टुप्च्छब्दप्रवृत्तिः । एष आदित्योऽपि त्रीन् भूर्भुवःस्वराख्यान् लोकान् स्तब्ध्वा स्थिरीकृत्य द्युलोके तिष्ठतीति त्रिष्टुप्च्छब्दार्थसंपन्नः । अतः प्रातःकालीनादित्याभिद्योतकत्रिष्टुप्सहितत्वात् पूर्वाह्णिकघर्मयागे अनयोराभिरूप्यम् । आपराह्णिकघर्मयाग-
याज्यायुगलमाभिरूप्यकथनेन स्तौति—**जगद्वतीभ्यां-विशति ।** एतमादित्यं 8.१६-१८
विशन्तमुपरतव्यापारं सन्तमनु सर्वं जगदपि विरतव्यापारं भवति । अतो जगत्संबन्धादादित्यस्य जागतत्वम् ।

शाखान्तरीयं पक्षमुपक्षिप्य दूषयति—**विपर्यस्य-स्थितम् ।** पूर्वाह्णे हि 8.१९, २०
'उभा पिबतमश्विना'[e] इति दाशतयीमृचं पूर्वमुक्त्वा 'तप्तो वाम्'[f] इति शाखान्तरीययर्चा वषट्कारं ब्रूयात् । अपराह्णे 'अस्य पिबतमश्विना'[h] इति दाशतयीमुक्त्वा 'यदुस्रियासु'[i] इत्यनया वषट्कुर्यादिति योऽयं क्रमः तद्विपर्यासेन 'तप्तो वाम्'[f] इति पूर्वमुक्त्वा 'उभा पिबतम्'[e] इत्यनया वषट्कारो

a. ŚŚ. 5. 10. 15.
b. MS. 4. 9. 9; ŚŚ. 5. 10. 17.
c. AB. 5. 33. 3
d.
e. RV. 1. 46. 15.
f. ŚŚ. 5. 10. 18.
g.
h. RV. 8. 5. 14.
i. AV. 7. 73. 4; ŚŚ. 5. 10. 21.

वक्तव्यः पूर्वाह्णे। एवमपराह्णेऽपि 'यदुस्रियासु'[a] इति पूर्वमुक्त्वा 'अस्य पिबतम्'[b] इत्यनया वषट्कुर्यादित्येवं केचिच्छाखान्तरिणः कथयन्ति। न त्वेवं कर्तुमुचितम्। पूर्वोक्तयाज्याद्वयपाठक्रमानतिक्रमेणैव वषट्कारः कर्तव्यः।

८.२१,२२ यागानन्तरं चतस्र ऋचो विधत्ते—**अथ-समृद्ध्यै**। 'स्वाहाकृतो घर्मः'[c]
इति घर्मयागाभिनिर्वृत्तत्वद्योतकत्वादाभिरूप्यम्। अन्यद् गतम्। अनन्तर-
८.२३,२४ मेकामृचं विनियुङ्क्ते—**हविर्-करोति**। आहुतेरग्निहोत्रसंबन्धिन्या अग्नौ प्रापणात् पूर्वं 'हविर्हविष्मः'[d] इत्यृचं पठेत्। तत् तेन 'हविर्हविष्मः' इत्यृक्-पाठेन पूर्वयागनिवर्तनेन एवं यातयामत्वं प्राप्तं घर्मं पश्चादग्निहोत्रहोमार्थं[1] हविष्ट्वसंपत्त्यर्थमयातयामम् अभिनवत्वेन सरसीकरोति। अथ परिधानीयां
८. २५-२७ विधत्ते—**सूयवसाद्-भवन्ति**। आशीरभिलषितार्थप्रार्थना। सा चास्यामृचि दृश्यते। 'अथो वयं भगवन्तः स्याम'[e] इति भगवत्त्वप्रार्थनादर्शनात्। अन्यद् गतम्।

एकोनविंशतिऋचो वक्तव्या दोहनान्विताः।
उपह्वयादिका आसिक्तवतीभ्यां समन्विताः॥
एकविंशतिरुद्वत्या युक्ता द्वाविंशतिः स्मृताः।
प्रैतु नाक इति द्वाभ्यां चतुर्विंशतिसंख्यकाः॥
याज्याद्वय्या चतसृभिरुत्तराभिश्च संयुताः।
त्रिंशत्संख्या भवेयुस्ता हविः सूयवसादिति॥
द्वाभ्यां द्वात्रिंशदेता स्युर्ऋच उत्तरभागगाः।
घर्मस्येत्याद्यनुवषट्कारेण सह गण्यताम्॥
अभिप्रेत्य त्रयस्त्रिंशदुत्तरा इति भाषणम्।
अभिष्टवार्थमुद्दिष्टाः पटलद्वयसंस्थिताः॥
समाहृताश्चतुस्त्रिंशदुत्तरं स्युर्ऋचः शतम्।

a. AV. 7. 73. 4; ŚS. 5. 10. 21.
b. RV. 8. 5. 14.
c. ŚS. 5. 10. 23.
d. RV. 9. 83. 5.
e. RV. 1. 164. 40.

1. T. omits होत्र

एव तावत् 'शिरो वा एतद्यज्ञस्य'[a] इत्यादिना 'अथ वै सुते प्रवर्ग्य'[b]
इत्यतः प्राक्तनैर्वाक्यैरुपसद्दिनेष्वनुष्ठेयं प्रवर्ग्याख्यं कर्म प्रतिपादितम् । इदानी-
मस्यैव प्रवर्ग्यकर्मणः सुत्याहन्यपि कर्तव्यत्वं मन्यमानानां मतमुपन्यस्यति—
**अथ–प्रवृञ्ज्युः**। अर्थान्तरोपन्यासेऽथशब्दः । वैशब्दो विशेषे । न केवलमुप- 8. २८-३०
सद्दिनेष्वेव प्रवर्ग्यस्यानुष्ठेयत्वम् , सुत्याहन्यपि प्रवर्ग्यकर्मानुष्ठेयमिति
केचिच्छाखिनो वदन्ति। सुत्याहनि कस्मिन् काले तदनुष्ठानमिति चेद् उच्यते ।
बहिष्पवमाने स्तुते बहिष्पवमानस्तुत्यनन्तरं सुत्येऽहनि पौर्वाह्णिकं प्रवर्ग्यकर्म
कर्तव्यम् । कुतो हेतोस्तस्मिन् काले तदनुष्ठानमिति चेद् यस्मात् पूर्वं तत्
तस्मिन् बहिष्पवमानस्तुत्यनन्तरकाले देवा अश्विनौ उप समीपे आहूतवन्तः ।
अश्विभ्यां ग्रहं गृहीतवन्त इत्यर्थः । अत्र काचिदाख्यायिका श्रुत्यन्तरप्रपञ्चिता[c]
संगृहीता—पूर्वं भिषक्त्वदोषेण यज्ञभागरहिताभ्यामश्विभ्यां छिन्नघर्मरूपयज्ञ-
शिरःप्रतिसंधानप्रीणितदेवैः बहिष्पवमानेन पवित्रेण कर्मणा तद्दोषनिर्हरणेन
यज्ञभागभागिनावश्विनौ कृतौ इति । यस्मादयमश्विनोर्योग्योचितः कालः ।
प्रवर्ग्यश्चाश्विनः । 'अश्विना घर्मं पातम्'[d] इत्यादिमन्त्रात् ब्राह्मणान्तराच्च ।
तस्मात् तस्मिंस्तस्मिन् काले प्रवर्ग्यं कुर्युः । तत्राप्याग्नीध्रियस्थाने प्रवञ्जनं
कर्तव्यम् । होमः पुनराहवनीय एव । एवं पूर्वाह्णिकं प्रवर्ग्यकर्म । आश्विन-
ग्रहप्रचारानन्तरम् प्रवर्ग्यकर्म[1], तदनन्तरं सवनीयपशुकर्मेत्याह— **तद्–तायते** । 8. ३१-३५
तत् प्रवर्ग्यकर्म यदा प्रवृज्यते समाप्यते अथानन्तरं पशुकर्म तायते विस्तीर्यते
अनुष्ठीयते । आपराह्णिकं माध्यंदिनपवमानानन्तरं कर्तव्यमित्याह—
**स–प्रचरन्ति** । महावीरशब्देन प्रवर्ग्यकर्माभिधीयते । स व्याख्यातरूपः । एष 8. ३६,३७
प्रकृतो महावीरो मध्यंदिनोत्सर्गो भवति । मध्यंदिने उत्सर्गः समाप्तिर्यस्य स
तथोक्तः । तस्मादेतेन महावीरेण प्रचारं कुर्युरध्वर्युप्रभृतयः । स्तौति—
**असौ–क्रियते** । तत् तेन मध्यंदिनप्रचारेण एतस्यादित्यस्य रूपं मध्यंदिन- 8. ३८-४०
संबन्धित्वलक्षणं क्रियते संपाद्यते ॥

इत्यष्टमः खण्डः

a. KB. VIII. 4. १. b. KB. VIII. 8. २८.
c. cf. TS. 6. 4. 9. 1–2. d. VS. 31. 12; SS. 8. 15. 12.

1. M. V. omit

9. १ इदानीमवसरप्राप्ता उपसत्संज्ञा इष्टीर्विधित्सुः प्रतिजानीते—**उपसदः**।
9. २-५ वक्ष्यन्त इति शेषः। प्रथमं तावदाख्यायिकामाह—**असुरा-चक्रिरे**। पुरा
असुरा एषु पृथिव्यन्तरिक्षद्युलोकेषु पुरो नगरीरकुर्वत कृतवन्तः। तदेव विभज्य
दर्शयति—अस्मिन् पृथिवीलोके अयस्मयीमयोविकाररूपां नगरीं कृतवन्तः।
अन्तरिक्षलोके रजतां रजतमयीम्। अमुष्मिन् द्युलोके हरिणीं काञ्चनमयीं
पुरं कृतवन्तः। एवमसुरैस्तिसृषु नगरीषु कृतासु देवाः किं कृतवन्त इत्यत्राह—
9. ६ **ते-अपश्यन्**। अनन्तरं देवा लोकेषु तैरसुरैराक्रान्तेषु सत्सु पुरैस्तिरोहितेषु
विनाशं गतेषु वा सत्सु किमस्माभिरिदानीं कर्तव्यमिति विमृश्य तन्निबर्हणार्थ-
मेतं वक्ष्यमाणलक्षणं पञ्चदशावयवोपेतं वज्रं दृष्टवन्तः। पञ्चदशत्वमुप-
9. ७-९ पादयति—**तिस्रः-पञ्चदश**। उपसत्सु तावद् 'उपसद्याय'[a] इत्यादिकास्त्रि-
संख्याकाः सामिधेन्यो न तु दर्शपूर्णमासादिष्विवैकादश। ताश्च तिस्र ऋचः
समनूक्ताः प्रत्येकं त्रिवारमभ्यासेन पठ्यमाना नवसंख्याका भवन्ति। त्रिषु
यागेषु प्रत्येकं याज्यापुरोनुवाक्याद्वयसंभवान्मेलने सति षट्संख्या याज्यापुरोनु-
वाक्या भवन्ति। नवानां षण्णां च मेलने सति पञ्चदशसंख्या ऋचः संपद्यन्ते।
सोऽयमृचां संघातः पञ्चदशावयवो वज्रः। वज्रवच्छत्रुहननसमर्थत्वाद् वज्रो
9. १०, ११ भवति। एवं वज्रं संपाद्य किं कृतवन्त इत्यत्राह—**एतेन-नुदते**। गतमेतत्।
सूत्र्यते हि—'उपसद्यायेति पूर्वाह्णे तिस्रः सामिधेनीरनवानमेकैकां सप्रणवां
त्रिस्त्रिराह'[b] इति।

अथ चोदकप्रदर्शितसामिधेन्यपवादेन पूर्वाह्णिकोपसदि पठनीयाः सामिधे-
9. १२-१४ नीरुपदर्शयति—**उपसद्याय-अभिव्याह्रियते**। यस्मादेता इष्टय उपसच्छब्द-
वाच्यास्तस्माद् 'उपसद्याय' इत्युपपूर्वसदिधातुमत्ता सामिधेनीनामभिरूपा।
उपसच्छब्दवत्त्वेन किं प्रयोजनमिति चेद् उच्यते। यत् क्रियमाणं कर्म ऋग्गतेन
प्रथमेन पदेन साक्षादभिधीयते तत् कर्म समृद्धिमद् भवति। एष मुख्यः कल्पः।
प्रथमपदाभिव्याहृत्यसंभवे तु कथंचित् केनाप्यृक्पदेन कर्माभिद्योतनमपि
कर्मणः समृद्धिहेतुरेव। इह पुनः उपसद्यायेत्याद्यपदेनैव उपसच्छब्दवाच्यकर्माभि-
धानात् मुख्यकल्पलाभेन सुतरां कर्मसमृद्धिः संभाव्यते। पूर्वाह्णकालाभिरूप्य-

a. RV. 7. 15. 1.    b. ŚŚ. 5. 11. 1.

कथनेनापि स्तौति—**उपसद्यम्-इति** । अस्यां तावदह्नो रूपं प्रतीयते । 9. १५
अहः खलूदयाद्रेरुद्गच्छतादित्येन उपसद्यमुपगमनयोग्यं भवति । आदित्योदये ह्यह्नोऽभिव्यक्तिः । 'अह्नां केतुः'[a] इत्याद्यादित्यस्तुतिदर्शनात् । तदेतदादित्यहेतुकमह्न उपसद्यत्वम् उपसद्यायेति पदेनाविद्योत्यत इत्यह्नो रूपं प्रतिपादयन्नयं तृचः पूर्वाह्णिकोपसद्यभिरूपम् । अथापराह्णिकोपसदि सामिधेनीर्विधत्ते—
**इमां-इति** । सूत्रितं च—'इमां मे अग्ने समिधमिति तिस्रोऽपराह्णे'[b] इति । 9. १६,१७
अपराह्णरात्र्योः सामीप्यादिह रात्रिरूपावगतिराभिरूप्यहेतुः । रात्रौ हि संदीप्तमग्निं जनाः शीतनिर्हरणाद्यर्थं परितः स्थित्वा सेवन्ते । यतो रात्रावग्निः समिद्ध्यते अतो रात्रिहेतुत्वादग्निसमिद्धत्वस्य रात्रिरूपत्वसिद्धेः तदभिधायकत्वादयं तृचोऽपराह्णोपसदि योग्यः । एवं प्रथमेऽहनि पूर्वाह्णिकापराह्णिकोपसदोः सामिधेनीर्विधाय द्वितीयेऽहनि कथितमेव तृचद्वयमुपसद्द्वये विपर्यासेन विधत्ते—
**अथ-इति** । समिद्धत्वमह्नो रूपमादित्यरश्मिसंपर्कादह्नः संदीप्तत्वसंभवात् । 9. १८-२२
उपसद्यत्वं च रात्रिरूपम् । रात्रावग्नेः शीतनिर्हरणादिसिद्ध्यर्थं सेव्यत्वेनोपसद्यत्वात् । अतो विपर्यासेन पठितयोरनयोस्तृचयोरस्त्याभिरूप्यम् । तृतीयाद्यहःस्वपि प्रथमाद्यहःस्विवैतावेव तृचौ विपर्यस्य सामिधेनीः कुर्यादिति हेतुप्रदर्शनेनाह—
**ते-इति** । यस्मादेतयोस्तृचयोरह्नो रात्र्याश्च रूपमुपसद्यत्वादिरूपं 9. २३-२५
प्रतीयते तस्माद्धेतोर्यावन्त्युपसदामहानि भवेयुस्तेषु सर्वेष्वप्येतावेव तृचौ रूपद्वयविशिष्टत्वात् सामिधेनीत्वेन पठेत् । केनाभिप्रायेणेति चेद् उभौ कामौ रात्र्यहःप्राप्तिरूपौ कामावेकैकस्मिन्नेव तृचे प्राप्तौ स्यातामित्यभिप्रायेण पठेत् ॥

इति नवमः खण्डः

अथ चोदकप्राप्तामर्धर्चशः पठनीयतामपवदन्ननुच्छ्वासेन पठनं विधत्ते—
**अनवानम्-प्राणाः** । प्रकृतौ हि प्रथमोत्तमयोरेव त्रिर्वचनम् । इह पुनर्नैवं कर्त- 10. १,२
व्यम्, किंतु तिस्रोऽप्यृचस्त्रिवारं पठनीया इत्याह—**त्रिस्-आप्नोति** । अभ्य- 10. ३-५
स्यमानानां तिसृणामृचां संख्यां स्तौति—**ताः-अभिसंपद्यन्ते** । तिस्रस्तावदृचः । 10. ६-८
ताश्च प्रत्येकं त्रिवारमभ्यस्यमाना नवसंख्याका भवन्ति । ऋतवो वसन्तादयः

a. RV. 10. 85. 19. b. ŚŚ. 5. 11. 2.

शिशिरान्ताः षट्संख्याः । लोका भूर्भुवःस्वरात्मकास्त्रयः । ते चर्तवो लोकाश्च
मिलिताः सन्तो नव भवन्ति । एवं स्थिते च तत् तेन तिसृणां प्रत्येकं पाठेन
एतदृतुलोकलक्षणं वस्तु ताः सामिधेन्यः प्राप्ता भवन्ति । सामिधेनी-
भिर्नवभिर्ऋतूनां लोकानां च प्राप्तिर्भवति ।

10. ९-११ चोदकप्राप्तम् 'अग्ने महाँ असि'[a] इत्यादिकं निगदं प्रतिषेधति—**न-ब्रूयात्।**
य एष निगदः सामिधेनीषु पठनीयस्तमेतं निगदमुपसत्सु न पठेत् । यस्मादुपसत्सु
सर्वेऽपि निगदाः 'कं प्रपद्ये'[b] इत्यादयः उत्सृज्यन्ते परित्यज्यन्ते । निगदपाठे को
दोष इति चेत्, यो होता निगदं पठेत्[1] तस्य जामितादोषो भवेत् । देवतावाहनं तु
10. १२ कर्तव्यमेवेति सिद्धान्तयितुं पूर्वपक्षयति—**न-आहुः।** यथा निगदपाठो न कर्तव्यः,
एवं देवतावाहनमपि न कर्तव्यमिति केचिच्छाखिन आहुः । सिद्धान्तयति—
10.१३-१५ **किमु-इति।** देवतावाहनमकृत्वा याज्यायाः पाठः क्रियत इत्येतदयुक्तमित्यतो
हेतोर्याज्यापाठार्थमेव देवतावाहनं कार्यमिति सिद्धान्तः । याज्यापाठ एवा-
वाहने हेतुर्नान्यः । इह याज्यापाठसंभवादावाहनं कर्तव्यम् । न ह्यनाहूताय
10.१६-१८ दूरदेशावस्थिताय दानं कर्तुं शक्यम् । देवतानां संख्यां स्तौति—**ता-करोति।**
[2]-ज्योतिष्मतः प्रकाशयुक्तान्-[2] ॥

इति दशमः खण्डः

इदानीं क्रमेण त्रयाणां यागानां याज्यापुरोनुवाक्या दर्शयिष्यन् प्रथम-
11. १-३ माग्नेययागस्य प्रदर्शयति—**गायत्र्याव्-आप्नोति।** आग्नेययागस्य 'अग्निर्वृत्राणि
जङ्घनद्'[c] 'य उग्र इव शर्यहा'[d] इत्येते गायत्रीछन्दस्के याज्यापुरोनुवाक्ये
भवतः । पृथिवीलोकश्च गायत्रः । गायत्रीयुक्तकर्मसाध्यत्वात् । तस्मात् तेन
पृथिवीलोकप्राप्तिर्भवति । सौम्ययागस्य 'त्वं सोम क्रतुभिः'[e] 'अषाळ्हं
11. ४-६ युत्सु'[f] इत्येते दर्शयति—**त्रिष्टुभौ-आप्नोति।** वैष्णवयागस्य 'यः पूर्व्याय'[g]

a. TS. 2. 5. 9. 1. b. ŚŚ. 1. 4. 5.
c. RV. 6. 16. 34. d. RV. 6. 16. 39.
e. RV. 1. 91. 2. f. RV. 1. 91. 21.
g. RV. 1. 156. 2.

1. T. पठति 2-2. T. ज्योतिष्मन्तः प्रकाशयुक्ताः

'तमु स्तोतारः'[a] इत्येते दर्शयति—**जगत्यौ-आप्नोति**। त्रिष्टुब्जगतीयुक्तकर्म- 11. ७-९
साध्यत्वात् त्रैष्टुभत्वं जागतत्वं च द्रष्टव्यम्। तथा च ब्राह्मणान्तरम्—
'गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौः'[b] इति। अथासामृचां
पूर्वाह्णापराह्णोपसद्यागयोः व्यत्यासेन पठनीयतामाह—**ता-पुरोनुवाक्याः**। 11.१०-१२
किमर्थं विपर्यासः क्रियत इत्यत्राह—**अयातयामतायै**। यातयामत्वं नीरसत्वम्। 11. १३
तत्परिहारो विपर्यासेन क्रियते। कथं यातयामत्वप्रसक्तिरित्यत्राह—
**वषट्कारेण-इति**। वषट्कारो यागः। तेन हेतुना याज्यारूपाया ऋचो यात-11.१४,१५
यामत्वं भवति। तत् किमिदानीं द्वितीयाहनि याज्यात्वं न स्यात् प्रथमेऽहनि
वषट्कारसंबन्धसद्भावात्? नेत्युच्यते। समानेऽहन्नेकस्मिन्नहन्येव यातयाम-
त्वम्। द्वितीयादिषु तु न यातयामत्वम्। पठिष्यति हि 'तदाहुर्यया वै प्रातर्यज-
त्यृक् सा तदहर्यातयामा भवति'[c] इति। एवं च पूर्वाह्णे याज्या नीरसीभाव-
मापद्यमाना नापराह्णे याज्यात्वेन पठितुं शक्या। किंतु तां पुरोनुवाक्यां
कृत्वा पूर्वाह्णिकोपसदि पुरोनुवाक्यारूपामृचं याज्यां कुर्यात्। एवं सति हि न
यातयामत्वदोषः प्रादुर्भवेत्। विधान्तरेण विपर्यासं स्तौति—**यदु-भवन्ति**। 11.१६,१७
अत्रोपसदो यज्ञस्य शरीरिणो ग्रीवास्थानीयाः याज्याः। पुरोनुवाक्याश्च
तत्पर्वस्थानीया इति कृत्वोच्यते। विपर्यासेन याज्यापुरोनुवाक्याः पठतीति
यदस्ति तद् ग्रीवाणां स्थेम्ने स्थिरत्वाय संपद्यते। यस्मादेवं विपर्यासः क्रियते
तस्मादेव लोकेऽपि ग्रीवाग्रगतानां पर्वाणि संधानानि व्यतिषक्तान्यन्योन्यं
संश्लिष्टान्येव भवन्ति। यज्ञपुरुषग्रीवारूपोपसत्संधिस्थानीयानामृचाम् अन्योन्य-
व्यतिषङ्गकरणात्। अथ यजमानस्य पयोव्रतत्वविधिम् अर्थवादेनोन्नयति—
**आज्यहविषो-सलोम**। देवताशब्दो यागवाची। आज्यं हविर्यासां तास्तथोक्ताः। 11.१८-२०
तथा चैतरेयक उपसदामिषुरूपकल्पनया आज्यहविष्ट्वमाम्नायते—'इषुं वा
एतां देवाः समस्कुर्वत यदुपसदः। तस्या अग्निरनीकमासीत् सोमः शल्यो
विष्णुस्तेजनं वरुणः पर्णानि। तामाज्यधन्वानो व्यसृजन्। तया पुरो भिन्दन्त
आयन्। तस्मादेता आज्यहविषो भवन्ति'[d] इति। यजमानः पयोव्रतो भवति।
पयः क्षीरं व्रतं यस्य स तथा। तदेतदाज्यहविष्ट्वमुपसदां यजमानस्य पयो-

a. RV. 1. 156. 3.
b. TS. 1. 7. 5. 4; 5. 2. 1. 1.
c. KB. XIII. 2. १.
d. AB. 1. 25. 2-3

व्रतत्वं च सलोम अनुरूपं भवति । आज्यपयसोर्गोविकारत्वादिभिरेकरूपत्वात् । यस्मादेवं तस्मादुपसद्दिनेषु यजमानः पयसा व्रतं चरेत् । एतत्तु ब्राह्मणविषयम् । 'पयो ब्राह्मणस्य तेजो वै ब्राह्मणः । तेजः पयः । तेजसैव तेज आत्मन् धत्ते'[a] इति शाखान्तरे श्रवणात् । क्षत्रविशोस्तु यवाग्वामिक्षे व्रतनद्रव्ये । 'यवागू राजन्यस्य व्रतम् । आमिक्षा वैश्यस्य'[b] इति शाखान्तरे श्रवणात् ।

11.२१,२२ अथोपसद्दिनेषु व्रतनार्थद्रव्यपरिमाणप्रदर्शनार्थमाह—**ताः–कुरुते** । ता उपसदः । परोवरीयसीः परत्रोत्तरफलाः कुर्यात् । तत् कथमिति चेत् तत्राह— त्रीन् । प्रथमोपसद्दिने स्तनत्रयजनितेन क्षीरेण व्रतं कुर्यात् । द्वितीयेऽहनि स्तन-द्वयजनितेन । तृतीये त्वेकस्तनजनितेन । इत्थमुत्तरोत्तरमल्पतासंपादनेन व्रतनं कर्तव्यम् । एवमुपसदां परोवरीयस्त्वसंपादनेन च लोकान् भूर्भुवःस्वराख्यान् उत्तरोत्तरमुत्कर्षशालिनः करोति । भूलोकादन्तरिक्षलोक उत्कृष्टः । तस्मादपि द्युलोक इति । अत्र त्र्यादिस्तनजन्यस्य पयसोऽल्पत्वात् तावन्मात्रेण यजमानस्य शरीरयात्रानिर्वृत्त्यसंभवात् लौकिकपयोऽभ्युन्नयने[1] प्रसक्ते प्रतिषेधति—

11.२३,२४ **न–उपयन्ति** । अभि त्र्यादिस्तनजनितपयस उपरि लौकिकं पयो न प्रापयेत् । कुत इत्याह—स्वर्गमिति । उपसदनुष्ठानं नाम स्वर्गलोकमुद्दिश्य गमनमेव तत्प्राप्तिहेतुत्वात् ॥

इत्येकादशः खण्डः

12. १ अथापि[2] किमित्यत्राह—**द्वादशो–लोकः** । स्वर्गलोकस्तावत् पृथिवी-लोकादस्माद् द्वादशो भवति । कथमिति चेद् अयं तावत् पृथिवीलोकः प्रथमः । मध्ये च येन स्वर्गो गन्तव्यः स दशान्तरुष्यनामास्ति कश्चिन्मार्गविशेषः । तस्मिंश्च दशसंख्या स्थानविशेषा भवन्ति । येषु मार्गावयवभूतेषु दशरात्रीरुषित्वा गन्ता स्वर्गं प्राप्नोति । एवमुक्तविधमार्गमवेक्ष्यास्माल्लोकाद् द्वादश स्वर्गो भवति । तत्र चोपसत्सु दशस्तनव्रतनेन अध्वनानेन स्वर्गं गता भवन्ति ।

a. TS. 6. 2. 5. 3. b. TS. 6. 2. 5. 2–3.

1. T. अविहितलौ°  2. T. तथापि

**स–अन्वश्नुते** । एवं सति च यो यजमान एकवारं लौकिकं पयो 12. २-७
व्रतेऽभ्युन्नीय व्रतयति स यथा लोके कश्चित् सार्थैः सहैकां प्राप्यभूमिं प्रति
गच्छन् केनचित् प्रतिबन्धकारणेन विलम्बित एकाहोरात्रपरिमितकालविप्र-
कृष्टान् सार्थान् स्वयमेक एव पश्चाद् द्रुतगमनेन कथंचित् प्राप्नुयात् तथा
तेनाभ्युन्नयनेन कर्मणा भवति । द्वितीयमभ्युन्नयनं तु रात्रिद्वयान्तरितसार्थानु-
गमनसमानम् । तृतीयोन्नयने तु द्रुतगमनेऽपि सार्थान् न प्राप्नोति । तथा स्वर्ग-
लोकप्राप्तिरपि न स्यात् । अतोऽभ्युन्नयनमुक्तदोषग्रस्तत्वान्न कर्तव्यम् । अत्रैव
विषये कंचित् पक्षमुपक्षिपति—**अपि–इति** । स्त्र्यादिस्तनजनितस्य पयसः शरीर- 12. ८-११
स्थित्यपर्याप्तत्वात् किं कर्तव्यमित्यत्र पैङ्ग्यनामधेयो महर्षिरित्थमुक्तवान् ।
कथमिति चेद् विहितं स्त्र्यादिस्तनजनितं पयो व्रतयित्वा पश्चादिच्छानुसारेण
आज्यादिद्रव्यान्तरेणापि व्रतनं कुर्यात् । प्रक्रान्तस्य कर्मणोऽवश्यमनुष्ठेयत्वात् ।
शरीरक्षये च तदननुष्ठानापातात् । तथा च श्रूयते—'यद्युपदस्येदोदनं धानाः
सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय'[a] इति । अभ्युन्नयनं तु यथोक्तन्यायेन
न कर्तुं युक्तम् । एवं कृते किं फलमिति चेद् उच्यते । यथा लोके एकां गम्यभूमि-
मुद्दिश्य बहूनां गच्छतां मध्ये एकः शरीरश्रान्तिविरहात् प्रथममेवाभीप्सितं देशं
प्राप्नोति, तथायमपि यजमानः स्वर्गलोकं गच्छन्ननुगमनेन शरीरापक्षय-
परिक्षयात् स्वर्गलोकसंबन्धिनि प्रदेशे सर्वेषां प्रथममेवावसानमवस्थानं
प्राप्नोति । तस्माच्छरीरापक्षयपरिहारार्थमनुव्रतनं कर्तव्यमिति पैङ्ग्याख्यो
मुनिर्मेने । कौषीतकिनः सिद्धान्तं दर्शयति—**समाप्तिः–कौषीतकिः** । यद्यपि 12. १२
स्त्र्यादिस्तनजनितेनैव पयसा व्रतनं कर्तुं युक्तं विहितत्वाद्, अभ्युन्नयनं तु पूर्वमेव
निषिद्धम्, तथापि शरीरापक्षयप्रसक्तौ सत्यां प्रक्रान्तस्य कर्मणः समापयितुम-
शक्यत्वप्रसङ्गात् तत्समाप्तेश्चावश्यं कर्तव्यत्वात् प्रकारान्तरमुपपादयितव्यम् ।
कोऽसौ प्रकारविशेष इत्यत्रोक्तम्—**सम्राजो–व्रते** । सम्राजो घर्मस्य भक्षणेऽस्मै 12. १३
यजमानाय दध्यानयनं कुर्यात् । न पुनर्व्रते दध्यानयनम् । उक्तदोषाविर्भाव-
प्रसंगात् । न केवलमनेन शरीरापक्षयपरिहार एव, फलान्तरमपीत्याह—
**सोमो–समाप्नोति** । दध्नो गोभक्षितौषधिपरिणामरूपत्वात् सोमदेवत्यत्वा- 12.१४,१५
च्चौषधीनां दध्नः सोमरूपत्वम् । दध्नः सोमत्वादस्य यजमानस्य दधिभक्षणे

a. TA. 2. 8. 1. ( यदि मन्येतोपदस्यामीत्योदनम्··· )

सति सोमभक्षोऽप्यव्यवहितो भविष्यति। सुत्याहन्येव तावत् सोमभक्षः। नार्वाचीनेषु दिनेषु। तेष्वप्येवं दधिभक्षणे सति सोमभक्षो विहितो भवेत्। दध्नः सोमादभिन्नरूपत्वात्। अतः सोमभक्षव्यवच्छिन्नतापरिहारार्थमपि घर्मभक्षे दध्यानयनं कर्तव्यम्। किं च एवं कृते सति दध्नो बलसंपादकत्वेन आलस्यप्रसंगाभवाद् यज्ञः समाप्तिं गच्छति। तस्मादपि दध्यानयनं कुर्यादित्ययं कौषीतकिनो महर्षेः सिद्धान्तः।

एवमुपसन्नामधेया इष्टयो विहिताः। अथ यत्र बहुषु यजमानेषु यागं कुर्वाणेषु सोमक्रयसन्निपातः प्रसजेत् तत्र संसवदोषोत्पत्तौ तत्परिहारोपाय-
12.१६-१८ मुपदिशति—**उत-चरेयुः**। यदि[1] बहवो यजमानाः सोमक्रयं सहानुतिष्ठेयुः तदा संसवदोषोत्पत्तिपरिहारार्थं केचिद् यजमाना मध्यमोपसद्दिनानुष्ठेयं कर्म दिनद्वयेऽनुतिष्ठेयुः। अन्ये पुनरेकस्मिन्नेव दिने कुर्युः। तथा सति दिनद्वयानुष्ठायिनाम् उपवसथाहन्येकदिनानुष्ठायिनां सोमाभिषवः। ततोऽपरेद्युः दिनद्वयानुष्ठायिनाम्। नैकस्मिन्नेव दिने सर्वेषाम्, येन संसवः स्यात्। किमिति मध्यमोपसत्कर्मैव दिनद्वयेऽनुष्ठीयते? प्रथमोपसदुत्तमोपसद् वा दिनद्वयेऽनुष्ठीयताम्।
12. १९ एवमपि संसवापत्तेः परिहर्तुं शक्यत्वादित्यत्राह—**आवपनं-सा**। सा मध्यमोपसद् यस्मादावपनं भवति। समोप्यते सम्यग् आसमन्तात् प्रक्षिप्यत इत्यावपनम्। मध्यमोपसद्येव दिनान्तरप्रक्षेप उचितः, नेतरयोः। आवपनत्वं वा कुत
12.२०,२१ इत्यत्राह—**इदम्-अभ्युदेति**। इदमिति सामान्येनाभिनीय निर्देशः। अन्तरिक्षलोक इति विशेषनिर्देशः। अतो न सामानाधिकरण्यानुपपत्तिः। अन्तरिक्षरूप आकाशे खल्विदं सर्वं भोक्तृभोग्यजातं समोप्यते। मध्यमोपसच्च स्थानतोऽन्तरिक्षरूपा। मध्यावस्थितत्वात्। अतोऽन्तरिक्षरूपत्वात् तत्रैवावापः नेतरयोः। अत उक्तेनोपायेन क्रियमाणे यागे सोमाभिषवसंगमराहित्येनैव यज्ञस्य समाप्तिः स्यात्। अभ्यासोऽध्यायसमाप्तिसूचनार्थः॥

इति द्वादशः खण्डः।

1. T. omits.

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
कर्तव्यान्युपसद्दिनेषु कथयन् कौषीतकिब्राह्मण-
व्याख्याने न्यवृतत् सुखाय सुधियामध्याय एषोऽष्टमः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## प्रथमदशके अष्टमोऽध्यायः

अथ

## नवमोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥

प्रकटितमिति कृत्स्नं कर्म दीक्षादिनेभ्यः
परमुपवसथाह्नो यत् पुरस्ताद् विधेयम् ।
उपवसथदिनानुष्ठेयमग्निप्रणीति-
प्रभृतिकमथ सम्यग् वक्तुमुज्जृम्भते स्म ॥

तत्र तावदग्निप्रणयनीया ऋचो विधित्सुः प्रथममग्निप्रणयनकर्म[1]
1. १-३ स्तौति—**ब्रह्म-अपघ्नन्ति ।** योऽयमग्निर्नासौ परिच्छिन्नतया मन्तव्यः । किंतु
ब्रह्म परिवृढरूप एव । अपरिच्छिन्नशक्तियुक्तश्च; अग्नेः सर्वात्मत्वावगमात् ।
एवं सत्युपवसथे सुत्यादिनात् पूर्वस्मिन्नहन्यध्वर्यवः अग्निप्रणयनाख्यं कर्म कुर्व-
न्तीति यदस्ति तेन परिवृढरूपेणाग्निना यजमानस्य पाप्मानं विनाशयत्येव ।
1. ४-७ तदेव विभज्य दर्शयति—**पुरस्ताद्-मार्जालीयेन ।** यजमानस्य पुरस्ताद् यः
पाप्मास्ति तमाहवनीयेनोत्तरवेदिस्थेनाग्निना विनाशयति । पुरोवर्तित्वसाम्यात् ।
यस्तु यजमानस्य पश्चाद्भागे पाप्मास्ति स गार्हपत्येन शालामुखस्थेन । एवमु-
1. ८-११ त्तरत इत्यादि । **ये-अपहत्यै ।** ये पुनरनयोरन्तःसदसं सदोनामधेयस्य मण्टपस्य
मध्यभागे स्थिता धिष्ण्यनामानः तैर्मध्यस्थितं पाप्मानं हिनस्ति । एवमेतेऽग्नयो
यजमानपाप्महन्तारः । अस्माद्धेतोरुपवसथे प्रागाभिमुख्येनाग्निं प्रणयन्त्यध्व-
र्यवः । धिष्ण्यविहरणं च कुर्वते । तच्च यजमानपाप्मापहत्यै संपद्यते । इत्थमग्नि-
प्रणयनकर्माभिष्टूय अग्निप्रणयनकर्मणि पठनीयानामृचाम् उच्चैस्तरत्वं विधातुं
1. १२-१४ पुरावृत्तमाह—**देवा-इति ।** पुरा देवा दीक्षां कर्तुमारब्धवन्तः सन्तो दीक्षाया
वाङ्नियमनरूपत्वात् स्वेषां मध्ये वर्तमाना वागियं दीक्षाविरोधिनी; अतोऽ-
स्मद् गमयितव्येति निश्चित्य तां निजगोचरादपागमयन् । किमुक्त्वेति चेत्,

1. T. अग्निप्रणयनाख्यं कर्म

हे वाक् त्वं खलु स्वभावादेव नानारूपा अनेकशब्दरूपा भवसि । वयं पुनरि-
दानीं सत्यमयाः । सत्सु भवं सत्यम् । अपभ्रंशासंस्पृष्टपरिमितयथार्थवचन-
प्रधानाः[1] । दममयाः । दमो नामेन्द्रियाणां नियमनम् । तत्प्रधानाश्च भवितु-
मिच्छामः । सत्यमयत्वं दममयत्वं च दीक्षितत्वं नामेति ह्युक्तं प्राक् । दममय-
त्वेनैव सत्यमयत्वसिद्धित्वेऽपि वाङ्नियमस्य दीक्षायामन्तरङ्गत्वद्योतनार्थं पृथ-
ग्वचनम् । यस्माद् वयं यज्ञदीक्षामारब्धुमिच्छामः तस्मादस्मासु भवत्या न
वर्तितव्यम् । दीक्षावैलोम्यापातात् । इत्येवमुक्त्वा देवा वाचमुत्सारितवन्तः ।
**सा-अभजन्त ।** इत्थं देवैरुक्ता वाग् देवसंनिधानादपक्रम्य कंचित् कालं 1. १५,१६
स्थित्वा संप्रति मत्सन्निधिस्तेषामभिमत इति संभावनया आगत्य दीक्षणीयादौ
आभजनमङ्गीकरणमभ्यर्थितवती । तामभ्यर्थयमानां वाचं नाङ्गीचक्रुर्देवाः ।
**सा-एव ।** सा वाक् पुनः प्रायणीये कर्मणि आभक्तिमैच्छतेत्यनुषंगः । तां 1. १७-१९
तत्रापि नैवाभजन्त[2] । एवं क्रयातिथ्यकर्मणोरप्यात्मन आदानमिच्छन्तीं वाचं
देवा नाभजन्त । **सो-एव ।** अनन्तरं सा वाक् । उशब्दो विशेषार्थः । 1. २०
यथा पूर्वेषु दीक्षणीयादिकर्मसु आगत्याभ्यर्थनाभङ्गं प्राप्य निवृत्ता न तथा
वागुपसत्सु कृतवतीति विशेषद्योतनार्थं उशब्दः । उपसद इति द्वितीया ।
आतिथ्यान्तकर्मस्वागमनस्य वैफल्यमालक्ष्य संजातागमननिर्वेदा सती वागुपसत्सु
आगमनमपि न कृतवती । अत्र प्रसंगादुपसदामुपांशुप्रयोगत्वं विधत्ते—**तस्मादु-** 1. २१
**चरेयुः ।** यस्मादुपसदः पुरा वाचा स्वयमेव दूरान्निरस्ताः तस्माद्धेतोस्ता उपस-
दस्तन्त्रेण सहैवोपांशु प्रयोज्याः । 'करणवदशब्दममनः प्रयोगमुपांशु'[a] प्रसिद्धम् ।
तत्प्रतिषेधार्थमाह—**यथा-शृण्वीरन् ।** होत्रादय ऋत्विजोऽन्योन्यमेवाकर्णयेयु- 1. २२
र्नान्ये । ते चान्योन्यमाकर्णयेयुश्च यथा तथा चरेयुः । अन्योन्यं श्रवणगोचरत्वं
स्वव्यतिरिक्तश्रवणगोचरत्वाभावश्च येन प्रकारेण संभवति तथा ब्रूयात् ॥

इति प्रथमः खण्डः

प्रसंगादुपांशुत्वमुपसदां विहितम् । अथ प्रस्तुतामेवाख्यायिकामुप-
2. १ संक्रम्याह—**सो-आगच्छत् ।** एवं क्रियासमभिहारेणागम्य प्रतिषिद्धा सा

a. **Kapardin** and Haradatta on ĀpŚ. 1.8.

1. T. adds संस्तुत after यथार्थ    2. T. adds विशेषः

वागेतस्मिन्नुपवसथे दिनेऽग्निप्रणयनकर्मणि प्रारब्धे सत्यागमनं कृतवती।
2. २ **तां-अभजन्त** । अथ देवास्तां वाचं तत्राग्निप्रणयनकर्मण्यङ्गीचक्रुः । यदर्थ-
2. ३,४ मियमाख्यायिका तं विधिं दर्शयति—**तस्मादु-यज्ञे**। उशब्दो[1] विशेषार्थः।
यस्माद् देवा अग्निप्रणयने वाचमभजन्त तस्माद्धेतोः अग्निप्रणयनकर्मण्युच्चैः-
स्वरेण पठनं कुर्यात्। नोपसत्स्विवोपांशु। केचिच्छाखिन आद्यामृचमुपांश्व-
नूच्य द्वितीयाद्या ऋच उच्चैःस्वरेण पठन्ति। तत् प्रतिषेधति—प्रथमत एवेति।
प्रथमामप्यृचमुच्चैः पठेत्। कुत इत्यत्राह—यथैनामिति। एनां वाचमागतां
प्राप्तां देवैर्यज्ञेऽङ्गीकृतां च सदस्या जना यथा विजानीयुस्तथा ब्रूयात्।
उच्चैर्हि पठ्यमाने कथिताख्यायिकार्थविदो विद्वांस इदानीमागता ननु
वागित्यादि प्रतिपद्येरन्।

अथाग्निप्रणयनाय प्रेषितस्य होतुरष्टावृचो विधित्सुः प्रथमं तिस्र ऋचो
2. ५ विधत्ते—**प्र-अन्वाह**। प्रवन्तमिति प्रशब्दवत्त्वेन प्रणयनकर्माभिरूप्यं दर्शितम्।
प्रह्रियमाणाय[2] प्रणीयमानमग्निमभिधातुम्। अथैकामृचं विधत्ते—**इळायास्-**
2. ६-८ **ईड्डे** । अत्रेळाशब्देन पृथिव्युच्यते इत्याह—इयं वा इळेति। कथमित्यत्राह—
अस्यां हीति। इदं दृश्यमानं स्थावरं जंगमं च प्राणिजातं पृथिव्यामीरितं
भवति। रेफस्य ळकारः। पदान्तराणि सुगमत्वान्न व्याख्यातानि। अतोऽ-
यमर्थः—हे अग्ने जातवेदः त्वामिळायाः पृथिव्याः संबन्धिनि पदे स्थानविशेषे।
तत्रापि पृथिव्या वेद्या नाभौ मध्ये निधीमहि स्थापयामः। किमर्थम्? देवेभ्यो
हव्यानि चरुपुरोळाशादिकानि प्रापयितुमिति। पदार्थोक्तेर्वाक्यार्थप्रतिपत्त्यर्थ-
2. ९ त्वात्। उत्तरार्धर्चपाठस्यावधिं दर्शयति—**जातवेदो-अनुस्तौति**। उत्तरवेद्या-
मध्वर्युणा स्थाप्यमानमग्निं 'जातवेद'[a] इत्यर्धर्चेन स्तौति। निहितवतेति
2. १० निधानकर्मद्योतकत्वं दर्शितम्। अथ तृचं विधत्ते—**अग्ने-अनुस्तौति**। परिधा-
२. ११-१६ नीयां विधत्ते—**त्वं-आप्त्यै** । अभिरूपा इत्यादि संवत्सरस्यैवाप्त्या इत्यन्तं
गतम्।

a. RV. 3. 29. 4.

1. T. उकारो

2. T. प्रणियमानाय

अथैतासां नानाच्छन्दस्कानामृचां गायत्रीछन्दस्त्वं संपादयति—**ताः—छन्दोभिः ।** ता वस्तुतोऽष्टावृच आद्यन्तयोर्ऋचोरावर्त्यमानाः सत्योऽष्टादश- 2. २०,२१
संख्या गायत्र्यो भवन्ति । तथा च सति गायत्र्यनुष्टुप्त्रिष्टुब्भिः छन्दोभिराग्नेयं छन्दो गायत्रीरूपमुपसंपन्नं भवति । 'प्र देवं देव्या'[a] इति तिस्रस्तावत् संपन्ना गायत्र्यः । आद्यायास्त्रिरावर्तनीयत्वात् तिसृभिरनुष्टुब्भिः चतस्रो गायत्र्यो भवन्ति । प्रत्येकमक्षराष्टकस्य अतिरिच्यमानत्वात् । तथा सति सप्त गायत्र्यः त्रिरावृत्तया 'त्वं दूतः'[b] इत्यनया परिधानीयया षट् त्रिष्टुभो भवन्ति । ताभिश्च 'यस्य ह कस्य च'[c] इति वक्ष्यमाणन्यायेन एकादश गायत्र्यो भवन्ति । तासां च पूर्वाभिः सप्तभिर्मेलने अष्टादश गायत्र्यो भवन्ति ।

आद्यान्त्याभ्यासयोगादृच इह विहिता द्वादशादौ हि तिस्रो
गायत्र्योऽनुष्टुभां यत्त्रयमिदममुना संभवेयुश्चतस्रः ।
षड्भिस्त्रिष्टुब्भिरेकादश च समुदिता इत्थमष्टादश स्यु-
श्छन्दांस्यन्यान्यतोऽग्निप्रणयसमुचितं छन्द आग्नेयमासीत्[1] ।।

अथैतेनैव प्रसंगेन सर्वेष्वपि गायत्र्यादिच्छन्दस्सु छन्दोऽन्तरस्य छन्दोऽन्तरसंपत्तिं व्युत्पादयति—**यस्य–जगतीम् ।** समानस्यैकस्य उष्णिगादेः सर्व- 2. २२-२८
स्यापि छन्दसः षट्संख्याका ऋचश्चेत् स्युस्तर्हि ता ऋचोऽक्षरसंख्यया गायत्रीछन्दोऽभिसंपन्ना भवन्ति । तथा यस्य कस्यापि छन्दसः सप्तसंख्याका ऋचः स्युस्तदा ता ऋच उष्णिहं छन्दोऽभिसंपन्ना भवन्ति । एवमनुष्टुबादावपि द्रष्टव्यम् । इयमत्र स्थितिः । गायत्रादिसप्तच्छन्दस्सु यच्छन्दोऽभिसंपिपादयिषितं तच्छन्दश्चतुर्धा विभज्य य एकोंऽशः—यथा गायत्र्याः षडक्षराणि, उष्णिहः सप्त, अनुष्टुभोऽष्टावित्यादि । गायत्र्या हि चतुर्विंशत्यक्षरायाश्चतुर्धाकरणे षट्षडक्षराणि भागा भवन्ति, तथोष्णिहोऽष्टाविंशत्यक्षरायाः सप्तसप्ताक्षराणि भागाः—तेन संपाद्यच्छन्दस एकेनांशेन तुल्या ऋचस्तेन संपिपादयिषितच्छन्दसा परिच्छेत्तुं शक्यन्ते । तत्राप्यृचां यत् स्वाभाविकं छन्दोऽस्ति

a. RV. 10. 176. 2. b. RV. 2. 9. 2.
c. KB. IX. 2. २२.

1. T. V. आसन्

तस्य पादभागेन संमिता ऋचो निष्पद्यन्ते। यथोष्णिक्छन्दस्कासु षट्स्वृक्षु विद्यमानासु गायत्रीसंपत्तौ प्रत्येकमक्षरचतुष्कस्यातिरिच्यमानत्वाच्चतुष्कस्य षट्कस्य चतुर्विंशत्यक्षराया गायत्र्याः संपत्तेः सप्त गायत्र्यः संपद्यते। अक्षरसप्तकं चोष्णिहः सप्तभाग इति स्थितौ स्वाभाविकच्छन्दश्चतुर्थभागसंमितत्वं भवति। तथा चैतद् ब्राह्मणार्थतत्त्वज्ञः सुयज्ञमुनिरसूसुचत्—'संपाद्यपादभागेनाहार्यस्यर्चः संमितास्तस्य पादभागेन संपन्नाः'[a] इत्यादि। एतदेव प्रातिशाख्यायां छन्दःपटलान्ते शौनकेनोक्तम्—

'छन्दस्तुरीयेण समानसंख्या याश्छन्दसोऽन्यस्य भवन्त्यृचोऽन्याः।
यावत्तुरीयं भवति स्वमासां तावत्य एता इतरा भवन्ति'[b]॥ इति॥

इति द्वितीयः खण्डः

अग्निप्रणयनं खण्डद्वयेनेत्थं प्रपञ्चितम्।
कथ्यतेऽथ क्रमायातं हविर्धानप्रवर्तनम्॥

3. १-४ प्रथमं तावत् कर्मस्वरूपं प्रशंसति—**वाक्-आप्त्यै**। हवींषि धीयन्ते स्थाप्यन्ते यस्मिन् शकटे तद्धविर्धानम्। ते च द्वे दक्षिणं चोत्तरं च। तयोरेकं हविर्धानाख्यं शकटं वागात्मकम् इतरं मनोरूपमिति प्रतिपत्तव्यम्। किं पुनरनयोर्वाङ्मनसोः सादृश्यमिति चेत्, यस्माल्लोके वाङ्मनसयोरिदं काम्यमानं कृत्स्नं वस्तु स्थितं भवति। वाचः कामसंपादकत्वं तावल्लोके स्पष्टमेव। यतो ममैते पदार्थाः सन्त्विति दातॄणामग्रे स्थित्वा याचन्ते। दातारश्च तान् प्रयच्छन्ति। ततो वाचि कामानां स्थितिः संभाव्यते। सर्वश्च लोकः प्रथमं मनसैवाभिलषितानर्थान् ध्यायति। तेन मनसि कामानामवस्थितिरुपपद्यते। तथा च ब्राह्मणम्—'मनसि वै सर्वे कामाः श्रिताः। मनसा हि सर्वान् कामान् ध्यायति। वाग् वै सर्वान् कामान् दुहे। वाचा हि सर्वान् कामान् वदति'[c] इति। एवं वाङ्मनसाभ्याम् आधारत्व-

a. ŚŚ. 7. 27. 29.
b. Ṛk. Prā. 18. 21.
c. AA. 1. 3. 2.

साम्याद्धविर्धानयोर्वाङ्मनसरूपत्वं ध्येयम्। तथा च सति वाङ्मनसात्मक-
हविर्धानप्रवर्तनं सर्वकामावाप्तिहेतुत्वात् प्रशस्तम्। प्रकारान्तरेण प्रशंसति—
**द्वे-अभिनिदधाति**। हविर्धानाख्ये शकटे तावद् द्विसंख्ये भवतः। परितो निधीय- 3. ५, ६
मानच्छदिर्द्वयापेक्षया त्रिसंख्यापूरकमेकं छदिरुपरिष्टादध्वर्यवः स्थापयन्ति।
तत् तृतीयं छदीरूपमेकं हविर्धानम्। एवं त्रीणि हविर्धानानि संपन्नानि।
तृतीयं छदिश्च हविर्धानरूपमित्येतदाध्वर्यवे ब्राह्मणे प्रतिपादितम्—'दण्डो
वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमच्छिनत्। यत् तृतीयं
छदिर्हविर्धानयोरुदाह्रियते। तृतीयस्य हविर्धानस्यावरुद्धचै'[a] इति। पुरा खलु
त्रीणि हविर्धानानि बभूवुः। तत्र कस्मिंश्चिद् यज्ञे हौत्रं कुर्वाण उपरस्यापत्यं
दण्डनामा मुनिस्तृतीयहविर्धानसंबन्धिनमक्षं वषट्कारेण चिच्छेद। ततः प्रभृति
द्वे एव साक्षाद् हविर्धाने प्रसिद्धे। यज्ञभग्नं तृतीयं हविर्धानम्। तत्स्थाने तृतीयं
छदिर्हविर्धानयोरुपरिष्टादध्वर्युभिः स्थाप्यत इति। एवं त्रीणि हविर्धानानि।
**तैर्-आप्नोति**। गतम्। अथ संप्रेषितेन होत्रा पठनीया अष्टसंख्याका ऋचो 3. ७
दिदर्शयिषुः प्रथममेकां विधत्ते—**प्रेतां-अन्वाह**। प्रवतीं प्रोपसर्गयुक्ताम्। प्रवर्त्य- 3. ८
मानाभ्याम् अध्वर्युणा प्राङ् नीयमानाभ्यां हविर्धानाभ्याम्। ते स्तोतुं 'प्रेताम्'[b]
इत्यृचं पठेत्। एषा च हविर्धानप्रवर्तनकर्मण्यभिरूपेत्युक्तं प्रवतीमिति। अथ
द्वे ऋचौ विधत्ते—**द्यावा-इति**। अन्वाहेति शेषः। एते ऋचौ प्रत्येकं 3. ९
स्तौति—**आशीर्वती-उत्तरया**। द्वयोर्ऋचोर्मध्ये[1] या पूर्वा प्रथमं पठनीया 'द्यावा 3. १०-१३
नः पृथिवी'[c] इत्येषा ऋगस्ति सा आशीर्वती। आशीर्वाचिशब्दोपेता भवति।
'यज्ञं देवेषु यच्छताम्'[c] इत्याशिषोऽस्यामृचि दर्शनात्। किंच सा पूर्वा देवता-
द्वयोपेता च भवति। द्यावापृथिव्योरेतद्देवतात्वात्। 'द्यावापृथिव्ये'[d] इत्यनु-
क्रमण्यां दर्शनात्। तच्च द्विदेवत्यत्वं हविर्धानद्वयस्याभिधेयत्वादभिरूपत्वहेतुः।
अपि च इह हविर्धानप्रवर्तनकर्मणि प्राङ्नीयमानयोर्हविर्धानाख्ययोः शकटयोर्द्वौ
चक्राभिघातजनितौ मार्गौ भवतः। तयोर्मार्गयोरध्वर्युणा होमः कर्तव्यः।

a. TS. 6. 2. 9. 4. b. RV. 2. 41. 19.
c. RV. 2. 41. 20. d. SA. II. 41.

1. T. तयोः for द्वयोः

तथा चाध्वर्युवेदे श्रूयते—'वर्त्मना वा अन्वित्य यज्ञं रक्षांसि जिघांसन्ति। वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति'[a] इति। बौधायनवचनं च—'दक्षिणस्य हविर्धानीयस्य[1] पश्चादक्षमुपसृत्य दक्षिणस्यां वर्त्मन्यां स्पयेनोद्धत्य हिरण्यं निधाय संपरिस्तीर्याभिजुहोति'[b] इत्यादि। तदिदं मार्गद्वये क्रियमाणं होमद्वयं पूर्वया 'द्यावा नः पृथिवी'[c] इत्यनयाभिधत्ते। 'इमं यज्ञं' इत्याहुत्यभिधानावभासात्। या पुनः 'तयोरिद् घृतवत्'[d] इत्युत्तरा ऋगस्ति तयाध्वर्युभिः क्रियमाणं हविर्धानयोः प्राङ्नयनकर्माभिधत्ते। अथैकामृचं विनियुङ्क्ते—

3. १४ **यमे-अनुस्तौति।** अनया 'यमे इव'[e] इत्येतयर्चा होताध्वर्युभिः प्राङ्नीयमाने हविर्धानशकटे अनुगच्छन् स्तौति। अस्या ऋचो द्वितीयं पादं व्याचष्टे—

3. १५,१६ **प्र-हरन्ति।** एने हविर्धानशकटे।

3. १७ अथ द्वे दर्शयति—**अधि-इति।** अनयोः पृथग्विनियोगं दर्शयति—

3. १८-२० **यत्-उत्तरया।** स्थापितस्य छदिर्द्वयस्योपरि तृतीयं यच्छदिरध्वर्यवः स्थापयन्ति, तद् 'अधि द्वयोः'[f] इति पूर्वयर्चा स्तौति। 'द्वयोरध्यदधा' इत्यभिधानात्। या 'विश्वा रूपाणि'[g] इत्युत्तरा ऋगस्ति तया हविर्धानद्वयाच्छादनकर्माभिधीयते। किंच तयोरुत्तरया 'विश्वा रूपाणि'[g] इत्यृचाध्वर्युणा बध्यमानां रराटीमेवाभिधत्ते। रराट्या लक्षणमाचक्षते हिरण्यकेशिनः—'रराटी तेजन्यैषीकी प्राच्यणूकाण्डा मध्ये विष्यूता तां वंशे बध्नाति'[h] इति। अस्यार्थः—रराटी नाम काचित्तेजनी यष्टिः संपाद्या। कीदृशी सेति चेद् ऐषीकी इषीकाः काशास्तद्विकारभूता। प्राची प्राक्प्रत्यग् वितता न तु दक्षिणोदग्वितताना। अणूकाण्डा दीर्घत्वणत्वे छान्दसे। अनुकाण्डा। काण्डं पर्व। 'काण्डात् काण्डात् प्ररोहन्ती'[i] इति चाम्नानात्। अनुलोमैः पर्वभिर्युक्ता। मध्ये सुषिरं कृत्वा सूत्रेण प्रोता। तामेतां रराटीं तेजनीं हविर्धानमण्टप-

a. TS. 6. 2. 9. 2.
b. BŚ. 6. 24. 26.
c. RV. 2. 41. 20.
d. RV. 1. 22. 14.
e. RV. 10. 13. 2.
f. RV. 1. 83. 3.
g. RV. 5. 81. 2.
h. HKŚ. 7. 5. 25 ( varies from the reading here ).
i. TS. 4. 2. 9. 2.

1. T. हविर्धानस्य

पुरोभागस्थितस्थूणाद्वयालम्बिनि वंशे बध्नीयादिति । बौधायनस्तु—'अध्य-
स्यन्ति पुरस्ताद् रराटीम्'[a] इति । 'विश्वा रूपाणि'[b] इति रराटीगतनाना-
वर्णत्वप्रतिभासादभिरूपा[1] । अथावधिप्रदर्शनपुरःसरमेकामृचं विधत्ते—
**ते-इति** । यदा ते हविर्धानशकटे अत्रास्मिन् प्रदेशे अध्वर्यवो नेङ्गयिष्यन्ति न 3. २१-२३
चालयिष्यन्तीति होता मन्येत । तदेव स्पष्टयति—यदैने । एने हविर्धाने
नभ्यस्थे अध्वर्यवः कुर्वन्ति । तस्मिन् काले 'आ वामुपस्थमद्रुहा'[c] इत्येतामृचं
पठेत् । अस्मिन्नेव समय इयमृगभिरूपेति हेतुप्रदर्शनेनाह—**यदा-उपस्थः** । अत्र 3. २४
हविर्धानसंबन्धिन्युपस्थदेशे देवानामवस्थानमभिधीयते । स चोपस्थस्तदा
संभवति यदा तयोः क्षेमः प्रतिष्ठा भवति । उपस्थदेशस्यावस्थानसमय एव
लोके दर्शनात् । तस्माद्धविर्धानशकटावस्थितावेव 'आ वामुपस्थम्'[c]
इत्यृचः पाठः ॥

इति तृतीयः खण्डः

परिधानीयामृचं विधत्ते—**परि-परिदधाति** । परिवत्या परीतिशब्दवत्या । 4. १
अनेन परिधानयोग्यत्वमुक्तम् । **अभिरूपा-अविस्रंसाय** । अभिरूपा अन्वाहेत्याद्य- 4. २-११
विस्रंसायेत्यन्तं गतम् । इत्थमष्टौ हविर्धानप्रवर्तनकर्मणि पठनीया ऋचो
विहिताः । इदानीं संप्रैषादनन्तरं 'प्रेतां यज्ञस्य'[d] इत्यृचः पठनात् पूर्वं कर्तव्यं
किंचित् कर्म विवित्सुराह—**तदु-इति** । तत् तत्र हविर्धानप्रवर्तनकर्मणि 4. १२
प्रस्तुते सति सदसि स्थिता अभियुक्ता होतारमभिलक्ष्य ब्रूयुः—हे होतः यथा
येन प्रकारेणाभयं यज्ञविघातकरक्षआदिजनितस्य भयस्य परिहारो भवति,
तेन प्रकारेण कर्म कुरु इति । एवमुक्तो होता किं कुर्यादित्यपेक्षायामाह—
**संप्रेषितः-भवति** । अध्वर्युणा हविर्धानप्रवर्तनाय संप्रेषितः सन् होता 'प्रेतां 4. १३-१७
यज्ञस्य'[d] इत्येतस्या ऋचः प्रारम्भात् प्राक् 'अपेतोजन्यम्'[e] इति शाखान्तरीय-

a. BŚ 6. 25. 18. b. RV. 5.81. 2.
c. RV. 2. 41. 21. d. RV. 2. 41. 19.
e. ŚŚ. 5. 13. 3.

1. T. V. omit अभिरूपा

मन्त्रेण एकं लोष्टं दक्षिणपादाग्रभागेन प्रत्यञ्चं क्षिपेत्। हविर्धानानुगमने
4. १८ कंचिन्नियमं विधत्ते—**स–उपनिश्रयीत**। प्राङ्नीयमानयोर्हविर्धानयोः होता
प्राङ्मुखो गच्छन् दक्षिणहविर्धानसंबन्धिनोर्मार्गयोर्मध्ये उत्तरो यो मार्गोऽस्ति
तमुपनिश्रयीत आश्रयेत्। तमाश्रित्यानुगच्छेदित्यर्थः। सूत्र्यते हि—'दक्षिण-
4. १९-२१ स्योत्तरं वर्त्मोपनिश्रितोऽनुसंयन्'[a] इति। स्तौति—**अयं–इति**। द्वयोर्ह-
विर्धानयोर्मध्ये दक्षिणभागस्थितं यद्धविर्धानमस्ति तदयं पृथिवीलोको भवति।
उत्तरं हविर्धानं तु द्युलोकः। हविर्धानयोर्द्यावापृथिवीरूपत्वात्। तथा च
ब्राह्मणान्तरम्—'द्यावापृथिवी वै देवानां हविर्धाने आस्ताम्। ते उ एवाद्यापि
हविर्धाने'[b] इति। पृथिवीलोकश्च प्रतिष्ठारूप इति सिद्धम्। तस्माद्धेतोः
पृथिवीरूपायाः प्रतिष्ठायाः सकाशादनुच्छिन्न उच्छेदरहितोऽहं भवानीति।
यदि दक्षिणहविर्धानमार्गाश्रयणं न कुर्यामिति परिभयेन दक्षिणहविर्धानमार्गं न
परित्यजेत्। परित्यागे तु पृथिवीलोकेऽवस्थितिर्होतुर्न स्यात्। परिधानीयाभि-
4. २२-२४ धानानन्तरमपि कंचिन्नियमं विधत्ते—**यत्र–इयात्**। यस्मिन् देशे तिष्ठन् होता
परिधानीयां पठति तस्मात् प्रदेशात् परिधानानन्तरं नियमं विना स्वेच्छानु-
सारेण यां कांचिद्दिशमभिलक्ष्य न गच्छेत्। इति वा इति वेत्यनियतदेशविषयः
4. २५,२६ साभिनयो निर्देशः। तथा सति को दोष इति चेत्—**यः–स्यात्**। यः परिधा-
नीयास्थानाद्यथेच्छं गच्छति तमधिकृत्य यः कश्चित् सदसि स्थितोऽभियुक्त
एतद्दोषज्ञः 'अयं होता नियमलङ्घनापराधेन च्युतिं भ्रंशं प्राप्नुयाद्' इति वक्ति
तस्य तद् वचनं यथार्थमेव भविष्यति। असंशयं च्युतिमेव प्राप्नोति। कस्तर्हि
4. २७-३० नियमः? यदनङ्गीकरणे सति कथितदोषापत्तिरित्यत्राह—**तस्मात्–अभ्यु-
पेयात्**। यस्मान्नियमातिलङ्घने कथितदोषलङ्घनमशक्यं तस्माद्धेतोरयं नियमोऽ
ङ्गीकार्यः। स क इति तदुच्यते। परिधानीयापठनादनन्तरं नियतवाग् भूत्वा
प्रदक्षिणमावर्तनं कृत्वा यथागतं पुनरप्यागत्य प्रथमां 'प्रेतां यज्ञस्य'[c] इत्येतामृचं
यत्र प्रदेशविशेषे स्थित्वा पूर्वं स्वयं पठितवान् तत्रावस्थितिं कुर्यात्। अवस्थाय
चानन्तरं यथेच्छं स्ववासस्थानं प्रतिगच्छेत्। एवमत्र कश्चिन्नियमोऽस्ति। न

a. ŚŚ. 5. 13. 5. b. AB. 1. 29. 4.
c. RV. 2. 41. 19.

केवलमत्रैव । अग्निप्रणयनकर्मणि चायं नियमः समान एव । तथा च सूत्रम्–'यत्र तिष्ठन् प्रथमामन्वाह तत् स्थित्वोत्सृज्यते'[a] इति ॥

इति चतुर्थः खण्डः

खण्डद्वय्यां प्रकल्पितं हविर्धानप्रवर्तनम् ।
अग्नीषोमप्रणयनं क्रमायातमथोच्यते ॥

प्रथममग्नीषोमप्रणयनकर्म स्तौति—**ब्रह्म–अपघ्नन्ति** । ब्राह्मणजात्य- 5. १-३
भिमानिदेवतात्वादग्नेर्ब्रह्मरूपत्वम् । एवं सोमस्य क्षत्रजात्यभिमानित्वात् क्षत्रत्वम् । वाजसनेयके देवेषु चातुर्जात्यविभागप्रतिपादकप्रकरणे[b] तयोर्ब्रह्मक्षत्ररूपत्वश्रवणात् । अग्नीषोमयोः प्रणयनं नाम यदस्ति तेन ब्रह्मक्षत्रदेवताभ्याम् अग्नीषोमाभ्यां यजमानस्य पापापघात एव संपाद्यते । अथ 'अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहि'[c] इति संप्रैषानन्तरं पठनीया विंशतिसंख्याका ऋचो विधित्सुस्तासां प्रथमाया ऋच आसीनेन पठनीयतां विधत्ते—
**तदु–इति** । तत् तत्राग्नीषोमप्रणयनीयानामृचामनुवचने । निपातद्वयं विशे- 5. ४-७
षार्थम् । आहुरभिज्ञाः । किमित्यत्राह—आसीन उपविष्ट एव होतानुवचनं कुर्यात् । किं सर्वा अप्यृच उपविष्टेन वक्तव्या इति ? नेत्याह । एतां प्रथमामिति । 'सावीर्हि देव'[d] इत्येषा प्रथमा । तामेव नान्याः । अन्यास्तु तिष्ठतैव वाच्याः । प्रथमा तूपविष्टेन पठितव्या । कुत इत्यत्राह—यथा लोके राज्ञि क्वापि गच्छति सति तदुपजीविनः सर्वेऽपि जनास्तमनुगच्छन्ति, एवं सोमस्यापि राजत्वात् तमासन्दीस्थानाद्धविर्धानदेशं नीयमानमनुलक्ष्य सर्वाणि स्थावराणि जङ्गमान्यपि प्राणिजातानि तेन सह गच्छन्त्येव । सोमस्य सर्वराजत्वात् । न खलु राज्ञि गच्छति तदुपजीविनां जनानामवस्थितिरुपपद्यते । एवं सत्येतामाद्यामृचमुपविष्टः सन् होता पठतीति यदस्ति तेन सर्वाणि गमनं कुर्वाणानि भूतानि गमनान्निवर्त्य स्वे स्वे स्थाने नियतानि निविष्टानि करोति । इतिशब्द आहुरित्यनेनान्वेति । तस्मादाद्यामृचमुपविष्टः पठेत् ।

a. ŚŚ. 5. 13. 11.
b. ŚB. 14. 4. 2. 24.
c. AB. 1. 30. 1.
d. AV. 7. 14. 3.

उत्तरास्तु तिष्ठन् । अथ प्रथमपठनीयां शाखान्तरीयामृचं दर्शयति—
5. ८-१० **सावीर्हि-अरिष्ट्यै**। गतमेतत् ।

5. ११-१३ **उत्तिष्ठ-समर्धयति**। अथाग्नीषोमोत्थानकाले पठितुमेकां विधत्ते—उत्तिष्ठेति ।
प्रणयनकाले पठनीयतयैकां विधत्ते—प्रैतु इति । स्तौति—ब्राह्मणस्पते ।
एते द्वे ऋचौ ब्रह्मणस्पतिदेवताके । उत्थानप्रणयनकर्माभिद्योतकत्वा-
च्चाभिरूप्यम् । ब्राह्मणस्पत्यत्वं चैतयोर्ऋचोः प्रशस्तम् । यस्माद् ब्रह्मणो
ब्राह्मणजातेः पालको ब्रह्म वेद एव । तस्मादनयोर्ब्रह्मणस्पतिदेवताकत्वाद्
5. १४,१५ ब्रह्मणा वेदेन ब्रह्म वेदं समृद्धं करोति । तृचद्वयं विधत्ते—**होता-हरन्ति** । एतौ
तृचौ केवलाग्नेयौ भवतः । केवलमग्निर्देवता ययोस्तौ तथोक्तौ । कथं पुन-
रग्नीषोमप्रणयनकर्मणि केवलाग्नेयस्य तृचद्वयस्य पाठः संगच्छत इत्य-
त्राह—अग्निमिति । अत्र प्रथममग्नेः प्रणयनं क्रियते । पश्चात् सोमस्य । तत्र
यदग्निप्रणयनकर्मास्ति तद्विषये[1] केवलाग्नेयतृचद्वयपाठो घटते । इह च
सोमप्रणयनमेव प्रधानम् । तदङ्गभूतं त्वग्निप्रणयनम् । तच्चैतदैतरेये
स्पष्टम्—'सोमं वै राजानं प्रणीयमानमन्तरेणैव सदोहविर्धानान्यसुरा
रक्षांस्यजिघांसन् । तमग्निर्माययात्यनयत् । पुरस्तादेति माययेति । मायया
हि स तमत्यनयत् । तस्माद्धस्याग्निं पुरस्ताद्धरन्ति'[a] इति । यथा[2] लोके
राजपुरोगामिजनविषया स्तुतिः फलतोऽङ्गीभूतराजस्तुतिरेव, एवमत्राग्नि-
स्तुतौ सोमस्यापि स्तुतिरर्थात् कृता भवति । अनयोस्तृचयोराभिरूप्यं
5. १६,१७ दर्शयति—**तौ-स्तौति** । तौ केवलाग्नेयौ तृचौ इतवन्तौ इण् गताविति
गत्यर्थधातुयुक्तौ भवतः । 'पुरस्तादेति मायया'[b] 'नमो भरन्त एमसि'[c] इति
तयोरिण्धातुश्रवणात् । तच्चैतद्गत्यर्थशब्दवत्त्वं युक्तम् । यस्मादत्र ह्रियमा-
णमध्वर्युणा नीयमानमग्निं स्तौति । तस्मादग्नेर्गमनक्रियाशालित्वाद्द्योतकत्वाद्
अस्त्यनयोराभिरूप्यम् । आद्यतृचस्यान्त्यायामृचि द्वितीयः पादो 'भूतानां गर्भमा

a. AB. 1. 30. 8-9. b. RV. 3. 27. 7.
c. RV. 1. 1. 7.

1. T. तद्विषयो 2. T. adds च

दधे'[a] इति। तस्य पठने कामनाविशेषालम्बने किञ्चिद् ध्यानं विधत्ते **स—गर्भम्** । गतमेतत् । अथान्यामृचं विनियोक्तुमवधिं दर्शयति— 5. १८-२०
**अथ—अभिरूपा** । शालामुखीयाग्नेः प्रणीतमग्निम् आग्नीध्रियशालास्थितेऽग्नौ 5. २१-२४
निक्षिप्य तस्मिन् 'अग्ने नय'[b] इत्यनयर्चा होमोऽध्वर्युणा कर्तव्यः । तथा च कल्पः—'उत्तरेण सदः परीत्याग्नीध्रागारेऽग्निं निधाय नयवत्यर्चाग्नीध्रे जुहोति'[c] इति । तामाहुतिं सम्यक् प्रतिलक्ष्यैतामृचं 'अग्ने जुषस्व'[d] इति पठेत् । तस्या अध्वर्युणा क्रियमाणाया आहुतेर्याज्यारूपैवैषा भवति । याज्यात्वे सत्याभिरूप्यं वक्तव्यम् । तत् किमस्तीति चेत्, अस्तीत्याह—जुषस्वेति । जुषस्व प्रतिहर्येति पदद्वययोगादियमृगभिरूपा । हे अग्ने त्वमेतामाहुतिं जुषस्व सेवस्व । किं च प्रेप्सावांश्च भवेत्यर्थावभासनात् ॥

इति पञ्चमः खण्डः

अथ विधास्यमानानां 'सोमो जिगाति गातुविद्'[e] इत्याद्यानामृचां केवलं सोमदेवत्यत्वे हेतुं दर्शयति—**अथ-अन्वाह** । अग्नेराग्नीध्रियाग्नौ निहित- 6. १-२
त्वाद् अध्वर्युभिः पुनः केवल एव सोमः प्राङ्नीयते । तथा च बौधायनः—'उपातियन्ति राजा चान्यैश्च'[f] इति । तस्माद्धेतोस्तदानीं सोमस्यैव स्तोतव्यत्वात् । **सोमो-अनुसमेति** । गमनावद्योतक इत्याभिरूप्ययुक्तः । ऋगन्तरं 6. ३
विधित्सुरवधिं दर्शयति—**अथ-अभिरूपा** । पुनःशब्दः आग्नीध्रीयाहुत्य- 6. ४-६
पेक्षः । तथा च कल्पः—'अथाहवनीये स्रुवाहुतिं जुहोति'[g] इति । तामित्यादि गतम् । आहुत्या वर्धत इत्याहुतीवृत् तमाहुतीवृधम् । अग्निमगन्म प्राप्तवन्तो वयमित्यर्थप्रत्यायकत्वेनाभिरूप्यम् । अन्यामृचं विधातुमवधिं दर्शयति—
**अथ-अन्वाह** । होमादनन्तरमध्वर्यवो हविर्धानाख्यमण्डपस्य या पुरोभाग- 6. ७-६
वर्तिनी द्वारस्ति तया द्वारा सोमं हविर्धानमण्डपं प्रापयन्ति । तस्मिन् सोमे

a. RV. 3. 27. 9.
b. RV. 1. 189. 1.
c. BŚ. 6. 30. 20.
d. RV. 3. 28. 1.
e. RV. 3. 62. 13.
f. BŚ. 6. 30. 22.
g. BŚ. 6. 30. 23.

हविर्धानं प्रपाद्यमाने सति तं प्रपाद्यमानं सोममभिधातुं 'तमस्य राजा'[a] इत्यृचं पठेत्। कीदृशीम् ? 'व्रजं च विष्णुः'[a] इति चतुर्थपादेनाभिरूप्ययुक्ताम् । विष्णुरित्यनेन सोमस्य हविर्धानमण्डपप्रवेशप्रतिभासात् । प्रवेशक्रियान्वयोपाधिजनितो हि सोमे विष्णुशब्द इत्युक्तं 'तद्यदेवेदं क्रीतो विशतीव'[b] इत्यत्र । अतो विष्णुशब्देन सोमस्य प्रविष्टत्वाभिधानात् क्रियमाणकर्मद्योतिकेयमृक् संपन्ना ।

6. १० अथावधिप्रदर्शनपुरःसरमेकामृचं विधत्ते—**अन्तश्च-प्रपन्नाय** । हविर्धानं प्रपादितं सोमं स्तोतुम् 'अन्तश्च प्रागाः'[c] इत्यृचं पठेत्। सा च प्रपन्नवती प्रागा इति प्रपन्नत्वाभिधायकशब्दवती । अथावधिप्रदर्शनेन तिस्र ऋचो विधत्ते—

6. ११ **श्येनो-अनुस्तौति** । दक्षिणमार्गस्थे शकटे सन्नं स्थितं सोममेताभिस्तिसृभिः ऋग्भिरभिष्टौति । ताश्च सन्नताभिधायकशब्दवत्त्वादभिरूपाः । 'आसदं देव एषति'[d] इति प्रथमा सन्नवती । 'सीद सादनम्'[e] इति द्वितीया । 'आसीदद्

6. १२ विश्वा भुवनानि'[f] इति तृतीया । परिधानीयां दर्शयति—**एवा-परिदधाति** । 'स नः शर्म त्रिवरूथम्'[g] इत्युत्तरार्धं आशीरुपलम्भादियमाशीर्वती । आशीश्चा-

6. १३,१४ वसाने योग्या । **अभिरूपा-समृद्ध्यै** । गतम् । अथैतासामृचां संख्यां स्तौति—

6. १५-१६ **ता-समर्धयति** । ताः 'सावीर्हि देव'[h] इत्याद्या ऋचो विंशतिसंख्या अनुब्रूयात् । ताश्च विराजं छन्दोऽभिसंपन्ना भवन्ति । 'दशाक्षरा विराड्'[i] इति हि प्रसिद्धम्। विंशतिसंख्या च दशकद्वयसंघातसमवायिनी । अतो विंशतिसंख्याभिः ऋग्भिर्द्वे विराजौ निष्पद्येते । किंच न केवलमभिधायिकानामृचामेव विराडभिसंपत्तिः अभिधेयस्य सोमस्यापीत्याह—सोमो वैराजः । 'दश त्वा एते सोमांशवः'[j] इति वक्ष्यमाणक्रमेण सोमस्य दशविधत्वाद् वैराजत्वमभिधाय अन्नसहितस्य सोमस्य वैराजत्वमतिप्रशस्तमित्याह—अन्नं विराट् । विराजोऽन्नरूपत्वं प्रसिद्धं तत्र तत्र । सोमस्य चान्नेषु प्रधानत्वात् सोम एवान्नम् । 'एतद् वै परममन्नाद्यं यत् सोमः'[k] इति वक्ष्यमाणत्वात् । तस्मादन्नरूपविराडात्मत्वमन्नरूपस्य सोमस्य

a. RV. 1. 156. 4.
b. KB. VIII. 2. २२.
c. RV. 8. 48. 2.
d. RV. 9. 71. 6.
e. RV. 2. 23. 1.
f. RV. 8. 42. 1.
g. RV. 8. 42. 2.
h. AV. 7. 14. 3.
i. AB. 6. 20. 20.
j. KB. XIII. 4. १.
k. KB. XIII. 6. १५.

यदस्ति तेनान्नेनान्नाद्यं समृद्धं करोति। यथा लोके मधुररसप्रधानं पयआदि वस्तु सजातीयेन मधुररसप्रधानेनैव सितादिना संपृच्यमानं सदतिशयालुमाधुर्यशालि भवति, तद्वदन्नेनान्नाद्यसमृद्धिर्युज्यते। आद्यन्तयोस्त्रिरावृत्तिविधिमभिप्रेत्य
तत्सहितां संख्यां प्रशंसति—**त्रिः-आप्त्यै**। गतम्। 6. २०-२२

सोमस्य हविर्धानप्रपादनेऽध्वर्यूणां पक्षभेदोऽस्ति। केचित् पूर्वया द्वारा प्रपादयन्ति। केचिदपरयेति। तत्रापरया द्वारा प्रपादनपक्षे होतुः कर्मविशेषं दर्शयिष्यन् पूर्वोक्तस्य होतृविधेः पूर्वया द्वारा प्रपादनपक्षविषयत्वमाह—
**एवं-प्रपादयेयुः**। यद्यध्वर्यवः पूर्वया द्वारा सोमं हविर्धानं प्रपादयेयुः तर्हीत्थमेव 6. २३
होतुः कर्म। पक्षान्तरे पुनः कर्मविशेषोऽस्तीत्याह—**यद्यु-अनुसमियात्**। येन 6. २४,२५
पथाध्वर्युः सोमं प्रपादयति तेन पथा सोमं होतानुगच्छेत्। कुतो वा सोमानुगते-
रावश्यकत्वमित्यत्र हेतुमाह—**आत्मा-इति**। यज्ञस्य शरीरस्य होतात्मा 6. २६-२८
जीवस्थानीयो भवति। सोमस्तु प्राणस्थानीयः। तथा च सति सोमाननुगमने सोमरूपादात्मरूपं होतारं मामपगमय्यान्यत्र स्थापयानीति परिभयेनाननुगमनं न कुर्यात्। किंतु आत्मप्राणयोः संबन्धसिद्ध्यर्थं सोममनुगच्छेत्। अन्यथा यथा लोके आत्मनः प्राणविश्लेषे सति शरीरावस्थानासंभवे शरीरं काष्ठलोष्टसमं झटिति निपतेत्, तथा यज्ञोऽपि निरात्मकः सन् न फलाय कल्पेत। अथ
परिधानीयास्थानमुपदिशति—**उत्तरतो-परिदधाति**। 'एवा वन्दस्व'[a] इत्येषैव 6. २९
परिधानीया। तत्पाठस्तु सोमस्योत्तरभागे दक्षिणाभिमुख्येन तिष्ठता होत्रा
कर्तव्यः। तत् स्तौति—**यशो-धत्ते**। यशोहेतुत्वात् सोमस्य यशस्त्वम्। 6. ३०,३१
आयुर्हेतुत्वाद् 'आयुर्घृतम्'[b] इति यथा व्यपदिश्यते, तद्वद्धेतुहेतुमतोरभेदोपचारात् सोमो यश इति व्यपदेशः। तथा च 'सर्वे नन्दन्ति यशसागतेन'[c] इति मन्त्रे यशःशब्देनैव सोमस्याभिधानं दृश्यते। अत्र यशोहेतुत्वेनैव यशःशब्दाभिधेयतेति तद्व्याख्यानरूपे ब्राह्मणान्तरे प्रदर्शितम्। 'यशो वै **सोमो** राजा सर्वो ह वा एतेन क्रीयमाणेन नन्दति। यश्च यज्ञे लप्स्यमानो भवति यश्च न'[d] इति। यशोहेतुत्वं च सोमस्यान्नाद्यत्वात्। अन्नवन्तं हि लोके जनः प्रशंसति। तथा

a. RV. 8. 42. 2.
b. TS. 2. 3. 2. 2.
c. RV. 10. 71. 10.
d. AB. 1. 13. 8.

चाम्नायते—'तस्माद् यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति'[a] इति । ततः किमित्यत्राह—अमुतः सोमादर्वाग् यद् यशोऽस्ति तत् सर्वं तत्र परिधानकर्मणि आत्मन्नात्मनि धत्ते स्थापयति । प्रधानस्य सोमरूपस्य यशसः परिग्रहादितरेषां च तत्रान्तर्भावात् । आत्मनीत्यत्र छान्दसात् ङिलोपादात्मन्निति रूपसिद्धिः । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

इति षष्ठः खण्डः

आम्नायार्थविमर्शेन पुण्यं यत् समपीपदम् ।
पर्याप्तास्तु सपर्या सा हरिपादसरोजयोः ॥
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
आपश्चौपवसथ्यकर्म कथयन् कौषीतिकिब्राह्मण-
व्याख्याने नवमोक्ति···नवमोऽध्यायः समाप्तिं गतः ॥

## इति कौषीतकिब्राह्मणव्याख्याने
## प्रथमदशके नवमोऽध्यायः

a. AB. 1. 5. 24.

अथ

## दशमोऽध्यायः

वटभूरुहभूषणस्य पुंसः परमस्य प्रणतार्तिभञ्जनस्य ।
विलसन्तु मयि प्रकामनम्रे करुणाकञ्चुकिताः कटाक्षपाताः ॥
यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
अतीतेऽध्यायेऽग्निप्रणयनहविर्धानशकट-
प्रवृत्त्यग्नीषोमप्रणयविधयः स्पष्टमुदिताः ।
विधातव्यः संप्रत्यखिलपशुकर्मप्रकृतितां
गतोऽग्नीषोमीयः पशुरवसराढौकित इह ॥
पशुरग्नीषोमीयः सांनाय्यविकारभूतोऽसौ ।
सवनीयादीनां च प्रकृतिरिति न्यायचक्षुषः प्राहुः ॥
पूर्वमत एव हेतोः क्रमागतोऽनुक्त एव पशुबन्धः ।
अस्मिन्नवश्यवाच्ये कथिते सत्येव तत्सिद्धेः ॥
तत्र प्रथमतस्तावत् पश्वर्थे यूपवस्तुनि ।
विधानं विविधं वक्तुकामो यूपं प्रशंसति ॥

**वज्रो-अपघ्नन्ति ।** 1. १-३

यथा सिंहो वटुरिति शौर्यादिगुणयोगतः ।
असिंहोऽपि वटुः सिंहशब्देन व्यपदिश्यते ।
यूपस्तद्वदवज्रोऽपि सन् **वज्रगुण**योगतः ।
शत्रुहिंसनहेतुत्वाद् वज्र इत्यत्र भण्यते ।
अथवा मुख्यमेवास्तु वज्रत्वं नौपचारिकम् ।
आख्यायिकात्मकेऽन्यत्र ब्राह्मणे दर्शनात्तथा ॥

इन्द्रेण वृत्रस्य निबर्हणाय वज्रो विमुक्तस्त्रिविधो बभूव।
रथस्फ्ययूपात्मतयेति काचिदाख्यायिकान्यत्र समीक्ष्यते हि[a] ॥
अस्तु यूपस्य वज्रत्वं ततः किं भवतीति चेत्।
उच्यते वज्ररूपं तं यूपं शत्रुनिषूदनम्।
अध्वर्यवः सोमयागदिनात् पूर्वेद्युरुच्छ्रितम्।
कुर्वन्तीति यदेतेन कर्मणा यजमानगम्।
विनाशयन्ति पाप्मानं वज्रेणामोघवृत्तिना।
स नापनत इत्यादि यूपसंस्थानवर्णनम् ॥

1. ४-६ **स—कुरुते।**

स यूपोऽपनतो प्रह्वीभूतो नैव भवेदधः।
ऋजुसंस्थान एव स्यात् कुत इत्यत उच्यते।
अशनेच्छाभिभूतस्य क्षुधा श्रान्तस्य देहिनः।
संस्थानमेतद्यदिदम् उदरेणावनम्रता।
स खलु क्षुत्परिक्षीण ऋजूकृत्य निजां तनुम्।
अवस्थातुमशक्तः सन् प्रह्वीभूतोदरो भवेत्।
यूपस्य मध्यतस्तस्मान्न भवेदवनम्रता।
यजमानस्याशनायासमाक्रान्तिप्रसक्तितः।
अग्रभागेन नम्रत्वं प्रब्रवीति प्ररोचयन्।
अग्निमाहवनीयं प्रत्याभिमुख्येन नम्रता।
यूपाग्रस्याभ्युपेता स्यात् कस्मादिति तदुच्यते।
यथेष्टान्नोपयोगेन संतृप्तस्य शरीरिणः।
इत्थं भवेदवस्थानं लोके तदनुभूतितः।
यूपं यथोक्तसंस्थानं यः करोति महामतिः।
तस्य भार्या बह्वशनशीला नैव भवन्ति हि।
यथोक्तवैपरीत्येन यूपसंस्थानकल्पने।
अतिभोजनशीलाः स्युर्भार्या यष्टुर्न संशयः।
ब्रह्मवर्चसकामादीनवलम्ब्याधिकारिणः।

a. cf. TS. 5. 2. 6. 1–2,

यूपप्रकृतिभूतानि द्रव्याण्युपदिशत्यथ ॥

**पालाशं—स्वर्गकामः ।** 1. १०–१२

पलाशद्रव्यकं यूपं कुर्वीत ब्रह्मवर्चसम्
यः कामयेत योऽन्नाद्यं स कुर्याद् बिल्वशाखिना
स्वर्गं कामयते यस्तु खादिरं स प्रकल्पयेत् ।

**त्र्यरत्निः—रूपेण ।** 1. १३–२२

त्र्यरत्निरित्यथास्यैव परिमाणोपवर्णनम्
लोकाः पृथिव्यन्तरिक्षस्वर्गसंज्ञास्त्रयो मताः
तेषां त्रिसंख्यान्वयित्वं यद्रूपं तेन संयुतः
असौ यूपस्त्र्यरत्निः स्यान्मितस्त्रिभिररत्निभिः
प्रादेशद्वयसंपाद्यमरत्निं वैदिका विदुः
एतदेकं मतं प्रोक्तं प्रदर्श्यन्तेऽपराण्यपि
चतुष्पादा हि पशवः प्रसिद्धा लोकवेदयोः
चतुःसंख्यान्वयस्तेषां रूपं तेन समन्वितः
अरत्निभिश्चतुःसंख्यैः परिमाय प्रकल्पितः
यूपो भवेदिति मतमेकमन्यत्तु कथ्यते
पञ्चारत्निर्भवेद्यूपः पङ्क्तिरूपसमन्वितः
पञ्चाक्षरा पङ्क्तिरिति पञ्चसंख्यान्वया यतः
प्रसिद्धः सर्ववेदेषु छन्दसः पङ्क्तिनामनः ।
अपरं तु मतं षड्भिः परिच्छिन्नस्त्वरत्निभिः ।
यूपः स्यादृतुरूपेण संपन्नोऽसौ भवेदिति ।
'ऋतवः षड्'[a] इति ह्येषां षट्संख्यत्वमधीमहे ।
जगत्यन्तानि सप्ताहुश्छन्दांस्याम्नायवादिनः ।
अतस्तद्रूपसंपन्नः सप्तारत्निभिरुन्मितः ।
यूपो भवेदिति प्रोक्तः कश्चित् पक्षोऽन्य उच्यते ।
'अष्टाक्षरा हि गायत्री'[b] प्रसिद्धाम्नायभूमिषु ।

a. KB. I. 4. ६.

b. TS. 2. 2. 9. 5.

तस्मात्तद्रूपसंपन्नो यूपोऽष्टारत्निरिष्यताम् ।
नवारत्नेस्तु यूपस्य बृहतीरूपसंगतिः ।
नवाक्षरा बृहतीति नवसंख्यान्वयश्रुतेः ।
द्वादशारत्नितान्तानां सर्वेषामेवमेव हि ।
तत्तद्रूपाभिसंपत्तिरवसेया मनीषिभिः ॥

इति प्रथमः खण्डः

कथितेष्वेषु कल्पेषु यूपमानावलम्बिषु ।
इच्छयाऽन्यतरस्योपादेयतां दर्शयत्यथ ॥

2. १,२ **एता—कुर्वीत ।**

या एता द्वादशारत्निपर्यन्ताः कथिताः क्रमात् ।
मात्रा मानानि ताः सर्वा विज्ञेया यूपसंपदः ।
आसामन्यतमायोगेऽप्येति यूपः समृद्धताम् ।
यत एवमतस्तासां या काचित् परिगृह्यताम् ।
तत्र त्र्यरत्नितापक्षे लोकप्राप्तिः फलं भवेत् ।
फलं चतुररत्नित्वे पशूनामवरोधनम् ।
इत्यादिः स्वयमेवोह्यो गुणात् फलभिदोदयः ।
यूपमानविशेषाणां फलभेदसहत्वतः ।
शाखान्तरेषु श्रवणादिहोक्ता फलसंहृतिः ।
अथास्य यूपमेयत्वपक्षस्योपेक्ष्यतां वदन् ।
तदु वा आहुरित्यादि पक्षान्तरमुपाक्षिपत् ॥

2. ३-७ **तदु—अवरुद्ध्यै ।**

तत्तत्र यूपमेयत्वविषये ब्रह्मवादिनः ।
केचिदाख्यातवन्त स्म यूपं न मिनुयात् सुधीः ।
तक्षा यथा वृक्षखण्डं मानदण्डेन केनचित् ।
प्रमाय खण्डयेदेष विधिर्यूपे न संमतः ।
यूपस्त्वपरिमायैव संपाद्यः सर्ववैदिकैः ।

मितं ह वै मितेनेति हेतुः कथितवस्तुनि ।
यस्मान्मितेन यूपेन परिच्छिन्नं फलं भवेत् ।
अमितेन त्वपर्यन्तमवाप्नोति समीहितम् ।
मिताच्चामित एष्टव्यः पुरुषार्थः परीक्षकैः ।
तस्माद्यूपो न मातव्य इत्येतत् सुप्रतिष्ठितम् ।
ननु मानं विना यूपसंपादनमसंभवि ।
कथं माननिषेधोऽयमित्याशङ्क्येदमुच्यते ।।

**यत्रैव—स्माह ।** 2. ८,९

यत्रैव मनसा वेलामवधिं मन्यते स्वयम् ।
यजमानस्तदेवास्तु मानं यूपस्य नेतरत् ।
यूपस्यैव परं नैतन्मानं वेदेरपीष्यताम् ।
न त्वरत्न्यादिना मानं यूपवेद्योः सहामहे ।
मानसं तु तयोर्मानमनुजानीमहे वयम् ।
इति कौषीतकिः प्राह महात्मा ब्रह्मविन्मुनिः ।।

**प्रजापतिर्—मनसः ।** 2. १०–१३

प्रजापतिर्वा इत्यादि मनोमानप्रशंसनम् ।
प्राजापत्यस्य यागस्य मनःसाध्यत्वहेतुतः ।
प्रजापतिप्रियत्वाद् वा तेन सृष्टत्वतोऽथवा ।
तद्वद् व्याप्तत्वतो वापि तद्वत् सूक्ष्मत्वतोऽथवा[1] ।
प्रजापतित्वं मनसस्तथा चान्यत्र पठ्यते ।
'प्राजापत्यं मन'[a] इति मन्त्रब्राह्मणयोः स्फुटम् ।
स च प्रजापतिर्यज्ञ एव नैष ततोऽधिकः ।
मनःप्रजेशयज्ञानामेकत्वं गम्यतामतः ।
हेमाकारेण तादात्म्यं कुण्डलाङ्गदयोरिव ।
यत एवमतो यज्ञं मनोरूपं प्रजापतिम् ।

a. TS. 1. 6. 10. 6; ŚB. 4. 1. 1. 22.

1. T. V. सृष्टत्वोऽथवा

जुषते सेवते यूपमानद्वारेण यन्मनः ।
तद् यज्ञः स्वयमेव स्वमात्मानं सेवते परम् ।
मनसो मानसंयोगो यूपे यज्ञसमृद्धिकृत् ।
यस्मादुक्तेन मार्गेण तस्मादारत्निकं त्यजेत् ॥

2.१४-१६ **वाजपेययूप—अष्टाश्रि।**

तत् किमारत्निकं मानं यूपे क्वचन नेष्यताम् ।
नेत्याह वाजपेयेति वाजपेयपदोदितः ।
अस्ति कश्चित् सोमयागस्तदङ्गपशुकर्मगः ।
यूपः सप्तदशारत्निरित्येवमवधारितः ।
वाजपेयस्थपश्वङ्गयूप एव तु केवलम् ।
अरत्निभिः प्रमातव्यो नैव यूपास्ततोऽपरे ।
वाजपेयस्य यूपेति षष्ठी संबन्धमात्रगा ।
न वाजपेयशब्दो हि साक्षाद् यूपेन संगतिम् ।
लभते सोमयागत्वात् सोमे यूपो हि नेष्यते ।
अतः स्वपशुसंबन्धसंबन्धेन[1] भवेदिति ।
षष्ठ्या संबन्धसामान्यवादित्वादियमीरणा ।
स्याद् वाजपेययूपेति राज्ञो नेतेति वाक्यवत् ।
अष्टाश्रीकरणं तस्य सोऽष्टाश्रिरिति भण्यते ।
अश्रयः कोटयो यस्य सन्त्यष्टौ स तथोदितः ।
अष्टाश्रिः स भवेद् यूपो निष्ठितः सर्वतः क्रतुम् ।
'यूपमष्टाश्रीकरोती'[a]त्यन्या हि श्रूयते श्रुतिः ।
सर्वेषामपि कामानां प्राप्त्यै साष्टाश्रिता भवेत् ।
अद्भिः प्रक्षालनं तस्य विधत्तेऽथैनमित्यथ[2] ॥

a. Cf. AB. 2. 1. 3.

1. T. स्वपशुसम्बन्धस्वसम्बन्धो
2. A. M. V. अपि for अथ

**अथ—भिषज्यति ।** 2. १७-१६

यूपसंपादनादूर्ध्वं क्षालयेद्यूपमम्बुभिः ।
तद्यदेतत् परशुना तष्टस्तक्षणकर्मताम् ।
गतो यूपस्ततः क्रूरीकृतः शस्त्रप्रहारतः ।
छिन्नमूर्तितया क्षुब्धो वर्तते तस्य शान्तिकृत् ।
एतत् क्षालनकर्म स्यादपां शान्तिकरत्वतः ।
छेदनोत्थव्रणारोपचिकित्सारूपमप्युत ।
'आपः सर्वस्य भैषज्यम्'[a] इत्येवं श्रूयते यतः ।
अथाज्येनाञ्जनं तस्य विधत्ते संप्ररोचयन् ॥

**अथ—भवति ।** 2. २०-२४

या एता आप एतस्मिन् पुंसो देहे व्यवस्थिताः ।
लोहितादिप्रकारेण ता आपो यूपवस्तुनि ।
दधातीति धिया यूपमञ्ज्यादाज्येन भूयसा ।
प्रसङ्गाद् यजमानेन कर्तव्यं विदधात्यथ ।
अभ्यञ्जनं खल्वध्वर्युयजमानावुभौ सह ।
व्यदधातां पुनर्यष्टा स्वग्रमेव यथा भवेत् ।
सुष्ठु यूपं तथाभ्यज्यादित्थं स्वभ्यञ्जने सति ।
अरूक्षः सर्वलोकस्य हृद्यशीलो भवेदयम् ॥

इति द्वितीयः खण्डः

यूपस्वरूपप्रकृतिप्रमाणसंस्थानभेदाः प्रतिपादिताः प्राक् ।
प्रसंगतः संस्कृतिकर्म तस्य प्रक्षालनाभ्यञ्जनरूपमुक्तम् ॥
अभ्यञ्जनाभ्युच्छ्रयणादिकर्मप्रयोज्यहौत्रप्रकटीक्रियायै ।
प्रवर्तमानः प्रथमं प्रपाठचां यूपाञ्जने कांचिदृचं विधत्ते ॥

a. Cf. TA. 1. 26. 5.

3. १–३ **अञ्जन्ति—परिदधाति ।**

'अञ्जन्ति त्वाम्'[a] इति स्पष्टमञ्जनार्थाभिधानतः ।
कर्मण्यञ्जनरूपेऽस्मिन्नभिरूपेयमृग्भवेत् ।
अञ्जनानन्तरं यूपमुच्छ्रयन्ति यजुर्विदः ।
तस्मिन् काले कीर्तयितुं पञ्चर्चो विदधात्यथ ।
आद्ये उच्छ्रितवत्यौ द्वे उच्छ्रयस्वेति दर्शनात् ।
उद्वत्यस्तु परास्तिस्रस्तासूच्छब्दोपलम्भनात् ।
सर्वा अप्यभिरूपाः स्युरुच्छ्रयद्योतकत्वतः ।
'युवा सुवासा'[b] इत्यस्यां परिशब्दसमन्वयात् ।
ऋगेषा परिधानीया भवेदिति वदत्यथ ॥

3. ४–११ **अभिरूपा–आप्त्यै ।** गतम् ।

यूपस्य च पशूनां च बहुत्वे कर्मणः क्रमम् ।
वक्तुं पूर्वोपसंहारद्वारा चोद्यमुपाक्षिपत् ॥

3. १२–२३ **इति—परिवीयमाणाय ।**

यूपपश्वोरेकतायामुक्त एव क्रियाक्रमः ।
यत्रैकादशयूपाः स्युः प्रयोगस्तत्र कीदृशः ।
इत्थं समुत्थिते प्रश्ने समाधिरभिधीयते ।
'अञ्जन्ति त्वे'[a]त्येतदाद्याः सप्तर्चो या इहोदिताः ।
एता आ दशमाद्यूपादनुब्रूयात् क्रमेण तु ।
एकादशो यदा यूपो मीयतेऽध्वर्युणा तदा ।
'अञ्जन्ति त्वेति'[a] सूक्तस्य यत् किंचित् परिशिष्यते ।
'यान् वो नरो देवयन्त'[c] इत्यादि तदिहावपेत् ।
'ऊर्ध्व ऊ षु ण'[d] 'ऊर्ध्वो न'[e] इत्यस्माद् द्वृचतः परम् ।
'युवा सुवासा'[b] इत्यस्मात् पुरस्ताच्चानुवर्तनम् ।

a. RV. 3. 8. 1.
b. RV. 3. 8. 4.
c. RV. 3. 8. 6.
d. RV. 1. 36. 13.
e. RV. 1. 36. 14.

सूक्तशेषस्य यूपानां नानाभावेऽभिरूपताम् ।
वक्तुं श्रृङ्गाणिमन्त्रार्थवर्णना क्रियते स्फुटम् ।
'श्रृङ्गाणी'[a] त्यत्र मन्त्रे हि गम्यते बहुता खलु ।
यूपानां स्पष्टमुर्वीभृच्छृङ्गदृष्टान्तवर्त्मना ।
सूक्तशेषे त्वभिहिते परिधानं यथोदितम् ।
'युवा सुवासा'[b] इत्यादि कुर्यादिति वदत्यथ ।
अनेकपशुके कर्मविशेषं प्रब्रवीत्यथ ।
तत्राध्वर्युः प्रतिपशु प्रेषणं विदधाति हि ।
तदा होता प्रतिपशु परिधानीमृचं पठेत् ॥

इति तृतीयः खण्डः

पशुकर्मण्यवसिते यूपस्तिष्ठेद्यथापुरम् ।
इति वक्तुं पूर्वपक्षमुपक्षिपति संप्रति ॥

**तम्—इति ।** 4. १–५

तं यूपमग्नौ प्रहरेत् प्रक्षिपेदिति केचन ।
वदन्ति हेतुमप्याहुर्योऽयं यूपः स केवलम् ।
यजमानात्मको योऽयमग्निराहवनीयकः ।
स स्वर्गलोकः सत्येवं यूपस्याग्नौ निधानतः ।
स्वर्गं लोकं प्रापयति यजमानमसंशयम् ।
अनुप्रहरणं तस्मात् स्वर्गप्राप्तिनिबन्धनम् ।
इत्येवं केचन प्राज्ञाः प्राहुः श्रेयोभिकाङ्क्षिणः ॥

**तदु—इति ।** 4. ६–८

तदु वा आहुरित्यादि सिद्धान्तमुपचक्रमे ।
पशुतन्त्रे समाप्तेऽसौ यूपस्तिष्ठेन्न संशयः ।
नाग्नावनुप्रहर्तव्यो यथा तदभिधीयते ।
स्वरोर्यूपस्य यत् स्थानं स्थितिर्यत्तत एव हि ।
असुरा राक्षसाश्चैव यज्ञं प्राप्तुं न हीश्वराः ।
यदीत्यसंशये संशयोक्तिर्वाक्यार्थगोचरा ।

a. RV. 3. 8. 10. b. RV. 3. 8. 4.

यूपः प्रक्षिप्यतेऽग्नौ चेद् यज्ञरक्षकहानितः ।
असुरादिर्यज्ञमाशु प्राप्नुयादविचारितम् ।
यत एवमतो हेतोरुच्यतेन्द्रायुधोपमः ।
यूपोऽसौ यज्ञशालायां तिष्ठेदेवासुरादिकम् ।
यज्ञहिंसाकरं निघ्नन् पालयन् यज्ञमापदः ।
यजमानं च शत्रुभ्यः सर्वेभ्यः परिपालयन् ।
नाग्नौ प्रक्षेप्तुमर्होऽसाविति सैद्धान्तिकी स्थितिः ।
उपादेयपरित्याज्याञ्छ्रेष्ठमध्यमनिन्दितान् ।
यूपप्रकृतिवृक्षाणां प्रभेदान् दर्शयत्यथ ॥

4. ९. **अथ—एकः ।**

अर्थान्तराभिधानेऽयमथशब्दः प्रयुज्यते ।
ये पलाशादयो वृक्षा यूपप्रकृतितां गताः ।
ते यूप्यद्रव्यगर्त्यभेदेन त्रिविधा मताः ।
तत्र यूप्य उपादेय उत्तमो द्रव्यसंज्ञितः ।
मध्यमो विपदि ग्राह्यो गर्त्यस्त्याज्योऽधमश्च सः ।
तत्र गर्त्यस्य हेयस्य स्वरूपं प्रब्रवीत्यथ ॥

4. १०,११ **यो—नैयात् ।**

अवाचीना अधोभूतमुखाः शाखा हि यस्य सः ।
गर्त्यो नाम भवेदाशां तस्येच्छामपि नाप्नुयात् ।
इच्छानिषेधतो यूपीकरणप्रतिषेधनम् ।
अत्यन्तहेयतेच्छाया निषेधेन च सूचिता ॥

4. १२,१३. **अथ—कुर्वीत ।**

यस्योर्ध्वगामिनः शाखाः स द्रव्यो मानुषश्च सः ।
न योग्यो वैदिके कर्मण्यसौ गर्त्यसमश्च न ।
यूप्याभावे सति द्रव्यं कुर्वीतापि कदाचन ।
मुख्याभावे प्रतिनिधिग्रहन्यायानुरोधतः ॥

4. १४,१५ **अथ—अभ्रातृव्यः**

अथ यस्येति यूप्यस्य लक्षणं संप्रकीर्त्यते ।

प्रसवीति हि शब्दोऽयं प्रादक्षिण्ये प्रयुज्यते।
आदित्यस्यावृतमिति तदेव स्पष्टमुच्यते।
पृथिवीमयमादित्यः परियाति प्रदक्षिणम्।
आदित्यावर्तनमनु शाखा यस्य प्रदक्षिणम्।
आवृत्ताः सन्ति विद्वद्भिः स यूप्य इति कीर्तितः।
स स्वर्ग्यः स्वर्गलोकस्य प्राप्तिहेतुश्च संमतः।
स्वयोनिरूढ एकस्थः स भ्रातृव्यविनाशकृत्।
तं भ्रातृव्यविनाशेच्छुर्यूपं कुर्यादसंशयम्।
कामनान्तरमुद्दिश्य विशेषान्तरमुच्यते॥

**यो—कुर्वीत।** 4. १६-१८

वाशब्दोऽयं तुशब्दार्थे मूलमारभ्य यो दलैः।
आच्छादितः स्यात् सोऽनग्नसंज्ञः पश्वाप्तिकारणम्।
तस्मात् स पशुकामेन यजमानेन गृह्यताम्॥

इति चतुर्थः खण्डः

इत्थं विधिर्यूपगतो विस्तरेण समीरितः।
कार्यः पशौ शेषभक्ष इति वक्तुमथोद्यमः॥

**अग्नीषोमयोः—प्रतिमया।** 5. १-५

सर्वदेवात्मकावग्नीषोमौ ये पशुदेवते।
तयोरास्यं मुखद्वारं प्राप्नुयादेष दीक्षितः।
स्वादीयानन्नकबलः क्षुधितानन गोचरः।
यथा तथैष भक्षत्वेनाग्नीषोममुखं गतः।
तत्रोपवसथीयेऽह्नि पश्वालम्भनकर्म यत्।
तत्रालब्धः पशुर्यष्टुरात्मनिष्क्रयणो मतः।
आत्मा निष्क्रीयते येन पशुना स तथोदितः।
अग्नीषोमास्यतो मोक्षो यजमानस्य निष्क्रयः।
यथा लोके यत् किमपि कस्मैचिद् द्रव्यमर्पितम्।
प्रदाय तत्समं द्रव्यं तदेव प्रतिगृह्यते।

तथाग्नीषोमभक्षार्थं प्राप्तमात्मानमञ्जसा ।
अग्नीषोमीयपशुना प्रतिमोचयति स्वयम् ।
अत एवानृणो भूत्वा स्वतन्त्रो यष्टुमर्हति ।
अन्यथा हि न यष्टृत्वं घटते पारतन्त्र्यतः ।
यस्मादेवमतस्तस्य भक्ष्यत्वं नोपपद्यते ।
संस्थानपतितत्वेन पुमानेव यतः पशुः ।
पुरुषस्य च भक्ष्यत्वमयुक्तं प्रतिषेधतः ।
अतः पशोः शेषभक्षो न कर्तव्य इति स्थिते ॥

5. ६–९ **तदु—अशितव्यम् ।**

सिद्धान्तस्तदु वा आहुरित्यादिरुपतिष्ठते ।
पुरुषस्थानसंप्राप्तेः पुरुषो यदयं पशुः ।
अतोऽस्य भक्ष्यता नेति यदुक्तं तन्न युज्यते ।
सर्वमेव हविर्यस्मादात्मनिष्क्रयणं स्थितम् ।
न केवलं पशुरयं यथा चोदक मन्यसे ।
यद्यदस्ति हविः सोमचरुप्रभृति कर्मसु ।
तस्य सर्वस्य वीप्सैषा ग्रहणार्थं प्रयुज्यते ।
सर्वत्राप्यनृणत्वस्य फलत्वेन प्रकीर्तनात् ।
आत्मनिष्क्रयणत्वोक्त्या यः पशोः शेषभक्षणम् ।
न करोति तदाशेषहविःशेषांशभक्षणम्[1] ।
न कुर्यात् स समानत्वाद्धेतोः सर्वहविःष्वपि ।
ततश्च प्रत्यवायस्य प्रसंगो निश्चितो भवेत् ।
अथाग्नीषोमदेवत्यपशुयागं प्रशंसति ॥

5. १०–१४ **अहोरात्रे—प्रीता ।**

अत्राहरग्निरादित्यरूपेणाग्नेः स्थितत्वतः ।
'ततः सूर्यो जायते'[a]ति मन्त्रेऽग्नेः सूर्यतोक्तितः ॥

a. RV. 10. 88. 6.

1. T. इतराशेषं तदाशेष

सूर्यस्य चाहस्कर्तृत्वं प्रसिद्धं लोकवेदयोः ।
सोमस्य राञ्यधीशत्वादुक्ता सोमस्य रात्रिता ।
अहोरात्रद्वयस्पर्शी पशुरेव च संमतः ।
दिने तावद्वपाहोमो रात्रौ संस्था च कर्मणः ।
वपाहोमेन तत्राहराग्नेयं प्रीतिमद् भवेत् ।
रात्रिश्च सोमदेवत्या प्रीता भवति कर्मणः ।
एतस्य रात्रौ संस्थानाद् द्वयं प्रीतमतो भवेत् ।
अहोरात्रद्वयप्रीत्या को लाभ इति चेच्छृणु ॥

**सैषा—आलभते ।** 5. १५–१८

अहोरात्रपरिष्वृता वर्तन्ते सर्वजन्तवः ।
अस्वतन्त्रा यथा गावस्तन्त्रिताः ··· ··· ··· ।
न कश्चिदप्यहोरात्रे अतिक्रमितुमर्हति ।
'कालः पचति भूतानी'[a]त्यत एव पुराणगीः ।
भवितव्यमनेनास्मिन् काले मर्तव्यमित्यपि ।
स्थातव्यं धावितव्यं वा चरितव्यमिहेत्यपि ।
या या दशा भवेन्नृणां सा सा कालविनिर्मिता ।
अहोरात्रपरिच्छेदविनिर्मुक्तौ विशृङ्खलम् ।
सुखं संजायते तावदैश्वरं शाश्वतं परम्[1] ।
अहोरात्रात्मनोरग्नीषोमयोरनयोरिह ।
कर्मणानेन संप्रीतिः साक्षात् संपाद्यते यतः ।
तस्मादेषा क्रियाहोरात्रातिमुक्तिनिबन्धना ।
अनेन पशुयज्ञेन यजमानोऽतिलङ्घयेत् ।
अहोरात्रपरिच्छेदं दुर्लङ्घ्यमकृतात्मभिः ।
अतिमुक्तममुक्तेन प्रतिबाधितुमीश्वरे ।
स्वगोचरस्थितं सर्वमीष्टे हि प्रतिबाधितुम् ।

a. **MBh.** 1. 1. 188.

1. 1. M. V. परमं पदं for शाश्वतं परम्

योऽहोरात्रविमुक्त्यर्थमिदं कर्मेति धीयुतः ।
पश्वालम्भनकर्मैतत् कुरुतेऽस्योदितं फलम् ॥
इति पञ्चमः खण्डः

अथ द्विवर्णयोगित्वं पशोरस्य प्रदर्श्यते ॥

6. १ **तम्—इति ।**

अहः शुक्लं [तथा] कृष्णा रात्रिराम्नायदर्शनात् ।
'अहश्च कृष्णम्'[a] इत्यस्मिन् मन्त्रे तदुपलम्भनात् ।
सौरीभिर्भाभिरत्यन्तभास्वरं दृश्यते ह्यहः ।
सान्द्रान्धकारसंवीता रात्रिः कृष्णेव चेक्ष्यते ।
अह्नो रात्र्याश्च रूपाभ्यां संपन्नः शुक्लकृष्णरुक् ।
पशुः स्यादिति विद्वांसः कतिचित् प्रतिजानते ।
अन्येऽन्येन प्रकारेण द्विरूपत्वं मनीषिणः ।
हेतुयुक्त्या वदन्तीति प्रब्रवीति प्ररोचयन् ॥

9. २ **शुक्लम्—इति ।**

तं पशुं प्राहुरित्येवं पूर्वस्मादनुषज्यते ।
सोमो हि शुक्लवर्णोऽग्निर्लोहितो रक्तवर्णभाक् ।
तद्दैवत्यः पशुरयं शुक्लरक्तो भवेदिति ।
द्वैरूप्यं देवतारूपभेदद्वयकृतं विदुः ।
इत्थं पक्षद्वयं प्रोक्तं द्वयमप्यत्र संमतम् ।
निरासोऽन्यतरस्येह न यस्मादुपलभ्यते ।
इतिकर्तव्यताभेदं प्रदर्शयति संप्रति ॥

6. ३-६ **तस्य—प्रीत्यै ।**

प्रयाजा इत्यनूद्यैषामत्रैकादशताविधिः ।
प्रयाजानां प्रसिद्धत्वात् संख्यायाश्चाप्रसिद्धितः ।
'अप्राप्ते सार्थकं शास्त्रम्'[b] इति हि न्यायवित्स्थितिः ।
अनूयाजेष्वपि तथा संख्यैव तु विधीयते ।

a. RV. 6. 9. 1.

b. Cf. JS. 6. 2. 4.

एकादशोपयज इत्यत्र द्वयविधिर्भवेत् ।
अप्राप्तेरुभयस्यापि विशिष्टविधिरिष्यते ।
'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ।।'[a]
इहोपयड्नामकानां कर्मणामप्यपूर्वकः ।
अपूर्वया संख्ययामा विधिरभ्युपगम्यते ।
एषां समुदितानां तु संख्यां संस्तौत्यनन्तरम् ।
संभूय तानि कर्माणि त्रयस्त्रिंशद् भवन्ति हि ।
देवा अपि त्रयस्त्रिंशत्संख्यास्तच्च पुरोदितम् ।
संख्यासाम्यादेष यागसंघातः सर्वदेवताः ।
प्रीणयेदिति सोऽतीव प्रशस्य इति गम्यताम् ।
संख्यासाम्यं प्रयाजानुयाजानामङ्गकर्मणाम् ।
तत्कारणाभिधानेन प्रसाधयति यत्नतः ।।

**प्राणा—प्राणापानाः ।** 6. ७–९

ऊर्ध्वाधोभागवर्तित्वं प्रधानस्यात्मरूपिणः ।
प्राणापानैः प्रयाजानुयाजानां स्यात् समानता ।
समानत्वाच्च तादूप्यमसाम्ये तदयोगतः ।
प्रयाजाः प्राणरूपाः स्युरितरेऽपानरूपिणः ।
यत एवमतो हेतोः समाः स्युस्तुल्यसंख्यकाः ।
प्राणापाना इमे यस्मात् समानास्तुल्यवृत्तयः ।
वैषम्ये सति वृत्तीनां देहोन्माथप्रसङ्गतः ।
संख्यासाम्यं प्रयाजानुयाजानां युज्यते ततः ।
उक्ते साम्ये चोदकानां चोद्यमुत्थापयत्यथ ।।

**तद्—इति ।** 6. १०

पशौ खलु प्रयाजानां याग ऋग्भिर्विधीयते ।
प्रतीकैरनुयाजानां प्रैषभागैरिति स्थितम् ।

a. TV. on JS. 2. 2. 6.

तदेतदुभयेषां यद्वैषम्यं किंनिबन्धनम् ।
साम्ये सतीति चोद्यस्य परिहारोऽभिधीयते ॥

6. ११–१३ **रेतःसिक्तिः—इति ।**

रेतस्सेचनरूपाः स्युः प्रयाजा अनुयाजकाः ।
सिक्तस्य रेतसस्तस्य धेयं धारणमिष्यते ।
पौर्वापर्यनिमित्तैषां सेकधारणरूपता ।
कथिता रेतसः सेको धारणात् पूर्वकालभाक् ।
प्रयाजानां च पूर्वत्वमनुयाजेभ्य इष्यते ।
एवं वैषम्यसद्भावात् प्रयाजानामृचा यजिः ।
प्रतीकैरनुयाजानामिति सर्वं समञ्जसम् ॥

6. १४,१५ **अथ—दधाति ।**

अथ यत् सर्वमित्यादि योज्यमत्रापि पूर्ववत् ।
ऋग्याज्यत्वं प्रयाजानां सिद्धवत् कथितं पुरा ।
अथाधुना विधत्ते तदप्राप्तेरन्यवाक्यतः ॥

6. १६ **आप्रीभिराप्रीणाति ।**

समिदाद्याः प्रयाजानां देवताः परितोषयेत् ।
यथा वार्षयमाप्रीभिः 'समिद्धो अग्न'[a] आदिभिः ॥
आप्रीशब्दनिरुक्त्याथ स्तौत्याप्रीसूक्तयाज्यताम् ॥

6. १७–२१ **सर्वेण—नाम ।**

अत्र चात्ममनःशब्दौ तद्व्यापाराभिधायिनौ ।
समस्तैरात्ममनसोर्व्यापारैः साध्यते मखः ।
अन्यत्र चेदात्मधियोर्व्यापारः स्यात् कदाचन ।
तद्यज्ञो न सुसंपादो महारम्भत्वहेतुतः ।
आदौ तावद्यक्ष्य इति चिकीर्षा तावदात्मनः ।
व्यापारो यज्ञसंपत्तिमूलस्तम्भायते स्फुटम् ।
ततस्तद्विघ्नविध्वंसतत्साधनगवेषणैः ।
तत्सहायार्जनैश्चैव तत्कालघटनादिभिः ।

a. RV. 1. 142. 1.

बहुव्यापारसाध्यो हि यज्ञोऽयं विघ्नसंकुलः ।
श्रेयःप्राप्तिविरोधे हि व्याप्रियन्ते सुरा अपि ।
किमुत द्वेषकलुषमतयो मानुषा द्विषः ।
तस्माद् बहुप्रयासेन निष्पाद्येतापि नैव वा ।
'श्रेयांसि बहुविघ्नानीत्यत'[a] एव हि गीयते ।
इत्थं व्यापृतचित्तस्य विलश्नतश्च दिवानिशम् ।
यज्ञनिष्पत्तये यष्टुरस्यात्मा क्षीयते ध्रुवम् ।
क्षयाच्चातृप्तिमानेष जायते भृशदुःखितः ।
तमस्यात्मानमाप्रीभिः प्रीतिहेतुभिरञ्जसा ।
ऋग्भिः समन्ततः सम्यक् करोति प्रीतिशालिनम् ।
प्रीतिहेतुत्वतश्चैता आप्रीशब्दाभिधेयताम् ।
प्राप्तास्तस्मात् प्रशस्तोऽयमाप्रीणां पठनक्रमः ॥

इति षष्ठः खण्डः

कृते प्रयाजदशके स्वाहाकृतिपदोदितात् ।
एकादशात् प्रयाजात् प्राक् पर्यग्निकरणं पशोः ।
आग्नीध्रेण हि कर्तव्यं तत्र तिस्र ऋचः पठेत् ।
'अग्निर्होता न'[b] इत्याद्या इत्यभिप्रायतोऽब्रवीत् ॥

**पर्यग्नि—अपहन्ता ।** 7. १,२

परितः क्रियमाणोऽग्निर्यस्य सोऽयं पशुस्तथा ।
पशुं कुर्वीत पर्यग्नि किमर्थं तत्क्रियेति चेत् ।
रक्षसां पशुलिप्सूनामायतामपनुत्तये ।
पर्यग्निकरणं यस्मादग्नी रक्षोविनाशकृत् ।
तस्य त्रिवारं कार्यत्वं प्रादक्षिण्यं च शंसति ॥

**त्रिःप्रसवि—तत् ।** 7. ३,४

पर्यग्निकुर्यादाग्नीध्रस्त्रिवारं च प्रदक्षिणम् ।
अग्निमय्यस्त्रिसंख्याका दुर्गाः प्राकारभित्तयः ।

a. *Subhāṣitāvalī*. 3427. b. RV. 4. 15. 1.

विधीयन्ते यथा तद्वत् पर्यग्निकरणं हि तत् ।
एवं हि सति यज्ञस्य विघातमभिवाञ्छताम् ।
रक्षसां न प्रवेशः स्यात् देहदाहप्रसक्तितः ।
प्राकारभित्तिरेकापि दुष्प्रवेशत्वकारणम् ।
किमुतैतास्त्रिसंख्याका इति त्रित्वं प्रशस्यते ।
त्रिःपर्यग्निक्रियाग्न्यात्मपूस्त्रयीकरणात्मकम् ।
यस्मादेतदतो हेतोरित्थं कार्यमितीर्यते ॥

7. ५,६ **तस्मात्—इति ।**

अयं न प्रच्युतिं नाशं प्राप्नुयादग्निहेतुकम् ।
इति वाञ्छेद्यमाग्नीध्रं तं प्रत्येवमुदीरयेत् ।
त्रिःपर्यग्निक्रियान्ते त्वं त्रिवारं परिहृत्य भोः ।
आग्नीध्र[1] व्रज नैवं चेदग्नेर्दाह व्रजेरिति ।
तस्मात्त्रिवारमाग्नीध्रः पशुं परिहरेत् स्वयम् ।
पर्यग्निकरणे पाठ्या ऋचोऽग्रे दर्शयिष्यते ।
'तत एता वामदेव'[a] इत्यष्टाविंशके स्फुटम् ।
पशुं संज्ञपनं कर्तुं नयन्त्यध्वर्यवो यदा ।
तदा वाच्येऽध्रिगुप्रैषे यद्वाच्यं तद्विवक्षया ।
प्रैषमेनमुपादत्ते प्रतीकग्रहवर्त्मना ॥

7. ७ **दैव्याः—इति ।**

अस्यायमर्थः संक्षेपाद् द्विविधाः पशुघातिनः ।
देवसंबन्धिनः केचित् परे मानुषजातयः ।
द्विविधानपि तानत्र होता संबोध्य तान् प्रति ।
अर्थानुपदिशत्येषामनुष्ठेयतया स्थितान् ।
कार्यो भवद्भिरारम्भो यज्ञे मेधपदोदिते ।

a. KB. XXVIII. 2. १५.

1. T. आग्नीध्रो

मेध्या[1] दुरोऽर्थान् हिंसायां साधनान्यानयन्त्विह ।
यज्ञेशाभ्यां देवताभ्यां यज्ञाशासनकारिणः ।
सन्तो खण्डनहेतूनि वस्तून्यानयत द्रुतम् ।
प्रैषेऽस्मिन् मेधपत्युक्त्या देवतैवाभिधीयते ।
इति साधयितुं तावत् पूर्वपक्षमुपाक्षिपत् ॥

**तद्धैक—इति ।** 7. ८, ९

मेधो यज्ञस्तस्य पतिर्यजमानो हि नापरः ।
देवस्य संप्रदानत्वात् स्वामित्वानुपपत्तितः ।
स मेधपतिशब्देन वचनीयो न देवता ।
इत्थं केचन मन्यन्ते प्रत्याचष्टेऽथ तन्मतम् ॥

**को-इति ।** 7. १०, ११

यजमानो मेधपतिरिति कः पण्डितो वदेत् ।
देवतैव यतस्तेन शब्देनेहाभिधीयते ।
मेधपत्यर्थता यज्ञस्याशास्यत्वेन कीर्तिता ।
यजमानार्थता नैव चाशास्यात्र प्रसिद्धितः ।
आशासाना मेधमिति वाक्यमेतत् समञ्जसम् ।
देवतार्थकतायां स्यान्नान्यार्थत्वे कथंचन ।
उक्तं प्राक् संप्रदानत्वात् न मेधपतितेति यत् ।
अयुक्तं तु तदुद्देश्यभावात् प्राधान्यसंभवात् ।
देवताया भवेन्मेधपतित्वमुपपत्तिमत् ॥

**षड्विंशतिः—वङ्क्रयः ।** 7. १२, १३

असृक्छब्दाङ्कितप्रैषखण्डस्योभयतो द्वयोः ।
उच्छ्वासेनाभिधेयत्वमन्तयोर्विदधात्यथ ॥

**उभयतो—प्रसजानीति ।** 7. १४–१६

'अस्ना रक्ष'[a] इति प्रैषखण्डोऽयं रक्षसासृजः ।

a. MS. 4. 13. 4; ŚS. 5. 17. 8.

1. T. योग्या

संसर्गकर्म कथयन् असृक्छब्देन गृह्यते।
खनतादित्युदीर्याथ कृत्वोच्छ्वासं पठेदमुम्।
'अस्ना रक्षः संसृजतादि'[a]त्यथारभ्य चोच्छ्वसेत्।
किमित्युच्छ्वासनियम इति चेद्रक्षसां ह्यसृक्।
रवो भागस्तत्र संधाय पाठे दैवेन राक्षसम्।
भागेन भागं संसृष्टं कुर्यादेतच्च नोचितम्।
अतः कुर्यात् तथेत्येवं परिभीत्या समुच्छ्वसेत्॥

7. १७, १८ **स—इति।**

प्रैषस्य पिण्डितार्थोऽथ स एष इति भण्यते।
पशोरङ्गानि मा च्छेत्सीरन्यूनानि कथा इति।
कर्तव्यार्थनियोगात्मा प्रैषोऽयमिति गृह्यताम्।
'गात्रं गात्रम्'[b] इति प्रैषखण्डः पिण्डार्थवाचकः।
प्रत्येकमङ्गान्यूनत्वं श्येनमित्यादिनोच्यते।
श्येनोपमं कुरुत हे शमितारः पशोरुरः।
वक्षसः श्येनसादृश्यं यद्विनश्येन्न तद्यथा।
तथान्यूनतया वक्ष उद्धर्तव्यमितीर्यते।
बाहू प्रशस्तौ निश्शेषावुद्धार्याविति भण्यते।
प्रशसेति प्रशस्तत्वमवैकल्यं विवक्ष्यते।
इत्थं सर्वत्र गात्राणामन्यूनत्वाभिसन्धितः।
तत्तद्रूपत्वगदनं शलेत्यादौ तदूह्यताम्॥

7. १९, २० **यद्व—अदन्ति।**

यद्वेत्याद्यवैकल्यकरणे हेतुरुच्यते।
वैकल्ये सति दुष्टत्वाद्धविर्देवा न भुञ्जते।
हविष्ट्वसिद्धये हेतुरन्यूनत्वमतो भवेत्।
अन्वयव्यतिरेकाभ्यां दुष्टं न तु हविर्यतः।
प्रैषेऽस्मिन्नवसु स्थानेषूच्छ्वासं विदधात्यथ॥

a. MS. 4. 13.4; ŚŚ. 5.17.8.
b. MS. 4. 13. 4; ŚŚ. 5. 17. 6.

**नवकृत्वो—अमुष्मिन् ।** 7. २१–२५

नववारं विधातव्यः समुच्छ्वासोऽत्र तद्यथा ।
मेधं नयूथ्यः शरीरं वारयद्ध्वात् अष्ठीवन्ता ।
कृणुतात् खनतात् संसृजतात् शमितारः ।
एषु स्थानेषु नवसु कथितेषूच्छ्वसेत् क्रमात् ।
अध्रिगो इति खण्डस्य त्रिःपाठं विदधात्यथ ।।

**त्रिः—अपराक्त्वाय ।** 7. २६

कर्मणः क्रियमाणस्य पराक्त्वविनिवृत्तये ।
आभिमुख्यविधानाय त्रिवारं पठनं भवेत् ।
आद्यस्य प्रैषखण्डस्य सकृत् पाठं प्रशंसति ।।

**सकृत्—भवति ।** 7. २७–२९

आलम्भावस्थतां प्राप्तः पशुः पित्रधिदैवतः ।
यद्यप्येष स्वरूपेण देवदेवत्य एव हि ।
'मृत्यवे वा एष'[a] इति श्रुतावन्यत्र हि श्रुतम् ।
पित्र्यं च कर्म सर्वत्र सकृत् कर्तव्यमिष्यते ।
तत् पुरस्तात् सकृत् पाठ उक्तहेतोः समञ्जसः ।
विधान्तरेणोपरिष्टात् त्रिःपाठोऽथ प्रशस्यते ।।

**अथ—करोति ।** 7. ३०–३२

देवसंबन्धि यत् कर्म त्रिवारं तद् विधीयते ।
श्रूयते हि 'त्र्यावृतो वै देवा'[b] इति यजुष्यपि ।
उपरिष्टात् त्रिवारं यत् पठनं तेन तं पशुम् ।
करोति देवदेवत्यं नरसीकरणेन तु ।
देवोपदेवयोग्यं च विदधाति त्रिरुक्तितः ।।

इति सप्तमः खण्डः

अध्रिगो इति यः प्रैषः परिधानतयोदितः ।
तत्पाठानन्तरं कंचिज्जपं प्रविदधात्यथ ।।

a. TS. 3. 1. 5. 1.

b. ŚB. 13. 1. 7. 2; TB. 3. 8. 10. 4.

8. १ **परिधाय—इति ।**

उच्चैस्त्रिः परिधानीयं पठित्वानन्तरं जपेत् ।
उपांशु 'भावपापश्चे'[a] त्येतत् कर्म प्रशंसति ॥

8. २–४ **अपापो—अनुवेद ।**

शमितृत्वमपापस्य देवानां यज्ञकर्मसु ।
प्रसिद्धमध्रिगोश्चापि गद्यते प्रैषलिङ्गतः ।
तथैतरेयेऽ 'ध्रिगुर्वै देवानां शमिते'[b] ति च ।
'अपापो निग्रभीते'[b] ति सुविस्पष्टमधीयते ।
तस्मै देवशमित्रेऽमुमपापाय प्रयच्छति ।
पशुं स देवानखिलान् सम्यग् जानात्यनुक्रमात् ।
स्तोकानूक्त्यर्थमध्वर्युः संप्रेष्यति यदा तदा ।
'जुषस्वे'[c] त्यृचमन्याश्च सूक्तं चे 'मं न'[d] उच्चरेत् ।
मैत्रावरुण इत्येतदाह सम्यक् प्ररोचयन् ॥

8. ५–८ **अथ—भवन्ति ।**

पठेत् प्रशास्ता 'स्तोकेभ्य'[e] इति प्रैषादनन्तरम् ।
'इमं नो यज्ञम्'[d] इत्याद्या स्तोकशब्दवतीर्ऋचः ।
यास्वृक्षु स्तोकशब्दो न स्तोकीया एव ता अपि ।
छत्रिशब्दो यथा छत्रिसंयुक्तेष्वप्यछत्रिषु ।
'जुषस्वे'[c] त्यादिका एवं स्तोकीयपदगोचराः ।
वपाया विप्रुषःस्तोकास्तानेवैताभिरग्नये ।
ऋग्भिः स्वादिमसंपत्त्या करोति रुचिगोचरान् ।
स्वादु वस्तु प्रशस्तं तल्लोके स्वादुतमं भवेत् ।
विगर्हितं च तत् सद्यः स्वाद्वप्यस्वादुतां व्रजेत् ।
अपि चैता जुषस्वाद्या स्तोकयागविधावृचः ॥

a. ŚŚ. 5. 17. 10.
b. AB. 2. 7. 11.
c. RV. 1. 75. 1.
d. RV. 3. 21. 1.
e. ŚŚ. 5. 18. 1.

अनुवाक्यात्मिका याज्यारूपाश्चेत्यवगम्यताम् ।
अनुब्रूहीति संप्रैषे पाठादासामनूक्तिता ।
यागसंबन्धतो याज्यारूपत्वमपि संगतम् ।
यस्मादुभयरूपत्वं तस्मात् स्तोकपदान्विताः[1] ।
एता ऋचोऽभिरूपाः स्युः स्तोकयागाख्यकर्मणि ॥

**स्वाहाकृतिभिः—कुर्वन्ति ।** 8. ९,१०

स्वाहाकृतिभिरित्यादि वपहोमो विधीयते ।
प्रयाजदशकादूर्ध्वं पर्यग्निकरणादिकम् ।
विधाय स्तोकयागान्तं स्वाहाकृतिपदोदितम् ।
अन्त्यं प्रयाजं कृत्वाथ प्रविदध्याद् वपाहुतिम् ।
अनेन च प्रयाजानां पशुभाक्त्वं विधीयते ।
उत्तमस्य प्रयाजस्य वपाहोमस्य चोभयोः ।
नैरन्तर्यविधानेन प्रयाजपशुसंगतिः ।
क्रियतेऽत्र प्रयाजानां पशुभाजनतास्थितेः ।
तथा च वर्ण्यतेऽन्यत्र त्रयस्त्रिंशत्तु सोमपाः ।
असोमपाश्च वस्वाद्या देवाः सोमपसंज्ञिताः ।
प्रयाजा अनुयाजोपयाजा एते त्वसोमपाः ।
पशुभाजनभूताः स्युस्त्रयस्त्रिंशदमी इति ।
उत्तमस्य प्रयाजस्य वपाहोमस्य चान्तरा ।
होतुर्वाचां नियमनं नियमं विदधात्यथ ॥

**न—इति ।** 8. ११–१४

ऊर्ध्ववर्तितया स्वाहाकृतीनां[2] प्राणरूपता ।
आत्मरूपवपाहोमशेषत्वाच्चेह वर्णितः ।
वपाहोमस्य चात्मत्वमेकत्वाङ्गित्वहेतुतः ।
स्वाहाकृतिवपाहुत्योरन्तरा वाग्विसर्जनम् ।
न कुर्यात् प्राणमात्मानं चान्तरालनिवेशिना ।

1. T. स्तोकपदाङ्किताः

2. T. omits वर्तितया स्वाहाकृतीनां

केनाप्यर्थान्तरेणाहं कुर्यामन्तरिताविति[1] ।
भयमुद्द्योतयन् वाचो विदध्यान्नियमं सुधीः ।
वपापुरोळाशहवीरूपाणां पशुयोगिनाम् ।
प्रदानानां क्रमाद'ग्नीषोमाव्'[a] इत्यादिका ऋचः ।
पुरोनुवाक्याः कर्तव्या इत्येतं विधिमाशये ।
कृत्वा तासामथानुष्टुप्छन्दस्कत्वं प्रशंसति ॥

8. १५–१७ **अथ—छन्दः ।**

'सा गायत्री गर्भमधत्ते'[b]ति श्रुत्यन्तरे यतः ।
गायत्रीतः समुत्पत्तिरनुष्टुप्छन्दसः श्रुता ।
कार्यहेत्वोरभेदात्तद् गायत्र्यात्मकतोदिता ।
आग्नेयत्वं तु गायत्र्याः पूर्वमेवोपवर्णितम् ।
एतेषामेव याज्यानां प्रशंसार्थ विधीयते ॥

8. १८–२१ **अथ—प्रीणाति ।**

'युवमेतान्ये'[c]वमाद्या ऋचो याज्या भवन्ति हि ।
एताश्च त्रिष्टुभः सर्वास्तल्लक्षणसमन्वयात् ।
क्षत्रसंबन्धिनी त्रिष्टुप् चैकयोनिभवत्वतः ।
क्षत्राभिमानिनी सोमदेवतेत्यपि निर्णयः ।
पुरोनुवाक्यायाज्याभिः स्वस्वच्छन्दोनुसारतः ।
अग्नीषोमौ क्रमादत्र संप्रीणयति कर्मणि ।
अनुवाक्याभिरत्राग्नेः सन्तुष्टिरुपपाद्यते ।
याज्याभिरपि सोमस्य वपाहोमादिकर्मसु ।
ब्रूते पशुपुरोळाशयागकर्तव्यतामथ ॥

8. २२–२४ **अथ—करोति ।**

पशूनां सारभूतोंऽशो मेधशब्देन भण्यते ।
पशुसंबन्धिसारांशं पुरोळाशं विदुर्बुधाः ।

a. RV. 1. 93. 1. b. AB. 4. 28. 6.
c. RV. 1. 93. 5.

1. T. अनत....for अन्तरितौ

एतच्च स्पष्टमुद्दिष्टं प्रपञ्चेनैतरेयके[a] ।
तथाविधपुरोळाशयागेन कुरुते पशुम् ।
सारांशसहितं यज्ञयोग्यं च सरसत्वतः ।
पुरोळाशस्त्रिष्टकृतो यजनं विदधात्यथ ॥

**अथ—अच्युतः ।** 8. २५, २६

अत्राच्युतत्वं नित्यत्वं नित्यत्वे हेतुरुच्यते ॥

**अग्निर्—भवति ।** 8. २७, २८

स्विष्टकृद्यजने याज्यानुवाक्ये दर्शयत्यथ ॥

**वैश्वामित्री—तायते ।** 8. २९–३२

'इळामग्ने'[b] तथैवा'ग्नि सुदीति'[c]मिति ये ऋचौ ।
विश्वामित्रेण दृष्टत्वाद् वैश्वामित्रीपदोदिते ।
तयोः पुरोनुवाक्याद्या याज्यान्येत्यवगम्यताम् ।
पुरोळाशस्ततिरविच्छित्तिकृत् पशुकर्मणः[1] ।
श्रपणादिक्रियाजातकालव्यवधिकारणात् ।
विच्छेदे कर्मणोऽनेन क्रियते प्रतिसंहृतिः ।
विश्वामित्रेण दृष्टे ते ऋचौ वागात्मिके मते ।
वाचा च यज्ञनिष्पत्तिस्तच्चाधस्तादुदीरितम् ।
ततिरूपे कर्मणि वाक् ततिरूपोचिता ततः ॥

इत्यष्टमः खण्डः

ऊर्ध्वं पशुपुरोळाशयागादध्वर्युणा[2] पशोः ।
विधीयमानेऽवदाने प्रशास्त्रा प्रेषितेन तु ।
'त्वं ह्यग्न'[d] इति सूक्तस्य पाठः कार्य इतीर्यते ॥

a. cf. AB. 1. 12.
b. RV. 3. 1. 23.
c. RV. 3. 17. 4.
d. RV. 4. 1.

1. MSS. प...णः
2. T. पुरो...कान्तमध्वर्युणा

9. १ **अथ—अन्वाह ।**

मनोताग्निस्तद्विषयं सूक्तं चात्रोपचारतः ।
मनोतेत्युच्यते तत्तु प्रशास्ता सूक्तमीरयेत् ।
एतत् सूक्तं समस्तानां देवानां प्रीतिकारणम् ।
इत्येवं कथयन् स्तौति सर्वा हीत्यादिना स्फुटम् ॥

9. २–५ **सर्वा–भवति ।**

आलम्भावस्थतां प्राप्तमुपलक्ष्य पशुं सुराः ।
सर्वेऽपीन्द्रादयः क्षिप्रमात्रजन्ति ससंभ्रमाः ।
मदीयं नाम होता य[दयं तावद् ग्रहीष्यति] ।
स्वस्मै समर्प्यते सम्यक् पशुरित्यभिमानिनः ।
एकमामिषमुद्दिश्य यथा लोके जिघृक्षवः ।
ममैवेति ममैवेति संगच्छन्ते समन्ततः ।
तत्रैकस्मिन् पशावेव सर्वेषाममृतान्धसाम् ।
मनांस्योतानि जायन्ते दृढबद्धानि रागतः ।
अतो मनः पशावोतं यासामिति निरुक्तितः ।
मनोताशब्दवाच्याः स्युरखिला अपि देवताः ।
तत्रैकस्या देवताया असाधारणनामनि ।
कीर्त्यमाने ततोऽन्यासामागतिर्विफला भवेत् ।
इत्थं[1] सूक्तमिदं कृत्स्नं देवताप्रीतिकारणम् ।
मनोतासूक्तकथने चोदयन्तीह केचन ॥

9. ६ **तदाहुः—इति ।**

पशुरन्यान्यदेवत्यः सूक्तमाग्नेयमेव तु ।
अवदाने पशोस्तावत् पठ्यते तदसंगतम् ।
यद्देवत्यः पशुः सूक्तं तद्देवत्यं भवेद्यतः ।
चोद्यस्यास्य समाधानं तिस्र इत्यादिनोच्यते ॥

1. T. अते

**तिस्रो—भवन्ति ।** 9. ७–१३

आग्नेयस्यापि सूक्तस्य सर्वदेवत्यता यतः ।
तस्मात् सर्वेषु पशुषु सूक्तमेतत् पठेत् परम् ।
देवेषु तिस्र एव स्युर्मनोताशब्दगोचराः ।
कास्तास्तासां मनोतात्वं कथं वेति तदुच्यते ।
देवेष्वेका मनोताग्निर्देवानां मानसानि यत् ।
अग्नावेव निविष्टानि यज्ञभागहरस्त्वतः ।
यज्ञभागान् कदा मह्यं दास्यत्यग्निरसाविति ।
अथो वागित्येवमादि व्याख्येयमिह पूर्ववत् ।
गोवाचोर्यज्ञहेतुत्वान्मनोतात्वं प्रतीयताम् ।
गोवाचोरुभयोरग्नावन्तर्भावं वदत्यथ ॥

**अग्निः—इति ।** 9. १४–१६

गोर्वाचश्च मनोतात्वं कथं वेति तदुच्यते ।
सर्वा अपि मनोताः स्युरग्निरेव हि केवलम् ।
अग्नेरेव मनोतात्वं न गोर्वाचोऽपि वा यतः ।
तस्मादित्युपसंहारस्तत्प्रीतौ सर्वदेवताः ।
प्रीता भवन्तीतरथा न स्यात् प्रीतिर्दिवौकसाम् ।
तस्मात् सर्वेष्वेव[1] पशुष्वाग्नेयीरेव संपठेत् ।
ऋच'स्त्वं ह्यग्न'[a] इत्याद्या नान्याः पूर्वोक्तहेतुतः ।
ता वै त्रयोदशेत्यादि संख्यर्चामिह शस्यते ॥

**ता—भवन्ति ।** 9. १७, १८

त्रयोदशावदानानि हृदयप्रभृतीनि हि ।
ऋक्संख्यैषावदानेऽस्मिन्नभिरूपा भवेदतः ॥

**त्रिः—प्रजापतिसंमितम् ।** गतमेतत् । 9. १९–२४

a. RV. 4. 1. 1.

1. T. सर्वेष्वपि

9. २५-२८ **अथ—श्रपयति ।**

अथ यत्रेत्यादिनाथ प्राह यागं वनस्पतेः ।
पशुयागाविनाभूतो याग एष वनस्पतेः ॥

इति नवमः खण्डः

10. १ **तस्माद्—भवति ।**

वनस्पतिपदेनाग्निर्यस्मादेतेन भण्यते ।
यज्ञे चाग्नेरच्युतत्वात् स्याद् वनस्पतिरच्युतः ।
यागे वनस्पतेर्द्रव्यविशेषं दर्शयत्यथ ॥

10. २,३ **स—भवति ।**

पयश्शब्दोऽत्र मिलितदध्याज्यद्रव्यवाचकः ।
पृषदाज्यहविष्टा हि श्रुतान्यत्र वनस्पतेः ।
अस्मिन् वनस्पतेर्यागे हविःषु सकलेष्वपि ।
अग्निर्भवेद् भागयुतो हविषः पयसोऽपि च ।
भागस्वीकरणादत्र चोद्यमुत्थापयत्यथ ॥

10. ४ **तद्-इति ।**

देवानां धामभाक्त्वस्य प्रसिद्धत्वाद् वनस्पतेः ।
देवस्य न पयोभाक्त्वं समञ्जसमिवेक्ष्यते ।
पयसः पितृभागत्वात् पितृत्वाच्च वनस्पतेः ।
पयोहविष्ट्वमस्येति तस्योत्तरमथाब्रवीत् ॥

10. ५-९ **धाम—ब्रूयात् ।**

सोमयागपशावेव कर्तव्या प्रवृताहुतिः ।
न हविर्यज्ञ इत्येवं वदितुं चोदयत्यथ ॥

10. १० **तद्—इति ।**

हेतुप्रदर्शनद्वारा चोद्यस्योत्तरमुच्यते ॥

10. ११, १२ **अकृत्स्नैव—अध्वरः ।**

अग्निहोत्रं दर्शपूर्णमासौ तद्विकृतीष्टयः ।
चातुर्मास्यानि च पशुर्हविर्यज्ञा इमे मताः ।

एते सर्वेऽप्यसंपन्नाः सोमयागव्यपेक्षया ।
एषां मध्ये सोमयागः संपन्नतम इष्यते ।
सौम्येऽध्वरे हविर्यज्ञा विद्यन्ते तेषु न त्वसौ ।
पञ्चप्रकारः संपन्नः सोमयागो यतः श्रुतः ।
सुत्यादिनप्रयोक्तव्यात् सवनत्रितयात् पुरा ।
दीक्षणीयादि यत् सेयमेकानुष्ठेयपद्धतिः ।
सवनत्रयरूपिण्यस्तिस्रः पद्धतयस्तथा ।
आरभ्यावभृथाच्चोदवसानान्ता तु पञ्चमी ।
नैवंविधः सोमयागात् प्रयोगोऽन्यत्र दृश्यते ।
अन्येषामत्र सद्भावादन्यत्रास्य त्वभावतः ।
अल्पीयांसो हविर्यज्ञाः सोमयागोऽधिको मतः ।
अस्माद्धेतोः सोम एव प्रवृताहुतिरिष्यते ।
न हविर्यज्ञ इत्येतदुपसंहरति स्फुटम् ॥

**तस्मात्—इति ।** 10. १३

प्रवृताहुतिकर्माथ विदधाति प्ररोचयन् ॥

**जुष्टो—जुहोति ।** 10. १४, १५

मन्त्रस्य मध्यतो यस्मात् स्वाहाकारोऽत्र दृश्यते ।
तेन मन्त्रः पुरस्तात्स्वाहाकार इति पठ्यते ।
स्वाहाकारमतो हेतोर्मन्त्रान्ते न प्रकीर्तयेत् ।
जुष्ट इत्यादिमन्त्रेण कृतेनानेन कर्मणा ।
प्रवृताहुतिसंज्ञेन वाचं प्रेरयति स्फुटम् ॥

**वाचं—वहति ।** 10. १६, १७

मन्त्रेऽस्मिन् वाचि संपत्तिप्रार्थना गम्यते यतः ।
मन्त्रोच्चारणरूपिण्या वाचा यज्ञो हि साध्यते ।
तां वाचं यज्ञविषये होता प्रेरयति स्वयम् ।
तथा च प्रेरिता सा वाक् स्वसाध्यं यज्ञमञ्जसा ।
शस्त्रादिपठनद्वारा निर्विघ्नं निर्वहत्यसौ ।
द्वितीयामाहुतिं कांचिद् विधत्ते मानसीमथ ॥

10. १८, १९ **मनसा—प्रीतम् ।**

मनसा जुहुयात्तूष्णीमुत्तरां प्रवृताहुतिम् ।
मनःपदेन व्यापारो मानसोऽत्र विवक्ष्यते ।
स च प्रजापतिध्यानलक्षणस्तत्प्रसिद्धितः ।
मानसेन तु होमेन मनःप्रीतिर्भवेद्यतः ।
मनसैव ततो होमः कर्तव्य इति निर्णयः ।
मनःप्रीतिश्च संसाध्या यज्ञनिष्पत्तिसिद्धये ।
सावधानेन मनसा शास्त्रार्थानखिलानपि ।
पर्यालोच्यैव यज्ञस्य प्रयोगः सुकरो भवेत् ।
'स एष वाच'[a] इत्येतदैतरेयश्रुतौ श्रुतम् ।
वाङ्मानसप्रवृत्त्येकसाध्यत्वं यज्ञकर्मणः ।
मनसो व्यापृतिस्तत्तच्छास्त्रार्थपरिभावना ।
मन्त्रोच्चारणरूपस्तु वाग्व्यापारस्तदात्मकः ।
यज्ञस्तद्द्वयसिद्ध्यर्थे द्वे ये ते प्रवृताहुती ।
यज्ञनिर्वोढृवाक्चेतःसावधानत्वहेतुतः ।
प्रवृताहुतिकर्मैतत् प्रशस्तमिति गम्यताम् ।
मनः प्रीतं मनः प्रीतमिति द्विर्वचनं त्विदम् ।
अध्यायस्यावधिं वक्तुमाद्यस्य दशकस्य च ॥
आम्नायार्थविमर्शेन पुण्यं यत् समुपार्जितम् ।
पर्याप्तास्तु सपर्या सा हरिपादसरोजयोः ॥

इति दशमः खण्डः

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
अध्यायः पशुतन्त्रचिन्तनचणः कौषीतकिब्राह्मण-
व्याख्याने दशमः सतां सुखकरः सोऽयं समाप्तिं गतः ॥

a. AA. 2. 3. 3.

सावित्र्यामजनिष्ट यः सुमनसो नारायणाद्यज्वनः
प्राञ्चो यस्य चतुर्दशास्वपि गता विद्यासु कोटिं पराम् ।
त्रटयन्ताम्बुजषण्डचण्डकिरणः श्रीमान् कुमारः सुधी-
र्मीमांसार्णवकर्णधारधिषणो नारायणश्चाग्रजौ ॥
तेन ब्रह्मखलाख्यकेरलमहीभूषायमाणोत्तम-
ग्रामोद्भासिमुकुन्दमङ्गलगृहोद्भूतेन धूतैनसा ।
ख्यातेनोदयसंज्ञया विरचिते कौषीतकिब्राह्मण-
व्याख्याने सुखदे सतामिह दशाध्यायी गतैषादिमा ॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**प्रथमदशके दशमोऽध्यायः**

अथ

## एकादशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
गुरुवरकरुणाकटाक्षगङ्गासलिलनिमज्जनमुक्तमोहपङ्कः ।
गिरिशनतिनिराकृतान्तरायो दशकमहं विवृणोम्यथ द्वितीयम् ॥
सुत्यादर्वाङ्क्षु दीक्षोपसदुपवसथाख्येष्वहस्सु प्रयोज्यं
कर्माध्यायैः पुरस्तादभिहितमखिलं सप्तमाद्यैश्चतुर्भिः ।
सुत्याख्येऽह्नि प्रयोज्यं विधिमथ विदधानोऽत ऊर्ध्वैस्तु षड्भिः
प्रातः पूर्वानुवाकं प्रथममवसरायातमाह स्म वेदः ॥
प्रातरनक्ति वक्तुं प्रारभमाणश्चिकीर्षितं वस्तु ।
प्रतिजानीते प्रथमं श्रोतृमनःसमवधानसंसिद्ध्यै ॥

1. १ **अथ—प्रातरनुवाकः ।** अथशब्द आनन्तर्यार्थः । तच्चानन्तर्यं पूर्ववृत्तोपवसथकर्मापेक्षम् । अतःशब्दो हेत्वर्थः । यस्मादौपवसथकर्मानुष्ठानोत्तरकालं सौत्यस्यास्य कर्मणः प्रातरनुवाकात्मकस्यानुष्ठानम्, तस्मादनुष्ठानक्रमप्रयुक्तत्वाद् विधानक्रमस्य प्रातरनुवाक एवादौ विधातव्य इत्यर्थः । यद्वा अथात इत्यखण्डः शब्दः आनन्तर्य एव वर्तते । 'अथात इत्ययं शब्द आनन्तर्ये प्रयुज्यते'[a] इत्युक्तत्वात् । प्रातरनुवाकः एतच्छब्दवाच्यऋक्संघातः तद्विषयो विध्यादिर्वक्ष्यत इति वाक्यशेषः । अन्यथा वाक्यस्यापरिपूर्तेः साकाङ्क्षस्यानर्थक्यापत्तेः ।

1. २, ३ तत्र प्रथमं प्रातरनुवाकं नामनिर्वचनमुखेन प्रशंसति—**यद्-प्रातरनुवाकत्वम् ।** अयं निर्वचनरूपः कश्चिदर्थवादभेदः । तथा च ब्राह्मणभागभेदाः पूर्वैः सुग्रहत्वाय श्लोकेन संगृहीताः—

a. Quoted by Sucaritamiśra on ŚV. 1. 34.

'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥'[a]

इति । एतेषामुदाहरणं तत्र तत्र द्रष्टव्यम् । तत्र 'तेन ह्यन्नं क्रियते'[b] इति हेतुः । 'तद् दध्नो दधित्वम्',[c] 'तदाज्यानामाज्यत्वम्'[d] इत्यादि निर्वचनम् । 'अमेध्या वै माषाः'[e] इति निन्दा । 'वायुर्वै क्षेपिष्ठा देवता'[f] इति प्रशंसा । 'तद् व्यचिकित्सन् जुहवानी३मा हौषा३म्'[g] इति संशयः । 'यजमानसंमितौदुम्बरी भवति'[h] इत्यादिर्विधिः । 'माषानेव मह्यं पचत'[i] इति परकृतिः । 'पुरा ब्राह्मणा अभैषुः'[j] इति पुराकल्पः । 'यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेद्'[k] इति विशेषावधारणकल्पनेति । एवमन्यदुदाहार्यम् । नन्वर्थवादः प्रशस्तबुद्धयुत्पादनप्रणाड्या प्रवर्त्यरुच्युत्पादनेन प्रवृत्तिहेतुर्वक्तव्यः; 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः'[l] इत्यर्थवादाधिकरणे तथा निर्णीतत्वात् । तत्र नामनिर्वचने का प्रशस्तबुद्धिः ? न हि स्ववाचकशब्दस्यार्थानुगमप्रतीतौ वस्तुनः कश्चिदुत्कर्षविशेषोऽवसीयते; येन तद्विषयरुचिजन्मद्वारा प्रवृत्तिः पर्यन्तीभवेत् । उच्यते । अस्ति तावन्नाम्नोऽपि नामिप्रतिपत्तिव्यतिरेकेण तद्गतार्थविशेषप्रतीतिः । यथा पुरुषोत्तम इत्यस्मान्नाम्नः सर्वपुरुषोत्कृष्टताविशिष्टो नामी प्रतीयते । तत्र नामवाच्योऽर्थविशेषो यदि नामिगुणयोगलक्षणस्तर्हि तत्प्रशस्तताप्रतीतेः को वारयिता ? वैपरीत्ये वा निन्द्यताबुद्धेः ? डित्थादिनामानि तु केवलसंज्ञिव्यवहारहेतूनि यादृच्छिकानि । न तेभ्यः कश्चिदुत्कर्षोऽपकर्षो वा नामिवस्तुनः प्रतीयते । नन्विह प्रातरनुवाकशब्देन का तद्वाच्यस्य प्रातरनुवाकस्य प्रशस्ततावगतिः ? उच्यते । ईदृशोऽयं महानुभावः प्रातरनुवाकः यदयं सर्वेतरकर्मणां मध्ये प्रथमं प्रातःकाले प्रयुज्यत इति तत्स्तुतिः । अथवा न डित्थादिसंज्ञिवद् यादृच्छिकसंज्ञावानयं प्रातरनुवाकः, किंतु अर्थानुगतसंज्ञावाच्यः । यदा संज्ञाया अर्थानुगमकथनेन संज्ञास्तुतिद्वारा संज्ञिनः स्तुतिः

a. Śabara on JS. 2. 1. 33.
b. Cf. ŚB. 2. 5. 2. 23.
c. TS. 2. 5. 3. 4.
d. AB. 2. 36. 3.
e. TS. 5. 1. 8. 1.
f. TS. 2. 1. 1. 1.
g. TB. 2. 1. 2. 2.
h. TS. 6. 2. 10. 3.
i. ŚB. 1. 1. 1. 10. ( varies )
j. TS. 1. 5. 7. 5.
k. TS. 2. 3. 12. 1.
l. JS. 1. 2. 7.

सर्वथाप्यस्त्येवात्र प्रशस्तताप्रतीतिः । एनम् 'आपो रेवतीः'[a] इत्यादिकमृचां संघातं प्रातर्नामके कालविशेषे होता पठति । यदेवाद्यापि दृश्यमानमस्ति । एतदेव प्रातरनुवाकशब्दवाच्यत्वे निमित्तम् । न तु डित्थादिवद् यदृच्छामात्रम् । अत्र निर्वचनेन कालविशेषोऽपि दर्शितः । तस्य तूत्तरत्र प्र[योगो] भविष्यति 'महारात्र उपाकुर्याद्'[b] इत्यादिना । अत्रायं प्रयोगकल्पः—

महारात्राह्वये काले होता प्रातरनुक्तये ।
प्रेषितोऽध्वर्युणाचम्य प्रपन्नस्तीर्थवर्त्मना ।
आग्नीध्रीयस्य धिष्ण्यस्य सव्यावृत् पुरतःस्थितः ।
जपेन्मन्त्रान् 'भूः प्रपद्ये'[c] इत्याद्यान् प्रपदाह्वयान् ।
पादधातोः प्रपूर्वस्य दर्शनात्तु तदाह्वयाः ।
'अस्यां म'[d] इत्यादिमन्त्रैः प्राच्यादीनां दिशां क्रमात् ।
प्राचीनावीत्युपस्थानं कुर्यात् सव्यावृदेव तु ।
अनन्तरं दक्षिणावृद् भूत्वाग्नीध्रीयधिष्ण्यकम् ।
गत्वोत्तरेणास्य पश्चादुपविश्य स्रुवाहुतीः ।
षड् 'भू'[e]रित्यादिभिर्मन्त्रैर्हुत्वाग्नीध्रीयदेशतः ।
यथाप्रपन्नं निष्क्रम्य गत्वा सव्यावृदेव हि ।
हविर्धानस्य पूर्वस्मिन् द्वारदेशे कृतासनः ।
संप्रेषितोऽभिहिंकृत्य वाचा मध्यमया पठेत् ।
'आप'[a] इत्यादिकं प्रातरनुवाकाख्यमृग्गणम् ॥

1. ४-६ अत्र प्रपन्नामकमन्त्रजपात्रिविधमाहुतिविधिं च स्तौति—**अथ-अनुब्रूयात्** । एतद्ध वा एकमित्यतः प्राक्तनं कृतव्याख्यानम् । निरुक्तानुवचनं स्तौति—
1.१०-१२ **एतद्ध-अपहत्यै** । वाचस्तावद् द्वे रूपे विद्येते, उपांशु निरुक्तं च । तत्र यदेतन्निरुक्तं श्रोत्रेन्द्रियविस्पष्टोपलभ्यं वाच एकं रूपमस्ति, तदेतत् पाप्मना वर्णाद्यनभिव्यक्त्यासुरपाप्मना संस्पर्शरहितं भवति । उपांशुपठने हि वर्णाद्य-नभिव्यक्तेः दुष्परिहरत्वात्तन्निमित्तोऽपराधः प्रादुर्भवेत् । निरुक्तानुवचने तु नायं

a. RV. 10. 30. 12.
b. KB. XI. 9. ३.
c. TA. 2. 19. 1; SS. 6. 2. 2.
d. SS. 6. 3. 1.
e. SS. 6. 3. 8.

दोषः । ततः स्वेच्छया वर्णाद्युच्चारणस्य शक्यसंपादनत्वात् । अत्र च निरुक्तम-
नुब्रूयादित्यत्र मध्यमस्थानेनानुवचनं विवक्षितम् । 'मध्यमया वाचा'[a] इति
सूत्रकृतोक्तत्वात् ।

अपरमप्यनुवचनविशेषं विधत्ते—**अर्धर्चशोऽनुब्रूयात्** । अर्धर्चेऽर्धर्चे 1. १३
विरम्योच्छ्वस्यर्चि प्रणवेन संधानं कृत्वा प्रातरनुवाकं पठेदित्यर्थः तथा च
सूत्रम्—'अर्धर्चन्यायाश्चर्चः'[b] इति । स्तौति—**ऋक्संमिता-दधाति** । इमे 1.१४-२०
पृथिव्यन्तरिक्षस्वराख्यास्त्रयो लोका ऋक्संमिता एकैकयर्चा परिच्छिन्ना भवन्ति ।
कथमिति चेदुच्यते । एकस्यामृचि तावत् पूर्वोत्तरौ द्वावर्धर्चौ भवतः । तत्र योऽयं
पूर्वोऽर्धर्चोऽस्ति सोऽयं पृथिवीलोक एव; अधोदेशवर्तित्वसाम्यात् । यः पुन-
रुत्तरोऽर्धर्चः सोऽसौ द्युलोकः ऊर्ध्वदेशवर्तित्वसाम्यात् । अर्धर्चद्वयान्तरालदेशः
अन्तरिक्षलोकः छिद्रत्वसाम्यात् । एवं लोकानामृक्संमितत्वम् । तत् तत्रैवं सति
अर्धर्चशः पठतीति यदस्ति तेन एभिः पृथिव्यन्तरिक्षद्युलोकैर्यजमानं समृद्धं
करोति । वृष्ट्यादिद्वारा च लोकानां यजमानसमृद्धिहेतुत्वात् । तथा एषु पृथि-
व्यादिलोकेषु यजमानं स्थापयति ॥

इति प्रथमः खण्डः

प्रातरनुवाकनिविष्टानां सर्वासामृचामर्धर्चशः पठनीयत्वं विहितम्—अर्ध-
र्चशोऽनुब्रूयादिति । तदेतद् विषमपदासु पङ्क्तिछन्दस्कास्वृक्षु न संभवतीति
चोद्यमुद्भावयति—**अथ-इति** । अथशब्दः पङ्क्तिच्छन्दर्थान्तरार्थः । वैशब्दः 2. १
प्रसिद्धौ । पङ्क्तिच्छन्दस्काया ऋचः पदानि पादाः पञ्चसंख्याका भवन्तीति
प्रसिद्धम् । तथा सति कथं सा पञ्चपदोपेता पङ्क्तिरर्धर्चशः पठिता भवति ?
समपदासु खल्वृक्षु साम्येन पादविभागस्य शक्यक्रियत्वाद् अर्धर्चशसनं संभवत्येव ।
पङ्क्तीनां तु पञ्चपदत्वेन पादविभागेनार्धर्चद्वयस्य दुःसंपादत्वात् कथं तत्रार्धर्च-
शसनं निर्वोढुं शक्यत इत्यर्थः । समाधत्ते—**प्रणव-भवति** । उत्तरयोर्द्वयोः 2. २, ३
पादयोः संबन्धी यस्त्रिसंख्यापूरकः पादोऽपेक्षितः स प्रणव एव भवति । तथा
सति सा पङ्क्तिरर्धर्चशः पठिता भवति । पञ्चसंख्येषु पादेषु पूर्वांस्त्रीन् पादान्

a. SS. 6. 3. 9. b. SS. 1. 1. 26.

पूर्वमर्धर्चं कुर्यात् । यौ पुनरुत्तरौ द्वौ पादौ स्तः तयोरवसानगामी यः प्रणवस्तं तृतीयपादस्थानेऽभिषिच्य त्रयः पादाः संपन्ना इति कृत्वोत्तरमर्धर्चं कुर्यात् । एवं सति द्वयोरपि दशतयोः साम्यसंपत्तेः तत्राप्यर्धर्चशंसनं संपादितं भवति । तथा च सूत्रम्—'त्रिपदानि पङ्क्तीनां समस्येद् द्वाभ्यां प्रणुयाद्'[a] इति ।

इहाध्वर्योः संप्रैषादनन्तरं हिंकृत्य' आपो रेवतीः'[b] इत्येषा प्रथमं पठनीया । तदनन्तरमाग्नेयोषस्याश्विनसंज्ञास्त्रयः क्रतवः पठनीयाः । तानेतान् त्रीन्
2. ४–६ क्रतून् क्रमेण विधानपूर्वकं स्तौति—**आग्नेयं-आप्नोति** । '**उपप्रयन्तो** अध्वरम्'[c] इत्यादिगायत्र्यनुष्टुप्त्रिष्टुप्बृहत्युष्णिग्जगतीपङ्क्तिरूपच्छन्दःसप्तकविभक्तमूर्तिः अग्निदेवत्यत्वादाग्नेयः क्रतुः । 'क्रतुरिति कर्मनाम'[d] इति गोविन्दस्वामिभिर्व्याख्यातम् । क्रत्वङ्गभूतस्य प्रातरनुवाकस्यावयव उपचारेण क्रतुशब्दः । अथवा क्रतुच्छन्दोभिः सप्तभिः साध्यत्वादाग्नेयादीनां प्रातरनुवाकावयवानां क्रतुशब्दवाच्यत्वं वेदितव्यम् । एवं 'कस्त उषः कधप्रिये'[e] इत्यादिरुक्तविध एवोषस्यः । 'अश्विना यज्वरीः'[f] इत्यादिरुक्तरूप एवाश्विनः । एतेषां त्रयाणां क्रमेण पृथिव्यादिलोकत्रयप्राप्तिहेतुत्वं स्थानतः साम्यात् ।

क्रतुत्रयनिवेशिनां गायत्र्यादीनां पङ्क्तिपर्यन्तानां सप्तसंख्यानां छन्दसामनुवचनं विधानपूर्वकं स्तौति गायत्रीमन्वाहेत्यादिखण्डशेषेण । **गायत्रीम्**—
2. १०-२३ **जगती** । गायत्रीछन्दस्का '**उपप्रयन्त**'[c] इत्याद्या ऋचः पठेत् । तत्र येयं गायत्री सा मुख्यमुत्तमाङ्गं भवति प्राधान्यात् प्राथम्याच्च । प्राधान्यं सोमाहरणाख्यायिकादौ प्रसिद्धम् । प्राथम्यं सिसृक्षोः प्रजापतेर्मुखतो गायत्र्या उत्पन्नत्वात् । पश्चाद् बाह्वादिभ्यस्त्रिष्टुबाद्युत्पत्तेः । 'अग्रं वै छन्दसां गायत्र्यग्रमङ्गानां शिरः'[g] इति श्रुत्यन्तरम् । गायत्रपाठानन्तरमनुष्टुप्छन्दस्काः 'ते ते अग्न'[h] इत्याद्याः पठेत् । तत्र येयमनुष्टुप् सा वाग्रूपैवेति । तद्रूपं चोपपादितमधस्तात् । तत् तेन गायत्र्यनन्तरमनुष्टुभः पठनेन मुखे वाचं स्थापयति । तच्चोचितमेव । यस्माल्लोकोऽखिलोऽपि मुखेन करणभूतेन वाचं वैखरीरूपां वदति । तदाहुः—

a. ŚS. 6. 3. 10 ( varies from printed edn. ).
b. RV. 10. 30. 12.
c. RV. 1. 74. 1.
d. On AB. 2. 18. 11.
e. RV. 1. 30. 20.
f. RV. 1. 3. 1.
g. AA. 1. 4. 1.
h. RV. 6. 16. 27.

'आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः ॥'[a] इति ।

अनुष्टुबनुवचनानन्तरं त्रिष्टुप्छन्दस्काः 'ससस्य यद्'[b] इत्याद्या ऋचः पठेत् । त्रिष्टुभो बलवीर्यहेतुमत्त्वं तद्धेतुत्वात् । यद्वा वीर्याश्रयप्रजापतेर्बाहुदेशादुत्पन्नत्वात् । बलं प्राणशक्तिः । वीर्यं शत्रुनिग्रहसामर्थ्यम् । त्रिष्टुप्पठनानन्तरं बृहतीछन्दस्काः 'एना वो अग्निम्'[c] इत्याद्या ऋचः पठेत् । बृहती गवाश्वरूपा तद्धेतुत्वात् । अनन्तरं 'त्वामग्ने मनीषिणः'[d] इत्याद्या उष्णिहः पठेत् । अत्रापि तद्धेतुत्वात् ताच्छब्द्यम् । अथ 'वेदिषदे'[e] इत्याद्या जगतीर्ऋचः पठेत् । गतमन्यत् । त्रिष्टुबादेरस्तु बलवीर्यादिरूपत्वं तावता किं यजमानस्य फलमित्यत्राह–
**बलम्—भवन्ति।** बृहत्युष्णिक्संबन्धिनां गवाश्वाजाव्युपलक्षितानां सर्वेषां पशूनां 2. २४-२८
पुरस्तादुपरिष्टाच्च त्रिष्टुप्जगतीसंबन्धिबलवीर्यप्रक्षेपेणायं होता गवादीन् पशून् बलवीर्यरूपाभ्यां त्रिष्टुप्जगतीभ्यामुभयोः पार्श्वयोः संदंशन्यायेन गृहीत्वा यजमाने स्थापयति नियमेन यजमानस्वामिकान् करोति । तथा सत्यस्माद् यजमानात् पशव उत्क्रमणशीला न भवन्ति । न केवलमस्मिन्नेव लोके गवादिपशूपभोक्तृत्वमेव त्रिष्टुबादिच्छन्दोऽनुवचनजन्यं फलम्; किंतु परस्मिन्नपि लोके
पशूनां यजमानभोग्यत्वमपीति विपक्षे बाधकप्रदर्शनपुरःसरमाह—**तद्-भुङ्क्ते।** 2. २९-३९
पयोदधिमांसाद्युपयोगस्य प्रत्यक्षत्वाद् यथेति दृष्टान्तः । तत् तत्र लोके । यथा मनुष्याः पशून् भक्षयन्ति यथा वा एभिः पशुभिः वाहदोहप्रसवद्वारात्मानं पालयन्ति, न तथा परस्मिन् लोके । किंतु तत्र वैपरीत्येन पशूनां भोक्तृत्वं मनुष्याणां भोग्यत्वमिति । तथा चाग्निहोत्रप्रकरणे तलवकाराणां ब्राह्मणम्—'ये वा अस्मिन् लोके अग्निहोत्रमजुह्वत नैवंविदः पशूनाक्रन्दयतः पचन्ते । तान् वा अमुष्मिन् लोके पशवः पुरुषरूपं कृत्वा प्रत्यदन्ति'[f] इति । तथा मांसशब्दनिर्वचनं कुर्वाणः स्मरति स्म भगवान् मनुः—

'मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥'[g]

a. *Āpiśaliśikṣā. 1. 1.*
b. RV. 4. 7. 7.
c. RV. 7. 16. 1.
d. RV. 3. 10. 1.
e. RV. 1. 140. 1.
f. JB. 1. 43.
g. **Manu. 5.55.**

इति। तत्रैवं सति यो यजमान इह प्रातरनुवाकेन तान् पशून् त्रिष्टुब्-वीर्याभ्यां परिगृह्णाति, तं यजमानं तेऽवरुद्धाः पशवः परस्मिन् लोके न भक्षयन्ति। न चैतेन यजमानेन पशुभूयं गतेनात्मानं पालयन्ति। किंतु अस्मिन् लोके यथा पशूनां भोग्यत्वमेव तथैव परस्मिन् लोकेऽपीति। उभयतः परि-
2. ४०-४२ गृहीतत्वात्। **पङ्क्तिम्—प्रतिष्ठापयति**। जागतानुवचनानन्तरं पङ्क्तिच्छन्दस्का 'अग्निं तं मन्ये'[a]इत्याद्याः पठेत्। प्रतिष्ठा समाप्तिः। तद्धेतुत्वात् तद्रूपत्वम्। तेन पङ्क्त्यनुवचनेनायं होता यजमानं सर्वेषु भूतेषु प्राणभृत्सु प्रतिष्ठितं करोति। सर्वभूताधिष्ठातारं करोति॥

इति द्वितीयः खण्डः

पङ्क्तिष्वर्धर्चशः शंसनविधिघटना वर्णिताथ क्रतूनां
तत्स्थानां छन्दसामप्यनुवचनविधिः सप्तसंख्याजुषां प्राक्।
आग्नेयाख्यात् क्रतोर्या प्रथमपठनयोग्यास्ति हिंकारपूर्वं
ता'मापो रेवती'[b]रित्यृचमथ विदधाति प्रकुर्वन् प्रशंसाम्॥

3. १-५ **अथ— आवृश्च्यते**। प्रकृतादर्थादर्थान्तरार्थोऽथशब्दः। सर्वा एवाग्न्याद्या देवताः प्रातरनुवाकमनुवक्तुमारभमाणं होतारं प्रतिलक्ष्य उपस्थिताः प्राप्ता भवन्ति। केनाभिप्रायेणेत्यतो विशिनष्टि। मद्दैवत्ययर्चायं होता प्रातरनुवाकं प्रारभते नान्यदेवत्ययेति प्रत्येकं सर्वा अपि संजातमनोरथाः सत्यः। एवं सति यदि स होता तासां देवतानां मध्येऽन्यतरां देवतां विशिष्टदेवताभिधायिपदविशेषोपेतया कयाचिदृचा साक्षादेव देवताविशेषाभिधानेन प्रातरनुवाकमारभते तथा सति या देवतादिष्टा तस्या इतराभ्यो देवताभ्योऽनादिष्टाभ्यः सकाशात् वृश्चनं विच्छेदमयं होता प्राप्नुयात्। एवमेकैकदेवतया प्रातरनुवाकप्रारम्भे दुर्वार एव दोषः। कथं तर्हि तन्निर्वाह इति चेत् अनिरुक्तया अनभिहितदेवतापदयर्चा प्रातरनुवाकं प्रारभेत, न निरुक्तया। तेनैव कारणेन कस्याश्चिदपि देवताया विच्छेदं न प्राप्नोति। सर्वदेवतासाधारण्येनैव तथा सति प्रारम्भात्। सा तर्हि ऋगनिरुक्ता कतमा, यया प्रातरनुवाकः प्रारब्धव्य इत्याकाङ्क्षाया-

a. RV. 5. 6. 1. b. RV. 10. 30. 12.

माह—**आपो-प्रतिपद्यते**। 'प्र देवत्रा'[a] इत्यस्मिन् पञ्चदशर्चे सूक्ते द्वादश्येषा 3. ६-८
'आपो रेवतीः'[b]इति। हे आपः। कीदृश्यः ? रेवतीः रेवत्यः धनवत्यः पशुमत्यो वा। 'पशवो वै रयिः'[c] इति श्रुतिदर्शनात्। रयिशब्दान्मतुपि 'रयेर्मतौ बहुलम्'[d] इति संप्रसारणम्। परपूर्वत्वम्। 'छन्दसीरः'[e] इति मतुपो वत्वम्, 'वा छन्दसि'[f] इति पूर्वसवर्णदीर्घः। एवंभूता हे आपः यूयं वस्वः वसुनः धनस्य क्षयथ ईशिध्वे। हिः प्रसिद्धौ। किंच यूयं भद्रं भजनीयं क्रतुं कर्माग्निहोत्रादिलक्षणं श्रद्धाजननादिद्वारेण धारयथ। तथा अमृतममरणधर्मकं तत्फलं यूयमेव धारयथ। तथा रायो धनस्य शोभनस्य च पुत्रस्य पालयित्र्यो भवथ। यस्मादेवं तस्माद्धेतोः सरस्वती नदी गृणते स्तुवते मह्यं तदिदं सर्वमन्नं प्रयच्छतु इति। अस्यामृचि 'या तेनोच्यते सा देवता'[g] इति न्यायेनापां प्रतिपाद्यमानत्वात् ता एव देवता भवन्ति। ताश्चापः सर्वदेवतारूपाः। सर्वासां देवतानामादावापः सृष्टा इति तासां सर्वदेवतारूपत्वम्। स्मरति हि भगवान् मनुः—'अप एव ससर्जादौ'[h] इति। तथा च सति सर्वदेवत्यया अत एवानिरुक्तयानयर्चा प्रातरनुवाकमारभमाणो होता सर्वाभिर्देवताभिः प्रारब्धवान् भवति।

प्रथमपठनीयामृचं विधाय तदनन्तरपठनीय आग्नेये क्रतौ प्रथमपठनीयामृचं
विधत्ते—**उपप्रयन्तो-उपसंदधाति**। 'आपो रेवतीः'[b] इत्येतामृचं पठित्वा तया 3. ९
संधाय 'उपप्रयन्त'[i] इत्येतामृचं पठेत्। अस्यायमर्थः—अध्वरं हिंसाप्रत्यवायरहितमग्निष्टोमादियज्ञमुपेत्य प्रकर्षेण यन्तो गच्छन्तो वयमग्नयेऽङ्गनादिगुणयुक्ताय देवाय मन्त्रं मननसाधनमेतत् सूक्तरूपं स्तोत्रं वोचेम वक्तारो भूयास्म इत्याशास्यते। कीदृशायाग्नये ? चशब्दोऽप्यर्थः आरेशब्दात् परो द्रष्टव्यः। आरे च दूरेऽपि स्थित्वास्माकं स्तुतीः **शृण्वते**। अस्मासु प्रीत्यतिशयेन सर्वत्र वर्तमानोऽ
ग्निरस्मदीयं स्तोत्रं शृणोतीति भावः। स्तौति—**उपेति-अमुष्य**। अस्यामृचि 3.१०, ११
प्रथमं द्वितीयं च यत् पदमस्ति तयोर्मध्ये उपेति प्रथमं पदं अस्य पृथिवीलोकस्य

a. RV. 10. 30.
b. RV. 10. 30. 12.
c. TB. 1. 4. 4. 9.
d. Vārttika on Pā. 6.1.37.
e. Pā. 8. 2. 14.
f. Pā. 6. 1. 106.
g. SA. 2. 7.
h. Manu. 1. 8.
i. RV. 1. 74. 1.

रूपं स्वरूपं भवति । तस्य पृथिवीलोकरूपत्वमस्तीत्यर्थः । पूर्वत्वसाम्यात् ।
यदुत्तरं पदं प्रयन्त इति तदमुष्य द्युलोकस्य रूपं भवति । यथा पूर्वोत्तरपदयोः
धर्मसाम्याल्लोकद्वयरूपत्वं तेनैव धर्मसाम्येन तदायतनदेवतारूपत्वमपि द्रष्टव्य-
3.१२, १३ मिति वदन् स्तौति—**उपेति-आदित्यस्य** । आदित्यस्य रूपमिति शेषः । आग्नेय-
क्रतुप्रथमप्रतिपद्युक्तं पूर्वोत्तरपदयोरग्न्यादित्यरूपत्वसंपादनमाग्नेय एवानुष्टुबादि-
3. १४ प्रतिपत्सु उषस्याश्विनक्रतुगतप्रतिपत्सु चातिदिशति—**एवम्-क्रतुषु** । आग्नेयोष-
स्याश्विनक्रतुषु याः प्रतिपच्छन्दसं प्रतिपदः सन्ति तासु तास्वप्येवमेव द्रष्टव्यम् ॥

इति तृतीयः खण्डः १९

4. १, २ तदेव विवृणोति—**आग्नेय-आदित्यस्य** । या पूर्वा पूर्वा प्रथमा प्रथमा
व्याहृतिः । व्याह्रियत इति व्याहृतिः । आद्यं पदमिति यावत् । सा अग्ने रूपमेव भवति । या तूत्तरा व्याहृतिः सा अमुष्य विद्योतमानस्याप्यादित्यस्य रूपमेव भवति । तद्यथा—'ते ते अग्ने'[a] इत्यस्यामानुष्टुभः प्रतिपदि प्रथमाबहुवचनान्तं ते इत्याद्यं पदं अग्ने रूपम् । द्वितीयं ते इति पदमादित्यस्य रूपम् । एवं त्रैष्टुभादिप्रतिपत्स्वप्यूहनीयम् । पूर्वोत्तरव्याहृत्योः अग्न्यादित्यदेवतारूपमुपपादित-
मुपजीव्य तस्य प्रातरनुवाकपठने होतुः संभाव्यमानायाः कस्याश्चिदनिष्टापत्ते-
4. ३-७ निवारकत्वं दर्शयति—**अथ-स्वर्ग्यम्** । अथेत्यर्थान्तराभिधाने । वैशब्दो विशेषे ।
एतदेतस्मिन्नवधौ प्रातरनुवाकपठनलक्षणे नानाभूतानि गायत्र्यादीनि छन्दांस्यन्तरेण छन्दसामन्तरालदेशेषु केचित् कर्ता इव भवन्ति । यथा लोके सीम्नामन्तरालदेशेषु क्षेत्रात् क्षेत्रान्तरं प्रति स्वच्छन्दसंचारपरिहाराय केचित् कर्ताः खन्यन्ते । तथाभूताः सुखसंक्रमप्रतिरोधकाः शंसितुरनर्थापत्तिहेतवश्चैते तदन्तरालदेशा भवन्ति । अथैवं सति ये एते बलिष्ठे बलातिशययुक्ते अरिष्टे नाशरहिते अनार्ते अन्यानभिभूते अग्न्यादित्यरूपे देवते ताभ्यां देवताभ्यां पूर्वोक्तक्रमेण अग्न्यादित्यात्मिकाभ्यां पूर्वोत्तरव्याहृतिभ्यां होता प्रातरनुवाकं प्रतिपद्यते प्रारभते । तथा समानेन ऋक्संख्यादिना तुल्यरूपं यत् सूक्तमस्ति, तेन सूक्तेन समारोहणं छन्दोन्तराच्छन्दोन्तरप्राप्तिलक्षणं संक्रमणं कुर्यात् । तदेतत्

a. RV. 6. 16. 27.

समारोहणमकर्तस्कद्यम् । कर्तस्कन्दनं गर्तपातः । तत्परिहारहेतुश्च यजमानस्य
भवति । यतस्तल्लोहस्य लोहविकारस्यायोदण्डादे रूपमतिदृढतरत्वेन सुख-
संक्रमणसाधनत्वात् सदृशं भवति । अपि चैतत् स्वर्ग्यं स्वर्गलोकप्राप्तिहेतुश्च
यजमानस्य भवति । अनर्थप्राप्तिपरिहारहेतुः इष्टप्राप्तिरूपश्चायमुक्तरूप-
समारोहक्रम इत्यर्थः । अत्रैव पक्षान्तरमाह—**यत्र–तत्** । यत्र यस्मिन् विषये 4.८-१२
सूक्तद्वयं समानस्यैकस्यैव ऋषेः संबन्धि स्यात् भवेत् , तत्रानवानं अनुच्छ्व-
स्यानुच्छ्वस्य संक्रमणं कुर्यात् । तत्र योऽयं प्राणोऽस्ति सोऽमृतममरणधर्मकं
किंचिद् वस्त्वन्तरमेव भवति । तत् तेनानवान्येनामृतेन प्राणेन मृत्युं कर्तस्कन्दन-
निबन्धनं तरति अतिक्रामति । तत् तत्र लोके यथा लोको वंशेन दृढबद्धेन
वेणुकाण्डेन मत्येन वा कर्तमतितरति तद्वदेतस्य भवति । यत्रेदमानवान्यं विहितं
तत्रैव संक्रमणे प्रणवपूर्वकत्वं विधत्ते—**प्रणवेन–उपसंतनोति** । प्रणवोऽनन्तरमेव 4.१३,१४
वक्ष्यते । तेन तत्पाठपूर्वकं संक्रमः कार्यः । तत्र यः प्रणवोऽस्ति स ब्रह्मैव । परस्य
ब्रह्मणस्तेन प्रतिपादनात् । 'ओंकारः सर्ववेदानां सारस्वत्त्वप्रकाशकः'[a] इत्युक्तेः ।
तत् तेन ब्रह्मणा प्रणवेन ब्रह्म ऋङ्मन्त्ररूपम् उपसन्ततमविच्छिन्नं करोति ॥

इति चतुर्थः खण्डः

अथ प्रस्तुतमेव प्रणवमधिकृत्य प्रसंगात् कानिचिद् विध्यन्तराणि प्रकटयं-
स्तस्य शुद्धमकारान्तत्वभेदेन भेदं हृदि कृत्वा तयोर्भेदयोः कामसंयोगभेदेन
विनियोगभेदं तावद् दर्शयति—**शुद्धः–प्रतिष्ठाकामानाम्** । ये प्रजां पुत्रपौत्रादि- 5. १,२
लक्षणां कामयन्ते तेषां यजमानानां शुद्धः केवलः मकारेणासंपृक्त 'ओ' इत्येवंरूप
एव प्रणवः सर्वत्र स्यात् । ये यजमानाः प्रतिष्ठामिह लोके सर्वायुष्ट्वममुष्मिन्न-
मृतत्वं च कामयन्ते तेषां मकारोऽन्तेऽवसाने यस्यासौ मकरान्तः स प्रणव 'ओम्'
इत्येवंरूपः सर्वत्र भवेत् । इदानीं शुद्ध एव मुख्यः प्रणवः इति स्वमतं तद्विरोधि-
शाखान्तरीयमतप्रदर्शनपुरःसरं दर्शयति—**मकारान्तः–स्थितः** । एके शाखिनः 5. ३, ४
प्रणवो मकारान्त एव स्यान्न तु मकारेणासंपृक्तः शुद्ध इत्येवमाहुः । न पुनरेवं
भवितुं युक्तम् । यतः शुद्ध एव मुख्यः प्रणवः । इतरस्त्वमुख्य एव । एवमत्र

a. *Pañcīkaraṇa-Vārttikam*. V. 1.

कौषीतकेर्मते स्थितिः। एवं वदता द्वयोरपि प्रणवत्वमुक्तं भवति। तथा च सूत्रम्—'उत्तमस्य छन्दोमानस्योर्ध्वमादिव्यञ्जनात् स्त्यान ओकारः प्लुतस्त्रिमात्रः। शुद्धो मकारान्तो वा। तं प्रणव इत्याचक्षते'[a] इति। शुद्धमकारान्तयो-
5.५,६ र्द्वयोरप्युक्तकामाधिकारादन्यत्र विषयव्यवस्थितिं विधत्ते—**मीमांसितः-इति।** इतिशब्दस्योपरि वक्ष्यत इत्यस्याध्याहारः। शुद्ध एव मुख्यः प्रणवः। तस्य मकारेणामिश्रितत्वात्। इतरस्तु मिश्रितत्वाद् व्यावहारिक इत्येवं पक्षान्तरोपन्यासपुरःसरं विमृश्य निर्णीतं प्रणवस्य स्वरूपम्। अनन्तरं तयोर्विषयविभागो
5.७-११ वक्ष्यते। तमेव विभागं दर्शयति—**शुद्ध-आप्त्यै।** शस्त्रादावृचां संघाते यत्र मध्ये प्रणवस्तत्र शुद्ध एव स्यात्। तथा 'यजिष्ठो बर्हिरासदो ऋतावा यस्य रोदसी'[b] इत्यादि। तथा तेन शुद्धप्रणवाभिधानलक्षणेन प्रकारान्तरेण उत्तरस्या ऋचः संहितं संधानं भवति। उदाहरणं दर्शितमेव। यत्र पुनर्ऋग्गणेषु पुरोनुवाक्यासु चावसानं विरामोऽपेक्ष्यते तत्र मकारान्त एव प्रणवो ग्राह्यः। तथा च सूत्रम्—'अवसाने तु मकारान्तः। सर्वेषु सपुरोनुवाक्येषु'[c] इति। तच्चैतत् प्रतिष्ठाफलत्वात् प्रशस्तम्। अवसानं हि प्रतिष्ठा समाप्तिरूपत्वात्। मकारान्तश्च प्रतिष्ठा। 'मकारान्तः प्रतिष्ठाकामानाम्'[d] इति प्रतिष्ठाहेतुत्वस्योक्तत्वात्।

इत्थं प्रसंगागतं प्रणवविषयं निरूपणं परिसमाप्य प्रकृतमेव गायत्र्यादि-
5.१२, १३ सप्तच्छन्दोनुवचनं प्रागुक्तकर्तस्कन्दननिवर्तकत्वेन स्तौति—**एत-अतिप्रोळ्हस्य।** एते ऋतुत्रयनिविष्टाः छन्दसां गायत्र्यादीनां प्रवाहाः पूर्वोत्तरभावेनाविच्छेदेनावस्थितानि छन्दांस्येव। प्रवहन्ति प्रापयन्तीति नद्यादिजलतुल्यत्वात् प्रवाहाः। अवरं पूर्वं परमुत्तरं छन्दः क्रमेणातिक्रम्य शंसितारं छन्दोन्तरालकर्तस्कन्दनपरिहारेण प्रवहन्ति। यथा जलप्रवाहः स्वगतं काष्ठतृणादिकं पूर्वोत्तरभावेन स्थितं जलावयवभूतात् प्रवाहिनः क्रमादतिक्रम्य प्राप्यदेशं प्रापयति। तस्य शंसितुः प्रवाहैः छन्दांस्यतिक्रम्य नीयमानस्यार्तिः कर्तस्कन्दनजनिता न भवति। छन्दोभिर्ध्रियमाणत्वात्। अस्मिन् गायत्र्यादिच्छन्दःसप्तकशंसने शत्रुहिंसासाधन-
5.१४-१६ त्वेन ध्यानविशेषं विधत्ते—**अतियन्-स्माह।** छन्दांस्यतिक्रम्य यन् गच्छन्नेव सन् शंसिता यं द्वेषविषयं निग्राह्यं मन्येत तं शत्रुं मनसा प्रविध्येदेव प्रक्षिपेदेव।

a. ŚŚ. 1. 1. 19-21.
b. RV. 3. 13. 1;2
c. ŚŚ. 1. 1. 22.
d. KB XI. 5. २.

तथा सति स प्रसिद्धो द्वेष्यः छन्दसां कृन्तत्रेषु अन्तरालदेशेषु कर्तेषु द्रवति संशीर्यते वा। इति ह स्माह कौषीतकिरिति शेषः।

ऋतुत्रयनिविष्टानाम् 'अग्निं तं मन्ये'[a] इत्यादिपाङ्क्तसूक्तानां समानोदर्कत्वं स्तौति—**समानोदर्काणि–रमन्ते**। ऋतूनामाग्नेयोषस्याश्विनानां यान्युत्त- 5. १७,6.१
मानि पाङ्क्तसूक्तानि पठति तानि समानोदर्काणि भवन्ति। उदर्कोऽन्तः स समान एको एषां तानि तथोक्तानि। 'माध्वी मम श्रुतं हवम्'[b] इत्यस्यैवैकस्य पादस्य सर्वासामृचामन्त्यपादत्वात्। तथा 'महे नो अद्य'[c] इत्यादावपि। रसात्मकस्य सहकारफलादेर्बीजाद्यपेक्षया अन्तर्वर्तित्वादुदर्कस्य रसरूपत्वम्। छन्दसां पशुरूपत्वं नानारूपत्वसाम्यात्। 'विषुरूपाणि छन्दांसि विषुरूपाः पशवः'[d] इति श्रुत्यन्तरदर्शनात्। छन्दसामक्षरवैषम्याद् विषुरूपत्वम्। पशूनां तु प्रसिद्धं तत्। तत् तेन समानोदर्कत्वेन। गायत्र्यादीनि पशुरूपाणि छन्दांसि रसमेवाभिलक्ष्योपगतानि प्राप्तानि भवन्ति। उदर्कस्यैकस्यैव पुनः पुनः पाठात् पुनः पुनश्छन्दांसि रसरूपमुदर्कमुपगतानीत्युच्यते। यस्माल्लोके पशव उपनिवृत्योपनिवृत्य शोभनयवसत्वेन रसवत्येव प्रदेशे रतिं कुर्वन्ति। तस्माच्छन्दसामपि पशुरूपत्वात् पुनः पुना रसोपनिवृत्तिरुपपन्ना॥

इति पञ्चमः खण्डः

अथ 'अभूदुषा रुशत्पशुः'[e] इति परिधानीयां विधित्सुः सर्वकामावाप्तिहेतुत्वेन स्तौति—**सैकोना–आप्नोति**। तत्रोत्तमायाः परिधानीयायाः त्रिर्वचनविधिं 6. २–१०
सिद्धवत्कृत्यायमर्थवादः। 'अभूदुषा'[e] इत्येषा तावद् ऋक् पङ्क्तिच्छन्दस्का। सा च चत्वारिंशदक्षरा। अष्टाक्षरैः पञ्चपादैरुपेतत्वात्। तस्माद् द्विवारं पाठे क्रियमाणे सत्यशीत्यक्षराणि मिलित्वा संपद्यन्ते। तत्र षष्ट्या द्वयोर्विराजोर्बृहत्योर्निष्पन्नयोः सत्योर्विंशतिरक्षराणि शिष्यन्ते। तैश्चैकेन पादेनोना विंशत्यक्षरा विराट् संपद्यते। त्रिवारं पाठे विंशत्यधिकं शतमक्षराणां संपद्यते तैश्चतस्रो विराजः संपद्यन्ते। तथा सति संपूर्णा विराट् संपन्ना भवति। एकवारं

a. RV. 5. 6. 1. b. RV. 5. 75. 1–9.
c. RV. 5. 79. 1. d. TS. 5. 3. 8. 2.
e. RV. 5. 75. 9.

पाठे विराजं त्रिंशदक्षरामतीत्य गच्छति । दशाक्षराणामतिरिच्यमानत्वात् । भवत्वेवं ततः किमिति चेत् । यज्ञे त्रयः कामाः कामनाविषयाः सन्ति । किमेकविधस्यैव यज्ञस्य कामत्रयहेतुत्वम् ? नेत्युच्यते । संपन्ने न्यूनातिरेकरहिते संपूर्णे यज्ञे यः कामः स एकः । यो न्यूने यज्ञे कामः स एकः । योऽतिरिक्ते यज्ञे कामः स एकः । के ते कामा इति चेत् । यदेतद् यज्ञस्य संबन्धि संपन्नमूनातिरेकविरहेण संपूर्णं रूपमस्ति तत् स्वर्गफलप्राप्तिहेतुः । संपन्नस्य स्वर्गः फलमित्यर्थः । यत् पुनर्न्यूनं यज्ञरूपं तदन्नाद्यम् अन्नाद्यफलहेतुः । 'न्यूनेऽन्नाद्यं प्रतिष्ठितम्'[a] इति श्रुत्यन्तरात् । यदतिरिक्तं यज्ञस्यास्ति तत् प्रजोत्पत्तिफलहेतुः । अतिरिक्तस्य पौंस्यस्य प्रजनस्य प्रजोत्पादनसमर्थत्वात् । यस्मादेवं तस्मादत्र परिधानीयाया ऋचस्त्रिवारं पठन एव सर्वान् संपन्नादिफलभूतान् स्वर्गादीन् कामान् यजमानः प्राप्नोति ।

इत्थं सर्वकामावाप्तिहेतुत्वेन स्तुतां परिधानीयामृचं विधत्ते—**अभूद्–**
6.११, १२ **वदते** । अस्यामृचि 'माध्वी मम श्रुतं हवम्'[b] इत्याह्वानविश्रवणविषयाशीर्वचन-
दर्शनाद् इयमृगाशीर्वती । तया प्रातरनुवाकं समापयेत् । तदाशीर्वदनं पशुप्राप्ति-
फलाय संपद्यते । देवताह्वावश्रवणस्य तत्प्रसादद्वारा यजमानाभीष्टफलप्रदान-
पर्यन्तत्वात् । प्रातरनुवाकस्य च पशुप्राप्तिहेतुत्वस्योक्तत्वाद् आशिषः पशुफल-
6. १३ त्वम् । **तथा–भवन्ति** । गतम् ।
6.१४-१६ अस्याः परिधानीयाया उत्तमेन स्थानेन पठनं विधत्ते—**तस्यां–जायते ।**
तस्यां परिधानीयायाम् 'अभूदुषा'[c] इत्यस्यां वाचं पूर्वप्रवृत्तां मध्यमां परित्यजेत् । उत्तमया वाचा परिधानीयां पठेदित्यर्थः । तथा च सूत्रम्—'प्रति प्रियतममिति उत्तमया परिधायोत्सृज्य वाचम्'[d] इति । मध्यमामुत्तमस्थानेन 'प्रति प्रियतमम्'[e] इत्यस्योत्तमया 'अभूदुषा'[c] इत्यनया परिदध्यादित्यर्थः । तत् तेन मध्यमस्थानपरित्यागेन उत्तमस्थानस्वीकारेण एनं यजमानं देवेभ्यो ज्ञापयत्येव । केन प्रकारेण ज्ञापयतीति चेत् । अयं यजमान इदानीमजनि जन्म प्राप्तवानित्येवं प्रकारेण । ननु जन्म प्रागेव प्रसिद्धं कथमिदानीं तन्निवेदनम् ? पूर्वमेव प्रतिपन्नत्वात् निष्प्र-

a. AA. 1. 1. 2.
b. RV. 5. 75. 1–9.
c. RV. 5. 75. 9.
d. ŚS. 6. 6. 14-15.
e. RV. 5. 75. 1.

योजनं चेत्याशङ्क्याह—अत्र हि जायत इति । यस्मादत्र सोमयागानुष्ठान एव यजमानो जन्म प्राप्तो भवति । 'एष ह वै दैव आत्मा यजमानस्य यमृत्विजः संस्कुर्वन्ति'[a] इति प्रागाम्नातत्वात् । यथा दूरस्थितं पुरुषं विज्ञापयितुमुच्चैः स्वरेणैवार्थमुपदिशति लोकः तथा देवानां यजमानजन्मनिवेदनम् उत्तमेन स्थानेन
क्रियते । परिधानानन्तरं कस्याश्चिद् द्विपदाया जपं विधत्ते—**अथा-तिष्ठति** । 6.१७-२१
अभ्यस्यति पठतीति यावत् । एतानि यानि गायत्र्यादीनि चतुरुत्तराणि छन्दांसि सन्ति, चतुर्विंशत्यक्षरा गायत्री अष्टाविंशत्यक्षरोष्णिक् इत्यादि पूर्वस्मात् छन्दस उत्तरस्योत्तरस्य छन्दसश्चतुर्भिरक्षरैराधिक्यं चतुरुत्तरत्वम् , तानि पशव एव । एतच्चोक्तं प्राक् । द्विपदा यजमानसंबन्धि छन्दो भवति । पादद्वयोपेतत्वेन साम्यात् । तत् तेन छन्दसामुपरिष्टाद् द्विपदाया ऋचः पाठेन पशूनां यजमानस्य चाधिष्ठेयाधिष्ठातृभावः संपादितो भवति । युक्तं चैतत् पशूनामधिष्ठेयत्वं यजमानस्याधिष्ठातृत्वं च । लोके तथा दृष्टत्वात् । 'तस्मात् पुरुषः पशुषु प्रतिष्ठितो भवति चैनानधि च तिष्ठति वशे चास्य'[b] इति श्रुत्यन्तरात् ।

पशूनां पुरुषः स्वामी पशवस्तदधिष्ठिताः ।
वाहदोहादिकार्येषु प्रवर्तन्ते तदीहया ॥
वैपरीत्यमधिष्ठेयाधिष्ठातृत्वस्य न क्वचित् ।
उपलब्धचरं लोके तदसामर्थ्यतस्तथा ॥
तस्माल्लोकद्वयेऽप्येतान् यजमानवशान् पशून् ।
करोति छन्दसामूर्ध्वं प्रक्षिपन् द्विपदामृचम् ॥

इति षष्ठः खण्डः

इदानीं प्रत्येकं ऋतुत्रयनिविष्टानां सप्तसंख्याविशिष्टानां छन्दसां समु-
दितां संख्यां स्तौति—**त्रिःसप्तानि-अध्यूहति** । ऋतूनामाग्नेयादीनां संबन्धीनि 7. १-८
यानि छन्दांसि पठनीयानि तानि त्रिसंख्यावच्छिन्नसप्तसंख्याकानि भवन्ति । तत् तथा सति एकविंशतिसंख्यान्वितानि भवन्ति । सप्तसंख्यायास्त्रिसंख्यावच्छेदे सति गणनायामेकविंशतिसंख्यानिष्पत्तेः प्रसिद्धत्वात् । किमतो भवतीति चेदुच्यते । त्रिवृत्पञ्चदशसप्तदशैकविंशसंज्ञितानां चतुर्णां स्तोमानां मध्ये य एक-

a. KB. III. 10. १९. b. AB. 4. 3. 4 ( अस्ति for भवति ).

विंशाख्यः स्तोमः स पर उत्तमो भवति । त्रिवृदादीनां सर्वेषामुपरि स्थितत्वात् । तथा सति तेनैकविंशतिच्छन्दोनुवचनेनायं होतात्रैव तं परममेकविंशस्तोममाप्नोति ।

प्रकारान्तरेण तामेव संख्यां स्तौति—यद्वेव । एवकारः पौनर्वचनिकः । यच्छब्दस्य तत् सलोकतायामित्यत्रत्येन तच्छब्देनान्वयः । मासाश्चैत्रादयो द्वादश प्रसिद्धाः । तत्स्वरूपं च दर्शितं ज्योतिर्विद्भिः—'मेषाद्येकैकराशिस्फुटगतिदिनकृत्संक्रमैकैकगर्भाश्चान्द्राश्चैत्रादिमासाः'[a] इति । वसन्तादयः ऋतवः षट् । लोका भूरादयस्त्रयः । एकविंशतिः । असौ दृश्यमान आदित्य एकविंश एकविंशतिसंख्यापूरको भवति । एवं सति तेन एकविंशतिसंख्यानुवचनेन तेनैकविंशेनादित्येन । सलोकतायां समान एको लोकः स्थानं यस्य स तथा तद्भावस्तत्ता तस्याम् । यजमानमध्यूहति । उपरिभावेन स्थापयति । आदित्येन सालोक्यप्राप्तिरेकविंशतिसंख्याफलमित्यर्थः ।

अथ प्रातरनुवाकस्य सोमयागसामिधेनीरूपत्वं प्रश्नपूर्वकं प्रकटयन् तत्प्र-
7. ९ शंसां करोति—**तद्-इति** । हविर्यज्ञानां पशोश्च सामिधेन्यस्तावत् 'प्र वो वाजाः'[b] इत्यादिकाः प्रसिद्धा एव । सौम्यस्याध्वरस्य पुनः काः सामिधेन्यो भवन्तीति वक्तव्यम् । न च सोमयागो निःसामिधेनीक इति वाच्यम् । यागस्य सामिधेन्यविनाभावात् । तदभावे वा हविर्यज्ञादिष्वपि सामिधेन्यो न पठितव्या स्युः । तस्मात् सामिधेनीस्वरूपं प्रदर्शनीयमिति चोद्यम् । उत्तरं दर्शयति—
7.१० **प्रातरनुवाक—ब्रूयात्** । यदिमा इत्येव **मादिचोद्यवादिनं** प्रति प्रातरनुवाकः सौम्यस्याध्वरस्य सामिधेन्य इत्युत्तरं ब्रूयात् । हविर्यज्ञसामिधेनीभ्यः प्रातरनु-
7.११,१२ वाकस्य सामिधेनीरूपत्वेऽतिशयं दर्शयन् प्रशंसति—**अक्षरैर्-इह** । इतरासां हविर्यज्ञादिसामिधेनीनां 'प्र वो वाजा'[b] इत्याद्यानां यान्यक्षराणि तैरेवायं होता संवत्सरमुपाप्तुमिच्छति । 'तासां त्रीणि च शतानि षष्टिश्चाक्षराणि । तावती संवत्सरस्य रात्रयो अक्षरश एव संवत्सरमाप्नोति'[c] इति श्रवणात् । इह तु प्रातरनुवाके नाक्षरगणनया संवत्सरप्राप्तिः किंतु ऋग्भिरेव । ततो भवत्येवा-

a. *Tantrasamgraha*, 1. 8. b. RV. 3. 27. 1.

c. TS. 2. 5. 8. 4.

त्रातिशयः । अन्यत्राक्षरगणनावलेशेन कथंचिदेव संवत्सरप्राप्तिसंपादनात् । इह तु द्व्युत्तरत्रिशतमृचां साक्षादेव विद्यमानत्वादनायासेन संवत्सरसंमितत्वसिद्धेः । इदानीम् ऋक्संख्यागणनप्रसक्तौ कियत्य ऋचः प्रातरनुवाके वक्तव्या इत्यपेक्षायां पक्षभेदान् प्रदर्शयति—**शतमात्रम्–दधाति** । शतायुः पुरुष इति प्रायेण प्राप्त- 7.१३-१५
स्यानुवादः। तत् तेन शतसंख्यानामृचाम् अनुवचनेनास्मिन् यजमाने शतवर्षपरिमितमायुरेव स्थापयति । **विंशतिशतम्–कामाः** । विंशत्यधिकं शतं विंशतिशतम् ।7.१६-२०
वसन्तादीनां मध्येऽन्यतरस्यर्तोरहानि तावत् षष्टिर्भवति । रात्रयश्च तावत्यः । तानि संभूय विंशत्यधिकशतसंख्यानि भवन्ति । न चाहःशब्देन दिवसवाचिना कथं रात्रिग्रहणमिति वाच्यम् । तस्य रात्रिवचनत्वेनापि प्रयोगदर्शनात् 'अहनी चक्रियेव'[a] 'अहश्च कृष्णमहरर्जुनं च'[b] इत्यादौ । तत् तेन विंशतियुक्तशतसंख्योक्तवचनेन संख्यासाम्यादृतुमाप्नोति । ऋतुशब्दो देवतावचनः । 'ऋतूनेव प्रीणाति'[c] इत्यादौ चेतनधर्मतया प्रसिद्धायाः प्रीतेः ऋतुगामितयाभिधानात् । ऋतुप्राप्तौ च तद्द्वारा संवत्सरदेवतायाः प्रजापतेः प्राप्तिः । अवयवावयविनोरभेदात् । संवत्सरप्राप्तौ च ये संवत्सरे निहिताः कामास्तेषामपि प्राप्तिरप्रत्यूहा । न हि संवत्सरात् कश्चन बहिर्धा कामोऽस्ति । **त्रीणि–आप्नोति** । षष्ट्यु- 7.२१-२३
त्तराणि शतानि षष्टिशतानि । यस्मादेकस्य संवत्सरस्य षष्ट्युत्तरं शतत्रयमहानि गणनायां भवन्ति । तस्मात् तत्संख्यानुवचनेन संवत्सरसंबन्धीन्यहानि संख्यासाम्यात् प्राप्नोति । अत्राप्यहोद्वारेण संवत्सरप्राप्तिरेव फलमुक्तम् ।
**सप्तविंशतिशतानि–आप्नोति** । अहानि रात्रयश्चाहोरात्राणि । तान्येकस्य संव- 7.२४-२६
त्सरस्य संभूय विंशत्यधिकानि सप्तसंख्याकानि शतानि भवन्ति । अत्राप्यहोरात्रावाप्तेः संवत्सरावाप्तिरेव फलमुक्तम् । अहोरात्रावाप्तेर्मुख्याया विवक्षाया निष्फलत्वात् । संवत्सरस्येति संवत्सरसंबन्धाभिधानस्य वैयर्थ्यप्रसंगाच्च । न चाहोरात्रसंघातविशेषव्यतिरिक्तं संवत्सरात्मककालस्वरूपं निरूपणपथमवतरति । तस्मादिह संवत्सरावाप्तिरेव फलं नापरमिति मन्तव्यम् ॥

इति सप्तमः खण्डः

a. RV. 1. 185. 1.
b. RV. 6. 9. 1.
c. KB. III. 4. १४; 5. २५, etc.

शतं च विंशत्यधिकं षष्ट्युत्तरशतत्रयम् ।
विंशत्यभ्यधिकं सप्तशतं वेत्येवमीरिताः ॥
क्रमेण पक्षाः प्रातरनुवाकर्क्संख्यानिवेशिनः ।
चत्वारः पूर्वमधुना प्राह पक्षान्तरं श्रुतिः ॥

8. १ **सहस्रमनुब्रूयात्** । सहस्रसंख्याका ऋचः प्रातरनुवाके पठेत् । स्तौति—
8. २-४ **सर्व-वेद** । यदेतत् सहस्रशब्दवाच्यसंख्याविशेषोऽस्ति तत् सर्वमेव । अत्र न्यूनाधिकसंख्यानां सर्वासामन्तर्भावात् । संख्येयस्य च वस्तुजातस्य संख्यायामेवान्तर्भावात् । अतः सहस्रव्यतिरेकेण कस्यचिदभावात् सहस्रसंख्या सर्वरूपा । तथा प्रातरनुवाकोऽपि सर्वरूप एव । सर्वासां देवतानामत्र आद्यया 'आपो रेवतीः'[a] इत्येतया प्रतिपादनेन प्रातरनुवाकस्य सर्वदेवत्यत्वात् । तत् सहस्रसंख्यानामृचां पाठेन सर्वेण सहस्रसंख्यारूपेण सर्वरूपं प्रातरनुवाकं प्राप्नोति । इदानीं सर्वेषामेतेषां शतादिपक्षाणाम् अन्यतमेनान्यतमस्योपादेयतां स्वाभिमतमाह—
8. ५-८ **तदु-इति** । तत् तत्र । उशब्दो विशेषार्थः । योऽयं प्रातरनुवाकः स प्रजापतिरेव; सर्वदेवत्यत्वात् प्रातरनुवाकस्य । प्रजापतेः सर्वदेवतासमष्टिरूपत्वात् । स च प्रजापतिरपरिमितरूप एव । अयमेवंरूप इति परिच्छेदरूपायाः प्रतिपत्तेरविषय एव भवति । कुतो हेतोरिति चेत् । तत्र कस्यचिदपि सामर्थ्याभावात् ।

अशेषदेवतारूपमशेषजगदात्मकम् ।
प्रजापतिं परिच्छेत्तुं न शक्नोतीह कश्चन ॥

तथा च मन्त्रः—'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति'[b] इति । तस्मादपरिमितप्रजापतिरूपत्वात् प्रातरनुवाकोऽपरिमित एव स्यात् । अन्य-
8. ६ पक्षस्यानभिमतत्वमाह—**एषा-स्थितिः** । नन्वेवं सति पूर्वोक्तं यच्छतादि तदेवापरिमितशब्देनाभिहितमित्युक्तं स्यात् । न चैवं युक्तम् । तथा हि मीमांसायां षष्ठाध्याये निर्णीतम्—'आधाने श्रूयते । एका देया । षट् देयाः । द्वादश देयाः चतुर्विंशतिर्देयः । शतं देयम् । सहस्रं देयम् । अपरिमितं देयम्'[c] इति । अत्रापरिमितशब्देन किं शतादिप्रतिषेधः किं वापरसंख्याविशेषविधानमिति संदेहः । तत्रापरिमितशब्दगतेन नञा शतादिपरिमाणं निषिध्यते । एवं हि सति परिमित-

a. RV. 10. 30. 12. b. KU. 2. 21.

c. Quoted by Śabara on JS. 6. 7. 21, 22.

शब्दस्य श्रुतोऽर्थः परिगृहीतो भवति। गणनाया विषयीकृतं हि परिमितं प्रसिद्धम्। लक्षणया हि बहुत्वमवगम्यते। न च श्रौतेऽर्थे सति लाक्षणिकोऽर्थः परिगृहीतुमुचितः। तस्मादपरिमितशब्दसामर्थ्याद् देयद्रव्यस्य परिमाणशून्यता प्रतीयत इत्येकादिका गवां संख्या पूर्वत्रावयोक्ता निवार्यत इति पूर्वः पक्षः। एकादिवत् कल्पान्तरमेवापरिमितशब्देन विधीयते। न चापरिमितशब्दसामर्थ्याच्छतादिसंख्याप्रतिषेध एवायमिति वाच्यम्। रूढिवृत्त्याऽस्य शब्दस्य बह्वर्थतावगमात्। समुदायप्रसिद्धिर्हि अवयवप्रसिद्धेर्बलीयसी। अपरिमितशब्दं च बहुत्वलक्षणेऽर्थे प्रयोक्तारो बहुलं प्रयुञ्जते। कुशलप्रवीणादिशब्दवत् निरूढलक्षणाभ्युपगमात्। तस्मान्नैकादिसंख्यानिषेधः कल्पान्तरविधिरेवेति सिद्धान्तः। तत्रैवापरो निर्णयः प्रवृत्तः। अतस्तावदपरिमितं कल्पान्तरमिति तत्र संशयः— किं सहस्रादूनमपरिमितमुत सहस्रादधिकम् इति। तत्रानियम इति तावत् प्राप्तम्। अपरिमितशब्देन हि प्रयोगबाहुल्यात् बहुत्वमभिधीयते। तच्च सहस्रादूने द्विशतत्रिशतादावप्यस्ति। तस्मादनियमेन यत् किंचिदेवापरिमितमिति पूर्वः पक्षः। एकादिपक्षेषूत्तरोत्तराभिवृद्धिर्दृश्यते। एका देया षट् देयेत्यादि। तत्र सहस्रादूर्ध्वमुपन्यस्यमानमपरिमितं सहस्रादधिकं भवितुं युक्तम्। यद्यपि बहुत्वमपरिमितशब्दार्थः, यद्यपि च द्विशतादावपि बहुत्वमविशिष्टम्, तथापि प्रकरणानुरोधेन सहस्रादधिकविषयं बहुत्वमेवापरिमितशब्देन विधातुं युक्तम्। तस्मादपरिमितं देयमित्यनेन सहस्रादधिकं देयमित्ययमर्थोऽवसीयत इति सिद्धान्तः। तस्मादयुक्तमेतद् व्याख्यानमिति चेदुच्यते। स्यादेतदेवं यद्यत्र परिमाणान्तरं विधित्सितं स्यात्। न त्वेतदेवम्। प्रातरनुवाकस्य सहस्रत्वनियमात्। किं तर्हि विधित्सितम्? पूर्वोक्तं यच्छतादि।

ननु एका देयेत्यत्राप्येवमेव कस्मान्न भवति? एका देयेत्यादिपूर्वोक्तानामानर्थक्यापत्तेरिति ब्रूमः। नन्वत्राप्यानर्थक्यापत्तिस्तुल्यैवेति चेत्, न। काम्यत्वाच्छतादीनां, तेषामेव पुनर्नित्यार्थतया विधानं भविष्यति। अपरिमितशब्दस्तर्हि कथम्? परिमितं भवत्येवम्। तर्ह्ययं प्रतिषेधः स्यात्। न विधिरेवायं विकल्पफलः। एतदुक्तं भवति-पूर्वोक्तं यच्छतादि परिमाणं तदर्थवादकीर्तितायुरादिफलविशेषप्रतिनियतम्। तदेव शतादिसर्वमनियमेन नित्यार्थं स्यादिति। तर्हि कथं शताद्यं परिमितमित्युच्यत इति चेद् अब्राह्मण इत्यादाविवान्यत्वाभिप्रायेणेति ब्रूमः।

तस्मादयमर्थः—आयुरादिकामनावतः शतादिनियतपरिमाणवत्तया प्रातरनुवाकः पठनीयः। नित्यार्थप्रयोगे शतादीनामनियमेन यः कश्चित् कल्प उपादेय इति। अथवा यथान्यायस्थिति सहस्रादधिकमेवापरिमितशब्दार्थोऽस्तु। स चायं पक्षः कौषीतकिमुनेरभिमतः। अन्ये तु शतादिपक्षा अन्यैरभिमता इति।

प्रातरनुवाकमनुवक्ष्यन् होता हविर्धानसंज्ञितस्य मण्डपस्य संबन्धिनि पूर्वस्मिन् द्वारप्रदेश उपविश्य प्रातरनुवाकं पठेत्। तथा च सूत्रम्—'सव्यावृद्धविर्धानयोः पूर्वस्यां द्वार्युपविशति। देवेभ्यः प्रातर्यावभ्य इत्युक्तोऽभिहिंकृत्य मध्यमया वाचा प्रातरनुवाकमन्वाह'[a] इति। तत्र प्रातरनुवाकपाठस्य यथोक्त-
8. १० देशसंबन्धं प्रश्नोत्तराभ्यां स्तौति—**तद्-इति**। हविर्धानयोरिति सामीप्य-
लक्षणा सप्तमी। यथा सदोनामधेयमण्डप एव शस्त्राणि शस्यन्ते, तथैव प्रात-
रनुवाकोऽपि तत्रैव कस्माद्धेतोर्न प्रयुज्यत इति प्रश्नः। उत्तरम्—**शिरो-**
8.११-१३ **समर्धयति**। यज्ञात्मकस्य शरीरितया परिकल्पितस्य हविर्धाने शिरो भवति। वैशब्दः श्रुत्यन्तरे तत्प्रसिद्धिद्योतनार्थः। यथा चक्षुरादयः प्राणाः शिरसि श्रिताः एवं हवींषि हविर्धानयोः श्रितानि भवन्ति। अतो हविर्धानस्य शिरोरूपत्वम्। प्रातरनुवाको वाग्रूपः। मनुष्यादिसर्ववाक्प्रवृत्तेः प्रागेव प्रातरनुवाकप्रारम्भेण सर्ववाचामनेन परिगृहीतत्वात्। यस्माद्धविर्धाने शिरो भवति। प्रातरनुवाकश्च वाग्रूपः, तस्माद्धेतोर्हविर्धानदेशे प्रातरनुवाकानुवचनेन यज्ञस्य शिरो वाचा समृद्धं संपूर्णं करोति। नहि वाग्रहितं शिरः समृद्धं भवति। तस्माद् यज्ञशिरःसमृद्ध्यर्थं हविर्धानयोरेव प्रातरनुवाकः पठनीय इत्युत्तरम्। तर्हि प्रातरनुवाकवच्छस्त्राण्यपि हविर्धानयोरेव पठ्यन्ताम्। किमिति तानि सदोदेशे पठ्यन्त इत्यापतिते तच्छं-
8.१४-१६ सनस्य सदःस्थानतामन्नरूपत्वोक्त्या स्तौति—**उदरं-अन्नाद्यम्**। अत्रापि वैशब्दः श्रुत्यन्तरप्रसिद्ध्यर्थः। यथा मुखे प्रक्षिप्तमन्नमुदरं गच्छति एवमाहवनीयमुखे हुतशेषं हविः सदोदेशं नीयते। तेन सदोदेशस्य उदररूपत्वम्। यथान्नं पुरुषस्य सर्वस्वं भवति एवं यज्ञस्य शस्त्राणि सर्वस्वं भवति। तस्मादुक्थानामन्नरूपत्वम्। यस्मादेवं तस्मादुदरस्थानीये सदस्येवोक्थानां शंसनं युक्तम्। अन्नस्योदराधारतया प्रसिद्धत्वात्। शतमात्रमित्यादिना प्रदर्शितेषु पक्षभेदेषु क्रमादूनसंख्य-
8.१७-२७ पक्षादधिकसंख्यपक्षस्य संभवे सत्युपादेयतामाह—**तद्-यजमानस्य**। तत् तत्र

a. ŚS. 6. 3. 8–9.

लोके यथा अनः शकटं भवति एवं यज्ञो भवति । सादृश्ययोगात् । अनो ह्यनेकावयवसन्निवेशविशेषविशिष्टमधिष्ठातृभिः शाकटिकैः पुरुषैः सम्यगधिष्ठितमभिलषितधान्यादिभारवहनधुरंधरं भवति । एवं यज्ञोऽपि नानाविधाङ्गतरङ्गितमूर्तिः नेतृभिः पुरुषैः सम्यङ्नीयमानो यजमानाभिलषिताशेषकामप्राप्तिहेतुर्भवति । प्रातरनुवाकस्य धान्यरूपत्वमपरिमितत्वसादृश्यात् । उक्थानां पात्ररूपत्वं परिक्लृप्तरूपत्वसाम्यात् । यथा लोके धान्यपूर्णानि कुसूलादिपात्राणि शकटे निधाय शकटमभिमतं देशं प्रापयन्ति एवं प्रातरनुवाकधान्यमुक्थाख्येषु पात्रेषु संभृत्य यज्ञरूपे शकटे निधाय यज्ञं निर्वर्तयति । एवं च सति यो होता अल्पसंख्यायुक्तमेव प्रातरनुवाकं पठेत् तस्य होतुरल्पधान्ययुक्तपात्रवद् उक्थान्यप्रतिष्ठितानि भवेयुः । धान्यसंपूर्णस्यैव पात्रस्य लोके दृढीभावदर्शनात् । उक्थानां विनाशमनु पश्चाद् यजमानमपि भ्रेषो विनाशोऽनुगन्तुमीश्वरो भवति । शस्त्रसारत्वाद्यज्ञस्य तद्विनाशे यज्ञस्यैव नाशाद् यजमानोऽपि विनश्येदित्यर्थः । तस्मात् कारणात् बहु सहस्राभ्यधिकसंख्यमेव प्रातरनुवाकं पठेदित्यभिज्ञा आहुः । तत् तेनोक्थानि धान्यसंपूर्णपात्रवद् दृढानि करोति । या यज्ञस्येत्यादि गतम् ॥

इत्यष्टमः खण्डः

प्रकारान्तरेण प्रातरनुवाकस्य सहस्रपरिमाणत्वं प्रशंसति—**अथो-इति ।** 9.१,२
अपि च यज्ञविषये बहूनामुक्थानां मध्ये त्रीण्येवोक्थानि सहस्रपरिमाणानि भवन्ति । अयं प्रातरनुवाकस्तावत् साहस्रः । तथाश्विनमहाव्रताख्ये शस्त्रे अपि साहस्रे भवतः । एतेभ्योऽन्यदुक्थं सहस्रपरिमाणं न किंचिद् यज्ञेऽस्ति । अतोऽसाधारणत्वात् प्रशस्तमिदं साहस्रत्वम् । अथ प्रातरनुवाकनामनिर्वचनार्थवादसूचितं कालविशेषं प्रदर्शयति—**एतद्-विसर्गात् ।** 'ऊर्ध्वमर्धरात्रान्महारात्रः'[a] 9.३
इत्याचार्याः । एतत् प्रकृतं प्रातरनुवाकाख्यमुक्थं महारात्राख्ये काले उपाकुर्यात् प्रारभेत । अत्रापि विशेषमाह—पुरा वाचो विसर्गादिति । एतदेव स्पष्टयति—
**यत्र-ततः ।** एतदिति क्रियाविशेषणम् । यत्र यस्मिन् काले पशवो मनुष्याः 9.४

a. *Bhāṣya* on ŚŚ. 6. 2. 1.

पक्षिणश्च वाचं वैखरीरूपामभिलापात्मिकां व्यालभन्ते वदन्ति तस्मात् कालात्
9.५,६ पूर्वमेव प्रातरनुवाकम् उपाकुर्यात् । कुत इत्यत्राह—**वाचम्-इति।** भूतानि
पश्वादीनि रात्रौ वाचंयमानि सम्यगुपरतवाग्व्यापाराणि मूकीभूतानि भूतानि
भूत्वा स्वापं कुर्वते इति यदस्ति । एतद् एतेन वाचमाप्याययन्ति वर्धयन्त्येव ।
यस्मादेवं तस्माद्धेतोरार्पीनां प्रवृद्धां अध्यासिक्तामखण्डितां वाचं प्रथमतः पश्वा-
दिभ्यः पूर्वमेव परिगृह्य समृद्धो भवानीत्यभिप्रायेण वाग्विसर्गात् प्रागेव प्रातरनु-
वाकं प्रारभेत ।

उपांश्वन्तर्यामग्रहयोः उपांशुग्रहहोम आदित्योदयात् पूर्वमेव कर्तव्यः ।
अन्तर्यामग्रहयागस्तदुत्तरकालम् । तथा च वक्ष्यति—'तयोर्वा उदितेऽन्यमनुदितेऽ
न्यं जुह्वति'[a] इति । तत्रान्तर्यामग्रहयागपरिसमाप्तिपर्यन्तं वाग्यमनं विधत्ते—
9.७-१० **न-इति।** प्रातरनुवाकादारभ्यान्तर्यामग्रहहोमपर्यन्तं वाग्विसर्गो न कर्तव्यः ।
कुत इति चेत् । उपांश्वन्तर्यामयोः प्राणापानरूपत्वं वक्ष्यति । प्रातरनुवाकस्य
वाग्रूपत्वमुक्तम् । नेदिति परिभयार्थो निपातसंप्रयोगः । अहं प्राणापानौ वाचं च
कर्मभूतामन्येनान्तर्हिते करवाणीति परिभयं द्योतयन् वाग्विसर्गं न कुर्यात् ।
प्राणापानयोर्वाचश्च व्यवधाने सति सर्वव्यवहारविलोपप्रसक्तेः ।

इदानीं प्रातरनुवाकप्रतिपत्पाठमधिकृत्य शाखान्तरिभिरभिमतं कंचिद्
9.११-१३ विशेषमुपन्यस्य प्रतिषेधति—**तद्-अनाव्रस्काय।** तत् तत्र प्रातरनुवाकोपा-
करणे । हशब्द ऐतिह्यार्थः । एके शाखिनः 'कश्छन्दसाम्'[b] इत्यृचं पूर्वं जप्त्वा
पश्चाद् 'आपो रेवतीः'[c] इत्येतया प्रातरनुवाकं प्रारभन्ते। न तदस्माकमभिमतम् ।
'आपो रेवतीः'[c] इत्यस्या ऋचः पूर्वं कामप्यन्यामृचं न परिहरेदाहरेत् पठेत् ।
एतदेव स्थितं मतम् । कुत इति चेत्, अनाव्रस्काय । पूर्वोक्तं देवतान्तरेभ्य आव्र-
श्चनं विच्छेदो मा भूदिति । 'कश्छन्दसाम्'[b] इत्यस्यामृचि 'इन्द्रस्य निचिकाय कः
स्विद्' इति देवताभिधायकपदवत्त्वादनिरुक्तत्वविरहात् पूर्वोक्तानिष्टप्रसक्तेः दुर्नि-
वारत्वाद् आपोरेवतीययैव प्रारम्भो युक्तः। तथा च सूत्रम्-'नापोरेवत्यै पुरस्ता-
ज्जपेन्न जुहुयाद्'[d] इति । अभ्यासोऽध्यायसमाप्तिसूचनार्थः ।।

इति नवमः खण्डः

a. KB. XII. 5. १०.
b. RV. 10. 114. 9.
c. RV. 10. 30. 12.
d.

इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
प्रायात् प्रातरनूक्तिकर्म कथयन् कौषीतकिब्राह्मण-
व्याख्याने सुखदे सुधीपरिषदामध्याय एकादशः ।।

## इति कौषीतकिब्राह्मणव्याख्याने द्वितीयदशके प्रथमोऽध्यायः

अथ

## द्वादशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ॥
एकादशेऽध्याय इति प्रयोगक्रमाश्रयात् प्रातरनूक्तिरुक्ता ।
अथात ऊर्ध्वं यदिह प्रयोज्यं तद् वर्ण्यते द्वादश आ वपायाः ॥

तत्रादौ तावत् प्रातरनुवाके परिहितेऽध्वर्युसंप्रैषादनन्तरपठनीयानाम् अपोनप्त्रीयाख्यानां विंशतिसंख्याकानां 'प्र देवत्रा'[a] इत्याद्यानामृचां पठनं विधातुं
1.१-३ तदभिधेयानामपां प्रशंसामुखेन तदभिधायकमृक्संघातं प्रशंसति— **यज्ञो-यन्ति ।**
अपो यच्छन्तीति केषांचित् पाठः । या एता आपो नाम ता यज्ञ एव अभिषवद्वारेण यज्ञसाधनरूपत्वात् । 'आयुर्घृतम्'[b] इत्यादिवत् साधने साध्याभेदोपचारात् । यस्मादेता आपो यज्ञरूपास्तस्माद्धेतोः यज्ञरूपाणामपामाहरणार्थम् ऋत्विग्यजमाना अपः अच्छ आभिमुख्येन यन्ति गच्छन्तीति यदस्ति, तेन यज्ञमेवाभिमुख्येन गच्छन्ति । अपां प्राप्तिं यज्ञप्राप्तिरूपत्वेन प्रशस्य प्रकारान्तरेण पुनरपि प्रशं-
1.४,५ सति— **अथो-संसृजन्ति ।** अपि च या एता आपः सन्ति ता ऊर्क्छब्दवाच्यो रस एव भवति । अमृतशब्दाभिधोऽत्यन्तसारभूतः सूक्ष्मोऽन्नरस ऊर्गित्युच्यते । स चायं रसरूपः । तद्धेतुत्वाच्चापां तद्रूपत्वम् । तत् तेनापां ग्रहणेन स ऊर्क्संबन्धिना रसेन हविः सोमलक्षणं संसृष्टं करोति । प्रातरनुवाकानन्तरमपां ग्रह-
1.६,७ णात् । प्रकारान्तरेण स्तौति— **अथो-धत्ते ।** अपि च या आपस्ता अमृतत्वमेव तद्धेतुत्वात् । मुद्गरादिप्रहारमूर्छितस्य विगतप्राणतया प्रतीतस्याद्भिरभिषेके सति उत्थानदर्शनात् । 'अमृतं वा आपः । तस्मादद्भिरवतान्तमभिषिञ्चन्ति'[c] इत्यन्यत्र श्रवणात् । तत् तेनामृतत्वमेवात्मनि स्थापयति ।

a. RV. 10. 30. 1. b. TS. 2. 3. 2. 2.
c. TS. 5. 6. 2. 1-2.

एवमभिधेयानामपां प्रशंसनप्रणाड्या 'प्र देवत्रा'[a] इत्येतत् सूक्तं प्रशस्य संप्रति साक्षादेव यज्ञप्रवृत्तिपरिपन्थिभूतरक्षोनिबर्हणहेतुत्वाभिधानेन स्तौति—
**तत्-प्रत्यायन्ति** । यज्ञं मोहयन्तीति यज्ञमुहः यज्ञप्रवृत्तिविघातकानीति यावत् । 1.८-१४
तीर्थेषु नद्याद्यवतारस्थानेषु स्थितान्यपः गोपायन्ति रक्षन्ति । यज्ञार्थमपां ग्रहणं मा भूदिति । कथं नाम यज्ञप्रवृत्तिर्विहन्येतेति समालोचयन्तः तन्मूलमाप एवेति निश्चिन्वाना मूले कुठारप्रक्षेपन्यायेन तीर्थदेशेऽवस्थिताः सन्तो यज्ञार्थमब्ग्रहणं कुर्वाणान् जिघांसन्तोऽसुरा राक्षसाश्चापो रक्षन्ति । तत्र ये केचिदृत्विग्यजमाना अपोऽभिमुखीकृत्य गतवन्तस्तदैव तान् सर्वान् हिंसितवन्तः । तस्माद्धेतोः कवषो नाम कश्चिन्महर्षिः पञ्चदशसंख्याकाभिर्ऋग्भिरुपेतं 'प्र देवत्रा'[a] इत्यादिकं सूक्तं दृष्टवान् । दृष्ट्वा च तत् सूक्तमनूक्तवान् । तेनास्य सूक्तस्यानुवचनेन यज्ञविध्वंसहेतूनि रक्षांसि हिंसितवान् । यस्मिंश्च काले कवषाख्येन महर्षिणा तद् यज्ञध्रुग्रक्षोहिंसनं कृतं तस्मात् कालादर्वागेवर्त्विग्यजमाना यज्ञार्थमपां ग्रहणं कृत्वा विनाशरहिताः सुखेन यज्ञं पुनरागच्छन्ति । अत्र सूत्रम्—'अप इष्य होतरित्युक्तः प्र देवत्रेति द्वादशीं परिहाप्य'[b] इति । अस्यार्थः—प्रातरनुवाकस्य परिधानीयामृचं पठित्वा वाग्यते स्थिते सति होतर्यध्वर्युः अपोनप्त्रीयानुवचनार्थम् 'अप इष्य होतः'[c] इति प्रैषं वदति । तदा होता 'प्र देवत्रा'[a] इत्येतत् सूक्तं पठेत् । अत्र चायं विशेषः—पञ्चदशर्चं खल्वेतत् सूक्तं भवति । तत्र या द्वादशी 'आपो रेवतीः'[d] इत्येषास्ति तां प्रातरनुवाकप्रतिपद्भूतामुत्सृज्य चतुर्दशर्चः पठनीया इति । अमुं विशेषं सिद्धवत्कृत्य विशेषान्तरम् 'आववृततीः'[e] इत्यस्याः पूर्वं
'हिनोता नः'[f] इत्यस्याः पठनलक्षणमवधिप्रदर्शनपूर्वकं विधत्ते—**अथ-अनुब्रूयात्**। 1.१५,१६
तीर्थदेशं गतेनाध्वर्युणा 'देवीराप'[g] इति मन्त्रेण काचिदाज्याहुतिरप्सु कर्तव्या । तथा च बौधायनः—'अथाप्सु बर्हिः प्रास्याभिजुहोति'[h] इति । प्रास्य प्रक्षिप्येत्यर्थः । तदेतदनुवदति अथाद इति । अद इति क्रियाविशेषणम् । अमुत्रेति

a. RV. 10. 30. •

b. ŚS. 6. 7. 1.

c. TS. 6. 4. 3. 3.

d. RV. 10. 30. 12.

e. RV. 10. 30. 10.

f. RV. 10. 30. 11.

g. ApŚ. 8. 8. 15.

h. Cf. BŚ. 8. 19. 14–15.

होत्रपेक्षया किंचिद्व्यवहितस्य तीर्थदेशस्य निर्देशः । तामाहुतिं सम्यक् प्रतिलक्ष्यैतां 'हिनोता नः'[a] इत्यृचं पठेत् ॥

इति प्रथमः खण्डः

2.१-२ **हिनोता–अभिरूपा।** तस्या आहुतेर्याज्यास्थानीयैषा ऋग् भवति। सा चैषा देवयज्येति पदेन युक्तत्वादाभिरूप्ययुक्ता। प्रसिद्धं हि याज्याया आभिरूप्यम्। अस्यामृचि च देवयज्येति साक्षादेव देवयागवाचिपदश्रवणाद् अस्त्याभिरूप्यम्। अत्र सूत्रम्–'नवानूच्यैकादशीमाहुतावप्सु हूयमानायाम्'[b] इति। आद्यायास्त्रिरावृत्तिराहित्येन क्रमेण नवर्चः पठित्वा दशमीम् 'आववृ॑ततीः'[c] इत्येतां क्रमायातामवधीर्य तस्याः स्थाने 'हिनोता नः'[a] इत्येतामेकादशीं पठेत्। तस्याश्चाप्स्वाहुतिहोमकालः काल इति सूत्रार्थः। 'हिनोता नः'[a] इत्यस्या ऋचोऽयमर्थः—हे आपः नः अस्माकमध्वरं यज्ञं प्रेरयत। किमर्थम्? देवानां यजनार्थम्। यज्ञस्याप्सु श्रितत्वात्। तदेव विशदयति—ब्रह्म परिवृढं कर्म प्रेरयत। किमर्थम्? धनानां लाभाय। किंच हे आपः! यूयमृतस्य यज्ञस्य योगे संयोगे सत्यात्मीयमूधो विष्यध्वम्। तथा अस्मभ्यमस्माकमर्थे सुखवत्यो भवतेति।

2.३ अवधिप्रदर्शनपूर्वम् 'आववृ॑ततीः'[c] इत्येतामृचं विधत्ते—**आववृ॑ततीः–आवृत्तासु।** आवृत्तासु प्रतिनिवृत्तासु। अध्वर्युरेकधना गृहीत्वा ताः प्रतिनिवर्तयति। तस्मिन् काले 'आववृ॑ततीः'[c] इत्यृचं पठेत्। हे ऋषे! त्वमपो वन्दस्व। कीदृशीः? आववृ॑ततीरावर्तमानाः। अपि च द्विवाराः। द्वयोर्लोकयोर्धारयित्रीः। गोनिमित्तं युध्यमाना इव सेना अभिमुखं चरन्तीः। भुवनस्य जनयित्रीः पालयित्रीश्च। तथा सहवृद्धाः समानस्थानाश्च। एवंविधा आपो वन्दस्वेति। तथा च सूत्रम्—'आवृत्तासु दशमीम्'[d] इति।

2.४ अवधिप्रदर्शनेन त्रयोदशीं विधत्ते—**प्रति–प्रतिख्यातासु।** प्रतिख्यातासु आधारभूतघटावस्थितास्वप्सु होत्रा दृश्यमानासु। तथा च सूत्रम्—'प्रतियदाप

a. RV. 10. 30. 11.
b. ŚS. 6. 7. 2.
c. RV. 10. 30. 10.
d. ŚS. 6. 7. 3.

इति दृश्यमानासु'[a] इति। हे आपः ! यदा वोऽहं प्रतिपश्यामि। कीदृशीः ? मत्समीपमागच्छन्तीः। घृतपयांसि मधूनि च धारयन्तीः। घृतादिदोग्धृत्वं सरस्वत्याः श्रूयते 'घृतं पयो दुदुहे नाहुषाय'[b] इति। तदभिप्रायमिदं वचनम्। अध्वर्युभिर्मनसा संगच्छमानाः। तथा इन्द्रार्थमभिषुतं सोमं हरन्तीः। एवंविधा वो यदाहं प्रतिपश्यामि तदानीं सरस्वती गृणते मह्यं पयोऽधादिति पूर्वेणान्वयः।
'उपेमसृक्षि'[c] इत्येतत्सूक्तगतासु तृतीयामृचं विधत्ते—**समन्या-समायतीषु**। 2.५
मैत्रावरुणचमसस्य वसतीवरीणां च संपर्के क्रियमाणे 'समन्या'[d] इत्यृचं पठेत्। तथा च सूत्रम्—'समन्या इति समायतीषु'[e] इति। मैत्रावरुणचमसगता वसतीवर्यश्च परस्परं संगच्छन्ते। मिलिताश्च ताः सर्वाः अपां समानं साधारणमूर्वं पृणन्ति पूरयन्ति। तथा तमेव शुचिं दीप्तमपान्नपातं स्वयं निर्मलाः सत्य आपः परितिष्ठन्तीति।

'अश्वावति'[f] इति सूक्ते द्वितीयां विधत्ते—**आपो-अवनीयमानासु**। तथा 2.६
च सूत्रम्—'आपो न देवीरिति होतृचमसेऽवनीयमानासु'[g] इति। होत्रियं होतुः स्वभूतं चमसम्। देवीर्देव्यो द्योतमानाः। आपो न यथा आप उपयन्ति उपगच्छन्ति तद्वदुपरि वर्तमाना एतमेव चमसमव अवस्तात् पश्यन्ति। होतृचमसेऽस्माकं सोमाभिषवायापः पूरिता इति। तेषां दृष्टिरपि एतस्मिन् संलग्नाभूत्। तत्र[1] दृष्टान्तः—विततं विस्तीर्णं रजो ज्योतिः सूर्यसंबन्धि निरन्तरमवस्तात् पतति। तद्वत् देवयुं देवान् कामयमानमेतं चमसं प्राचैः प्राचीनम्। यद्वा प्राञ्चनैः प्राग्गमनैरुत्तरवेद्यभिमुखं होमकाले प्रणयन्ति। होमार्थं प्रणीतं ब्रह्मप्रियं ब्रह्मणा सोमलक्षणेनान्नेन प्रीतं संतृप्तं पूरितमित्यर्थः। जोषयन्ते सर्वे देवाः स्वं स्वं चमसं सेवन्ते वरा इव कन्यकाः। यथा वरा ममेयं भविष्यति ममेयं भविष्यति इति कन्यकां सेवन्ते, एवं देवा अपि ममायं सोम इत्यस्य पार्श्वे वर्तन्ते इत्यर्थः। अथ हविर्धाने आनीयमानास्वप्सु पठनीयामृचं[2] कांचिद्

a. ŚŚ. 6. 7. 4.
b. RV. 7. 95. 2.
c. RV. 2. 35.
d. RV. 2. 35. 3.
e. ŚŚ. 6. 7. 5.
f. RV. 1. 83.
g. ŚŚ. 6. 7. 6.

1. T. तद्
2. T. C. omit ऋचं

2. ७–९ विधत्ते—**आ-धिन्वन्ति** । कुत एतत् ? 'आ धेनव इत्येतामायतीषु'[a] इति सूत्रकारवचनात् । नन्वस्यामृचि धेनुशब्दश्रवणात् तस्य च विशिष्टगोपदार्थवाचितया प्रसिद्धत्वाद् अपामस्यामृच्यनभिधानाद् अस्या न कर्मण्यस्मिन् समवेतार्थत्वमित्याशङ्क्य योगवृत्त्यापामभिधानात् नोक्तदोष इत्याशयेन धेनव इति पदं व्याचष्टे—आपो वै धेनवः इति । कथं धेनुशब्देनापामभिधानमित्यत्राह—आपो हीदं धिन्वन्ति इति । 'धिवि[1]प्रीणने'[b] इति धातोरुत्पन्नो हि धेनुशब्दः । अखिलजगत्प्रीतिहेतुत्वं चापामेव । अतो धेनुशब्देनापामभिधानं युक्तमेव । धेनव आपः । आभिमुख्येन उपयन्तु समीपं प्राप्नुवन्तु । कीदृश्यः ? तूण्यर्थाः तूर्णगमनाः । अमर्धन्तीरस्मानहिंसन्त्यः । मधुना मधुररसेन पयसोपलक्षिताः । यस्माद् विप्रः मेधावी । बृहतीः सप्तनदीरन्यतमामाह्वयति । किमर्थम् ? महते धनाय । कीदृशीः ? मयोभुवः सुखस्य भावयित्रीरिति ।

2.१०,११ अथाध्वर्युविषयप्रश्नरूपं कंचिन्मन्त्रमुत्पाद्य विनियुङ्क्ते—**अथ-इति** । होतारं स्वायतने स्थितमभिलक्ष्यावर्तनं कृत्वाध्वर्युस्तिष्ठति । तं तिष्ठन्तमध्वर्युं
2.१२,१३ प्रति पोता प्रश्नवाक्यं ब्रूयात् । प्रश्नवाक्यं व्याचष्टे—**ऐषीर्-प्रत्याह** । अत्राप्च्छब्देनैवं यज्ञ एवाभिधीयते । 'आपो वै यज्ञः'[c] इति पुरस्तादुक्तत्वात् । प्रश्ने
2. १४ प्लुतिः । अध्वर्योः उतेमनन्नमुः इत्युत्तरवाक्यं व्याचष्टे—**अविदाम-आह** । आस्वप्सु यद् यज्ञप्राप्तिलक्षणं प्रयोजनमैषीष्म । इष्टवन्तो वयं तदिदानीमविदाम लब्धवन्तो वयम् एता आपस्तस्मै प्रयोजनायानंसत नमनं प्रह्वीभवनमानुकूल्यं कृतवत्यः । इत्ययमर्थ उतेमनन्नमुः इत्युत्तरवाक्येनेच्यत इत्यर्थः । **प्रतिवचना-**
2.१५-१७ **नन्तरं** होतुः कस्यचिन्निगदस्य पाठं विधत्ते—**प्रत्युक्तो-दधाति** । तथा च सूत्रम्-'प्रत्युक्तो निगदं तास्वध्वर्यवाधावेन्द्राय सोममूर्जस्वन्तं पयस्वन्तं मधुमन्तं वृष्टिवनि वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिमते विश्वदेव्यावते यस्य पीत्वा मद इन्द्रो वृत्राणि जङ्घनत् प्रसजन्यानि तारिषः'[d]

a. ŚŚ. 6. 7. 7.
b. Dh. Pāṭha. 593.
c. AB. 2. 8. 2.
d. ŚŚ. 6. 7. 10.

1. Mss. धिनु

इति । तद्धेतुत्वात्ताच्छब्द्यन्यायेन ऊर्गादिशब्दवाच्यत्वम् । 'अम्बयो यन्त्यध्वभिः'[a]
इति तृचस्य पठनं विधत्ते—**अम्बयो–इति** । अत्राभिरूप्यसिद्ध्यर्थं अम्बय इति 2. १८
पदस्यार्थमाह—**आपो—अम्बयः** । अध्वरीयतामध्वरमात्मानमिच्छतामस्माक- 2. १९
मम्बयो मातृस्थानीया आपः । अपां मातृत्वम् 'उशतीरिव मातरः'[b] इत्यन्यत्रा-
प्याम्नातम् । ता आपोऽध्वभिर्देवयजनमार्गैर्यन्ति गच्छन्तीति । कीदृश्यः ?
जामयः हितकारिण्यो बन्धवः । तथा मधुना माधुर्यरसेन युक्तं पयः पृञ्चतीर्ग-
वादिषु योजयन्त्य इति । अस्त्वबभिधायकत्वम्, ततः किमित्यत उक्तम्—**अपो–** 2. २०
**स्तौति** । यस्मादत्रापो धेयतया स्थिताः । अस्ति चाम्बय इत्यादेस्तत्-
सामर्थ्यम् । तस्मादस्त्याभिरूप्यमिति । 'अपो हि यतीः स्तौति' इति पाठे यस्माद्
यतीर्गच्छन्तीरपोऽत्र स्तौति तस्माद् 'अम्बयो यन्त्यध्वभिः'[a] इति गच्छन्तीना-
मपामभिधायिकेयमृगभिरूपेत्यर्थः । प्रदेवत्रीयसूक्तस्योपोत्तमामुत्तमां च विधत्ते—
**एमा–परिदधाति** । हे अध्वर्यवः इमा आप आगताः । कीदृश्यः ? रेवत्यः 2.२१,२२
पशुमत्यः । तथा जीवन्तः सर्व एव धनार्हा यासां तास्तथोक्ताः । तथा ईदृशीरापः
हे सखायः समानख्याना भवन्तः सादयत । तदेव विशदयति—हे सौम्यासः सोम-
संपादिनो यूयमपो बर्हिषि निधत्त न । कीदृशीः ? अपांनप्त्रा संवादं कुर्वन्तीः ।
ता[1] अपो निधत्त नेति । आग्मन्नाप इत्यस्या ऋचोऽयमर्थः । आप आगताः ।
कीदृश्यः ? उशतीः कामयमानाः । आगता वा अध्वरे यज्ञे निषण्णाः । देव-
कामाः । यस्मादेवं तस्मात् हे अध्वर्यवः इन्द्राय सोमाभिषवं कुरुत । युष्माकं
देवयज्या इदानीं सुखेन कर्तुं शक्या भवतीति । **अभिरूपा–समृद्ध्यै** । 2.२३,२४
इत्यादि गतम् ॥

इति द्वितीयः खण्डः

अथ 'प्र देवत्रा'[c] इत्येतत् सूक्तं प्रकारान्तरेण प्रशंसति—**अनूकः–वज्ररूपम्** । 3. १-८
पुरा देवानां कस्मिंश्चिद् यज्ञे प्रातरनुवाकानुवचनोत्तरकालमुक्थानां शस्त्राणां

a. RV. 1. 23. 16. b. RV. 10. 9. 2.
c. RV. 10. 30.

1. T. एता

शंसनात् पूर्वं योऽन्तरालकालस्तस्मिन् काले छिद्रान्वेषिणोऽसुरा देवान् हिंसितुकामा अनुद्रवणं कृतवन्तः। अथ विदितैतद्वृत्तान्ताः 'अमी असुरा अस्मान् प्रातरनुवाकशस्त्रलक्षणवज्ररहिते काले हन्तुमुद्युक्ता ध्रुवं हन्युरेव निरायुधत्वादस्माकम्' इति महतीं भीतिं दधानास्तन्निबर्हणोपायं जिज्ञासमाना एतं त्रिभिः त्सर्वादिभिः समृद्धं संपूर्णं वज्रं दृष्टवन्तः। कथं त्रिःसमृद्धत्वमिति चेद् उच्यते। 'आपो रेवतीः'[a] इत्यस्यामृचि यदाप इत्याद्यं पदमस्ति तदेकं वज्ररूपम्। अपां वृत्रवधकर्मणि वज्राप्यायनरूपत्वाद् वज्ररूपत्वम्। तच्च तैत्तिरीये श्रूयते—'तस्मै त्वष्टा वज्रमसिञ्चत्। तपो वै स वज्र आसीद्'[b] इति। 'सरस्वती तद् गृणते वयोऽधाद्'[a] इत्यत्र सरस्वतीति द्वितीयं वज्ररूपम्। सरस्वत्या **वज्ररूपत्वं**[1] 'वाग्घि वज्रः'[c] इत्यादौ प्रसिद्धम्। तथैतत् 'प्र देवत्रा'[d] इति सूक्तं पञ्चदशर्चं भवतीति यदस्ति तत् तृतीयं वज्रस्य रूपम्। वज्रस्य पञ्चदशत्वात् पञ्चदशसंख्याया वज्ररूपत्वम्। एवं रूपत्रयसमृद्धं वज्रमसुरनिबर्हणसमर्थं देवाः
3.९,१० संपादितवन्तः। **एतेन–नुदते**। इत्यादि गतम्।

अथैतत्सूक्तद्रष्टुः महर्षेः महानुभावतामाख्यायिकोपन्यासेन प्रकटयन् एतदेव
3.११-२३ सूक्तं स्तौति—**माध्यमाः–विनिन्युः**। मध्यममण्डलद्रष्टारो महर्षयो माध्यमाः। 'मध्यमेषु माध्यमाः'[e] इत्युक्तत्वात्। ते सरस्वत्या नद्यास्तटे। सामीपिकाधिकरणसप्तमी वा। सत्त्रासनं कृतवन्तः। तत्र किल कवषो नाम कश्चिन्महर्षिः तेषामृषीणां मध्ये तैः सह सत्त्रासनं कर्तुमना निषण्णोऽभूत्। निषण्णं तमृषिं कवषं अविदिततदीयनिरतिशयमहिमानस्ते माध्यमा उपोदुः उपवादः परिवादः तं कृतवन्तः। कथमिति चेत्। त्वं दास्याःपुत्र इव निन्दनीय एव। **'आक्रोशे** षष्ठ्या अलुक्'[f]। अतोऽस्माभिः सह सत्त्रासनं कर्तुमयोग्योऽस्यनभिजातत्वात्। तस्मादस्माद् देवयजनदेशान्निर्गच्छेति। एवं वाचा तं महर्षिमुपोदितवन्तः[2]। स च

a. RV. 10. 30. 12.
b. TS. 2. 4. 12. 2.
c. AB. 4. 1. 4.
d. RV. 10. 30.
e. SA. 2. 2.
f. Pā. 6. 3. 21.

1. T. वज्रत्वं
2. T. अपोदितवन्तः for उपो०

निरतिशयमहत्त्वसंपन्नो महर्षिस्तैर्निरस्तः क्रोधदीप्तः सन् एतेन 'प्र देवत्रा'[a] इति सूक्तेन सरस्वतीं तुष्टाव । तं महर्षिं अभिष्टुता सती सरस्वत्यनुगतवती किल । अथ ते माध्यमा दृष्टसरस्वत्यनुगमना विदिततदीयमहानुभावास्तं निर्दोषमत एव महदवमानदोषरूषितमात्मानं च मन्यमानास्तत् प्रसादोपायमालोच्य निश्चित्य तमनुगम्योक्तवन्तः । हे ऋषे द्रष्टः! ते नमोऽस्तु । नमस्कारव्यतिरिक्तस्य निखिलापराधविधूननसमर्थस्य कस्यचित् प्रसादोपायस्याभावात् प्रथमं तदुक्तिः । 'नमस्कृत्य हि वसीयांसमुपचरन्ति'[b] इति च श्रुत्यन्तरम् । त्वं नोऽस्मान् मा त्याक्षीः यं त्वामियं सरस्वत्यनुगच्छति । तादृशस्त्वमस्माकं मध्ये श्रेष्ठो भवसि । वयं तु भवन्तमेव सेवामहे जना इव राजानमिति । एवं 'वाचा मित्राणि संदधति'[c] इति न्यायेन मधुरया वाचा तं विप्रतिपन्नं सन्तमृषिं संप्रतिपन्नं चक्रुः । तस्य च यः स्वात्मपरिवादनिमित्तः क्रोधस्तं कथंचिदपनयामासुः । 'नवनीतं हृदयं ब्राह्मणस्य'[d] इति न्यायेन सुमहति रोषनिबन्धने सत्यपि संनत्या क्षिप्रमेव सुप्रसादत्वात् साधूनाम् । उपसंहरति—**स-अनुवेदिता** ॥ 3. २४

इति तृतीयः खण्डः

एकधनाख्यानामपां ग्रहणार्थं प्रतिगमने सति पत्न्या सहैव गमनं कर्तव्यम् । तथा च बौधायनः—'आनयति नेष्टा पत्नीं वान्नेजनं कलशमादाय प्रेह्युदेहीत्येतेन निगदेन । अथैनां पूर्वया द्वारा उपनिष्क्रामय्य उत्तरेण सदः परावृत्त्योत्तरेणाग्नीध्रियं धिष्ण्यं पर्याणीयान्तरेण चात्वालोत्करावुपनिष्क्रम्य यत्रापस्तद् यन्ति'[e] इति । तदेतत् पत्न्या सह गमनं स्तौति—**अथ-भवति** । यन्ति तीर्थदेशमिति शेषः । 4.१-६
पत्नीभिः सह गमनं किमर्थमिति चेद् उच्यते । इन्द्रसम्बन्धिनं सोममप्सु वर्तमानं सन्तं प्रत्याहिताः समवहितचेतसो गन्धर्वा रक्षन्ति । ते गन्धर्वा स्त्रीकामाः इति प्रसिद्धम् । स्त्रीणां गन्धर्वगृहीतत्वोपलम्भात् । ते स्त्रीकामत्वादेवासु पत्नीषु मनांसि कुर्वते कामयन्ते । न ह्यस्ति संभवः यो यत्कामनशीलः स

a. RV. 10. 30.
b. TS. 5. 4. 4. 5.
c. AA. 3. 1. 6.
d. *Mahābhārata*, Ādiparvan 3. 123.
e. BŚ. 7. 3. 6–7.

तस्मिन् सन्निहितेऽपि न कामयत इति । तत् तत्रैव सति यथा लोके प्रमत्तानाम् अनवहितानां सतां रक्षितॄणां तद्रक्षितं धनमाहरेल्लोकः एवं तद् भवति । एनं यजमानं प्रत्युपनामुकः उपनमनशील एव यज्ञो भवेत् ।

अथ 'प्र देवत्रा'[a] इत्याद्यानामपोनप्त्रीयानाम् ऋचां संख्यां स्तौति—
4.७-११ ता-समर्धयति । 'प्र देवत्रा' इत्येतत्सूक्तगता ऋचस्तावत् पञ्चदश । 'आ धेनवः'[b] इत्येका, 'समन्या यन्ति'[c] इत्येका, 'अम्बयो यन्ति'[d] इत्येतास्तिस्रः । इत्थं संभूय विंशतिसंख्याका ऋचो भवन्ति । ता एता ऋचो विराजमभिसंपन्ना भवन्ति । विराजो दशसंख्याक्षरत्वात् । विंशतिसंख्यायाश्च दशसंख्याविकारात्मकत्वात् । आपश्च विराट्संबन्धिन्यः । कथमिति चेत् । यस्माद् 'विराळन्नम्'[e] इति प्रसिद्धम् । अन्नवतः पुरुषस्य लोके विराजमानत्वदर्शनात् । आप एव चान्नम् । तदभावेऽन्नस्यानिष्पत्तेः । 'तेऽपामूर्ध्वं रसमुदौहन् । तदन्नमभवद्'[f] इत्युक्तत्वात् । तस्मादपां विराट्संबन्धित्वमुपपन्नमेव । तत् तेन विंशतिसंख्यत्वाद् विराडात्मकेन सूक्तलक्षणेनान्नेन अब्लक्षणमन्नं समृद्धं करोति । अभिधेयानामपामन्नरूपत्वादन्नरूपा इमा विंशतिसंख्या ऋचोऽनुरूपा इत्यर्थः । प्रथमोत्तमयोरा-
4.१२-१५ वृत्तिविधिमभिप्रेत्य तत्सहितां संख्यां स्तौति—त्रिः-अपाति । प्रथमोत्तमयोर्ऋचोस्त्रिवारं पठने ता विंशतिर्ऋचश्चतुर्विंशतिसंख्या भवन्ति । गायत्री च चतुर्विंशत्यक्षरेति प्रसिद्धम् । सा च प्रातःसवननिर्वोढ्रीति 'तद् गायत्री स्वमायतनमकुरुत'[g] इत्यादौ श्रुत्यन्तरे प्रसिद्धम् । तत् तेन तद् विंशतिसंख्यानामृचां पठने कथितप्रकारेण चतुर्विंशतिसंख्यासिद्धेः प्रातःसवनस्य रूपान्नापयाति भवति । किंतु तद्युक्तमेव भवति । प्रातःसवनानुरूपं चैतदित्यर्थः । 'यज्ञो वा आपः'[h]
4.१६ इत्यादिना प्रकटितमपोनप्त्रीयविधिमुपसंहरति—इति न्वापोनप्त्रीयस्य । विधिरिति शेषः ॥

इति चतुर्थः खण्डः

a. RV. 10. 30. 1.
b. RV. 5. 43. 1.
c. RV. 2. 35. 3.
d. RV. 1. 23. 16.
e. TS. 1. 4. 3. 4; 1. 8. 2. 2; AB. 1. 5. 22, etc.
f. KB. II. 5. ४.
g. AB. 3. 27. 1.
h. KB. XII. 1. १.

उपांश्वन्तर्यामसंज्ञितग्रहहोमकाले 'प्राणं मेऽपानं मे'[a] इत्यादिप्रैषाभ्यां यथाक्रमं नासिकाद्वारा प्राणवायोः बहिर्निःसारणलक्षणमनुप्राणनं तस्यैवान्तः प्रवेशनलक्षणमन्वपाननं च होत्रा कर्तव्यम् । तथा च सूत्रम्—'प्राणं मे पाहि प्राणं मे जिन्व स्वाहा त्वा सुभव सूर्यायेत्युपांशुं हूयमानमनुप्राणिति । अपानं मे पाह्यपानं मे जिन्व स्वाहा त्वा सुभव सूर्यायेत्यन्तर्याममन्वपानिति'[b] इति । तत्रोपांशुग्रहहोमकाले कर्तव्यमनुप्राणनं विधानपूर्वकं स्तौति—**अथ-भवन्ति** । अथशब्द आनन्तर्यार्थः । 5.१-८
विकारार्थो वा । वैशब्दः 'प्राणो वा एष यदुपांशुः'[c] इत्यादिश्रुत्यन्तरप्रसिद्धिद्योतनार्थः । योऽयमुपांशुसंज्ञो ग्रहोऽस्ति स प्राण एव प्राणस्य प्राथम्यात् । उपांशुग्रहस्य च ग्रहाणां मध्ये प्राथम्यात् । तं ग्रहं हूयमानमनुलक्ष्य प्राणनं कुर्यात् । तत्र योऽयमुपांशुग्रहहोमस्तस्य संबन्धी वषट्कारः स्वाहाकारश्च स एव 'प्राणं मे'[a] इत्यादिमन्त्र एव भवति । होमस्य वषट्कारस्वाहाकाराविनाभावित्वादिह तत्स्थानेऽयं मन्त्र एव निविशते । अथ भोः कस्तादृशो वषट्कारस्वाहाकारयोर्महिमा यद्बलात् तयोरिह क्लेशेन संपादनमित्याशङ्क्य व्यतिरेकप्रदर्शनेन वषट्कारस्वाहाकारयोर्महिमानं प्रसाधयति—न ह वा इति । या आहुतयो वषट्कारेण स्वाहाकारेण वा वर्जिताः क्रियेरन् ता न देवान् गच्छन्ति । देवास्तामाहुतिं न प्रतिगृह्णन्ति । किंतु निरर्थकाः भस्महोमसमानयोगक्षेमा एव भवन्ति । तस्मान्निरतिशयः स तादृशोऽनयोर्महिमा । अन्तर्यामस्तुत्यादि पूर्ववद् व्याख्येयम् ।

अथ तयोः प्रयोगकालं व्यवस्थितं प्रदर्शयति—**तौ-नानैव** । उपांश्वन्तर्या- 5.९-१२
मयोः प्राणापानरूपत्वमुक्तम् । भवतूपांश्वन्तर्यामग्रहयोः प्राणापानरूपत्वम्, ततः किम् इति चेत् , तयोरुपांश्वन्तर्यामयोर्मध्ये अन्यमन्तर्याममुदिते सूर्ये जुहुयात् , अन्यमुपांशुमनुदित एव सूर्ये जुहुयाद् इत्ययं कालविधिः । तत् तेन तयोरुपांश्वन्तर्यामयोरित्थं कालस्य व्यवस्थया होमेन इमौ दृश्यमानौ वितारयति । असांकर्येणान्योन्यं प्रावृत्तस्वरूपतया विभेदेन स्थापयति । यस्मादेवं तस्मादेव हेतोरिमौ प्राणापानौ सर्वदा सहैव प्रवर्तमानावपि सांकर्यपरिहारेण 'अयं प्राणोऽयमपानः' इति परस्परव्यवच्छेदव्यवहारप्रत्ययविषयतया नानाभूतावेव वर्तेते ।

a. ŚŚ. 6. 8. 1. b. ŚŚ. 6. 8. 1-2.
c. TS. 6. 4. 5. 1.

5.१३-१५ प्रकारान्तरेण स्तौति—**यदु-स्माह**। अन्यमन्तर्याममुदिते सूर्ये जुह्वति, अन्यमुपांशुमनुदिते सूर्ये जुह्वतीति यदस्ति तेनाहोरात्राभ्यां सकाशादसुरानन्तरयन्ति। अन्तरितान् व्यवहितान् कुर्वन्त्यध्वर्यवः। अह्नः सकाशादसुराणामन्तरायः उपांशुहोमेन क्रियते। अन्तर्यामहोमेन रात्रिसकाशादसुराणामन्तरायः। यस्मादमुमादित्यमुभयतः परस्तात् पुरस्ताच्च क्रमेणाहोरात्रे भवतः। आदित्योदयाद् यः पूर्वकालस्तस्य रात्रिशब्दवाच्यत्वम्। उपरितनः कालः अस्तमयावधिरहःशब्दवाच्यः। तस्माद्धेतोरादित्योदयात् पुरस्तात् परस्ताच्च क्रमादुपांश्वन्तर्यामग्रहहोमकर्मणा अहोरात्राभ्यामसुराणामन्तरायो युक्तः। न केवलं यज्ञविध्वंसकानामसुराणां विनाश एवैतत्फलम्, यजमानगतपाप्मनिवृत्तिश्चेति दर्शयति—पाप्मानं वा इति। इति स्माह कौषीतकिरिति शेषः। यजमानोऽहोरात्रसंचितं पाप्मानं उपांश्वन्तर्यामहोमाभ्याम् अन्तरयतीत्यनुषंगः। अमुमेव कालविधिं
5.१६,१७ विपक्षे बाधकोपन्यासमुखेनापि स्तौति—**अथ-सोमयाजी**। उभौ उपांश्वन्तर्यामौ। स यजमान उदकयाज्येव[1] भवेन्न सोमयाजी भवेत्। वस्तुतः सोमस्यापि सतो विधिपूर्वप्रयुक्ताभिषवादिसंस्कारकलापसंस्कृतस्य कथितकालविशेषावधीरणमात्रादेव सोमरूपत्वप्रहाण्योदकत्वप्रसक्तेः तद्याजिनश्चोदकयाजिशब्दवाच्यत्वप्रसक्तेश्च प्रशस्तोऽयं कालविशेष इति। व्यतिरेके बाधकं प्रदर्श्यान्वये लाभ-
5.१८ माह—**यस्य-सोमयाजी** यथायथमिति। उदितेन्तर्यामग्रहः अनुदित उपांशुग्रह
5.१९ इत्यर्थः। अथवा इत्यादिखण्डेन प्रदर्शितं विधिमुपसंहरति—**इति—उपाश्वन्तर्यामयोः**। उपांश्वन्तर्यामयोरिति विधिरिति शेषः॥

इति पञ्चमः खण्डः

उपांश्वन्तर्यामग्रहहोमानन्तरम् उत्तरेणाहवनीयमन्तर्वेद्येव आस्तावनामधेये प्रदेशे बहिष्पवमानेन स्तुतिं कर्तुं छन्दोगेषु प्रसर्पणं कुर्वाणेषु होत्रा प्रातरनुवाकस्थान एव यथापूर्वमवस्थानं कर्तव्यम्, न तु मैत्रावरुणादिवच्छन्दोगैः सह सर्पणं
6.१ कार्यम् इतीममर्थं प्रदर्शयिष्यन् मीमांसां प्रस्तौति—**अनूत्थेयः-इति**। मीमांसन्ते

1. V. उदयाज्येव

ब्रह्मवादिन इति शेषः । पवमानो बहिष्पवमानः प्रकरणसामर्थ्यात् । स किमनू-
त्थेयः । अनुलक्ष्योत्थानमनूत्थानं सर्पणमिति यावत् । तस्य योग्यः किमिति
संशयस्यैका कोटिः । ना इत्यपरा । पवमानः किमनूत्थेयो न भवतीति । विचारे
प्लुतिः । बहिष्पवमानाय छन्दोगैः सह सर्पणं कर्तव्यं न वेति संदेहे सिद्धान्तमेव
तावदाह—**न–आहुः** । अभिज्ञा इति शेषः । कुतस्तथाहुरित्यत आह— 6. २
**ऋच–गायन्ति** । एतद् इदानीं यत्र स्थाने होतास्ते तत् स्थानमृचः ऋग्वेदस्यैवा- 6.३,४
यतनं स्थानं भवति । होतुर्ऋग्वेदप्राणत्वात् । अत्र दृष्टान्तः--य[अ]थादः यत्र
स्थाने स्थिता अमी सामगाः सामगानं कुर्वन्ति तद् यथा साम्नः सामवेदस्य
स्थानं भवति, तथा होतुः स्थानं ऋग्वेदस्य स्थानं भवति । अत्र दृष्टान्तच्छलेन
सामवेदसंबन्धि स्थानमपि विहितमेवेति द्रष्टव्यम् । 'ऋच एतदायतनं यत्रैतद्धो-
तास्ते अथादस्साम्नः' इति पाठे स्पष्टो विधिनिर्देशः । भवत्वेवम्, ततः किमिति
चेत् । **स–करोति** । यो होता बहिष्पवमानमनूत्थानं कुर्यात् स होता ऋचमृग्वेदं 6. ५-७
स्वात् स्वीयाद् आयतनात् स्थानात् च्युतं प्रचलितं करोति । किंच ऋचमृग्वेदं
साम्नः सामवेदस्यानुवर्त्मानम् अनुगन्तारं स्वामिन इव भृत्यादिकं गुणभूतं
करोति । न चैतद् युक्तं यत् प्राधानभूतस्य सतो गुणभूतम् अन्यं प्रति तद्विपरी-
तगुणीभावप्रापणम् । गीतिरूपस्य साम्न ऋगाश्रितत्वेन व्यवस्थितत्वाद् ऋग्वे-
दस्य भित्तिस्थानीयस्य चित्रस्थानीयं सामवेदं प्रति प्राधान्यमवसेयम् । तस्मा-
दित्युपसंहरति—**तस्माद्–इति** । नेदिति परिभयार्थः । तत् किमिदानीं बहिष्पव- 6.८-१०
माने सर्वत्रानूत्थानं नानुष्ठेयमेवेति ? नेति । तत्र विषयप्रतिप्रसवं करोति—
**यदि–भवति** । तुशब्दो विशेषार्थः । यदि स्वयं यजमान एव होता हौत्रस्य कर्मणः 6.११-१३
कर्ता स्यात् । सत्रेषु यजमानानामेव ऋत्विक्कर्मकर्तृत्वम् । तथा च श्रूयते—'ये
यजमानास्त एवर्त्विजः'[a] इति । अत्र सत्रकर्मणि यजमानस्यैव हौत्रपदार्थप्रयो-
क्तृत्वमपि न तु यजमानेन वृतस्यान्यस्य । तस्मिन् विषयेऽनूत्थानं कार्यमेव ।
कुतो हेतोरित्यत उक्तम् औपगात्रमिति । यस्मादस्य यजमानस्योपगातृत्वं
भवति । तस्मादुपगानार्थमेव होत्रा सतापि यजमानेनानूत्थानं कर्तव्यमेव । अत
एवात्र नोक्तदोषावतारः । यजमानप्रयुक्तत्वादुपगातृत्वस्य तत्प्रयुक्तत्वाच्चोत्था-
नस्य ऋग्वेदस्थानप्रच्यावनादिदोषाप्रसक्तेः । उपगानार्थं सति विषये यदनूत्थानं

a. Cf. J S. 10. 6. 51.

6.१४,१५ प्रतिप्रसूतं तत् प्रशंसति—**स्वर्गो-इति** । योऽयं यज्ञः स स्वर्गलोक एव तत्फलत्वात् । योऽयं स्वर उपगाननिर्वर्तकः स सामैव भवति । स्वरैकनिर्वर्त्यत्वात् साम्नः । तथा च तलवकारब्राह्मणे वचनम्—'एतावद् वा इदं साम यावान् स्वरः । ऋग्वावा एषर्ते स्वराद् भवति'[a] इति । अत एव च जैमिनीयं सूत्रम्—'गीतिषु सामाख्या'[b] इति । यस्मादेवं तस्माद् यज्ञरूपे स्वर्गलोके स्वररूपे साम्नि चात्मानं यजमानात्मकं आदधानीत्यभिप्रायेण उपगानार्थमनूत्थानं कुर्यात् । 'स्वर्गो वै लोकः स्वरसाम' इति केचिदधीयते ।

अथ बहिष्पवमानस्तुत्यनन्तरं होतुः कस्यचिन्मन्त्रस्य जपं विधित्सुः प्रश्न-
6.१६,१७ मुत्थापयति—**अथ-इति** । प्रातःकालीने पवमाने बहिष्पवमाने सर्वा देवताः सोमयागे यष्टव्याः संतृप्ता भवन्ति । बहिष्पवमानस्य देवानां सोमभक्षरूपत्वात् । एवं सति सोमः कथं होत्रा अपरिभक्षितो भवति ? देवैर्भक्षितस्य सोमस्य होत्रा भक्षणं कार्यम् । तत् केन विधानेन संपत्स्यत इत्यर्थः ॥

इति षष्ठः खण्डः

7.१-५ अथास्य चोद्यस्योत्तरं वक्तुं होतुः कस्यचिन्मन्त्रस्य जपं विधत्ते—**स-भक्षयन्ति** । स होता बहिष्पवमानस्तुत्यनन्तरमेतं वक्ष्यमाणं जपेत् । भवत्वेतस्य मन्त्रस्य जपः, तथापि कथमुक्तचोद्यसमाधिः ? इत्यत उक्तम्—स एष इति । स एष उपहूत इत्यादिर्देवैः संभूयोपहवोऽनुज्ञानं सोमभक्षणार्थम् । तथा समुपहवे सति अस्यानेन होत्रा सोमो भक्षितो भवति । मन्त्रस्यायमर्थः—अस्य बहिष्पवमानात्मकस्य सोमस्य । कीदृशस्य ? विचक्षणस्य विश्वं विशेषेण चष्टे जानातीति विचक्षणश्चन्द्रमाः तस्यास्मिन् सोमे देवतारूपेणानुप्रविष्टत्वात् तस्यैवात्राधिदैवं स्तूयमानत्वाद् वा विचक्षण इत्युच्यते । तादृशस्य सोमस्य भक्षे भक्षणकर्मणि मया देवा उपहूता इदानीमनुज्ञाताः । 'इतः प्रदानं देवा उपजीवन्ति'[c] इति प्रसिद्धम् । अतोऽस्ति देवानां सोमभक्षणकर्मण्युपहवापेक्षा । यथा देवाः सोमस्य भक्षे मयोपहूतास्तथा देवा अपि मामस्मिन् कर्मण्युपह्वयन्तामनुज्ञानं कुर्वन्तु । हे

a. JUB. 1. 6. 2. 4. b. JS. 2. 1. 36.

c. TS. 3. 2. 9. 7.

सोम अहं मनसा त्वां भक्षयामि । भक्षणकार्यस्यामृतत्वस्य सर्वेन्द्रियव्यापित्वा-
देवमुक्तिः । एवमन्यदपि व्याख्येयम् । तथा ह्यस्य इत्यादि पूर्वमेव व्याख्यातम् ।

इत्थं बहिष्पवमाने होत्रा कर्तव्यं कर्म विधाय संप्रति सवनीयपशोः
क्रमप्राप्ते यत् कर्तव्यं तद् विधित्सुः प्रतिजानीते[1]—**अथ पशुः** । विधास्यत 7. ६
इति शेषः । स्तौति—**सोमः-आलभ्येत ।** पशुरिति यदस्ति स साक्षात् स्वयमेव 7.७,८
च सोमः । नात्रौपचारिकत्वशङ्का कार्येति प्रत्यक्षशब्दः । एतदुपपादयति—
उदकेति । यद्येष सवनीयः पशुर्नालभ्येत पशुयागो न क्रियेत तर्हि सोमपानमुदक-
पानसमानयोगक्षेमं भवेत् । अतः सोमस्य सोमरूपनिष्पत्तिहेतुत्वात् पशोर्मुख्य-
सोमरूपत्वमवसेयम् । अथास्य पशोः सवनत्रयव्यप्त्या तेन तत्समृद्धिं दर्शयन्
प्रशंसति—**सवनानि-तीव्रीकारः** । एतेन पशुना सवनानि प्रातःसवनमाध्यंदिन- 7.९-१६
सवनतृतीयसवनानि स्वतोऽतीव्राण्यसमृद्धानि सन्ति तीव्राणि वीर्यवन्ति
करोति । पशुमन्तरेणातीव्रत्वमभिप्रेत्य च्विप्रयोगः । कथमित्यत आह—तद्यद्
इति । वपा पुरोळाशो हविरिति त्रेधाऽवस्थितः पशुयागः । तत्र प्रातः सवने
वपायागः । तेन तस्य सवनस्य तीव्रीकरणं क्रियते । श्रपणं पशोः पशुपुरोळा-
शयागश्च माध्यंदिने सवने कर्तव्यः । तेन तस्य तीव्रीकरणम् । तृतीयसवने
हविषा यागः । तेन तस्य तीव्रीकरणम् । स एष इत्युपसंहारः । स एष
पशुस्तीव्रीकारः तद्धेतुरित्यर्थः । प्रकारान्तरेण प्रशंसति—**याश्च—
आलभ्यते**। सन्ति द्विप्रकारा देवताः—सोमपाः पशुभाजनाश्च । ता उभय- 7.१७-२४
प्रकारान्विता अपि देवता अनेन सवनीयपश्वालम्भनेन प्रीता भवन्तीत्यु-
परितनेनान्वयः । तत्र कति सोमपा देवताः काश्च ता इत्याकाङ्क्षाद्वयमुत्थि-
तम् । तत्र तयोराद्यां पूरयति—त्रयस्त्रिंशद् वै इति । वैशब्दोऽस्य श्रुत्यन्तर-
प्रसिद्धयर्थः । संख्येयस्वरूपजिज्ञासायामुक्तमष्टावित्यादि । पशुभाजनानां
संख्यामाह—त्रयस्त्रिंशत् पशुभाजना इति । ताश्च प्रयाजादयः । प्रयाजानुया-
जोपयजां समुदितानां त्रयस्त्रिंशत्संख्यत्वात् । पशुना तावत् पशुभाजनानां
प्रीतिरविवादा । सोम एवैष प्रत्यक्षं यत् पशुरित्याद्युक्तमार्गेण सोमस्वरूपानु-
बन्धित्वादस्य पशोः सोमपानामपि प्रीतिः संभवत्येव । पशुसमवहितस्यैव सोमस्य

1. A. M. प्रस्तौति

सोमशब्दवाच्यत्वात् । तस्मात् प्रशस्तोऽयं पशुयाग इति ॥

इति सप्तमः खण्डः

अथैवंविधमहानुभावस्य पशोर्देवताविशेषमुपदिदिक्षुः शाखान्तरिणां
8. १-३ देवताविषयं मतभेदं दर्शयति—**तम्–वदन्तः** । य उक्तविधया स्तुतः पशुस्तमेतं सवनीयं पशुमेके शाखिनः अयं सवनीयः पशुरिन्द्राग्निदेवत्यः स्यादित्येवमाहुः । किं कारणं वदन्तस्ते तथा वदन्ति इति चेत् यस्मात् सर्वेऽपि देवा इन्द्राग्नी एव भवतः । तयोरेवातिशयेन प्रधानभूतयोः सर्वेषां देवानामन्तर्भावात् । यस्मादेवं तस्माद्धेतोरनेन पशुनैन्द्राग्नेन सर्वान् देवानयं प्रीणयतीत्येवं वदन्तंस्तथाहुरित्य-
8.४-७ न्वयः । पक्षान्तरमुपक्षिपति—**तदु–इति** । तत् तत्र पशुदेवतानिरूपणविषय एव केचिदभिज्ञा आहुः—किमिति चेत् । तत् तथा सति पशोरिन्द्राग्निदेवत्यत्वे ते तथावादिनः इन्द्रमग्नेर्भागादतिरिक्तभागभाजं कुर्वन्ति । पशुपुरोळाशा हि केवलमैन्द्रा एव । तत्र यदि पशुरिन्द्राग्निदेवत्यः स्यात् तदानीमिन्द्रोऽग्नेरधिकभागः स्यात् । न चैतदुचितम् । इन्द्राग्न्योर्द्वयोः समत्वेन समभागभाक्त्वस्यैव न्याय्यत्वात् । न हि वृत्तविद्यादिगुणैस्तुल्यतया प्रधानभूतयोरुभयोः पुरुषधौरेययोः अभ्यागतयोरतुल्यतया संभावना कर्तुं युक्ता । तस्माद्धेतोरेष पशुः केवलमग्निदेवत्य एव स्यात् । पुरोळाशाः पुनः केवलमिन्द्रदेवत्या एव । एवं सति साम्येन इन्द्रश्चाग्निश्च भागभाजौ भवत इत्यतो हेतोराग्नेय एव पशुः स्यात् ।
8.८-११ इतश्चाग्नेय एवायं पशुर्युक्त इत्याह—**अग्नेः–तत्** । प्रातःसवनं ह्यग्नेः स्वभूतमिति प्रसिद्धम् । सवनीयपश्वालम्भनं च प्रातःसवनमध्यपाति । तस्मादयमप्यग्नेः स्वभूत एव युक्तः । तथा सति ये शाखिनोऽमुं पशुमन्यदेवत्यम् अग्नेरन्या देवता यस्य तथाभूतं कुर्वन्ति, तेऽग्नेः स्वभूतं सन्तमेतं पशुमन्यस्मै समर्पयन्ति । तच्चैतदन्यदीयस्य कस्यचिद्धनस्य बलात्कारेण प्रमथ्य अन्यायेन अन्यदीयत्वापादनवद् आक्रोशनविषयत्वादत्यन्तमनुचितमेव स्यात् । तस्मादप्याग्नेय एवायं पशुरिति । न केवलमग्निष्टोम एवायमाग्नेयः पशुः कर्तव्यः, संवत्सरसत्रेष्वपी-
8. १२ त्याह—**अपि–इति** । इति शब्दस्याहुरित्यनेनान्वयः । संवत्सरसदः सत्रिणः । तेषां संवत्सरं कृत्स्नमेव केवलमयमाग्नेयः पशुर्न च्यवेत, च्युतिं प्राप्नुयात् । किंतु

नित्य एव स्यात् । न केवलमग्निष्टोम एवाय पशुर्नित्यः स्यात् । सत्रेऽपि
गवामयनप्रभतौ स एव स्यादित्यपिशब्दः । तत् किमिदानीं सर्वत्राग्नेय एव
पशुः सवनीये नाङ्गीक्रियतामिति ? नेति स्वाभिमतं विभागं दर्शयति—**तदु-**
**आग्नेयः** । शिष्यन्ते उपदिश्यन्ते प्रत्यक्षं श्रुत्या सर्वे धर्मा यत्र स प्रकृतिरग्निष्टोमः 8.१३,१४
शिक्षाशब्देनोच्यते । तत्रैवायमाग्नेयः पशुरवधृतो न तु तद्विकृतिभूतेषु सत्त्रादिषु।
अथ तत्सम्बन्धिना वपापुरोळाशहविषां याज्याः क्रमेण विधत्ते—**तस्य-भवति** । 8.१५-१६
तस्याग्नेयस्य पशोः । वपाया इति षष्ठ्यर्थे चतुर्थी । यदि पुनः पृष्ठापाय
रथन्तरादीनि षट्सङ्ख्यानि पृष्ठान्युपायो यस्य तथाविधं कर्म भवति, तर्हि
तत्राग्नेयः पशुः स्यात् । किंतु तत्रैकादशिन एव सवनीयाः पशवः स्युरित्येव
निश्चितोऽर्थः । नास्मिन्नर्थे विचिकित्सा कर्तव्येत्यर्थः ।।

इत्यष्टमः खण्डः

अथ चोदकप्राप्त आवाहननिगदे विशेषं विधत्ते—**अथ-आवाहयति** । 9.१-८
विशेषो विधीयत इति वाक्यशेषः। स च विशेषः 'इन्द्रं वसुमन्तमावह'[a] इत्यादिः।
तत्र 'इन्द्रं वसुमन्तमावह'[a]इत्यनेनांशेन प्रातःसवने प्रातःसवनदेवतां **वसु-**
मद्गुणेन्द्रलक्षणामावाहयति । सवनस्वरूपस्यैवानावाह्यत्वादेवं योज्यम् । 'इन्द्रं
रुद्रवन्तम्'[a] इत्यादावप्येवमेव योजना द्रष्टव्या। पशुदेवतावाहनसमनन्तरमेव वन-
स्पतेरावाहनमिति स्वाभिमतः पक्षः । तं प्रतिष्ठापयितुं तद्विरोधिनां शाखान्त-
रिणां पक्षमुपन्यस्यति—**अत-वदन्तः** । एके शाखिनोऽत्रैव तृतीयसवनदेवतावाह- 9.९-११
नानन्तरस्थान एव वनस्पत्यावाहनं कुर्वन्ति । यस्मादेनं वनस्पतिं तृतीयसवन
एव यजन्ति । अतो यथायोगमेवावाहनमपि युक्तमिति हेतुं वदन्तस्ते तथा वन-
स्पतिमावाहयन्ति । सिद्धान्तमाह—**तदु-आवाह्यः** । पशोरात्मत्वमङ्गित्वेन 9.१२-१६
प्राधान्यात् । वनस्पतेः प्राणत्वं प्रधानाङ्गत्वसाम्यात् । एवं पशोरात्मत्वाद् वन-
स्पतेः प्राणत्वाच्च पशोर्व्यवधानेन वनस्पतेरावाहने क्रियमाणे यः कश्चिद् एतद्दो-
षाभिज्ञः सदसि स्थितस्तं होतारं प्रति ब्रूयात्—'अयं होतैवं पशुव्यवधानेन वनस्प-
तेरावाहनं कुर्वन्नात्मनः प्राणेन व्यवधानं संपादितवान्, अतः स्वयमपि न

a. ŚS. 6. 9. 13.

चिरकालं प्राणान् धारयिष्यति' इति, तदेतत् तदीयं वचनं तथैव यथार्थमेव स्यात् । यस्मादेवं पशुव्यवधानेन वनस्पतेरावाहने प्राणपरित्यागलक्षणो दोषः तस्मात् पशुमेव इत्युपसंहरति । इदानीम् 'अथ पशुः'[a] इत्युपक्रान्तमुपसंहरन्नाह—

9.१७ **मीमांसितः पशुः** ।

'एकादशिनीत्वेवान्वायातयेयुः'[b] इत्यत्र यैकादशिनी सिद्धवदुद्दिष्टा तामि-
9.१८-२४ दानीमध्यायशेषेण विधित्सुः प्रस्तौति—**प्रजापतिः-रुन्धे** । पुरा प्रजापतिरुच्चावचाः प्रजाः सृष्टवान् । सृष्ट्वा चान्नाद्यादि सर्वकामरहितम् अत एव प्रजापालनासमर्थम् आत्मानं कल्पितवान् । स च येन यज्ञक्रतुना साधनेन विधिवदनुष्ठितेन सता काम्यानर्थान् पश्वादीन् प्राप्तो भवानि, विशेषतोऽन्नाद्यं चावरुद्धः प्राप्तो भवानि तादृशेन यज्ञक्रतुना यागं करवाणि; स तादृशो यज्ञक्रतुः कीदृश इति पर्यालोचयन्नचिन्त्यमहिमत्वात् प्रजापतिरेतां याज्ञिकजनप्रसिद्धाम् एकादशिनीम् एकादशसंख्यपशुसाधनकत्वादेतत्संज्ञं कंचिद् यज्ञविशेषं दृष्ट्वा तदपेक्षितेतिकर्तव्यताकलापसहितं संपाद्यानुष्ठितवान् । तेन चानुष्ठितेन कामानाप्तवान् । विशेषतश्चान्नाद्यमवरुद्धवान् किल । यस्मादेवं समस्तकामावाप्त्यन्नाद्यावरोधहेतुरियमेकादशिनी, तस्माद्धेतोः प्रजापतिवदेवास्या अनुष्ठानात् कामान्नाद्यकामो यजमान इदानीमपि तद्यागेन कामानन्नाद्यं चाप्नोति ॥

इति नवमः खण्डः

10.१-६ **तस्यै-अवरुद्ध्यै** । अग्नेर्योनिर्ब्रह्म ब्राह्मणजातिरेव भवति । तदात्मकत्वं च प्रजापतेर्मुखत एकस्मात् कारणादुत्पन्नत्वात् । तच्च 'स मुखतस्त्रिवृतं निरमिमीत । तमग्निर्देवतान्वसृज्यत । गायत्रीच्छन्दो रथन्तरं साम । ब्राह्मणो मनुष्याणामजः पशूनाम् । तस्मात्ते मुख्या मुखतो ह्यसृज्यन्त'[c] इति यजुर्ब्राह्मणादवसेयम् । यस्मादेवं तस्मादाग्नेयः पशुर्ब्राह्मणो जातेः यच्छ्रुतवृत्ताद्यतिशयजन्यं यशोऽस्ति तस्यावरुद्ध्यै परिग्रहाय संपद्यते । एवमुत्तरत्रापि व्याख्येयम् । **सारस्वतो-**
10.७-९ **उपाप्त्यै** । वाग् वैखरीरूपात्र विवक्षिता । अर्थवादसामर्थ्यात् । तस्या एव सर्व-

a. KB. XII. 7. ६. b. KB. XII. 8. १८.
c. TS. 7. 1. 1. 4.

व्यवहारनिर्वाहनिबन्धनतया प्रसिद्धत्वात् । इदमन्नं व्रीह्यादिलक्षणं वाचा
स्वदितं स्वादुत्वेन संपादितं लोके अत्तृभिरद्यते । 'इदमन्नं साधु संपादितं मृष्ट-
तरविशिष्टव्यञ्जनसनाथं विपाकसुखकरं च दिष्टया भोक्तव्यम्' इत्यादिवाचा
स्तूयमानस्यैवान्नस्य सुखेन भोजनार्हत्वात् । निन्दितस्य निसर्गरसस्यापि हेय-
त्वात् । अतो वाच एवान्नोपयोगहेतुत्वादयमन्नाद्यस्योपाप्त्यै संपद्यते । **सौम्यः–**
**अवरुद्धयै ।** सोमस्य क्षत्रजातिरूपत्वं वाजसनेयके श्रुतम्—'तच्छ्रेयोरूपमत्य- 10.१०-१२
सृजत । क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो
मृत्युरीशान इति'[a] इति । **पौष्णः–उपाप्त्यै ।** पूष्णोऽन्नत्वं वृष्टिद्वारा अन्नवृद्धि- 10.१३-१५
हेतुत्वात् । **बार्हस्पत्यः–अवरुद्धयै ।** ब्राह्मणजातेरेव वेदरूपाया वाचः पालकत्वाद् 10.१६-१८
बृहस्पतिर्ब्रह्मैव । 'वाग्वै बृहती तस्या एष पतिस्तस्मात् बृहस्पतिः'[b] इति वाज-
सनेयक एव श्रवणात् । **वैश्वदेवः–उपाप्त्यै ।** अन्नस्य वैश्वदेवत्वं सर्वेषां स्थिति- 10.१९,२०
हेतुत्वाद् विश्वरूपत्वाद् वा । **ऐन्द्रः–अवरुद्धयै ।** इन्द्रस्य क्षत्ररूपत्वं प्रागुप- 10.२१-२३
पादितम् । **मारुतो–उपाप्त्यै ।** मरुतां वृष्टिप्रेरकत्वादबात्मकत्वम् । अपाम- 10.२४-२७
प्यन्नहेतुत्वादन्नरूपत्वम् । **ऐन्द्राग्नो–उपाप्त्यै ।** सवित्रा देवतया प्रसूतमनुज्ञातम् । 10.२८-३२
**वारुणः–अवरुद्धयै ।** वरुणस्य क्षत्रत्वमुदाहृतादेव वाजसनेयकवाक्यादवसेयम् । 10.३३-३५
स्पष्टमन्यत् । उपसंहरति—**एवं–एति ।** वैशब्दः पुरार्थे । ब्रह्मणा आग्नेयादिना । 10.३६,३७
क्षत्रेण सौम्यादिना । क्षत्रेण तेनैव सौम्यादिना । ब्रह्मणा
बार्हस्पत्यादिना । उभयतः द्वयोः पार्श्वयोः संदंशन्यायेन । अन्नाद्यं सारस्वतादि ।
तस्यान्नरूपस्य द्वयोर्भागयोः ब्रह्मक्षत्राभ्यां संदष्टत्वाद् ब्रह्मक्षत्रयोर्भोक्तृत्वाद्
भोज्यस्य भोक्त्रैव परिग्रहसंभवात् । प्रजापतेः सर्वनियन्तुः ताभ्यां तत्परिग्रहादि-
संभवात् । परिग्रह उपादानमवरोधः स्वस्वामिभावसंबन्धः । ऐत् गतवान् ।
यज्ञस्यान्तमिति शेषः । एतदिदानीं वार्तमानिकोऽपि यजमानः प्रजापतिवदेव ब्रह्म-
क्षत्राभ्यामन्नपरिग्रहं तदवरोधं च कुर्वन् यज्ञस्यान्तं गच्छति । अभ्यासोऽध्याय-
समाप्त्यर्थः ॥

इति दशमः खण्डः

a. BṛhU. 1. 4. 11. b. BṛhU. 1. 3. 20.

आम्नायार्थविवेचनेन विहितेनानेन शक्तिश्रुते
अल्पे अप्यवलम्ब्य यत् खलु मया पुण्यं किमप्यार्जितम् ।
विद्वद्भृङ्गनिपीतयोर्भगवतो विष्णोः पदाम्भोजयोः
कृत्स्नं तत् फलमर्पितं दिशतु स श्रेयांसि भूयांसि नः ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
ऊर्ध्वं प्रातरनूक्तितः प्रकटयन् कौषीतकिब्राह्मण-
व्याख्याने विधिमाप्रसर्पणमिहाध्यायोऽत्यगाद् द्वादशः ।।

**इति कौषीतकिब्राह्मणव्याख्याने**
**द्वितीयदशके द्वितीयोऽध्यायः**

अथ

## त्रयोदशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ।।

आदौ सृप्तिविधिः सदस्यथ हविष्पङ्क्तिद्विदेवग्रहैः
सोमैः प्रस्थितसंज्ञितैश्च यजनं पश्चात्ततो भक्षणम् ।
अच्छावाकगतोपहूतिविषया क्लृप्तिस्त्वथर्तुग्रहै-
रिज्या भूय इति त्रयोदश इहाध्यायेऽभिधेयं क्रमात् ।।

अथेदानीमनुष्ठानक्रमानतिक्रमेणैव धिष्ण्योपस्थानपुरःसरं सदःप्रसर्पणं विधत्ते—**प्रजापतिः-अमृतत्वम्**। योऽयं यज्ञो नाम ज्योतिष्टोमादिरस्ति स 1.१-८
प्रजापतिः संवत्सरदेवतैव भवति। तत्प्राप्तिहेतुत्वात्। तद्धेतौ तच्छब्दप्रयुक्तेः प्रसिद्धतरत्वात्। यज्ञस्य प्रजापतिसृष्टत्वाद् वा प्रजापतिरूपत्वम्। यज्ञस्य प्रजापालयितृत्वाद् वा। तस्मिन् प्रजापतिरूपे यज्ञे सर्वे कामाः काम्या ऐहिकामुष्मिकभेदभिन्नाः श्रिता इति सप्तमीगमिताधारस्वभावाल्लभ्यते। न हि संवत्सरात् बहिर्धा कश्चित् कामोऽस्ति। यज्ञस्य सर्वकामदोग्धृत्वं स्मर्यते—'एष वोऽस्त्विष्टकामधुग्'[a] इति। सर्वं चामृतत्वमाभूतसंप्लावावस्थायिलक्षणं तस्मिन् यज्ञरूपे प्रजापतौ निहितम्। अमृतत्वस्य ज्ञानसहकृतकर्मनिर्मितस्य तारतम्येन विविधमवस्थानात् सर्वशब्दप्रयोगः। अस्त्वेवम्, किमेतावतेति चेत्। धिष्ण्याः धिष्ण्यस्था अग्नय इति यदस्ति, त एतेऽग्नयस्तस्य प्रजापतिरूपस्य यज्ञस्य गोप्तारो रक्षितारः स्युः तान् यज्ञस्य गोप्तॄन् धिष्ण्यानग्नीन् सदः एतन्नामकमण्डपं प्रसप्स्यन् प्रसर्पणं करिष्यन् होता 'सम्राळसि'[b] इत्यादिभिर्मन्त्रैः नमस्कुर्यात्। ते च मन्त्राः सूत्रकृता दर्शिताः। तेषां मन्त्राणां 'नमो नम' इति प्रतीकेन

a. BG. 3. 10. b. ŚŚ. 8. 17. 3.

ग्रहणम् । स चायं नमस्कारः प्रशस्तः । यस्माद् देवा नमस्कारं नातिवर्तन्ते ।
किंतु स्वीकुर्वन्त्येव । तथा च ब्राह्मणम्—'नमस्कारो हि देवानाम्'[a] इति । 'नम-
स्कृत्य हि वसीयांसमुपचरन्ति'[b] इति च । ते धिष्ण्याग्नयो नमस्कृताः सन्तः
प्रसन्ना होतारं 'इमं यज्ञं प्रविशतु भवान्' इत्यनुजानन्ति । प्रसिद्धं खल्वेतद्
यत्स्वामिको यः प्रदेशस्तत्प्राप्तिस्तदनुज्ञापूर्विकेति । सोऽनुज्ञातो होतैतं
सोमयागात्मकं प्रजापतिरूपं यज्ञं प्राप्नोति । यस्मादेवं सर्वेषां कामानां सर्वस्य
चामृतत्वस्य च निधानभूतं यज्ञं तत्स्वाम्यनुज्ञया प्रविष्टोऽसौ होता, तस्मादत्रैव
सदःप्रसर्पणकर्मण्येवायं यजमानः सर्वान् कामान् सर्वं चामृतत्वमाप्नोति । अथ
1.९-११ सदःप्रसर्पणसमनन्तरकरणीयं हविष्पङ्क्तियागं विधत्ते—**अथ–आप्त्यै** । हविषां
वक्ष्यमाणानां पङ्क्तिः पञ्चसंख्या यस्यामिष्टौ सा तथोक्ता । अथ सर्पणानन्तरं
हविष्पङ्क्तिनामधेयं कर्म कुर्वन्ति ऋत्विजः । तत्र यदिदं हविष्पङ्क्तिकर्मास्ति
तत् पशव एव; तद्धेतुत्वात् । ततश्च हविष्पङ्क्तिः पशुप्राप्त्या एव संपद्यते ।
1.१२-१८ हविषां संख्यां स्तौति—**तानि–आप्त्यै** । धाना भर्जिततण्डुलाः । पङ्क्तेः पञ्चप-
दत्वं प्रसिद्धम् । यज्ञस्य पाङ्क्तत्वं पङ्क्तिच्छन्दःपादैः संख्यया समत्वात् ।
तच्चाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमभेदेन पञ्चविधत्वात् । तदुक्तम-
भियुक्तैः—

'संमितः संख्यया पादैः पाङ्क्तस्य छन्दसो यतः ।
पाङ्क्तो यज्ञस्ततः सद्भिः सर्वदा समुदाहृतः ॥'[c] इति ।

पशूनां पाङ्क्तत्वं पाङ्क्तयज्ञकार्यत्वात् । तदप्याहुः—'तत्कार्यः स्यात् पशुः
पाङ्क्तः'[d] इति । पुरुषस्य पाङ्क्तत्वं लोमादिभिः । 'पाङ्क्तोऽयं पञ्चधा विहितो
लोमानि त्वङ्मांसमस्थि मज्जा'[e] इति श्रुत्यन्तरश्रवणात् । पञ्चभूतकार्यत्वाद्
वा । 'स एष पुरुषः पञ्चविधः तस्य यदुष्णं तज्ज्योतिः यानि खानि स आकाशः ।
अथ यल्लोहितं श्लेष्मा रेतस्ता आपः । यच्छरीरं सा पृथिवी यः प्राणः स वायुः'[f]
इति श्रुत्यन्तरात् । अतः संख्यासामान्यादियं हविष्पङ्क्तिः पुरुषस्य यजमानस्य

a. TS. 6. 3. 2. 5.
b. TS. 5. 4. 4. 5.
c. BṛU. Bhā. Vārttika, 1. 4. 1851.
d. BṛhU. Bhā. Vārttika, 1. 4. 1852.
e. AB. 2. 14. 7; 6. 29. 4.
f. AĀ. 2. 3. 3.

यज्ञपशुफलप्राप्त्यै संपद्यते । न केवलं हविष्पङ्क्तेः पशुप्राप्तिरेव फलम्, सवन-
तीव्रीकारोऽपीत्याह—**सेयं-तीव्रीकाराय ।** 1.१६,२०

अथ प्राणरूपेण स्तौति—**अथ-प्राणः ।** प्राणस्य पञ्चवृत्तेः पङ्क्तिसंख्या- 1.२१-२३
संबन्धः हविष्पङ्क्तेः प्राणरूपत्वं हेतूकृत्य 'हरिवाँ इन्द्रः'[a] इत्यादेः प्रैषस्यैव होता-
यक्षद्धोतर्यजयोरुद्धारेण याज्यात्वं विधत्ते—तस्माद् येनैवेति । यस्मादयं देहा-
न्तर्वर्ती मुख्यः प्राणो वस्तुवृत्त्या समान एक एव । वृत्तीनामेव भेदाद् वृत्तिम-
त्प्राणभेदे प्रमाणाभावात् । वैपरीत्ये तद्भावाच्च । तस्मादिह प्रैषयाज्ययोरेकत्वं
युक्तम् । हविष्पङ्क्तेः प्राणरूपत्वात् । अत्र सूत्रम्—'प्रसृप्य पुरोळाशैः सवनीयै-
श्चरन्ति । धानावन्तमिति पुरोनुवाक्या । होता यक्षदिन्द्रं हरिवाँ इत्यनुसवनं
प्रैषो यथासमाम्नातम् । तेनैव यजत्युद्धृत्य होतायक्षं होतर्यजं च'[b] इति । अत्र
पुरोळाशशब्दो हविरन्तरोपलक्षणार्थो द्रष्टव्यः । 'एवंरूपेष्वपि हविष्षु पुरोळा-
शैरित्युक्तं पौर्णमासीविकारार्थम्'[c] इति वृत्तिकारोक्तेः ॥

इति प्रथमः खण्डः

'हरिवाँ इन्द्रः'[a] इत्यादेः प्रैषस्यैव सवनत्रयेऽपि याज्यारूपत्वमुक्तम्, तत्र
तस्मिन् सवने तत्तत्सवनाभिधायकपदप्रक्षेपेण याज्यात्वेनास्य प्रयोज्यतां दर्श-
यितुं चोद्यमुत्थापयति—**तद्-इति ।** तत् तत्र सवनत्रयेऽपि 'हरिवाँ इन्द्रः'[a] 2.१
इत्यादेः प्रैषस्यैव याज्यारूपत्वे केचिद् वक्ष्यमाणं प्रश्नवाक्यमाहुः । किं तदित्य-
त्राह । यया याज्यया प्रातःकाले यजति, यामृचं याज्यारूपेण पठतीत्यर्थः, सा
ऋक् तस्मिन्नहनि यातयामा विगतरसैव भवति । पुनर्याज्यात्वेन तस्मिन्नहनि
पाठयोग्या न भवति; विगतरसत्वात् । एवं स्थिते कस्माद्धेतोरेषा याज्या सर्वेषु
सवनेषु अयातयामा सरसैव भवति ? तस्मिन्नहनि प्रातःकाले याज्यात्वेन
पाठान्न पुनर्याज्यात्वेन पाठो न्याय्यः । तस्मादुत्तरयोः सवनयोर्याज्यान्तरं मृग्य-
मिति चोद्यम् । अयातयामत्वं संपादयन् परिहरति—**यद्-अयातयामा ।** 2.२-६

a. MS. 3. 10. 6. b. ŚŚ. 7. 1. 1-5.

c. Bhā. on ŚŚ. 7. 1. 1.

सवनैः सवनवाचिभिः 'प्रातः प्रातः सावस्य'[a] इत्यादिभिः पदैर्वितारयन् विभेदयन् गच्छति याज्यां पठति होतेति यदेवास्ति तेन हेतुना सा याज्या सवनत्रयेऽयातयामैव भवति। यस्या यादृश्या एव पूर्वं याज्यात्वेनावस्थानं तस्यास्तादृश्या एव तस्मिन्नहनि पुनःप्रयोग एव यातयामत्वापत्तिदोषः। इह तु तस्या एव याज्यात्वेऽप्यतादृशीत्वान्न यातयामत्वमापादयितुं शक्यम्। अन्यत्वस्य उक्तसवनवाचिपदप्रक्षेपणे विद्यमानत्वादत्यन्तान्यत्वस्यानिरूपणाद् अयातयामत्वं प्रत्यहेतुत्वादिति।

2.७ अथ पयस्यामधिकृत्य किंचिच्चोद्यमुद्भावयति—**तद्-इति**। तत् तत्र सवनीयहविर्विषये केचिज्जिज्ञासवो वक्ष्यमाणं प्रश्नवाक्यमाहुः। पयसि शृतायां भवा पयस्या। आमिक्षेत्यर्थः। सा प्रातः प्रातःसवन एव क्रियते। नोत्तरयोः सवनयोः पयस्यायागः क्रियते। तत्र को हेतुः? इतरेषां सवनत्रयेऽपि संभवात् तत्सहभाविपयस्यायागस्य सवनत्रयासंभवे हेतुर्वचनीय इति चोद्यम्। अस्यो-
2.८-१५ त्तरम्—**यज्ञो-इति**। यज्ञः सोमयागो यः स मित्रावरुणसंबन्धीति प्रसिद्धम्। तच्च श्रुतम्—'मित्रो यज्ञस्य स्विष्टं युवते गमयति वरुणो दुरितम्'[b] इति। तेन मित्रावरुणसंबन्धिपयस्यायागस्तावद् यज्ञे संगत एव। न चोत्तरयोः सवनयोरपि तत्क्रियोत्पत्तिः। यस्मात् स यज्ञः दीक्षोपसदुपवसथदिनेषु गर्भावस्थां गतः सुत्याहनि प्रातःसवनावच्छिन्नो यः कालस्तस्मिन् काले जन्म प्राप्तो भवति। तरुणः प्रसूतमात्रश्च कुमारो लोके पयोभाजन इति प्रसिद्धम्। तत् तत्र लोके यथा जाताय तरुणाङ्गाय कुमाराय जनयित्री स्तनं स्तन्यं पयः प्रयच्छेद् एवमयं प्रातःसवने पयस्यायागः। स यज्ञ उत्तरयोर्माध्यंदिनतृतीयसवनयोर्वृद्धः परिणतशरीरो भवति। लोके च कुमारो यदा वर्धिताङ्गो भवति तस्मिन् काले स्तन्यपाननिरपेक्षो व्रीह्याद्यन्नोपयोगी भवति। तस्मात् प्रातरेवेत्युपसंहरति॥

इति द्वितीयः खण्डः

3.१ अथान्यामेव हविष्पङ्क्तेः स्विष्टकृद्यागस्य याज्यां विधत्ते—**हविर्-यजति**।
3.२-६ सवनत्रयेऽप्येषैव स्विष्टकृतो याज्येति। अथ स्तौति—**अवत्सारो-अतिमुच्यते**।

a. ŚB. 4. 2. 1. 23. b. Cf. TS. 6. 6. 7. 3.

पुरा किल अवत्सारनामा प्रश्रवणनामकस्य महर्षेरपत्यं कश्चिन्महर्षिः देवानां संबन्धिनि यज्ञे हौत्रमकरोत् । तमवत्सारं हौत्रं कुर्वाणं प्रतिलक्ष्य मृत्युर्मारयिता देवः एतस्मिन् स्विष्टकृद्यागलक्षिते द्युम्ने काले मारयितुकामः सन् निलीयावस्थितोऽभूत् । तत्र योऽयं मृत्युरुक्तः सोऽग्निरेव । अग्नेरेव सर्वसंहर्तृतया प्रसिद्धत्वात् । अथ दिव्यज्ञानसंपन्नः स महर्षिस्तद्विदित्वा तत्प्रतीकारोपायमन्विच्छुः[1] ईश्वरानुग्रहाद् 'हविरग्ने' इत्यमुं मन्त्रं दृष्टवान् । दृष्ट्वा च तन्मन्त्रसंस्कृतेन हविषाऽग्निं प्रीणयित्वानन्तरं ततोऽग्नेः प्रीतात् सतोऽतिमुक्तोऽभूत् । यथोक्तप्रकारेणावत्सारोऽग्नेर्मृत्योरतिमुक्तः, तथैवेमामाख्यायिकां विजानन् होता 'हविरग्ने वीहि'[a] इत्येतन्मन्त्रसंस्कृतेन हविषाग्निं प्रीणयित्वानन्तरं ततोऽग्नेर्मृत्योरतिमुक्तो भवति । प्रकारान्तरेण स्तौति—**एतैर्-अतिमुच्यते** । एतैः पञ्चभिर्हवि- 3.७-११
र्यागैरन्तराकाशैर्गमनमार्गद्वारभूतैः पुरा देवाः स्वर्गं लोकं गतवन्तः । तानेतस्मिन्नित्यादि पूर्ववत् ।

अथैतन्मन्त्रगताक्षरसंख्यां स्तौति—**तानि-यजते** । हे अग्ने ! इदं मया 3.१२-१४
दीयमानं हविर्वीहि भक्षयेत्येवमर्थस्यास्य मन्त्रस्य षडक्षराणि गणनायां भवन्ति । षट्संख्यानि पाणिपादचतुष्टयात्मशिरआख्यान्यङ्गानि यस्य स आत्मा षळङ्गः । तथा च ब्राह्मणान्तरम्—'षोढा विहितो वै पुरुषः आत्मा च शिरश्च चत्वार्यङ्गानि'[b] इति । आत्मा मध्यदेहः । शिर उपरिभागः । तथा षड्विधः षट्प्रकारः षट्कौशिकत्वात् । केचिदाहुः—'द्वौ पाणी द्वौ पादौ द्वौ स्तनाविति षडङ्गः । मध्यदेहो द्वे पार्श्वे पृष्ठं कुक्षिः शिर इति षड्विधः'[c] इति । तत् तेनात्मनैवात्मानं देवेभ्यो दत्तं निष्क्रीय प्रत्याहृत्यानन्तरमृणरहितः सन् यागं करोति । अमुमेव मन्त्रं विशिष्टतरद्रष्टृप्रदृष्टत्वेनापि स्तौति—**स-विद्यात्** । भवतु तदीयोऽसौ 3.१५-१७
हविरग्न इत्यादिर्मन्त्रः । ततः किमित्यत उक्तम्—स न मन्येतेति । कथं तर्हि मन्येतेत्यत उक्तम्—ऋषिकृतेनेति । ऋषिणा अवत्सारनाम्ना दृष्टेन वाग्रूपेण मन्त्रेण यागं करोमीत्येव जानीयात् । न त्वनध्यवसितरूपतया विजानीयात् ।

a. AB. 2. 24. 11; ŚS. 7. 1. 8. b. TS. 5. 6. 9. 1-2.

c.

1. M. V. अन्विच्छन्

3.१८,१९ इदानीं पुरोळाशानां सोमरूपत्वं संपादयन् स्तौति—**अथ-पुरोळाशान्।** यथा 'सोम एवैष प्रत्यक्षं यत् पशुः'[a] इति पशोः सोमरूपत्वमस्माभिरुक्तम्। एवं पुरोळाशानामपि सोमरूपत्वं वयं ब्रूम इत्यर्थः ॥

इति तृतीयः खण्डः

सोमरूपत्वेनाप्रसिद्धस्यापि पशोः पुरोळाशानां च सोमरूपत्वमुक्तम्। हन्त
4.१-१२ तर्हि कति सोमास्तावत् सन्तीत्यपेक्षायां सोमभेदान् प्रदर्शयति—**दश-सुतः।** यथांशुसमुदायः सोमशब्दवाच्यः एवं वक्ष्यमाणसोमसमुदाय एव सोमशब्दाभिधेय इति दर्शयितुं सोमांशवो दशसंख्याका विद्यन्ते किंस्वरूपाः किंनामानश्च इत्यत्राह—प्रत्नोऽंशुरिति। यमेतं प्रतियज्ञभूमि लतारूपं सोमं ऋत्विग्यजमाना अभिषुण्वन्ति[1] अभिषुतं कुर्वन्ति स एकः सोमस्यांशुरेव। तस्य च प्रत्न इति नाम। पुरा गन्धर्वेष्वमुष्मिन् लोक एव सतः पश्चाच्छन्दोभिराहृतत्वेन नित्यत्वात्। आप एवापरः सोमांशुः। तस्य तृप्त इति नाम। सर्वेषां तृप्तिहेतुत्वात्। तृप्तवत् प्रवर्धमानस्वभावत्वाद् वा। व्रीहिरेवैकः सोमांशुः। तस्य रस इति। तस्य प्राण-स्थितिहेतुत्वेन सारभूतः। तस्य प्राणभृत्त्वेन जीवत्वात्। हिरण्यस्यामृतत्वहेतु-त्वादमृताख्यसोमांशुरूपत्वम्। तद्धेतुत्वं च 'हिरण्यदा अमृतत्वं भजन्ते'[b] 'अमृतं हिरण्यम्'[c] इत्यादौ प्रसिद्धम्। ऋग्यजुःसामाख्या वेदा एव त्रयः सोमांशवः। एत उक्तनामान उक्तस्वरूपा दशसंख्याः सोमांशवः। अत्र यद्यपि लतात्मक एव मुख्यः सोमः प्रसिद्धः, 'सोमेन यजेत'[d] इत्यादौ तस्य यागसाधनत्वश्रवणाच्च, सोमाहरणाख्यायिकानुरोधाच्च; तथाप्यबादीनामभिषवाद्युपकारद्वारा अत्य-न्तान्तरङ्गत्वमभिप्रेत्य सोमांशुरूपत्वमुक्तम्। यथा राजकार्यसर्वनिर्वोढरि मुख्यामात्ये राजशब्दप्रयोगस्तद्वत्। अत एवाह—यदा यस्मिन् काले एते प्रत्नाद्याख्या लतादिस्वरूपा दशसंख्याकाः सोमांशवः संगतिं मेलनं प्राप्नुवन्ति

a. KB. XII. 7. ७.
b. RV. 10. 107. 2.
c. TB. 1. 7. 6. 3; 1. 7. 8. 1.
d. Cf. ApŚ. 8. 21. 2.

1. T. omits

तदैव सोमः सोमो भवति । अन्यथा त्वसोम एव भवेत्; अकृत्स्नत्वात् । तदानीमेव चायं सोमोऽभिषुतो भवति । सोमाभिषवोऽपि सर्वेष्वेतेषु समुदितेष्वेव संपादितो भवति । अन्यथा सोमाभिषवोऽकृत एव स्यादित्यर्थः ।

पुरोळाशप्रचरणानन्तरं द्विदेवत्ययागः कर्तव्य इत्याह—**पुरोळाशैः-लोके**। 4.१३-१७
ऐन्द्रवायवमैत्रावरुणाश्विनाख्यास्त्रयो द्विदेवत्या ग्रहाः । सूत्र्यते हि—'ऐन्द्रवायवमैत्रावरुणावाश्विनश्च द्विदेवत्याः'[a] इति । द्वे द्विसंख्ये इन्द्रवाय्वादिरूपे देवते स्तो येषां त इमे द्विदेवत्याः तैश्चरणं यागं कुर्युः । स च पुरोळाशयागानन्तरं कर्तव्यः । तदेतदानन्तर्यं प्रशस्तम् । यथात्मा देहेन्द्रियविषयाणां मध्ये प्रधानभूतः । सर्वस्य तदर्थत्वात् । एवं पुरोळाशयागोऽपि सर्वेषां प्रधानभूतः सवनत्रयक्लृप्तहेतुत्वात् । तच्चान्यत्र श्रूयते—'देवानां वै सवनानि नाध्रियन्त । त एतान् पुरोळाशान् अपश्यन् ।ताननुसवनं निरवपन्त्सवनानां धृत्यै । ततो वै तानि तेषामध्रियन्त । तद् यदनुसवनं पुरोळाशा निरुप्यन्ते सवनानामेव धृत्यै । तथा हि तानि तेषामध्रियन्त'[b] इति । द्विदेवत्यानां प्राणरूपत्वं द्विसंख्यायोगसाम्यात् । तच्च वक्ष्यति । यस्मात् पुरोळाशा आत्मरूपाः द्विदेवत्या प्राणरूपाः । तत्र पुरोळाशयागानन्तरं द्विदेवत्ययाग इति यदस्ति, तथा सत्यात्मनि प्राणानां स्थापनात् यजमानोऽस्मिन् पृथिवीलोके सर्वं शतसंवत्सरात्मकमायुः प्राप्नोति । प्रेत्य च परस्मिन् स्वर्गाख्ये लोकेऽमृतत्वमाभूतसंप्लवावस्थायित्वलक्षणं प्राप्नोति । अमृतत्वमित्यस्यैव व्याख्यानमक्षितिमिति । क्षितिः क्षयो विनाशः तदभावोऽक्षितिः । एतच्चामृतत्वमापेक्षिकमेव । कर्मजन्यत्वात् प्रकरणसामर्थ्याच्च ।

अथ द्विदेवत्यानां प्राणरूपत्वं विभज्योपदर्शयन् तद्याज्यापठने अनुच्छ्वसनलक्षणमानवान्यं विधत्ते—**ते-आश्विनः**। यथा प्राणा वाक्प्राणौ चक्षुषी 4.१८-२२
श्रोत्रे इति द्विसंख्यायोगिनः एवमेते ग्रहा अपि; द्विदेवत्यत्वात् । अतो द्विदेवत्याः प्राणा इत्युच्यन्ते । तत्रायं विभागः—योऽयमैन्द्रावयवो ग्रहः स वाक् प्राणरूपः । तद्देवतयोस्तद्रूपत्वात् । तत्रेन्द्रो वाग्रूपः । तद्रूपत्वं च तद्व्याकर्तृत्वात् । तच्चैन्द्रवायवग्रहब्राह्मणे श्रुत्यन्तरे श्रूयते—'वाग् वै पराच्यव्याकृतावदत् । ते देवा

a. ŚS. 7. 2. 1. b. AB. 2. 23. 1–2.

इन्द्रमब्रुवन् । इमां नो वाचं व्याकुर्विति । सोऽब्रवीद्वरं वृणै । मह्यं चैवैष वायवे च सह गृह्याता इति । तस्मादैन्द्रवायवः सह गृह्यते । तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यते'[a] इति । अस्यार्थः—पुरा खलु वाक् शब्दात्मिका समुद्रघोषादिवदेकरूपा सती प्रकृतिः प्रत्ययः पदं वाक्यमित्यादि विभागविरहितासीत् । तत्र तद्व्याकरणार्थं देवैरभ्यर्थितः तद्दत्तेन तस्मिन् पात्रे स्वस्य वायोश्च सहैव सोमरसग्रहणरूपेण वरेणोत्कोचेन संतुष्ट इन्द्रस्तां वाचमखण्डां सतीं मध्येऽवखण्डच प्रकृतिप्रत्ययादिविभागमकरोत्[1] । तस्मादिदानीमियं व्याकृता वाक् पाणिन्यादिभिः पठ्यत इति । वायोः प्राणरूपत्वं प्रसिद्धम् । मैत्रेयशाखायां प्रजापतेरेव वाय्वात्मना देहं प्रविष्टस्य पञ्चवृत्तिमत्प्राणात्मकत्वश्रवणात् । 'प्रजापतिर्वा एकोऽग्रेऽतिष्ठत् । स नारमतैकः । स आत्मानमभिध्यायन् बह्वीः प्रजा असृजत । ता अश्मेवाप्रबुद्धा अप्राणा स्थाणुरिव संतिष्ठमाना अपश्यत् । स नारमत । सोऽमन्यत एतासां प्रतिबोधनायाभ्यन्तरं विशानीति । स वायुमिवात्मानं कृत्वान्तरं प्राविशत् । स एको नाशकत् । स पञ्चधात्मानं प्रविभज्य उच्यते यः प्राणोऽपानो व्यान उदानः समान इति । अथ योऽयमूर्ध्वमुत्क्रामयत्येष वाव स प्राणः । अथ योऽयमवाञ्चं संक्रामयत्येष वाव सोऽपानः । अथ योऽयं स्थविष्ठमन्नधातुमपाने स्थापयत्यणिष्ठं चाङ्गेऽङ्गे सन्नमयत्येष वाव समानः । अथ योऽयं पीताशितमुद्गिरति निगिरति वैवैष वाव स उदानः । अथ येनैताः सिरा अनुव्याप्ता एष वाव स व्यानः[2]'[b] इति । अत्र च मुख्यप्राणविवक्षया प्राणशब्द एकवचनप्रयोगात् । चक्षुषो द्विसंख्यान्वयान्मैत्रावरुणस्य चक्षूरूपत्वम् । एवमाश्विनस्य श्रोत्ररूपत्वमपि । ननु चक्षुरादीनां कथं प्राणशब्दवाच्यत्वम्; तेषां रूपादिसंवेदनासाधारणकारणानामिन्द्रियत्वात् ? उच्यते । तेषां प्राणाधीनव्यापारत्वात् प्राणशब्देन व्यवहारात् । तथा च छन्दोगा आमनन्ति—'न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षते'[c] इति । अत एव 'सप्तशी-

a. TS. 6. 4. 7. 3-4. b. MU. 2. 6-7.
c. ChU. 5. 1. 15.

1. T. प्रकृतिप्रत्ययमित्यादि० 2. T. समानः

र्षन् प्राणाः'[a] 'सप्त शीर्षण्याः प्राणाः'[b] इत्यादौ सर्वत्र चक्षुरादौ प्राणशब्दप्रयोगः ॥

इति चतुर्थः खण्डः

**तस्माद्–प्राणाः।** यस्मादुक्तप्रकारेण द्विदेवत्यानां प्राणरूपत्वं तस्माद्धेतो- 5.१,२.
स्तेषां याज्या अनवानमुच्छ्वसनं विना पठनीयाः। किमर्थम्? प्राणानां संतत्या अविच्छित्त्यै। अन्यथा प्राणानां विच्छेदापत्तेर्होता मृतिं प्राप्नुयात्। यस्मादेते प्राणाः संतता अन्योन्यव्यतिषक्ताः शरीरं धारयन्ति, अतस्तद्विच्छेदापत्तिपरिहारार्थम् आनवान्यं कर्तव्यमित्यर्थः। याज्यासु 'अग्नं पिब शतेनानः'[c] 'गृणाना जमदग्निना'[d] 'वावृधाना शुभस्पती'[e] इत्येताः श्रुत्यन्तरविहिताः सूत्रकृता दर्शिता द्रष्टव्याः। इतरसोमयागवदिह प्रसक्तमनुवषट्कारपठनं प्रतिषेधति—
**न–प्राणाः।** 'सोमस्य अग्ने वीहि'[f] इत्यनुवषट्कारः। तदिह द्विदेवत्यविषये न 5.३-७
कुर्यात्। कुत इति चेत्। यस्माद् द्विदेवत्याः प्राणाः। अनुवषट्कारः संस्था समाप्तिरूपः। तत्र द्विदेवत्येषु प्राणेष्वनुवषट्कारं संस्थां[1] कुर्वन् पुरुषस्य सामान्यतः शतसंवत्सरसंपूर्तिलक्षणो यः संस्थाकालस्तस्मात् पूर्वमेव प्राणान् संस्थितान् करवाणीति परिभयं द्योतयन् होता द्विदेवत्येष्वनुवषट्कारं न कुर्यात्। तथा च सूत्रम्—'सोमस्याग्ने वीहीत्यनुवषट्कारः सर्वासु सोमयाज्यासु। द्विदेवत्यर्तुयाजान् परिहाप्यादित्यग्रहसावित्रग्रहौ पात्नीवतं च'[g] इति। होमानन्तरमध्वर्युणा होतुर्हस्ते दत्तानां होत्रा 'ऐतु वसुः पुरूवसुः'[h] इत्यादिभिर्मन्त्रैः परिगृहीतानां ग्रहपात्राणां क्रमेण सादनं विदधानः प्रथममैन्द्रवायवग्रहसादनं विधत्ते—
**ऐन्द्रवायवम्–च।** ऐन्द्रवायवाख्यं ग्रहं दक्षिण ऊरौ तस्य पूर्वार्धे सादयेत्। 5.८-११
सूत्र्यते हि—'ऐतु वसुः पुरूवसुरित्यैन्द्रवायवं प्रतिगृह्योरौ दक्षिणे निधाय'[h] इति।

a. ŚB. 9. 5. 2. 8; TB. 1. 2. 3. 3.
b. JUB. 2. 2. 3. 9; 10.
c. ŚŚ. 7. 2. 4.
d. ŚŚ. 7. 2. 7 ( RV. 3. 62. 18 ).
e. ŚŚ. 7. 2. 10 ( RV. 8. 5. 11 ).
f. AB. 3. 5. 4.
g. ŚŚ. 7. 3. 4.
h. ŚŚ. 7. 3. 1.

1. M. V. omit.

यस्मादेषां वागादीनां प्राणानां मध्ये एष मुख्यः[1] पूर्वार्ध्यो भवति । शरीरस्य पूर्वार्धे भवः पूर्वार्ध्यः । मुखे तस्य वर्तमानत्वात् । 'अथ हेममासन्यं प्राणमूचुः'[a] इत्यत्रासन्यत्वविशेषणात् ।

'अस्ति यस्मादसुर्नित्यमासन्योऽयमतो मतः ।
वागादिभ्यो विभागार्थं विशेषणमसोरिदम् ॥'[b]

इत्याचार्यैरासन्यपदस्य व्याकृतत्वात् । मैत्रावरुणाश्विनग्रहयोः सादनं विधत्ते— अभिधानतम इव । इतरौ ग्रहावैन्द्रवायवग्रहस्य पश्चात् पार्श्वद्वयवर्तितया सादयेत् । मैत्रावरुणमैन्द्रवायवस्य दक्षिणतः पश्चान्निदध्यात् । आश्विनमुत्तरतः पश्चात् । तौ चैन्द्रवायवग्रहेण संलग्नौ यथा स्यातां तथा सादयेदित्युक्तमभिधानतम इवेति । एतच्चोपपद्यते । यस्माच्चक्षुःश्रोत्रे पूर्वार्ध्यस्य मुख्यप्राणस्य परितः स्थिते भवतः । तस्मात्तद्रूपयोरनयोरप्यभितः सादनमुचितम् । अत्र सूत्रम्— 'ऐतु वसुर्विदद्वसुरिति मैत्रावरुणं प्रतिगृह्य[2] दक्षिणेनैन्द्रवायवं हृत्वा दक्षिणतः पश्चान्निदधाति । ऐतु वसुः संयद्वसुरित्याश्विनं प्रतिगृह्य दक्षिणेन पूर्वौ हृत्वोत्तरतः पश्चान्निदधाति'[c] इति । सादितानां द्विदेवत्यग्रहपात्राणां धारणं विधत्ते—

5.१२,१३ **तान्–इति** । तान् सादितान् द्विदेवत्यानवगृह्याधोदेशे हस्तेन गृहीत्वासीत । कुत इति चेत् । प्रवर्तनं स्थानात् प्रच्यवनतोऽधःपतनं तदवग्रहाभावे सति प्राप्नुयुरिति परिभयं द्योतयन् अवगृह्णीयात् । प्रवृत्तान्ता इत्युपधीयान्ता इत्यादिवल्लेटचाडागमः । 'वैतोन्यत्र'[d] इत्यैत्वम् । केचिद् द्विदेवत्यानामपिधानमिच्छन्ति ।

5.१४-१६ तत् प्रतिषेधति—**न–इति** । यदि द्विदेवत्यानपिदध्यात् तर्हि प्राणानामेवापिधानं कृतं स्यात्; तेषां प्राणरूपत्वस्योक्तत्वात् । अतः प्राणानामपिधानं कुर्यामिति परिभयं द्योतयन्नपिधानं न कुर्यात् । सूत्र्यते हि—'अनपिधानमनवेक्षणं च द्विदेवत्यानामा शेषस्यावनयनात्'[e] इति । अपिधाने च संज्ञप्यमानपशुवन्मरणप्रसक्तिः दुर्निवारा ।

a. BṛhU. 1. 3. 7.
b. BṛhU. Bhā. Vārttika on 1. 3. 7.
c. ŚS. 7. 3. 2–3.
d. Pā. 3. 4. 96.
e. ŚS. 7. 3. 1.

1. T. adds प्राक्
2. T. प्रतिहृत्य

द्विदेवत्ययागानन्तरं प्रस्थितसोमयागः । तत्र होतुर्याज्यां विधत्ते—
**इदं-मधुमती ।** मधु मधुरं रसं श्च्योतयन्ति स्यन्दयन्तीति मधुश्च्युतः सोमाः 5.१७
तेषां सोमानां प्रस्थितानां देवान् गन्तुं प्रारब्धानां[1] मधुशब्दवती 'इदं ते सोम्यम्'[a]
इत्येषा याज्या कर्तव्या । मधुश्च्युतां मधुमतीत्याभिरूप्यं दर्शितम् । अत्र सूत्रम्-
'उन्नीयमान इत्युक्त आ त्वा वहन्तु हरय इत्युन्नीयमानसूक्तम् । होता यक्षदिन्द्रं
प्रातः प्रातः सावस्येति प्रैषः । इदं ते सोम्यं मध्विति यजति'[b] इति । अत्रानुव-
षट्कारं विधत्ते—**अनुवषट्करोति-प्रतिष्ठित्यै ।** आहुतीनां शान्तिः प्रतिष्ठा 5.१८,१९
चानुवषट्कारफलम् । अशान्तत्वं च वज्ररूपवषट्कारसंबन्धात् दाहादिविधानम्;
तीक्ष्णीकृतक्षुरादेरिव वा । स्वतो विशृङ्खलशक्तिशालित्वात् । यथाग्नेर्घोरं शिवं
चेति रूपद्वयमस्ति एवमाहुतीनामपि । तत्र घोरं यद्रूपमस्ति तच्छान्तिहेतुरय-
मनुवषट्कारः । प्रतिष्ठा सुखावस्थितिरवसानं वा । एतावत्याहुतिरिति अनुव-
षट्कारस्य संस्थारूपत्वात् तद्धेतुश्चायम् । एवं सति हि यजमानाभिप्रेतफलप्रा-
प्तिहेतुत्वमाहुतीनामवकल्पेत । अथ होत्रकाणां प्रशास्त्रादीनां प्रस्थितयाज्याः
विधत्ते—**अथ-संप्रमुञ्चन्ति** । यद्यपि होत्रा इति स्त्रीलिङ्गनिर्देशस्तथापि 5.२०,२१
होत्रकाः पुरुषा एवाभिप्रेताः । संयजन्तीत्यादिनिर्देशात् । ताश्च याज्याः 'पुनरु-
न्नीतान् होत्रका यजन्ति'[c] इत्यादिना 'मित्रं वयं हवामहे'[d] इत्याद्याः सूत्रकृता
दर्शिता द्रष्टव्याः । तत् तेन ते होत्रका अनृणतायै ऋणराहित्यार्थं यजमानं
पाप्मनः संप्रमुक्तं कुर्वन्ति । श्रूयते 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते'[e]
इत्यृणित्वम् ।

एवं तावत् क्रमेण पुरोळाशद्विदेवत्यप्रस्थितसोमयागान् विधाय संप्रति सोमभक्षणविषयं विधिं निरूपयति—द्विदेवत्यानामित्यादिना सर्वे समुपहूय भक्षयन्तीत्यन्तेन । तत्र तावद् द्विदेवत्येळाहोतृचमसभक्षणे क्रममाह—**द्विदेवत्या-
नां-होतृचमसः ।** द्विदेवत्यानां ग्रहाणां भक्षो भक्षणं प्रथमं भवति । अनन्तर- 5.२२-२९

a. RV. 8. 65. 8.
b. ŚŚ 7. 4. 1-3.
c. ŚŚ. 7. 4. 5.
d. RV. 1. 23. 4.
e. TS. 6. 3. 10. 5.

1. T. adds मधूनां

मिळाभक्षणम् । तदनन्तरं होतृचमसभक्षणम् इत्येवं क्रमो भवति । इळाहोतृ-
चमसशब्दाभ्यां तद्विषयं भक्षणं लक्ष्यते । अत्र हेतुमाह—आत्मा वा इत्यादि ।
पुरोळाशानामात्मरूपत्वं द्विदेवत्यानां प्राणरूपत्वं चात्रैवाधस्तादुक्तम् । इळाया
अन्नपशुरूपत्वं तृतीयाध्याय इळाभक्षणविधानप्रकरण उक्तम् । यस्मादन्नमेव
प्राणात्मनोरन्योन्यसंश्लेषहेतुः । अन्नोपयोगविरहे सति प्राणोत्क्रान्तिदर्शनात् ।
अतः प्रथममेव विद्यमानानां प्राणानामन्नस्य प्रतिष्ठाहेतुत्वात् प्रथमं प्राणात्मक-
द्विदेवत्यभक्षणम् । अनन्तरं तत्प्रतिष्ठापकान्नरूपेळाभक्षणम् । तत एव चान्ते
होतृचमसभक्षणमिति क्रमसिद्धिः । तत्र द्विदेवत्यभक्षणं तावद् विधित्सुस्तेषाम्
5.३० 'इह वसुः'[a] इत्यादिमन्त्रैरध्वर्यवे प्रदानं विधत्ते—**तान्-प्रयच्छति** । सूत्रितं च—
'इह वसुः पुरूवसुरित्यैन्द्रवायवमध्वर्यवे प्रगृह्य'[b] इत्यादि । पात्राणामध्वर्यवे
5.३१-३३ प्रदाने सति प्रसक्तं होतुः पात्रविमोचनं प्रतिषेधति—**न-इति** । अनुसर्जनं
विमोक्षः । तन्न कुर्यात् । किं तु गृहीत्वैवासीतेत्यर्थः । किं सर्वदेति ? नेत्याह—
आ शेषस्यावनयनादिति । प्रतिभक्षितस्य द्विदेवत्यस्य शेषो होतृचमसेऽवनेयः ।
तथा वक्ष्यति—'संस्रवान् होतृचमसेऽवनयति'[c] इति । सूत्रितं च—'प्रतिभक्षितं
द्विदेवत्यशेषं नाराशंसवतां च ग्रहाणां होतृचमसेऽवनयति'[d] इति । सोऽयं शेषा-
वनयः । तस्मात् पूर्वं पात्रमोचनं न कर्तव्यम् । तस्मिंस्तु कृते कर्तव्यमेव । सूत्रितं
हि—'अनुत्सर्जनं च द्विदेवत्यानामा शेषस्यावनयनात्'[e] इति । अथ क्रमेण ऐन्द्र-
5.३४-३६ वायवमैत्रावरुणाश्विनानां भक्षणं विधत्ते—**द्विर्-शृणोति** । ऐन्द्रवायवं ग्रहं
द्विवारं भक्षयेत् । कुत इति चेत् । यस्मात् वषट्कारनिबन्धनं भक्षणम् । वषट्-
कारश्च द्विवारमनुष्ठितः । अतो द्विवारं भक्षणं कर्तव्यम् । मैत्रावरुणाश्विनग्रहौ
सकृदेकवारमेव भक्षयेत् । तत्र सकृदेव वषट्कारस्य कृतत्वात् । तत्राश्विनभक्षणे
विशेषमाह—सर्वतः परिहारम् इति । सर्वासु दिक्षु परिहृत्येत्यर्थः । सूत्रितं
हि—'आश्विनं प्रदक्षिणं शिरः पर्याहृत्यावेक्ष्य प्रतिपर्याहृत्यावेक्ष्य'[f] इति ।
यस्मात् सर्वतः सर्वासु दिक्षु प्रवृत्तां वाचं श्रोत्रेन्द्रियेण सर्वलोकः शृणोति ।

a. AB. 2. 27. 3.
b. ŚŚ. 7. 5. 1.
c. KB. XIII. 6. १.
d. ŚŚ. 7. 4. 15.
e. ŚŚ. 7. 4. 17 ( Pr. edn. अनवसर्जनम् ).
f. ŚŚ. 7. 5. 4.

तस्मात् सर्वासु दिक्षु परिहारेणैवाश्विनग्रहभक्षणम् । 'श्रोत्रमाश्विनः'[a] इत्याश्विनस्य श्रोत्ररूपत्वोक्तेः । तथा च ब्राह्मणान्तरम्—'सर्वतः परिहारमाश्विनं भक्षयति । तस्मान्मनुष्याश्च पशवश्च सर्वतो वाचं वदन्तीं शृण्वन्ति'[b] इति ॥

इति पञ्चमः खण्डः ६

अथाध्वर्युणा प्रतिभक्षितानां द्विदेवत्यानां शेषावनयनं होतृचमसे कर्तव्य-
मिति दर्शयति—**संस्रवान्-करोति** । तत् तेन संस्रवावनयनेन । एनान् संस्रवा- 6. १,२
निळाभाज एव करोति । होतृचमसस्येळासंबन्धात् तद्द्वारा संस्रवाणामिळा-
भाक्त्वम् । क्रमप्राप्तमिळाह्वानं विधत्ते—**अथेळामुपह्वयते** । सूत्र्यते हि—'उप- 6.३
स्पृश्येळामुपह्वयते'[c] इति । अत्र चमसाध्वर्यूणां किंचित् कर्म विधत्ते—**उपोद्य-
च्छन्ति चमसान्** । तस्मिन् काले चमसाध्वर्यवश्चमसानिळासमीप उत्क्षिपन्ति । 6.४
सूत्र्यते हि—'उपोद्यच्छन्ति चमसान्'[d] इति । नियमान्तरं विधत्ते—**होतृचमस-
मन्वारभते** । अन्वारम्भणं स्पर्शः । सव्येन पाणिना होतृचमसं स्पृशेत् । 'सव्येन 6.५
होतृचमसं च पात्रीं च संयच्छति'[e] इति श्रुत्यन्तरात् । इळाहोतृचमसयोः
प्रसक्तं स्पर्शनं प्रतिषेधति—**असंस्पर्शयन्-इळाम्** । असंस्पर्शने हेतुमाह— 6.६
**वज्रो-इति** । आज्यस्य वज्ररूपत्वं 'घृतं वै देवा वज्रं कृत्वा सोममघ्नन्'[f] 6.७-९
'घृतेन हि वज्रेणेन्द्रो वृत्रमहन्'[g] इत्यादौ प्रसिद्धम् । सोमस्य रेतस्त्वं 'सोमो वै रेतोधाः'[h] इत्यादिश्रुतेः । रेतःसारूप्याद् वा । सोमस्यान्नरूपत्वाद् वा । अत आज्येन वज्रेण सोमरूपं रेतो विनाशयानीति परिभयं द्योतयन् संस्पर्शनं न कुर्यात् । आज्यस्य सोमस्य च हिंस्यहिंसकभावो 'घृतं वै देवाः'[f] इत्युदाहृतश्रुतिबलाच्चावगन्तव्यः । एतच्च सूत्रितम्—'असंस्पर्शनं सर्वत्राज्यलेपेन सोमस्य'[i] इति । इळायां सुन्वच्छब्दाभिधानं आशीःपदानभिधानं च प्रसक्तं प्रतिषेधति—

a. KB. XIII. 4. २२; TS. 6. 4. 9. 4.
b. AB. 2. 27. 8.
c. ŚŚ. 7. 5. 7.
d. ŚŚ. 7. 5. 8.
e. KB. XIII. 7 of Lindner's edn.
f. TS. 6. 2. 2. 4.
g. AB. 2. 23. 6.
h. TB. 1. 7. 2. 3; 4.
i. ŚŚ. 7. 5. 10.

6.१०,११ **तस्यां-निराह** । अथ प्रकृतिगतादिळाह्वानाद् विशेषमाह—**उपहूय-**
6.१२,१३ **उत्तरेळाम्** । इळोपहवनिगदं पठित्वा तत इळाभक्षणं हि प्रकृतौ क्रियते । इह पुनर्न भक्षणकर्मास्ति । किं तु इळानिगदपाठानन्तरमवघ्राणनं कृत्वा उपरमेदेव । न चावान्तरेळाभक्षणवदुत्तरेळाभक्षणमपि नानुष्ठेयमिति शङ्क्यम् । किं तु प्रकृताविवोत्तरेळाभक्षणं कर्तव्यम् । 'अथेळाथ होतृचमसः'[a] इति हि पूर्वं क्रमोऽभिहितः । तदनुरोधेनेळाभक्षणविधानानन्तरं होतृचमसभक्षणं विधत्ते—
6. १४ **अथ-भक्षयति** । उपलक्षणमेतद् ब्रह्मादिचमसभक्षणस्य । अथ चमसानामन्येषां प्रातिस्विकचमसभक्षणविधिं सिद्धवत्कृत्य प्रस्थितसोमभक्षणं स्तौति—**एतद्-**
6.१५,१६ **भक्षयन्ति** । सोम इति यदस्ति तदेतद् व्रीह्यादीनामन्नाद्यानां मध्ये परममुत्कृष्टमन्नाद्यम् । परमत्वं चामृतत्वादिहेतुत्वात् । तच्च 'अपाम सोमममृता अभूम'[b] इत्यादिमन्त्रतस्तावदवगम्यते[1] । एतत् सोमलक्षणं परममन्नाद्यं सर्वे होत्रादयः संभूयोपहवमनुज्ञाम् अन्योन्यं कृत्वा भक्षयन्त्येव ।

इदानीमच्छावाकीयप्रचारविषये होत्रा कर्तव्यं किंचिद् विधित्सुः
6. १७ प्रस्तौति—**अथ-अच्छावाकस्य** । अनन्तरमच्छावाकविषये होतुः प्रत्युपहवोऽपि निरूप्यते इति योजना। अत्रायं प्रयोगक्रमः—सवनमुखभक्षणसमनन्तरम् 'अच्छावाक[2] सीद'[c] इत्यध्वर्युणोक्ते प्रसृप्याप्रसृप्य वा सदोनामधेयान्मण्डपाद् बहिस्तस्याग्रदेशे शालामुखीयादारभ्य उत्तरवेदेर्द्वारपरम्परया यो मार्गः तस्य स्रुतिशब्दाभिधेयस्योत्तरत[3] उपविश्याध्वर्युणा विश्राणितं पुरोळाशखण्डं गृहीत्वा 'अच्छावाक वदस्व'[d] इत्युक्ते 'अच्छा वो अग्निमवसे'[e] इति तिस्र ऋचः पठित्वान्त्येन प्रणवेन संततं 'यजमान होतः'[f] इत्यादिकं निगदं ब्रूयात् । अथ निगदे समाप्ते 'उपहवमयं ब्राह्मणोऽच्छावाको वेच्छते'[g] इत्यध्वर्युणोक्तो होता 'प्रत्येता वामा'[h]

a. KB. XIII. 5. २३.
b. RV. 8. 48. 3.
c. ŚŚ. 7. 6. 1.
d. ŚŚ. 7. 6. 1.
e. RV. 5. 25. 1.
f. ŚŚ. 7. 6. 3.
g. ŚŚ. 7. 6. 4.
h. ŚŚ. 7. 6. 6.

1. T. °मन्त्रवस्तादवगम्यये
2. T. अच्छावाकः
3. T. उत्तरतो दूरत for उत्तरत

इत्यमुं मन्त्रमैकस्वर्यम् उच्चैष्ट्वं च विना पठेदिति। अस्य मन्त्रस्यान्त 'उतोपहूत'[a] इति प्रत्युपहवसंज्ञस्य कस्यचिन्मन्त्रस्य पाठः कर्तव्यः। न वा कर्तव्यः। तत्र स्वेच्छा प्रमाणं भवति। यद्युपहवं दातुमिच्छेत् तदा कर्तव्यः, न चेन्न कर्तव्य इति। उपहवदानस्य करणे[1] नित्यवदनुष्ठानहेत्वभावात्। तमिममर्थं दर्शयति—**प्रत्येता-उपजुह्वषते।** यदि होता अच्छावाकायोपहवं दातुं नेच्छेत् तर्हि 'उत नो 6.१८-२१
गाव उपहूताः'[a] इत्यन्त एव मन्त्रः पठितव्यः। 'उतोपहूत'[a] इति तु न ब्रूयात्। तथा च सूत्रम्—'उत नो गाव उपहूता इत्यातोनुपह्वास्यमानः'[b] इति। अभिविधावयमाङ् द्रष्टव्यः। उपहवं दातुमिच्छन्नुपह्वास्यमानः। तद्विपरीतोऽनुपह्वास्यमानः। यदि होतोपहवं कर्तुमिच्छति तर्हि 'गाव उपहूताः'[a] इति जपित्वा तत 'उतोपहूत'[a] इति मन्त्रखण्डं पठेत्। सूत्रितं हि—'प्रत्येतावामासूक्तायं सुन्वन् यजमानो ग्रभीत्। उत प्रतिष्ठोतोपवक्तरुत नो गाव उपहूता उतोपहूता इत्युपह्वास्यमानः'[a] इति।

होत्रा कर्तव्यमैच्छिकं कर्म विधायाच्छावाकीयं कर्म विधत्ते—**प्रत्युपहूतो-प्रायश्चित्तिः।** 'उतोपहूत'[a] इति प्रत्युपहूतः सन्नच्छावाको 'नि वर्तध्वं 7.२२-२४
मानु गात'[c] इति यत् सूक्तमस्ति तस्य सूक्तस्य यावतीर्ऋचः प्राक् संप्रैषात् पठितुं शक्नुयात् तावतीर्ऋचः पठेत्। सूत्र्यते हि-'प्रत्युपहूतोऽच्छावाको नि वर्तध्वमिति सूक्तस्य यावच्छक्नुयात् तावदनुद्रवेत्'[d] इति। अच्छावाकस्योपहवेच्छाविरहे होतुः कर्म विधत्ते—होता वा इत्यादि। वाशब्दो विकल्पे। उपहवमनिच्छन्तमच्छावाकं प्रत्युपहूय ततो 'नि वर्तध्वं मानु गात'[c] इति सूक्तस्य यावच्छक्नुयात् तावत् पठेत्। तत्र तस्मिन् विषये उपहवमनिच्छते तद्दानलक्षणेऽपराधे सैव प्रायश्चित्तिर्भवति॥

इति षष्ठः खण्डः

a. ŚS. 7. 6. 6.
b. ŚS. 7. 6. 7.
c. RV. 10. 19. 1.
d. ŚS. 7. 6. 8.

1. T. adds अभ्युदयहेतुत्वात्

7.१-३ क्रमप्राप्तान् ऋतुयाजसंज्ञान् यागविशेषान् विधत्ते—**प्राणा-दधति** । वक्ष्यमाणप्रकारेणर्तुयाजानां प्राणधारणहेतुत्वात् प्राणरूपा एवर्तुयाजाः । तत्रर्तु-याजैः ऋतुयाजसंज्ञान् यागविशेषान् चरन्ति प्रचरन्ति कुर्वन्तीति यदस्ति, तत् तेन प्राणान् प्राणापानव्यानानेव यजमाने स्थापयन्ति । एतदेवोपपादयति—**स-**
7.४-१० **दधाति ।** प्राणस्वरूपं मैत्रेयशाखाश्रुत्युदाहरणेन पूर्वं प्रदर्शितम् । त्रेधा त्रिप्रकार-वत्तया विहितः परिक्लृप्तः । एवं प्राणानां त्रैविध्ये सति त ऋतुयाजैरेतैर्यजमाने स्थाप्यन्ते । कथमिति चेत् । 'ऋतुना सोमं पिबतु'[a] इति षट्कृत्वो यजन्ति होत्रादयः । तेन प्राणमेव यजमाने स्थापयन्ति प्राथम्यसाम्यात् । अथ चत्वारो मान्त्रवर्णिका ऋत्विजः 'ऋतुभिः सोमं पिबतु'[b] इति यजन्ति । तेनापानमेव यजमाने स्थापयन्ति । मध्यवर्तित्वसाम्यात् । अथ पुनरपि 'ऋतुना सोमं पिबतु'[a] इति द्विवारं होता यजति । तेन व्यानमेव यजमाने स्थापयन्ति । तृतीयत्व-साम्यात् । एवं क्रमादृतुयाजैस्त्रेधा विभक्तैः प्राणापानव्यानानां प्राणानां यजमाने
7.११ प्रतिष्ठापने किं फलमिति चेत् तत्राह—**तथा-लोके ।** व्याख्यातमेतत् ।

7.१२-१९ **ते-प्राणाः ।** ते वा एते इत्यादिकं युक्ता इव हीमे प्राणाः इत्यन्तं द्विदेवत्यब्राह्मणवद् व्याख्येयम् । अध्वर्युप्रेषितेन मैत्रावरुणेन होत्रादीन् प्रति 'होता यक्षदिन्द्रं होत्राद्'[c] इत्यादय ऋतुप्रैषनामानः प्रैषाः अनवानं वक्तव्याः । तथा च सूत्रम्—'होता यक्षदिन्द्रं होत्रादित्यृतुप्रैषैरनवानं प्रेष्यति'[c] इति । अत्र सर्वेष्वपि प्रैषेषु होता यक्षदित्ययमेवारम्भः । तत्र कामप्यनुपपत्तिमुद्भावयति—
7.२० **तद्-इति ।** तत् तत्र प्रैषादिभूते 'होता यक्षद्' इत्येवमारम्भेऽस्मिन्नंशे जिज्ञासवः केचित् प्रश्नवाक्यमाहुः । किमिति चेत् । होतारं प्रति याज्यापठनाय मैत्रावरुण-स्य यः प्रैषपाठः तत्र तावद्धोतारं प्रति 'होता यक्षद्' इत्येवमारम्भो युक्तः । तत्र होतुरेव वषट्कर्तृत्वेन होतृशब्दस्य समवेतार्थत्वस्य संभवात् । यदा पुनर्होतृव्यति-रिक्ताः पोत्रादयो होत्रका वषट्कर्तारो वर्तन्ते तदा तान् प्रति कथंकारं होतारमिव प्रति 'होता यक्षद्' इत्येव प्रैषारम्भः ? तेषां होतृत्वाभावेन होतृशब्दस्यासमवे-तार्थत्वात् । अतस्तेषु वषट्कर्तृषु सत्सु तत्तद्वाचिभिः पदैरेव प्रैषपाठो न्याय्यः ।
7.२१,२२ वक्तव्यो वा हेतुरिति । सर्वेभ्य इति द्वितीयार्थे चतुर्थी । उत्तरमाह—**वाग्-आह ।**

a. KS. 28. 2. b. cf. KS. 28. 2.
c. ŚS. 7. 8. 2.

होतृशब्देन वागेवाभिधीयते। हौत्रस्य वाङ्निर्वर्त्यत्वात्। अत एव हि 'वाक्पतिर्होता'[a] 'वाग्घोता'[b] इत्यादिमन्त्रवर्णाः। तथा सति होत्रकाणामपि तत्तत्कर्मणां वाङ्निर्वर्त्यत्वेन वाग्रूपत्वसंभवाद् होतृशब्दवाच्यत्वोपपत्तिः। इत्थमापाततः परिहारमुक्त्वा साक्षात् परिहारमाह—**अथो-इति**। पूर्वोक्तहोतृशब्द- 7.२३-२५
वाच्यत्वोपपत्तिसमुच्चयार्थोऽथोशब्दः। सर्वेऽप्येते होता तद्व्यतिरिक्ता होत्रकाश्च संभूय सप्तसंख्याका होतृशब्दवाच्या एव। किमत्र प्रमाणमित्याशङ्क्य शाखान्तरीयामृचमत्र प्रमाणयति—अपि वा इति। किंच सर्वेषामेषां होतृशब्दवाच्यत्वात् सर्वेष्वपि होतृशब्दस्य मुख्यया वृत्त्या प्रवृत्तिसंभवान्न कश्चिद् दोष इत्यर्थः।

उत्तमयोः ऋतुयाजयोः प्रैषे होतारं परित्यज्याध्वर्युगृहपत्योरादेशः क्रियते। तं प्रशंसति—**अथ-अजामितायै**। होतुरेवोत्तमयोरपि यष्टृत्वात् तस्मिन्नेवादेश्ये 7.२६
स्थिते तदादेशं वर्जयित्वा अध्वर्युगृहपत्योरादेशः क्रियत इति यदस्ति तदजामित्वसिद्ध्यर्थम्। भूयो भूयस्तदादेशजन्यालस्यदोषापत्तेरेवं सति परिहारसंभवात्। **ते-आप्त्यै**। ते वै द्वादशेति ऋतुयाजसंख्यास्तुत्यर्थवादो गतः। अथर्तुया- 7.२७-२९
जेषु भक्षणस्थाने ओष्ठलेपनावघ्राणनयोरन्यतरद् विधित्सुरन्यत्रैव प्रसक्तं साक्षाद् भक्षणं प्रतिषेधति—**स-स्यात्**। अत्र ऋतुयाजविषये स यः कश्चिद् 7.३०-३३
वषट्कर्ता साक्षाद् सोमभक्षणमन्यत्रैव कुर्यात्। तं भक्षणं कुर्वाणं वषट्कारमधिकृत्य यः कश्चित् सदसि स्थितो भक्षणदोषाभियुक्तो विद्वानित्थं ब्रूयात्। कथमिति चेत्-अयं भक्षोऽशान्तः क्रूरः। यस्माच्छान्तिहेतुना अनुवषट्कारेण रहितः। अनुवषट्कारस्य शान्तिहेतुत्वस्य पूर्वमुक्तत्वात्। 'ऋतुयाजेषु नानुवषट्कुर्वन्ति'[c] इति यत्नतो निषेधात्। अतः क्रूरत्वाद् वज्रायमाणो भक्षो भक्षितोऽस्य भक्षयितुः प्राणान् विगमयेत्। तथा च नायं प्राणान् धारयिष्यति। एवं यो विद्वान् ब्रूयात् तस्य तद्वचनं तथा भूतार्थमेव स्यात्। प्राणवियोगस्यावश्यंभावित्वात्। तस्मादुक्तदोषापत्तेः नर्तुयाजेषु भक्षणं कर्तव्यम्। मा भूत् तर्हि तत्र भक्षणमित्याशङ्क्य तत्रापि दण्डमाह—**य-स्यात्**। योऽयं भक्षोऽस्ति 7.३४-३७
स प्राणस्थितिहेतुत्वात् प्राण एव। तथा सति भक्षणमकुर्वन्नयं वषट्कर्तात्मानं

a. TA. 3. 1. 1. b. TA. 3. 6. 1.

c. Cf. ŚB. 4. 3. 1.21.

प्राणसकाशाद् वियोजितवान् , अतो नायं धारयिष्यतीति यद् वचनं तत् तथा यथार्थमेव स्यात् । तस्मादभक्षणमप्यननुष्ठेयम् । यद्युक्तदोषापत्तिपरिभयेन भक्षणमभक्षणं च नानुष्ठेयमेव किं तर्ह्यनुष्ठेयम् ? न हि विधान्तरमत्र संभावनीयमित्याशङ्क्य पक्षद्वयाविरुद्धमुक्तदोषानाक्रान्तमनुष्ठानप्रकारं
7.३८ प्रदर्शयति—**लिम्पेद्-इति** । अत्रर्तुयाजेषु द्विदेवत्येषु च ओष्ठलेपनं वा कर्तव्यम् । अवघ्राणनं वा कर्तव्यम् । न साक्षात् सोमस्य भक्षणम् अत्यन्तं वा अभक्षणं कर्तव्यम् । उक्तदोषापत्तेः । एवशब्दो विकल्पार्थः । इवशब्दोऽनर्थकः । न चायं स्वकपोलपरिकल्पितोऽनुष्ठानप्रकारः किं तु अभियुक्ततरब्रह्मवादिधर्मत
7.३९ इत्याह—**तदु-वेदयन्ते** । तत्र भक्षणाभक्षणायोग्यविषये । विद्वांस इत्युक्तप्रकारोपपन्नमेतदेव शासनं लेपनावघ्राणनान्यतरलक्षणं विधानं वेदयन्ते जिज्ञासून् बोधयन्ति । अतः प्रमाणमूलकत्वादयं पक्षोऽङ्गीकर्तव्यः । अथ प्रसङ्गादृतुग्रहग्रहणकर्मणि अध्वर्युप्रतिप्रस्थातृकर्तृके तयोः प्रचरणे कंचिद्विशेष-
7.४०-४२ मनुभाष्य प्रशंसति—**अथ-अनुप्रपद्यते** । अमू अध्वर्यू अध्वर्युः प्रतिप्रस्थाता च । व्यतिचरतः व्यतिक्रम्य चरणं कर्म कुरुतः । व्यतिचरत इत्येतदेव व्याचष्टे—नान्योन्यमनुप्रपद्येत इति । अनुप्रवृत्तिर्नामान्यस्मिन् हविर्धानमण्डपादनिष्क्रान्त एवान्यस्य तत्प्रवेशः । तं न कुरुतः । किंतु अध्वर्यौ हविर्धानान्निष्क्रान्त एव सति प्रतिप्रस्थाता हविर्धानं प्रविशेत् । तथा प्रतिप्रस्थातरि ग्रहं गृहीत्वा निष्क्रान्त एवाध्वर्युः प्रविशेत् । एवमन्योन्यमनुप्रपत्तिं सहनिष्क्रान्तिं सहप्रवेशं वा न कुरुतः । तद् यदेवं व्यतिचरणमस्ति तस्माद्धेतोः ऋतुर्वसन्तादिरन्यं ग्रीष्मादिकमृतुं नानुप्रपद्यते प्राप्नोति । किं तु परस्परसांकर्यपरिहारेण व्यवस्थितस्वरूप एव घटीयन्त्रवदावर्तमानो वर्तते । अत एव चाध्वर्युब्राह्मणम्—'नान्योऽन्य मनु प्र पद्येत । यदन्योऽन्यमनु प्र पद्येत ऋतुर्ऋतुमनु प्र पद्येत । ऋतवो मोहुकाः स्युः'[a] इति । अभ्यासोऽध्यायसमाप्तिसूचनार्थः ॥

इति सप्तमः खण्डः

a. TS. 6. 5. 3. 3.

गुर्वनुग्रहबलेन मयेत्थं ब्राह्मणार्थपरिभावनया यत् ।
पुण्यमार्जितमिहार्पितमेतत् पुण्डरीकनयनस्य पदाब्जे ।।
इत्याचान्तनिजाङ्घ्रिपङ्कजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात् ।
ऋत्विज्यावधिकर्म सर्पणमुखं कौषीतकिब्राह्मण-
व्याख्याने विदधत्त्रयोदश इहाध्यायः प्रतिष्ठां गतः ।।

**इति कौषीतकिब्राह्मणव्याख्याने**
**द्वितीयदशके तृतीयोऽध्यायः**

अथ

## चतुर्दशोऽध्यायः

यस्याहुर्जगतां बीजं वेदा यज्ञमयं वपुः ।
स पुष्कलान् पुमर्थान् नः पुष्णातु पुरुषोत्तमः ।।
सर्पणाद्यृतुयाजान्तमुक्तं कर्म त्रयोदशे ।
आज्यप्रउगशस्त्रे द्वे अथोच्येते चतुर्दशे ।।

1.१ तत्र तावद् विवक्षितमर्थं प्रतिजानीते—**अथात आज्यम्**। अनन्तरं यस्मा-
दृतुयाजादूर्ध्वम् आज्यशस्त्रशंसनमित्यनुष्ठानक्रमः, तस्माद्धेतोः आज्याख्यं शस्त्रं
1.२,३ वक्ष्यत इति शेषः । तत्रादावाज्यनामनिर्वचनमुन्नयन् प्रशंसति—**आज्येन-अमृत-
त्वम्**। पुरा खलु देवा आज्याख्येन शस्त्रेण सर्वान् कामानैहिकानामुष्मिकांश्च
काम्यानर्थान् सर्वममृतत्वं चासमन्तात् आभिमुख्येन वा वशे स्थापितवन्तः । तथो
एवैतद् इत्यादि स्पष्टम् । अनेनाज्यनामनिर्वचनं कृतं भवति । आसमन्तादा-
भिमुख्येन वा जयति वशीकरोत्यनेनेत्याज्यमिति । अथ तूष्णींजपादिशस्त्राव-
1.४,५ यवविधानक्रमेण शस्त्रं विधित्सुरादौ विभागपुरःसरमुद्दिशति—**तद्-इति**। तद्
विधित्सितमाज्याख्यं शस्त्रं **षड्विधं** भवति । षट्संख्या विधाः प्रकारा यस्य तत्
तथोक्तम् । कास्ता विधा इत्यत उक्तं तूष्णींजप इत्यादि । तूष्णींजपः 'पिता
मातरिश्वा'[a] इत्यादिः । तूष्णींशंसः 'अग्निर्ज्योतिः'[b] इत्यादिः । पुरोरुग् 'अग्निर्दे-
वेद्धः'[c] इत्यादिका । सूक्तं 'प्र वो देवाय'[d] इत्यादि । उक्थवीर्यं 'भा विभा'[e]
इत्यादि । याज्या 'अग्न इन्द्रश्च दाशुषः'[f] इति । षड्विधत्वं स्तौति—**षळृतुः-
1.६-१० अमृतत्वम्**। योऽयं संवत्सरात्मकः कालविशेषः स षळृतुः । षट्संख्या ऋतवो

a. TS. 5.6.8.6; ŚŚ. 7. 9. 1.
b. VS. 3. 9; ŚŚ. 7. 9. 2.
c. AB. 2. 34. 1; ŚŚ. 7. 9. 3.
d. RV. 3. 13. 1; ŚŚ. 7. 9. 3.
e. ŚŚ. 7. 9. 6.
f. RV. 3. 25. 4.

वसन्तादयो यस्य स तथा । संवत्सरस्य वसन्ताद्यृतुषट्कसमुदायशरीरत्वात् । अत एव षड्विधः । पुरा देवा एतेन वक्ष्यमाणेन आज्याख्येन शस्त्रेण षळृतुत्वात् षड्विधं संवत्सरं प्राप्तवन्तः । षड्विधत्वसाम्यात् । संवत्सरं प्राप्य च तत्प्रणाड्या सर्वान् कामान् सर्वममृतत्वं च प्राप्तवन्तः । तथैव वार्तमानिकोऽपि यजमान एतेन षड्विधेनाज्येन षड्विधं संवत्सरं प्राप्नोति । तद्द्वारा च तद्वदेव सर्वान् कामान् सर्वममृतत्वं च प्राप्नोति ।

अथोद्देशक्रमेणैव शस्त्रावयवान् विधित्सुरादावनुष्ठेयं तूष्णींजपमेव तावत् प्रशंसति—**अथ–समष्टयै** । 'पिता मातरिश्वा'[a] इत्यादिस्तूष्णींजपः । तं 1.११-१४
पुरस्तादाज्यशस्त्रशंसनात् पूर्वं जपेत् । सूत्र्यते हि—'आज्यं शंसिष्यन् पिता मातरिश्वाच्छिद्रा पदोशिगशीयानुतक्षिषत्सोमो नीथविन्नीथानि नेषद् बृहस्पतिरुक्थामदानि शंसिषदिति जपित्वा'[b] इति । तदिदं प्रशस्तं यस्मात् योऽयं यज्ञः सः स्वर्गलोक एव भवति; तत्प्राप्तिहेतुत्वात् । तत्र पुरस्ताच्छस्यस्य तूष्णींजपं जपतीति यदस्ति तत् तेन प्राप्यस्य स्वर्गलोकस्य प्राप्त्यर्थं स्वस्त्ययनमेव करोति । यथा कश्चित् लोके प्रेक्षापूर्वकारी पुरुषो गम्यभूमिं कांचिदुद्दिश्य गन्तुमनाः सन्नन्तरा पक्षप्राप्ततस्करादिनिबन्धनपरिभयपरिहारसमभिलषितफलविशेषसिद्धयर्थं स्वस्त्ययनरूपं कर्म प्रथममनुतिष्ठति तद्वदिदमपि तूष्णींजपजपकर्म भवति । द्वितीयं शस्त्रावयवं तूष्णींशंसाख्यं विधत्ते—**अथ–आप्त्यै** । अथ तूष्णीं- 1.१५,१६
जपपठनादनन्तरं 'शोंसावो'[c] इत्याहावं पठित्वैतं वक्ष्यमाणं तूष्णींशंसाख्यं मन्त्रं पठेत् । तथा च सूत्रम्—'शोंसावो इत्याहावः प्रातःसवने । तेनाहूयोपांशु तूष्णींशंसं शंसति । अग्निर्ज्योतिर्ज्योतिरग्निरित्यवसायेन्द्रो ज्योतिर्ज्योतिरिन्द्र इत्यवसाय सूर्यो ज्योतिर्ज्योतिः सूर्य इत्यवसाय'[d] इति । तत्र तूष्णींशंसस्य त्रिषु पादेषु प्रथमपाठं प्रशंसति—**अग्निर्–यज्ञस्य** । जपेदिति शेषः । तत् तेन प्रथमपादपाठेन 1.१७-१९
लोकानां पृथिव्यन्तरिक्षस्वराख्यानां मध्ये इमं पृथिवीलोकं प्राप्नोति । यज्ञसंबन्धिषु त्रिषु सवनेषु प्रातःसवनं प्राप्नोति । प्रथमत्वसामान्यात् । एवमुत्तरमपि व्याख्येयम् । **इन्द्रो–यज्ञस्य** । एवं लोकत्रयस्य सवनत्रयस्य च प्राप्तिहेतुत्वात् 1.२०-२५

a. TS. 5. 6. 8. 6; ŚŚ. 7. 9. 1.
b. ŚŚ. 7. 9. 1.
c. ŚŚ. 7. 9. 1.
d. ŚŚ. 7. 9. 1-2. ( Pr. edn. om. शंसति )

1.२६ त्रिपदत्वं प्रशस्तम् । अथ 'अग्निर्देवेद्धः'[a] इत्यादिकां पुरोरुचं विधत्ते—**अथ-तपति** । पठनीयेति शेषः । सूत्र्यते हि—'पच्छोऽवस्यन् पुरोरुचम् । अग्निर्देवेद्धः । अग्निर्मन्विद्धः । अग्निस्सुषमित् । होता देववृतः । होता मनुवृतः । प्रणीर्यज्ञानाम् । रथीरध्वराणाम् । अतूर्तो होता । तूर्णिर्हव्यवाट् । आ देवो देवान् वक्षत्[1] । यक्षदग्निर्देवो देवान् । सो अध्वराकरति । जातवेदो'[b] इति । निविच्छब्देन पुरोरुक्च्छब्देन च 'अग्निर्देवेद्धः'[a] इति द्वादशपदी गृह्यते । यैषा निविदस्ति सा पुनरसावादित्य एव भवति । योऽयमादित्यः सकलं जगदवभासयन् दिवि दीप्यते ।।

इति प्रथमः खण्डः

[कस्मात्] प्रवृत्तिनिमित्तात् पुनरस्य निविच्छब्दवाच्यत्वमित्यत उक्तम्—

2.१ **एष-एति** । यस्मादेष आदित्य इदं प्रत्यक्षादिपरिदृष्टं सर्वं जगन्निवेदयन् रश्मिभिस्तिमिरनिवहमहावरणनिराकरणेन स्फुटतरमवभासयन् गच्छति । तस्मादस्य निवेदनार्थान्वियात् निविच्छब्दवाच्यत्वं युक्तमेव । निविद आदित्यात्मकत्वमुक्त्वा प्रकृतनिवित्स्थानविधिप्रसंगात् प्रतिसवनं निविदः स्थानभेदं विधत्ते—

2.२-८ **सा-एति** । सा निविद् 'अग्निर्देवेद्धः'[a] इत्यादिका प्रातःसवने सूक्तस्य वक्ष्यमाणस्य पुरस्तात् पूर्वं स्थापनीया । तच्च युक्तम् । यस्मादेष आदित्यस्तदा तस्मिन् प्रातःसवनकाले पुरस्तात् पूर्वस्यां दिशि भवति । तस्मात् प्रातःसवने पुरस्तान्निविद्धानं युक्तम् । माध्यंदिने सवने सूक्तस्य मध्ये निवित् स्थापनीया । तच्च युक्तम् । यस्मात् तस्मिन् काले नभसो मध्येऽयमादित्यो भवति । तृतीयसवने पुनरुत्तमा ऋचः परिशिष्यान्ततो निवित् स्थाप्या । तदपि युक्तम् । यस्मादयमादित्यस्तर्हि तस्मिन् काले पश्चात् प्रतीच्यां दिशि परिवर्तमानो भवति । तत् तेन कथितप्रकारेण निविद्धानेन एतस्यैवादित्यस्यैव रूपेण तत्तत्कालभाविना

a. AB. 2. 34. 1; ŚŚ. 7. 9. 3. b. ŚŚ. 7. 9. 2–3.

1. T. यक्षत्

स्वरूपेण सह निविदं स्थापयन् होता शस्त्रं शंसेत् । निविद्धानस्यादित्यव्यापारानु-
सारित्वम् अन्यत्रापि श्रूयते–'तद् यत् पुरस्तादुक्थानां प्रातःसवने धीयन्ते मध्यतो
मध्यंदिनेऽन्ततस्तृतीयसवने । आदित्यस्यैव तद् व्रतमनु पर्यावर्तन्ते'[a] इति । व्रत-
शब्दः कर्मवाचकः । **तदु–एव** । अस्याः पुरोरुचः पदे पदे विरम्य पठनीयताम- 2.९-११
भिप्रेत्य द्वादशपदतां स्तौति—**द्वादशपदां–आप्त्यै** । 'अग्निर्देवेद्धः'[b] इत्यादीनि 2.१२-१४
द्वादशसंख्याकानि पदानि यस्याः सा तथोक्ता । द्वादशसंख्यास्तुत्यर्थवादो द्वादश
वा इत्यादिर्गतः । क्रमप्राप्तं 'प्र वो देवाय'[c] इति सूक्तं विधत्ते—**अथ–शंसति** । 2.१५
पुरोरुक्पाठादनन्तरं 'प्र वो देवाय'[c] इति सप्तर्चं सूक्तम् आज्यशस्त्रात्मकं पठेत् ।
सूत्र्यते हि—'प्र वो देवायेत्याज्यम्'[d] इति । सप्तर्चत्वं स्तौति—**सप्त–आप्त्यै** । 2.१६,१७
यान्येतानि छन्दांसि गायत्र्यादीनि सन्ति तानि सप्तसंख्याकानीति प्रसिद्धम् ।

'गायत्र्युष्णिगनुष्टुप् च बृहती च प्रजापतेः ।
पङ्क्तिस्त्रिष्टुप् च जगती सप्त छन्दांसि तानि ह ॥'[e]

इति शौनकवचनात् । तस्मात् संख्यासामान्यादेव तत् सप्तर्चत्वं सर्वेषां छन्दसां
प्राप्त्यै संपद्यते । छन्दोद्वारेणापि स्तौति—**तद्–आप्नोति** । तदाज्यमनुष्टुप्छन्द- 2.१८-२०
स्कं भवति । तत् तेन आनुष्टुभत्वेनात्र जगति यत् किंचिदनुष्टुब्रूपया वाचा
विस्पष्टमनूक्तमभिहितं वस्तु विद्यते तत् सर्वमयं होता यजमानश्च प्राप्नोति ।
अनेन सर्वप्रपञ्चप्राप्तिहेतुत्वमुक्तम् । रूपप्रपञ्चस्य सर्वस्य नामप्रपञ्चगोचरत्वात् ।
तदितरस्य शशविषाणकल्पत्वात् । 'तन्नामरूपाभ्यामेव व्याक्रियते'[f] इति प्रका-
रान्तरप्रतिषेधात् । यत् किंचिद् वस्तु समस्ति तत् सर्वं वाग्विषय एव । अविष-
यश्चेदसदेव । शब्दविषयत्वं विना प्रतीतिविषयतापन्नमेव किंचिद् वस्तु किं न
स्यादिति चेत्, न । प्रत्ययस्य शब्दानुगत्यविनाभावित्वनियमात् । गौरिति
प्रत्यय उदयमासादयन् खल्वभिलापात्मकगोशब्दानुगत एवोदेतीति स्वसंविदि-
तमेव तत् । तदाहुस्तद्विदः—

a. AB. 3. 11. 1.
b. AB. 2. 34. 1; ŚŚ. 7. 9. 3.
c. RV. 3. 13.
d. ŚŚ. 7. 9. 3.
e. ṚkPrā. 16. 1.
f. BṛhU. 1. 4. 7.

'न सोऽस्ति प्रत्ययो लोके यच्छब्दानुगमं विना ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते[1] ॥'[a]

इति । तेन यद् वस्तु प्रमाणगम्यं सत्ताधर्मि तत् सर्वं वाग्विषय एव । अन्यथा शशविषाणवन्निरुपाख्यमेवेति स्थितम् । वाङ्नामस्वनुष्टुभः पठितत्वादनुष्टुभो वाग्रूपत्वमिति केचित् । पादचतुष्टयोपेतत्वादनुष्टुभो वाग्रूपत्वम् । 'चत्वारि वाक् परिमिता पदानि'[b] इति वाचः पादचतुष्टयोपेतत्वश्रवणादित्यन्ये ।

2.२१,२२ 'प्र वो देवाय'[c] इत्याद्यस्यार्धर्चस्य पच्छः शंसनीयतामाह—**पदे-रूपम् ।** पदे पादे विगृह्य विच्छिद्य पठेत् । प्रथमं पादं पठित्वावसाय द्वितीयं पादं पठेदित्यर्थः । तद् विग्रहणं प्रजात्यै-षष्ठ्यर्थे चतुर्थी-प्रजोत्पत्तेः रूपम् । कस्मात्
2.२३ तद्रूपत्वमित्यत आह—**वीव-गृह्णाति** । लोके पुरुषः स्त्रीसंभोगावस्थायां स्त्रिया अधः शयानायाः स्वयमुपरि स्थितः ऊरू विगृह्णाति विश्लिष्टौ करोति । तस्मादाद्ययोः पादयोर्विग्रहणस्य प्रजोत्पत्तिरूपत्वसिद्धिः । प्रकारान्तरेण विग्रहणं
2.२४,२५ स्तौति—**यद्वेव-रूपम्** । प्रतिष्ठयोः पादयोः । प्रतितिष्ठन्त्याभ्यामिति व्युत्पत्तेः ।
2.२६-२८ अथास्मिन् विग्रहणे विशेषमानवान्यलक्षणं विधत्ते—**अथो-स्यात्** । विहरणेनानवान्यलक्षणविशेषस्य साहित्यार्थोऽथोशब्दः । अनयोः पादयोः 'प्र वो बर्हिष्ठम्'[d] इत्येवंरूपयोर्विगृह्य पठितयोर्योऽयं अन्तरालप्रदेशोऽस्ति स मृत्योर्मारयितुर्देवस्य वक्त्रबिलसदृश इति ज्ञेयम् । अवकाशरूपत्वान्मृतिहेतुत्वाच्च । एवं सति यः कश्चित् सदसि स्थितो ब्रह्मवादी पादान्तरालदेशोच्छ्वासदोषाभिज्ञः अत्रान्तरालदेशे अवानन्तमुच्छ्वासं कुर्वाणं होतारमित्थं ब्रूयाद्—अयं होता अत्रावधाववानन्नुच्छ्वसन् मृत्योरास्यबिलमापतति, अतो न चिरकालं प्राणान् धारयिष्यतीति तस्य वक्तुस्तद्वाक्यं तथा यथार्थमेव भवेत् । अस्मिन्नवधावुच्छ्वसन् न जीविष्यत्येव ॥

इति द्वितीयः खण्डः

a. VP. 1. 123.
b. RV. 1. 164. 45.
c. RV. 3. 13. 1.
d. RV. 3. 13. 1 ( a+b ).

1. T गृह्यते

**तस्मात्-तरति** । यस्मादुक्तप्रकारेणोच्छ्वासे महतोऽनिष्टस्यावाप्तिः, 3.१-३
तस्माद्धेतोरनवानमेव उच्छ्वसनपरिहारेणैव उत्तरं पादं पठेत् । सूत्र्यते हि—
'तस्य प्रथममर्धर्चं पच्छोऽनवानम्'[a] इति । अमृतं वै प्राण इत्यादि गतम् ।
'गमद् देवभिः'[b] इत्युत्तरार्धे पादयोः पूर्ववैधर्म्येण पठनीयताम् अवसाने प्रणव-
पाठं च विधत्ते—**समस्तेन-प्रहरति** । विग्रहं विना यथासंहितं पठनेन 'गमद् दे- 3.४,५
वेभिः'[b] इत्युत्तरेणार्धर्चेन प्रणवं पठेत् । 'गमद् देवेभिरासनो यजिष्ठो बर्हिरासदा'
इति । स्तौति—वज्रमेवेति । अथास्याज्यसूक्तस्य प्रातःसवनाभिरूप्यं दर्शयितुं
सप्तसंख्यानामनुष्टुपछन्दस्कानामृचाम् अक्षरगणनया गायत्रीच्छन्दोरूपतामाह—
**ता-पदम्** । ताः 'प्र वो देवाय'[b] इत्याद्याः सप्तानुष्टुभोऽक्षरगणनायां दशसंख्या- 3.६,७
का गायत्र्यो भवन्ति । ननु कथं घटतामेतत् ? तथा हि—द्वात्रिंशदक्षराभिः
सप्तभिरनुष्टुब्भिर्हि दश गायत्र्यः सपाद्याः । तत्राक्षरगणनायां क्रियमाणायां
चतुर्विंशत्यक्षराणां सप्तसंख्यानां गायत्रीणां सप्तभिरनुष्टुब्भिर्निष्पत्तौ सत्यां
अनुष्टप्सु प्रत्येकमक्षराष्टकस्यातिरेके मिलित्वा षट्पञ्चाशदक्षराण्यतिरिक्तानि
वर्तन्ते । तत्राष्टाचत्वारिंशत्संख्यैरक्षरैः द्वयोर्गायत्र्योरुत्पत्तौ नव गायत्र्यो भव-
न्ति । शिष्टानि चाष्टावक्षराणि । तत् कथं दश गायत्र्यः सपद्यन्त इति वचन-
व्यक्तिः संगच्छेत ? चतुर्विंशत्यक्षरातिरेक एव दशसंख्यापूर्तिसिद्धेः । इह
चाक्षराष्टकस्यैव परिशिष्टत्वादिति । अत्रोच्यते—सत्यम्, अष्टावक्षराण्येवा-
तिरिक्तानि । तथापि दश गायत्र्यः इत्युक्तिरविरुद्धैव । योऽयमष्टाक्षरो दशस-
ंख्यापूरकः पादोऽस्ति स एव दशसंख्यापूरणी गायत्री एका भवति अष्टाक्षर-
त्वात् । 'अष्टाक्षरा गायत्री'[c] इति तल्लक्षणश्रुतेः । ननु 'चतुर्विंशत्यक्षरा गायत्री'[d]
इत्यपि श्रवणात् तदभावान्न गायत्रीत्वमिति चेत्, न । चतुर्विंशत्यक्षरत्वस्य
त्रित्वविशिष्टाक्षराष्टकमिलितसंख्यावच्छेदरूपत्वेन अष्टाक्षरत्व एव निवेशात् ।
ननु 'त्रिपदा गायत्री'[e] इति श्रुतेरत्र तदभावान्न गायत्रीत्वमिति चेत्, सत्यम् ।
तथापि गायत्रीरूपप्रयोजकाष्टसंख्याक्षरत्वस्य पादे एकस्मिन्नपि विद्यमानत्वाद्

a. SS. 7. 9. 4.
b. RV. 3. 13. 1.
c. TS. 5.6.5.1; AB.2.17.6; JUB.1.1.8, etc.
d. JUB. 4. 2. 2; ChU. 3. 16. 1.
e. PB. 10. 5. 4.

गायत्रीति व्यपदेशानुपपत्तेर्वक्तुमशक्यत्वाद् दश गायत्र्य इति वचनव्यक्तिरुपपन्नै-वेति। एतदभिप्रायेणोक्तम्—अष्टाक्षरं हि दशमं पदम् इति। योऽयं दशसंख्यापूरक एकः पादोऽस्ति सोऽयं यस्मादष्टाक्षरो भवति तस्मात् तस्यापि गायत्रीशब्द-वाच्यत्वात् ता अनुष्टुभो दश गायत्र्यः संपद्यन्त इत्यर्थः। संपादनप्रयासमन्तरे-
3.८,९ णाप्यनुष्टुभां गायत्रीरूपत्वमस्तीत्याह—**गायत्री-छन्दः**। येयमनुष्टुबस्ति सा गायत्रीच्छन्द एव भवति। अनुष्टुभो गायत्र्या उत्पन्नत्वात्। तच्च श्रुतम्—'सा गायत्री गर्भमधत्त। सानुष्टुभमसृजत'[a] इति। गायत्रीत्वे को लाभ इति चेत् तत्राह—गायत्रमग्नेश्छन्द इति। अग्नेर्हि स्वभूतं प्रातःसवनम्। अग्नेश्च स्व-भूतं छन्दो गायत्री। तच्चोक्तं प्राक्। तस्मादानुष्टुभस्य गायत्रत्वादत्र सवने आभिरूप्यमित्यर्थः। यद्वा आज्यशस्त्राभिधेयो ह्यग्निः। तस्य च स्वभूतं छन्दो गायत्री। अतो देवतानुरूप्यमस्त्याज्यसूक्तच्छन्दसः। उक्तन्यायेन गायत्रीछन्दस्क-त्वसिद्धेरिति।

अथात्राध्वर्यूद्गातृहोतृकर्माणि ग्रहग्रहणस्तोत्रशस्त्रलक्षणानि तद्गोचरग्रह-
3.१०-१६ स्तोत्रियशस्यानां विराट्संपत्त्यभिधानेन प्रशंसति—**दश-प्रतिदधाति**। सवना-न्तरे द्विदेवत्यादिग्रहाभावान्न ग्रहाणां दशसंख्यत्वमिति दर्शितम्—प्रातःसवन इति। बहिष्पवमानात् पूर्वं नव धाराग्रहा गृह्यन्ते। तस्मादूर्ध्वमाश्विनग्रह इति संभूय दश ग्रहाः अध्वर्युणा प्रातःसवने गृह्यन्ते। तथा नवसु उपास्मै गायतासु नवसंख्याकास्वृक्षु सामगा बहिष्पवमानस्तोत्रकर्मणि स्तुतिं कुर्वन्ति। तत्र च यः स्तोत्रोपक्रमप्रयोज्यो हिंकारः, 'तिसृभ्यो हिंकरोति'[b] इति तद्विधानात्, स दशसंख्यापूरको भवतीति हिंकारेण सह स्तोत्रिया दश संपन्ना भवन्ति। इमाश्च 'प्र वो देवाय'[c] इत्याद्या अनुष्टुभ उक्तप्रकारेण दश गायत्र्यः परिणताः। इत्थं ते अध्वर्यूद्गातृहोतारः पृथग्भूतानि कर्माणि कुर्वन्तः प्रत्येकं विराट्संपत्तिं कुर्वन्ति। उक्तविधया ग्रहादीनां दशसंख्यान्वयात्। 'दशाक्षरा विराड्'[d] इति विराजो दशसंख्यान्वयित्वात्। विराट्संपत्तौ को नामाभ्युदय इति चेत् तत्राह—एतद्वै कृत्स्नमित्यादि। विराजोऽन्नरूपत्वस्य प्रसिद्धत्वात् तत्संपादनमेव भवति।

a. AB. 4. 28. 6. b. PB. 2. 1. 1.
c. RV. 3. 13. 1. d. AB. 6. 20. 20; JB. 1. 132, etc.

ततश्च विराट्संपादनच्छलेनाविकलं समग्रमन्नं संपाद्य तदन्नं तेऽध्वर्यूद्गातृहोतारो
यजमाने प्रत्येकं स्थापयन्ति । प्रथमोत्तमयोः ऋचोः त्रिरावृत्तिविधिमभिप्रेत्य
आवृत्तपाठानां तासां याज्यासमुदितानां संख्यां स्तौति—**त्रिः-आप्त्यै ।** याज्यां 3.१७-२०
वक्ष्यति—'अग्न इन्द्रश्च दाशुषो दुरोणे'[a] इति । सा द्वादशसंख्यापूरणी भवति ।
शिष्टं गतम् । स्तुतानां द्वादशसंख्यानामनुष्टुभाम् अक्षरगणनयागायत्रीछन्दस्त्वं
संपादयति—**ताः-अभिसंपद्यते ।** ता द्वादशानुष्टुभः । तद्यथा—द्वादशभिरनुष्टुब्भि- 3.२१,२२
र्द्वादश तावद् गायत्र्यः संपद्यन्ते । प्रत्येकं द्वादशसु अक्षराष्टकस्योद्धारेण तद्ग-
तानि च मिलित्वा षण्णवतिरक्षराण्यतिरिच्यन्ते । तैश्चतस्रो गायत्र्यो भवन्ति ।
ततश्च द्वादश चतस्रश्च मिलिताः षोडश गायत्र्यो[1] भवन्ति । तदेवमाज्यं शस्त्रम्
अनुष्टुप्छन्दस्कमपि गायत्रीं छन्दोऽभिसंपन्नं भवति । तच्चोपपन्नम् । गायत्र्याः
प्रातःसवनच्छन्दस्त्वात् । 'गायत्रं प्रातःसवनम्'[b] इति श्रुतेः । परिधानीयाख्या-
मन्त्यामृचं पठित्वानन्तरं 'भा विभा'[c] इत्यादिरुक्थवीर्याख्यो मन्त्रः पठनीयः ।
तथा च सूत्रितम्—'सूक्तशेषं शस्त्वाहूयोत्तमया परिधायोक्थवीर्यं जपति भा वि-
भा उषाःस्वर्ज्योतिः श्लोकाय त्वोक्थमवाचीति'[d] इति । तं विधिं सिद्धवत्कृत्य
याज्यां विधत्ते—**आग्नेन्द्र्या-करोति ।** इन्द्राग्निदेवत्यया 'अग्न इन्द्रश्च'[a] इत्येतया 3.२३,२४
यागं कुर्यात् । सूत्र्यते हि—'अग्न इन्द्रश्चेति यजति'[e] इति । तत् तेनाग्नीन्द्र-
देवत्याया याज्यायाः पठनेन क्रियमाणेन सवनस्य प्रातःसवनस्यार्धभाजमिन्द्रं
करोति । अस्यार्थः—आग्नेयं हि प्रातःसवनम् । तत्राग्नेय्येव याज्योचिता ।
तत्परित्यागेनाग्नीन्द्रसाधारणयाज्यां कुर्वन् होता प्रातःसवनार्धमिन्द्रस्य स्वभूतं
कृतवान् भवति । अस्या ऋचोऽयमर्थः—हे अग्ने त्वमिन्द्रश्च हे देवौ क्रीडाविजि-
गीषादिमन्तौ अमर्धन्तौ अक्रुध्यन्तौ प्रसन्नहृदयौ भूत्वाभिषुतसोमसहितस्य
प्रयच्छतो यजमानस्य सोमपानार्थं यज्ञं प्रतिलक्ष्यास्मिन् देश आगच्छतमिति ।
अस्यामृचि अग्निवदेवेन्द्रस्यापि भागभाक्त्वावगमाद् अग्नेरर्धमिन्द्रस्यापरमर्धमिति

a. RV. 3. 25. 4.
b. PB. 6. 3. 11.
c. ŚS. 7. 9. 6.
d. ŚS. 7. 9. 5–6.
e. ŚS. 7. 9. 8.

1. T. अनुष्टुभो

3.२५ सिध्यति । सर्वदेवताभाजनत्वाभिधानेनापि याज्यां स्तौति—**तस्यां–कौषीतकिः।**
3.२६-२८ कथमस्यामृचि देवतानामन्वाभजनमिति तत्राह—**त्रयस्त्रिंशद्–करोति।** अक्षराणां तावत् त्रयस्त्रिंशत्संख्यत्वमस्ति । देवतानां तु प्रसिद्धमेव । अत एव एकैका देवतैकैकमक्षरं भजत इत्यनया याज्यया सर्वा देवताः स्वीकृता भवन्ति ।
3.२९-३१ अस्या[1] याज्याया अर्धर्च उच्छ्वासं विधत्ते—**अग्न–प्रतितिष्ठति।** 'अग्न इन्द्रश्च'[a] इत्येतस्या विराट्छन्दस्काया ऋचः पदं पादं अमर्धन्त इत्येतं परिशिष्य उपयातम् इत्यर्धर्चावसान उच्छ्वासं कुर्यात् । श्रीर्विराळित्यादि गतम् । अमर्धन्त इति
3.३२-३५ यः पादः परिशेषितः तदन्ते वषट्कारपाठं विधत्ते—**उत्तरेण–प्रतिष्ठित्यै।** स्वर्गलोकस्योपरिष्टाद् वर्तमानत्वादुत्तरार्धर्चे वषट्कारकरणेन एतं[2] यजमानं स्वर्गलोक एव स्थापयति । अनुवषट्करोतीत्यादि गतम् ॥

इति तृतीयः खण्डः

एवमग्निष्टोमशस्त्रेषु द्वादशसंख्येषु प्रथममाज्याख्यं शस्त्रं निरूपितम् । अथेदानीं क्रमप्राप्तं प्रउगशस्त्रं विधित्सुरादौ प्रतिशस्त्रं पठनीयौ शस्त्राङ्गभूतौ आहावप्रतिगरौ सवनत्रयभेदाद् भिन्नरूपौ प्रदर्शयितुं प्रारभते—**शोंसावो–**
4.१-७ **प्रत्यष्ठाताम्।** प्रातःसवने शस्त्रं पठन् होता 'शोंसावो'[b] इत्याहावसंज्ञं मन्त्रं पठेत् । तद्यथा—आज्यशस्त्रे तूष्णींजपानन्तरमाहावस्तूष्णींशंसार्थः । अथ परिधानीयार्थः । एवमन्यत्रापि सूत्रानुसारेण द्रष्टव्यम् । यथा होत्रा 'शोंसावो'[b] इत्ययमाहावः पठितव्यः तथाध्वर्युणा 'शोंसामो दैवो'[c] इत्येष प्रतिगरसंज्ञो मन्त्रो वक्तव्यः । प्रतिगरणं प्रोत्साहनम् । यत्राहावस्तत्र प्रतिगरस्य स्थानं भवति । अनयोर्मन्त्रयोरक्षरगणनया गायत्रीपादरूपत्वेन गायत्रीरूपसंपत्तिमाह–तान्यष्टावक्षराणीति । 'शोंसावो'[b] इति त्रीण्यक्षराणि । 'शोंसामो दैव'[c] इति पञ्च मिलित्वा तान्यष्टौ संपद्यन्ते । शस्त्रान्ते होतुः पठनीयं मन्त्रमाह—उक्थम-

a. RV. 3. 25. 4.    b. ŚŚ. 7. 9. 1.
c. AŚ. 5. 9. 5.

1. T. एतस्या    2. T. omits

वाचीति । अध्वर्योरप्याह—उक्थशा इति । अनयोर्मेलनेऽक्षरगणनया गायत्रीरूपत्वमाह—तान्यष्टाविति । भवत्वेवं ततः किमित्यत आह—गायत्र्या सवनमिति । एवं गायत्र्या अष्टाक्षरसंख्यत्वेन गायत्रीरूपेण पादेन प्रातःसवनं प्रारभ्य तथैव गायत्र्यामेव प्रतिष्ठां समाप्तिमगमयतामुभौ होत्रध्वर्यू । नन्वष्टाक्षरमात्रस्य कथं गायत्रीरूपत्वम् ? उच्यते । उक्तोत्तरमेतत् । गायत्रीसादृश्याद् गायत्रीत्युच्यते । गायत्र्या अपि पादस्याष्टाक्षरत्वात् । एवं त्रिष्टुभेत्यादावपि द्रष्टव्यम् ।

एवं प्रातःसवन आहावप्रतिगरप्रभेदं प्रदर्श्येतरयोः सवनयोरपि तं दर्शयति—**अध्वर्यो-प्रत्यष्ठाताम् ।** सर्वं पूर्ववत् । षट् पञ्च चाक्षराणि मिलित्वैकादश भवन्ति । 'अध्वर्यो शोंसावो'[a] इति षट् । अन्यानि तावत् पञ्च । अष्टौ त्रीणि च मिलित्वैकादश भवन्ति । 'अवाचि इन्द्राय'[b] इतीकारविश्लेषेणाष्टावक्षराणि । अन्यानि त्रीणि । **अध्वर्यो-प्रत्यष्ठाताम् ।** पूर्ववद् अभ्यासम् अभ्यस्य । अभ्यासः 'शोशों' इति पुनर्वचनम् । होतारं प्रतिलक्ष्याभ्यस्यति शोशों इत्यक्षरम् शो इत्येतदावृत्या पठितानि मिलित्वाक्षराणि द्वादशसंख्यानि भवन्ति । यद्यप्यत्र गणनायां त्रयोदशाक्षराणि विद्यन्ते तथापि द्वादशसंख्याया विद्यमानत्वाद्द्वादशेत्युक्तिर्न विरुध्यते । जागतपादवत्त्वेन जगतीछन्दःसादृश्यस्यात्र संपिपादयिषितत्वात् त्रयोदशाक्षरासिद्धवत्कारेण द्वादशसंख्योपादानम् । त्रयोदशसंख्यां विनापि जगतीपादसंपत्त्या जगतीछन्दःसादृश्यमभिप्रेत्याह—लोमशेनेति । अक्षराणीति शेषः । अधिकाक्षरच्छन्दो लोमशमुच्यते । इत्थंभावलक्षणा च तृतीया । लोमशमधिकाक्षरं यज्जगतीछन्दोऽस्ति तद्भावेनैतानि त्रयोदशाक्षराणि भवन्ति । त्रयोदशसंख्यत्वेऽपि लोमशजगतीपादसंपत्त्या जगतीछन्दोरूपत्वं सिध्यतीत्यर्थः । संप्रतिशब्दः सम्यगर्थे वर्तते । संप्रति द्वादशेत्यन्वयः । पूर्वत्र त्रयोदशाक्षराणां विद्यमानत्वान्न द्वादशसंख्या समीचीना । इह द्वादशसंख्याया अन्यूनानतिरिक्तायाः संभवात् सम्यक्त्वम् । जागत्येति गतम् । उपसंहरति—**एतद्-वहन्ति ।** सवनस्य मध्ये गायत्र्यादेरन्यच्छन्दो यत् किंचिदाह्रियते तत् सर्वमुक्तरीत्या गायत्र्यादिकमेव भवति । तत्र यद्यपि स यज्ञो व्यूळ्हच्छन्दा एव भवेत्, तथाप्येवं विदुषः

4.८-१४

4.१५-२२

4.२३-२५

a. ŚŚ. 7. 19. 6. b. ŚŚ. 8. 16. 3.

सवनत्रयस्य गायत्र्याद्युपक्रमोपसंहारत्वेन केवलगायत्र्यादित्वं जानतो होतुर्यजमानस्य वा तं व्यूळ्हच्छन्दसमपि यज्ञं क्लृप्तानि गायत्र्यादीनि त्रीण्येव सवनानि वहन्तीत्येवं जानीयात्। उक्तेऽर्थे दाशतयीगतं कंचिन्मन्त्रं प्रमाणयति—

4.२६-२८ **अथो-इति।** यदेतदस्माभिरुक्तं वस्तुतत्त्वं तदेवाभिलक्ष्यैषा वक्ष्यमाणा ऋगनूक्ता पठितेत्येवं कौषीतकिमुनिराह। 'यद् गायत्रे'[a] इत्यादिः ऋक्। अस्या अयमर्थः—गायत्रे प्रातःसवने। त्रिषु सवनेषु छन्दस्त्रयपरिमाणात् सवनान्यपि तत्तच्छन्दःशब्दैरुच्यन्ते। 'गायत्रं प्रातःसवनम्। त्रैष्टुभं माध्यन्दिनं सवनम्। जागतं तृतीयसवनम्'[b] इति तत्र तत्र श्रुतेः। तादृशे प्रातःसवने अधि उपरि गायत्रं 'शोंसावो शोंसामो दैव' इत्यादिकमष्टाक्षरात्मकं पदमाहितं स्थापितम्। तथा त्रैष्टुभान्माध्यन्दिनात् सवनात् त्रैष्टुभम् 'अध्वर्यो शोंसावो शोंसामो दैव' इत्याद्याहावप्रतिगरात्मकमेकादशाक्षरात्मकं पदमृत्विजो निरतक्षत साधु संपादितवन्तः। यच्च जगति जागते तृतीयसवने। जगत् जागतम्। 'अध्वर्यो शोशोंसावो शोंसामो दैव' इत्याद्याहावप्रतिगरात्मकद्वादशाक्षरपरिमितं पदमाहितम्। एवं गायत्रादौ गायत्रादिपदस्थापनं य इत् य एव नरा विदुर्जानन्ति त एवामृतत्वमानशुः प्राप्नुवन्त्यनुष्ठानेन। एवमजानन्तोऽनुष्ठानेनापि फलं न प्राप्नुवन्ति; तस्य साकल्याभावादिति। अत्रेयं ऋगुदाहृता यज्ञं लोकांश्चाधिकृत्य प्रवृत्ता। तत्र प्रकृतोपयोगितया यज्ञविषयतयेयमुदाहृता। अथ प्रसंगाल्लो-
4.२६-३२ कविषयतयेमां व्याचष्टे—**अथो-अध्यूळ्हः।** न केवलं यज्ञमधिकृत्य प्रवृत्तैवेयमृक्, लोकानधिकृत्यापीत्यथोशब्दार्थः[1]। इमा अग्न्याद्या या देवतास्ता एषु पृथिव्यादिषु त्रिषु लोकेषु परिनिहिताः। एतदेव विभज्य दर्शयति—गायत्रेऽस्मिन्नित्यादि। एषोऽर्थः—प्राथम्यात् सर्वैस्तुत्यत्वाच्च गायत्री भूः, तदीयं स्थानं गायत्रम्। अधि उपरि। तत्र गायत्रमाग्नेयं पदम्। स हि प्रथमसृष्टत्वाद् गायन्तं त्रायते च इति व्युत्पत्त्या प्रजापतेर्मुखाद् गायत्र्या सहोत्पन्नत्वाद् भक्त्याग्निरपि गायत्रः। सोऽग्निरस्मिन् पृथिवीलोके स्थापित इति यत्। तथा त्रैष्टुभाद् वृष्टिपर्जन्यविद्युद्रूपात् त्रिस्तोभयुक्तादन्तरिक्षात् त्रैष्टुभं त्रिस्तोभयुक्तमूर्ध्वाधस्तिर्यगुल-

a. RV. 1. 164. 23. b. PB. 6.3. 11.

1 T. शब्दः for शब्दार्थः

क्षणस्तोभत्रयोपेतं वायुं निरतक्षत साधु संपादितवन्त इति यत् । अथवा जगति सर्वैर्गन्तव्ये उद्गततमे वा तृतीये[1] द्युलोके जगद् गमनशीलमादित्याख्यं पदमाहितमिति यत्[2] । तदिदं त्रिषु स्थानेषु त्रयाणामग्न्यादीनां पदाधानं य इद् य एव नरा विदुः जानन्ति, त एवामृतत्वममरणरूपं पदमाप्नुवन्तीति । तृतीयभूतत्वाज्जागतो द्युलोकः । तेनैवादित्यस्यापि जागतत्वं द्रष्टव्यम् ॥

इति चतुर्थः खण्डः

इदानीं क्रमप्राप्तं प्रउगशस्त्रं विधित्सुः प्रस्तौति—**आज्यं-लोके** । प्रउग- 5.१-५
मिति शस्त्रस्य संज्ञा । तत्र यदिदम् आज्याख्यं शस्त्रमस्ति तद् यजमानस्य आत्मैव भवति । यथात्मा[3] शब्दादीन्द्रियग्राह्यतद्ग्राहकश्रोत्रादिभेदे सत्यपि सर्वानुसंधातृत्वात् सर्वत्रैकरूप एव, एवमाज्यमप्यग्न्यात्मकैकदेवत्यत्वादेकरूपमेव भवति । यथा चात्मा सर्वाधिष्ठातृत्वात् सर्वापेक्षया प्रथमो भवति तथा शस्त्रमाज्याख्यं सर्वशस्त्राणां प्रथमं भवतीति तस्यात्मरूपसाधर्म्याद् आत्मत्वम् उचितम्[4] । यच्चेदं प्रउगाख्यं नाम शस्त्रमस्ति तत् प्राणा एव चक्षुरादयः, प्राणानां सप्तसंख्यत्वात् । तच्च 'सप्त वै शीर्षन् प्राणाः'[a] इति श्रुतेः प्रसिद्धम् । प्रउगं च वायव्यादिसप्ततृचात्मकत्वात् सप्तसंख्यान्वयि । तत् सप्तसंख्यान्वयसाम्यात् प्राणरूपत्वम् । तद्यदाज्यमित्यादि गतम् ।

अथाज्यप्रउगशस्त्रयोरन्योन्यं स्थानव्यत्यासेन शंसनं प्रशंसति—**पवमाने-**
**तत्** । पवमानस्तोत्रादनन्तरं प्रउगशस्त्रस्य स्थानं तदनुशंसनरूपत्वात् । तत् 5.६-११
परित्यज्य तत्राज्यशस्त्रं पठेत् । आज्यस्तुत्यनन्तरं तदनुशंसनरूपं प्राप्तमाज्यशस्त्रं परित्यज्य तत्र प्रउगशस्त्रं पठेत् । एवमन्योन्यं स्थानव्यत्यासेन पठेत् । ननु प्रातिस्विकस्थाननिवेशिनी एवैते शस्त्रे किं न स्यातामिति ? नेत्युच्यते । तदेतत् प्रउगाख्यमुक्थं शस्त्रं पवमानस्य बहिरुपपदस्य उक्थमेव वस्तुतः । आज्यस्तोत्रस्य

a. AB. 1. 17. 8.

1. T. तृतीयभूते
2. T. omits
3. M. T. V. omit
4. T. उदितम्

आज्यमेवोक्थं भवति । ते शस्त्रे एतदित्थं विहरत्येव व्यत्यासेन पठ्येते एव । प्रउगस्य स्थान आज्यशस्त्रं क्रियते; आज्यशस्त्रस्य स्थाने प्रउगशस्त्रमिति[1] । किमर्थमेतदिति चेत्-यथा लोके रथस्यान्तर्बन्धनरज्जुबन्धनं रथस्य दाढर्यार्थं व्यत्यासेन रथशिल्पिभिः क्रियते एवं देवरथस्य आज्यप्रउगशस्त्रे अन्तर्बन्धनरज्जुभूते भवतः । तेन तयोः स्थानव्यतिषञ्जनेन पठनं क्रियते । अथ

5.१२-१६ वायव्यादिग्रहाभिवदनरूपत्वप्रदर्शनेन प्रउगशस्त्रं प्रशंसति—**ग्रहान्-सवनेषु** । तदेव विभज्याह—योऽसाविति । योऽयमेकस्मिन्नेव पात्रे वायोरिन्द्रवाय्वोर्गृहीतः कश्चिद् ग्रहोऽस्ति—'उपयाम गृहीतोऽसि वायवे त्वा'[a] 'इन्द्रवायुभ्यां त्वा'[a] इति पृथगेव ग्रहणात्, स एष वायव्येनैन्द्रवायवतृचेन च क्रमादनुशस्यते । वायव्येन तृचेन वायव्यग्रहानुशंसनम् ऐन्द्रवायवतृचेन ऐन्द्रवायवग्रहानुशंसनं च क्रियते । एवं मैत्रावरुणाश्विनप्रस्थितयागहोत्रायागाः क्रमान्मैत्रावरुणाश्विनैन्द्रवैश्वदेवतृचैरनुशस्यन्ते । ननु सारस्वततृचस्य न ग्रहानुशंसनरूपत्वं संभवति । सारस्वतशब्दवाच्यस्य कस्यचिद् ग्रहस्याभावात् । अतः प्रउगशस्त्रस्य ग्रहानुशंसनरूपत्वमव्यापकमित्याशङ्क्याह—वागेवेति । सरस्वतीशब्देन वागभिधीयते । सा च वाक् सर्वेषु सवनेषु अनुगता । वाङ्निर्वर्त्यत्वात् सवनत्रयस्य । एतदुक्तं भवति—सत्यम्, न सारस्वतो ग्रहविशेषोऽस्ति । तथापि सवनत्रयनिविष्टानां सर्वेषामपि ग्रहाणां सरस्वतीशब्दाभिधेयया वाचैव गृह्यमाणत्वात् सर्वेऽपि ग्रहाः सारस्वता एव भवन्ति । अतः सरस्वतीदेवत्येन तृचेन सर्वेऽपि गृहीता ग्रहा अनुशस्ता भवन्तीति ग्रहानुशंसनरूपत्वं सारस्वततृचस्य सुतरां संगतमेवेति ।

इत्थं प्रउगशस्त्रं प्रशस्य तत्र पठनीयान् पुरोरुङ्नामकान् मन्त्रान् विधित्सु-

5.२०,२१ राह—**अथ-रोचते** । वक्ष्यत इति शेषः । स्तौति—असावेवेति । स्पष्टम् । कथमस्य पुरोरुक्छब्दवाच्यत्वं जातमित्यत आह—एष हीति । यस्मादेष आदित्यः पूर्वस्यां दिशि प्रकाशते तस्मात् पुरोरुक्त्वमस्य युक्तमिति । पुरोरुचां स्थानं स्वरूपं च सूत्रकृता दर्शितम्—'प्रउगेऽन्तरेण माधुच्छन्दसाँस्तृचानृचो व्यवयन्ति

a. TS. 1. 4. 4. 1.

1. T. प्रउगमिति

ताः पुरोरुच इत्याचक्षते'[a] इति। पुरोरुक्सूक्तान्तराल आहावप्रतिषेधार्थं तयोः प्रणात्मरूपत्वं संपादयति। **अथ-रूपम्**। सूक्तान्तर्वर्तित्वात् गुणभावाच्च पुरो- 5.२२-२९
रुचः प्राणत्वम्। तदाधारत्वात् प्राधान्याच्च सूक्तस्यात्मत्वम्। तयोरेवात्म-प्रजापशुरूपत्वं संपादयति—अथ वा इति। अत्रान्तरत्वमुपादाय पुरोरुच आत्मत्वमुक्तम्। बहिष्ठत्वात् सूक्तस्य प्रजापशुरूपत्वम्। भवत्वेवं पुरोरुक्सूक्तयोः प्राणात्मादिरूपत्वम्, ततः किमित्यत आह—तस्मान्नेति। यस्मादुक्तप्रकारेण पुरोरुक्सूक्तयोः प्राणात्मादिरूपत्वम्, तस्माद्धेतोः प्राणात्मनोः आत्मप्रजापशूनां चान्येन व्यवधानपरिहारार्थं पुरोरुक्सूक्तमध्ये आहावं न कुर्यात्। किंतु पुरोरुचा संधायैव सूक्तं पठेत्। तर्हि सूक्तादनन्तरं पुरोरुचः प्रागप्याहावो न कर्तव्य एवेति? नेत्याह—संशस्येति। पुरोरुचा सह सूक्तमाहावं विनैव संधाय पठित्वा पुरोरुगर्थं सर्वत्राहावः कर्तव्य एव। सूत्र्यते हि—'तासां पुरस्तादाहावः'[b] इति। तद्यथा—प्रथममाहावं कृत्वा 'वायुरग्रेगा'[c] इत्यादिकां वायव्यां पुरोरुचं पठित्वा ततो 'वायवा याहि'[d] इत्येतं तृचं पठेत्। पुनराहूय 'हिरण्यवर्तनी'[e] इत्यादिकामैन्द्रवायवीं पठित्वा 'इन्द्रवायू इमे सुता'[f] इत्यैन्द्रवायवं तृचं पठेत्। एवमुत्तरास्वपि द्रष्टव्यम्। प्रथमौ पुरोरुक्तृचौ प्राणापानात्मत्वेन स्तौति—वायुरग्रेगा इति। पूर्वापरभावेनावस्थितत्वादनयोः प्राणापानरूपत्वम्॥

इति पञ्चमः खण्डः

अथैतदेव प्रउगशस्त्रं सवनत्रयप्राप्तिहेतुत्वेन स्तौति—**गायत्रम्-आप्तम्**। 6.१-६
'वायवा याहि'[d]इत्यादेः माधुच्छन्दसस्य प्रउगस्य आदौ गायत्रम्। 'गायत्रं प्राग्धैरण्यस्तूपाद्'[g] इत्यनुक्रमण्याम् उक्तत्वाद् गायत्रीछन्दस्कत्वम्। तेन प्रातःसवनं

a. ŚŚ. 7. 10. 3.
b. ŚŚ. 7. 10. 4.
c. VS. 27. 31.
d. RV. 1. 2. 1.
e. VS. 20. 74.
f. RV. 1. 2. 4.
g. SA. 12. 14.

प्राप्तं भवति । प्रातःसवनस्य गायत्रत्वाच्छन्दोद्वारा तत्प्राप्तिः । ऐन्द्रतृचशंसनेन माध्यंदिनसवनप्राप्तिः । तस्यैन्द्रत्वात् । अत्र[1] देवताद्वारा तत्प्राप्तिः । वैश्वदेवतृचशंसनेन तृतीयसवनप्राप्तिः । तस्य वैश्वदेवत्वात् । अत्रापि देवताद्वारा
6.७-१२ तत्प्राप्तिः । वैश्वदेव्यां पुरोरुचि विशेषं विधित्सुराह—**अथ–इति** । सा वैश्वदेवी पुरोरुक् षट्पदा षड्भिः पदैरन्विता भवति । तां तथाविधां षट्पदां तां वैश्वदेवीं पुरोरुचमभिज्ञा ऋतव इत्येवं कथयन्ति । यस्मादृतवो वसन्ताद्याः षट्संख्यान्विताः । इयमपि षट्पदत्वेन षट्संख्यान्विता भवति । तस्मात् तामृतव इत्युक्तवन्तः । तस्या एतस्याः शंसने कंचिद् विशेषं विधत्ते—तस्या इति । षष्ठ्यर्थे चतुर्थी । द्वे द्वे द्वौ द्वौ पादौ । अवग्राहम् अवगृह्यावगृह्य । अवग्रहो विच्छेदः । सूत्र्यते हि—'तस्यां द्वाभ्यां द्वाभ्यामवसाय प्रणौति'[a] इति । यस्माद् द्वाभ्यां द्वाभ्यां पदाभ्यामवसानं द्वाभ्यां प्रणव इत्येवं शंसनं भवति, तस्माद्धेतोः ऋतवः समस्ताः सन्तो द्वन्द्वमाख्यायन्ते । द्वौ द्वावृतू एकीकृत्य ग्रीष्मो वर्षा हेमन्त इति त्रय एव लोकैरभिधीयन्ते । वसन्तं ग्रीष्मं चैकीकृत्य ग्रीष्म इति, सौर्यरश्मिप्रसरणसाधारण्यात् । वर्षाः शरदं चैकीकृत्य वर्षा इति, वृष्टिसंबन्धसाम्यात् । हेमन्तशिशिरौ समस्य हेमन्त इति व्यपदिश्यते, शैत्ययोगसाम्यात् । सारस्वतीं
6.१३-१७ पुरोरुचमधिकृत्य शाखान्तरिणां मतं दर्शयति—**अत्र–वाक्** । प्रउगशस्त्रं सप्तम्यन्तशब्देन[2] परामृश्यते । स्वाभिमतं पक्षं दर्शयति—न तथा कुर्यादिति । कुत इत्यत्र हेतुः अतिरिक्तं तदिति । तच्छंसनमतिरिक्तम् अधिकं पुनरुक्तप्रायं भवति । कुत इत्यत उक्तं रुचिता वै वागिति । तदेव स्पष्टयति—स्वयं पुरोरुग्वै वागिति।
6.१८-२५ अथैतच्छस्त्रवृत्त्यृक्संख्यां संपाद्य स्तौति—**वायवा–अध्यूहति** । अत्रानुक्रमणी—'वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाः । आश्विना द्वादश'[b] इति । 'वायवा याहि'[c] इति सूक्तं नवर्चं भवति । 'अग्नि नव'[d] इत्यत्र नवसंख्याया वायो इत्यत्राप्यनुवर्तनात् । 'सूक्तसंख्यानुवर्तत आन्यस्याः सूक्तसंख्यायाः'[e] इति परिभाषायामु-

a. ŚŚ. 7. 10. 7.
b. SA I. 2-3.
c. RV. 1. 2.
d. SA. I. 1.
e. SA. 12. 1.

1. M. V. तत्र
2. T. सप्तम्यन्तं तच्छब्देन

क्तत्वात् । नवसंख्यानां द्वादशसंख्यानां चर्चां मेलने सत्येकविंशतिसंख्या ऋचो भवन्ति । एकविंश इत्यादिः संख्यास्तुत्यर्थवादो गतः ॥

इति षष्ठः खण्डः

वायव्यादितृचसंख्यां स्तौति—**तानि–आप्त्यै** । गतमेतत् । विधान्तरेण 7.१-३
तामेव संख्यां स्तौति—**अथो–वृङ्क्ते** । अपि च एतैः सप्तभिस्तृचैः पुरा देवा 7.४,५
असुराणां संबन्धीनि सप्तसंख्यानि सप्तपरिमाणानि रत्नजातानि स्वीकृतवन्तः । तथैवायं यजमानोऽप्येतैः सप्तभिस्तृचैः शस्त्रसंबन्धीनि सप्त साप्तानि वृङ्क्ते ।
प्रउगनामनिर्वचनमुखेनापि प्रउगशस्त्रं स्तौति—**अग्नेर्–भवन्ति** । अग्रे 7.६-१६
पूर्वस्मिन् काले पर्याये प्रातःसवनमग्नेरेव स्वभूतमासीत् । तथा माध्यंदिनं सवनमिन्द्रस्यैव स्वभूतमासीत् । एवं तृतीयसवनं विश्वेषां देवानामेव स्वभूतमासीत् । अत एव हि 'आग्नेयं प्रातःसवनम्'[a] 'ऐन्द्रं माध्यंदिनं सवनम्'[b] 'वैश्वदेवं तृतीयसवनम्'[c] इति श्रुतिषूद्घोषणा । एवं स्थिते सति **स** प्रातःसवनमात्राधिपतिरग्निरित्थमकामयत कामनां कृतवान् । कथमिति चेत् । अहं खलु प्रातःसवनस्यैवाधिपतिरस्मि न मम माध्यंदिनसवने तृतीयसवने वा संबन्धोऽस्ति । तदिदमवमतिपदमेव । अपर्याप्तं च परिमितवृत्तित्वात् । तस्मान्माध्यंदिने तृतीयसवने च मम संबन्धो भूयाद् इत्येवं कामनामकरोत् । एवमिन्द्रोऽकामयतेत्यादिषु योज्यम् । इत्थं कामनायामुत्पन्नायां सत्यां तास्तृतीयसवनभाजो देवता अमुतोऽर्वाच्य इतोमुखं गच्छन्त्यः सत्यः तृतीयसवनमपादानीकृत्य प्रातःसवनमभिगम्य प्रयुक्ता अन्योन्यं संप्रयुक्ता बभूवुः । यस्मादेवं देवतानाम् अस्मिन् शस्त्रे प्रयोगस्तस्मादेव प्रवृत्तिनिमित्तात् प्रउगशब्दवाच्यत्वं संपन्नम् । प्रयुक्ताः संयुक्ता अस्मिन् देवता इति । यस्मात् कारणात् भिन्नदेशवर्तिनीनां बह्वीनां देवतानामिहैकत्र संघातः पुरा कस्मिंश्च कालेऽभूत् तस्मादिदानीमप्यत्र प्रउगशस्त्रे बह्वृचो वाय्वाद्या देवताः शंसनीया भवन्ति । नैकैव

a. ŚB. 2. 4. 4. 12; JUB. 1. 12. 3. 2.
b. ŚB. 2. 4. 4. 12; JUB. 1. 12. 3.3.
c. ŚB. 2. 4. 4. 13; JUB. 1. 12. 3. 4.

देवता, यथाग्निराज्यशस्त्रे। यस्मादुक्तप्रकारेण देवतानाम् अन्योन्यस्थानसंक्रमकामनापुरस्सरः प्राङ्निर्वृत्तः तस्माद्धेतोः सर्वाणि सवनानि सर्वदेवत्यानि जातानि। प्रसंगात् किञ्चिदुक्त्वा शस्त्रशंसनानन्तरपठनीयां याज्यां विधत्ते—
7.२०-२३ **विश्वेभिः—वषट्करवत्**। आभिरूप्यसूचनार्थं वैश्वदेव्येति। तथापि किमित्याभिरूप्यमित्यत्रोक्तं वैश्वदेवं हीति। इतोऽप्याभिरूप्यमस्तीति सूचयन्नाह—गायत्र्येति। यजतीति शेषः। अनुवषट्कारं विधत्ते—अग्निरिति। अनुवषट्कारं च कुर्यादित्यर्थः। अभ्यासोऽध्यायसमाप्तिसूचनार्थः॥

इति सप्तमः खण्डः

वेदार्थगोचरनिबन्धनिबन्धनेन दोषानुबन्धरहितेन निबन्धनेन।
यत् पुण्यमप्रतिममार्जितमर्पितं तत् कृत्स्नं परस्य पुरुषस्य पदारविन्दे॥

इत्याश्रितनिजाङ्घ्रिपङ्कजजनमन्मोहाम्बुधेः श्रीनिधे-
राचार्यस्य वटद्रुमूलवसतेरीशस्य चानुग्रहात्।
आज्यं च प्रउगं च शस्त्रमुभयं कौषीतकिब्राह्मण-
व्याख्याने विदधच्चतुर्थ इहाध्यायः प्रतिष्ठां गतः॥

**इति कौषीतकिब्राह्मणव्याख्याने**
**द्वितीयदशके चतुर्थोऽध्यायः**